॥ श्रीः ॥

॥ न्यायसिद्धान्तमञ्जरी ॥

भट्टाचार्य चूडामणि जानकीनाथ विरचिता
पण्डितवरनीलकण्ठदीक्षितप्रणीतबृ-
हत्तर्कप्रकाशाभिधया व्याख्यया
समेता ॥

काशीस्थसुप्रसिद्धब्रह्मामृतवर्षिणीसभासम्पा-
दकपण्डितवरश्रीराममिश्रशास्त्रिणामन्ते-
वासिना नैयायिकेन श्रीगौरीनाथ-
शास्त्रिणा परिशोधिता ॥

श्रीकाश्यां रामापुराख्यामर यन्त्रालये
श्रीमदम्बिकाचरणचट्टोपाध्यायेन
मुद्रिता ॥

संवत् १९४१

(श्रीः)

भूमिका ।

अथ दुःखवारिधिनिमग्नं कृत्स्नमेव जगदवेक्षमाणः कारुणिको भगवान् गोतमः पञ्चाध्यात्मकमान्वीक्षिकीशास्त्रमुपनिबबन्ध यदुद्दिश्यतीर्थकाराः "प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम् । आश्रयः सर्वधर्म्माणां विद्योद्देशेप्रकीर्तिता ॥" एवमाचक्षते तदिदमतिप्राचीनं न्यायशास्त्रं शिष्यप्रशिष्याचार्यपरम्परया बहुधा विवर्द्धितं भाष्यवार्त्तिकटीकातद्व्याख्यानादिरूपेण वात्स्यायनोद्द्योतकरादिभिः परमर्षिकुलप्रसूतै राधुनिकैश्च वाचस्पतिमिश्रप्रमुखैः, चिन्तामणिकृतो गङ्गेशोपाध्यायात्पूर्वं वैशेषिकशास्त्रात्पृथग्विभक्तमपीदं चिन्तामण्यादिकालमारभ्याविभक्तोपन्यासम् एकैकग्रन्थोपन्यस्तोभयरहस्यं सहस्रधारमभवत् । अधुनातु रघुनाथशिरोमणिप्रणीतदीधितिव्याख्यानै रतिगहनैः सुविस्तरैः सुसूक्ष्मधियामप्यगोचरतां गतं, साधारणधिषणानां तु भीषणतामुपयातमनतिप्रयोजनकमिवाभासीदित्यालोच्य अनतिप्रौढधियामप्युपचिकीर्षया श्रीजानकीनाथशर्म्माभिर्न्यायसिद्धान्तमञ्जरीनाम्नायं प्रारभ्यि, सुलभपदार्थावगतिर्ग्रन्थः, अयं च ग्रन्थकारो गङ्गेशोपाध्यायाच्चिन्तामणिकृत उत्तरकालसमुद्भवो, मञ्जर्यां तत्र तत्र मण्डुपण्डितदर्शनात् । अयं ग्रन्थकारो बङ्गदेशीयोऽथ मैथिलइति नावधारकं हेतुमुपलभामहे अत एवतु दुर्निश्चयेऽमुष्मिन्नर्थे संशेरते प्रायः सर्वे । परमस्मदाचार्या अशेषदर्शनाचार्या बहुश्रुताः श्री ६ राममिश्रशास्त्रिणोऽमुं जानकीनाथभट्टाचार्यमसूत्र लेखप्रणाल्या बङ्गदेशीयमाचक्षते । भवेदसौ वाङ्गोथवा मैथिलः परमुत्कृष्टमतिरयमनतिकठिनया रीत्या सुकठिनानर्थांस्तथाभ्यधाद्, यथासाधारणमतिरप्यवगत्यामुं ग्रन्थं ग्रन्थीयादपि परं ग्रन्थं, आचक्षीत चान्यदपि शास्त्रमितीमामुपयोगितामालोच्य चिरं मुद्रयितुं प्रायतिषि अस्मिंस्तु स्वसरे सर्वशास्त्रप्रकाशनकृतोत्साहेन श्रीमतास्मन्निवेणाम्बिकाचरणचट्टोपाध्येनाभ्यर्थितः सोत्साहं प्रवृत्तोस्मि मञ्जरीमुद्रणे परमियं " मञ्जरी " तर्कप्रकाशाख्यां व्याख्यामपेक्षते इति तयैव सङ्गलितैषा प्रकाश्यते, प्रकाशकारश्चायं महाराष्ट्रकुलोद्भवो वाराणसेयो दशाश्वमेधप्रान्तान्तर्गतागस्त्यकुण्डवीथीनिवास्तव्य इति जनश्रुतिः । अत्र ग्रन्थे सौसकाक्षरयोजक प्रमादजाः सुलभाश्शुद्धय इति न ताभिरहं गर्हणीय इति साञ्जलिबन्धमभ्यर्थये तत्र भवतोविदुषः ॥

काशीस्थ राजकीय संस्कृत प्रधानपाठशालायां समुपार्जितन्यायाद्यनेकविद्यः सुपसिद्ध ब्रह्मामृत वर्षिणोसभासभ्यः पाठकोपनामा ।

मिति आश्विन कृष्ण २ भानुवासरे संवत् १९४१ } गौरीनाथशास्त्री

अथ बृहत्तर्कप्रकाशः ।

॥ श्रीगणेशायनमः ॥

प्रणम्य परमात्मानं जानकीनाथधर्मणा ॥
क्रियते युक्तिसुक्ताभिर्न्यायसिद्धान्तमञ्जरी ॥ १ ॥

श्रीगणेशायनमः । सन्ध्यायाः प्रणतिक्षणे गिरिजया सेर्ष्यं समालोकिते रोषं मानिनि मा कृथास्त्वदपरा नान्यास्ति कन्या मम ॥ किन्तु त्वामहमानमामि सततं ध्यात्वा तवैवाकृतौरित्थं हर्षितशैलराजतनया दृष्टः शिवः पातु नः ॥१॥ सिद्धान्तगूढवर्त्मैकभावनापरिशीलिता ॥ श्रीकण्ठनिर्मिता सेयं कृतिरातनुतां मुदम् ॥ २ ॥ सत्येकस्मिन्नपि बाधके साधकसहस्रस्याप्यकिञ्चित्करत्वेन प्रतिबन्धकाभावस्यावश्यमपेक्षिततया प्रकृतग्रन्थसमाप्तिप्रतिबन्धकदुरितरूपविघ्नविघाताय कृतं भगवत्स्मरणात्मकं मङ्गलं शिष्यशिक्षार्थमादौ निबध्नाति । प्रणम्येति । मङ्गलस्य समाप्तिप्रतिविघ्नध्वंसद्वारा हेतुत्वमिति सिद्धान्तस्थितिः तच्चानन्यथासिद्धनियतपूर्ववृत्तित्वरूपकारणत्वघटकानन्यथासिद्धत्वांशग्रहे व्यापकत्वरूपनियमांशग्रहे वा *स्वस्वव्याप्येतरान्वयेषकारणसत्त्वे यत्सत्त्वे ऽवश्यं यत्सत्त्वं यदभावेऽवश्यं यदभाव इति नियमघटितयो र्भिन्नयतान्वयव्यतिरेकयोः कारणत्वे मानाभावेप्यन्वयव्यतिरेकाभ्यां विशिष्टतद्रूपकारणत्वग्रहेऽतिरिक्तकारणत्वग्रहे वा तयोर्हेतुतया तत्सहकृतप्रत्यक्षप्रमाणगम्यत्वस्य यद्यपि नात्र सम्भवः मङ्गलसत्त्वेपि समाप्त्यसत्त्वान्मङ्गलाभावेपि ममाप्तेरित्यन्वयव्यतिरेकव्यभिचारात् तथापि मङ्गलस्य समाप्तिफलकत्वे लाघवमिति लाघवज्ञानसहकृतं शिष्टाचारविषयत्वहेतुकं सफलत्वानुमा-

---

* अनन्यथासिद्धनियतपूर्ववृत्तित्वरूपकारणत्वघटकैकैकदलविषयकयहहेतुत्वं नोक्तनियतान्वयव्यतिरेकयहयोरन्वययहमात्रस्यैवानन्यथासिद्धयाहकत्वेन व्यतिरेकयहस्य तदयाहकत्वात् एवमन्वययहोनियमांशयहे नोपयुज्यत इति नैकैकदलविषयकयहहेतुत्वमुभयस्मिन्निति विशिष्टकारणत्वयहोपयोगित्वमेवविशिष्टे इत्यभिसन्धिः ॥

नमेषान्न मानं जन्मान्तरीयमङ्गलसन्देहेन व्यतिरेकव्यभिचारसंशयेपि †"ग्राह्य संशयस्यानुमित्याप्रतिबन्धकतया" समाप्तिकारणत्वेऽनुमिते समाप्तिरूपकार्येण जन्मान्तरीयमङ्गलानुमानान्न व्यतिरेकव्यभिचारः। मङ्गले सति समाप्त्यभावस्य तत्तन्मङ्गलानाश्यविघ्नसत्त्वादन्तरीयत्पन्नविघ्नसत्त्वादेति नान्वयव्यभिचारोपि अत एव तच्छङ्कया मध्येपि मङ्गलमाचरन्ति एवञ्चाशुविनाशिनः कालान्तर भाविफलजनकत्वं व्यापारं विनाऽनुपपन्नमिति विघ्नध्वंसद्वारा मङ्गलं हेतुरिति सम्प्रदायः ।

अन्यस्तु मङ्गलं विनापि नास्तिकयत्यसमाप्तेर्न तच्च तद्धेतुः नच चरमवर्णरूपायाश्चरमवर्णध्वंसरूपाया वा समाप्तेराकाङ्क्षानिष्ठतयाऽत्यन्तनिष्ठमङ्गलस्य तज्जन्यविघ्नध्वंसस्य वा व्यधिकरणतया कारणत्वासम्भवेन स्वप्रतियोगिचरमवर्णानुकूलज्ञातित्वसम्बन्धेन चरमवर्णध्वंसरूपसमाप्तिं प्रति आश्रयतासम्बन्धेनात्मनिष्ठप्रत्यासत्त्या मङ्गले हेतुत्वस्यावश्यं वक्तव्यतया जन्मान्तरीयमङ्गलानुमानान्न व्यभिचार इति वाच्यम् जन्मान्तरीयसमाप्तिमुद्दिश्य शिष्टैस्तदनाचरणात् प्रारिप्सितसमाप्तेरेव तत्फलत्वकारीरीवत् न तु जन्मान्तरीयसमाप्तेरपि, पुत्रेष्टिस्थले तु पुत्रमात्रफलकत्वश्रवणादैहिकामुष्मिकसाधारणफलकत्वम् तस्मादात्मनिष्ठप्रत्यासत्त्या कारणत्वे जन्मान्तरीयसमाप्तिमुद्दिश्यापि मङ्गलकरणापत्तेः स्वप्रतियोगिचरमवर्णावच्छेदकतासम्बन्धेन चरमवर्णध्वंसरूपसमाप्तिं प्रति स्वोत्पत्तावच्छेदकजातीयतासम्बन्धेन शरीरनिष्ठप्रत्यासत्त्या तत्कारणत्वस्यावश्यं वाच्यतया नास्तिकशरीरे अवच्छेदकतया मङ्गलस्य तज्जन्यविघ्नध्वंसस्य चाभावेन व्यतिरेकव्यभिचारान्न कारणत्वसम्भवः नन्वु विघ्नस्थलीयसमाप्तित्वमेव तज्जन्यतावच्छेदकं तच्च न व्यभिचारः विघ्नस्थलीयत्वं च विघ्नवज्जातीयशरीरकर्तृकत्वं मङ्गलजन्यविघ्नध्वंसविशिष्टत्वं वा विशिष्टत्वं च स्वावच्छेदकावच्छिन्नप्रतियोगिकत्वस्वाव्यवहितोत्तरक्षणोत्पत्तिकत्वोभयसम्बन्धेन जन्मान्तरीयमङ्गलजन्यविघ्नध्वंसस्य च स्वावच्छेदकावच्छिन्नप्रतियोगिकत्वस्वाव्यवहितोत्तरक्षणोत्पत्तिकत्वोभयसम्बन्धेन नास्तिकसमाप्तावभावेन तस्याः कार्यतावच्छेदकाक्रान्तत्वादिति चेन्न ग्रथनेसमाप्त्यव्यवहितपूर्वक्षणे विघ्नासत्त्वेन तस्य विशेषणत्वासंभवात् उपलक्षणत्वेतु प्रसक्तानुष्ठितसमाप्तेरप्युत्पत्त्यसमानविघ्नवज्जातीयशरीरकर्तृकतया

† तद्विषयकप्रत्यक्षनिश्चयत्वावच्छिन्नमत्वेव साध्यसंशयस्यप्रतिबन्धकत्वं नत्वनुमितित्वाद्यवच्छिन्नमतीत्यभिप्रायेण ॥

व्यभिचारस्य दुर्वारत्वात् अन्यविधस्यच विघ्नवज्जातीयशरीरनिष्ठक्लेशजन्य त्वरूपस्य तत्कर्तृकत्वस्य दुर्वचत्वात् द्वितीये तु समाप्यव्यवहितपूर्वक्षणं तत्तद्व्यक्तित्वेन निवेश्यैवान्यव्यवहितोत्तरत्वस्य वक्तव्यतयाऽननुगमात्, कारणस्य कार्यतावच्छेदकत्वानुपगमाच्च अन्यथा काम्यौमरणस्यापि स्वविशिष्टमुक्तिं प्रति हेतुत्वस्य सुवचतया "काम्यौमरणान्मुक्तिरिति" श्रुतेर्हेतुत्वपरतयैवोपपत्तौ प्रयोजकत्वपरतयोपवर्णनस्यासङ्गत्यापत्तेः । "नान्यमेव विदित्वेति" श्रुत्या तत्त्वज्ञानस्यैव मुक्तिसामान्यहेतुत्वप्रतिपादनेन तस्य साक्षात्कारणत्वासम्भवात् श्रुतेः प्रयोजकत्वपरत्वमेवेति वाच्यम् । तावतापि तत्त्वज्ञान द्वारा हेतुत्वस्यादुष्टत्वाद् विघ्नध्वंसद्वारा समाप्तौ मङ्गलस्यैव । नन्व स्वजन्यतत्त्वज्ञानविशिष्टमुक्तिं प्रति काम्यौमरणस्य हेतुत्वेऽन्यम्रतीत्याद्यन्यथासिद्ध्या न तन्मुक्तिहेतुरिति वाच्यम् स्वजन्यविघ्नध्वंसविशिष्टसमाप्तिम्प्रति मङ्गलस्य हेतुत्वेऽपि तस्याः दुर्वारत्वात् तस्मादन्यथासिद्धतया मङ्गलं न समाप्तिहेतुः एतेन काम्यौमरणविशिष्टमुक्तौ काम्यौमरणस्य हेतुत्वे दृष्टापत्तिः तत्त्वज्ञानमद्वारीकृत्य न तद्धेतुरिति सूचनायैव षष्ठम्याः प्रयोजकत्वपरत्वमितिनिरस्तम् । तथापि तदत्वसमाप्तिहेतुतावोधकप्रत्यक्षश्रुत्यभावेनोक्तदिशामङ्गलेऽन्यथासिद्धेर्दुर्वारत्वादिति नन्व निर्विघ्नं परिसमाप्यतामिति कामनया तदाचारात्समाप्तेरेव तत्फलत्वसिद्धिरिति वाच्यम् "नागृहीतविशेषणन्यायेन" विघ्नध्वंसकामनाया आवश्यकत्वात्तस्यैव तत्फलत्वात् नहि यदुद्दिश्य यत्क्रियते तच्च तद्धेतुः चैत्रस्य नक्तनादेरपि स्वर्गफलकत्वापत्तेः तज्जनकीभूतज्ञानस्य भ्रमतया न तथेति चेत् अत्रापि समाप्तिजनकत्वज्ञानस्य भ्रमत्वसमादाय विवादसम्भवात् पाकप्रवृत्तिकाले तृप्तिकामनायादुभयत्रेष्टसाधनताज्ञानेन समाप्तिकामनाया अप्युपपत्तेरिति न किञ्चिदेतत् अत एव नास्तिकसमाप्तिप्रतियोगिव्यावृत्तं वैजात्यं चरमवर्णे स्वीकृत्य विजातीयचरमवर्णध्वंसरूपसमाप्तिं प्रति मङ्गलं हेतुरिति निरस्तम् । पुरुषविशेषजन्यतावच्छेदकजातिव्याप्यानन्तजातिकल्पनेप्रमाणाभावात् अन्यच्च कृत्स्नेत्याद्यन्यथासिद्धिसत्त्वाच्च । तस्माद्विघ्नध्वंस एव मङ्गलस्य फलं समाप्तिस्त्वन्यच्च कृत्स्नसामान्यसामग्रीत एवोपपद्यत इति प्राहुरिति कृतं पल्लवितेन ।

अथ मत्त उत्कृष्टः अहमस्मादपकृष्ट इति ज्ञानविशेष एव नमस्कारपदवाच्यः तत्कुतोलभ्यते इत्यतआह । परमात्मानमिति । परमत्वंच नित्यज्ञानादिमत्त्वेन सर्वोत्तकृष्टत्वं तथाच समानसम्बित्समवेद्यतया

सर्वस्मिंस्तदपेक्षया ऽपकृष्टत्वे ज्ञाते सर्वान्तः पातिनि स्वस्मिन्नप्यपकृष्टत्वज्ञानाभिमस्कारनिर्वाह इतिभावः नत्वेवं परममहत्परिमाणवत्त्वं परमत्वं तादृशपरिमाणविशिष्टात्मत्वस्य स्वापेक्षयाऽपकृष्टेपि सत्त्वेन नमस्कार्यतावच्छेदकत्वाभावात् यद्यपि नित्यस्य स्वरूपयोग्यत्वे फलावश्यम्भावइति नियमेन सुखसमवायिकारणतावच्छेदकतया सिद्धस्यात्मत्वस्येश्वरेस्वीकारे सुखोत्पत्त्यापत्तिः तादृशनियमाभावेपि चात्यन्ताजनकव्यावृत्तरूपेणैव कारणतायान्याय्यत्वादीश्वरे आत्मत्वजातिसत्त्वे प्रमाणाभावः तथापि आत्मपदशक्यतावच्छेदकतयापि आत्मत्वजातिस्तत्सधारणी सिध्यति कार्यतावच्छेदकतया कारणतावच्छेदकतया च जातिसिद्धिवदसति बाधके शक्यतावच्छेदकतयापि जातिसिद्धेरदुष्टत्वात् असति बाधक इति विशेषणाच्च नाभावपदशक्यतावच्छेदकतयाऽभावत्वादिजातिसिद्धिः जन्यभावत्वावच्छिन्नकारणतानिरूपितकार्यतावच्छेदकतया ध्वंसत्वादेरपिजातित्वापत्तेा तद्विशेषणस्य भवतोप्यावश्यकत्वादित्तेाद्दु स्वश्चित्यम् तथा सति विभुपदशक्यतावच्छेदकतया विभुत्वमपि जातिः सिद्धेत् नचेष्टापत्तिः एवंविधानेकजातिकल्पने प्रमाणाभावादिति कारणतावच्छेदकतया कार्यतावच्छेदकतया च जातिसिद्धिरित्तेावाङ्गीकरणीयम् एवं च सुखसमवायिकारणतावच्छेदकात्मत्वजातेरीश्वरसाधारणे मानाभाव एव वस्तुतस्तु नहि शक्यतावच्छेदकतयाजातिसिद्धिरिति ब्रूमो येनोक्तानुपपत्तिरुद्भाव्येत अपि तु सुखसमवायिकारणतावच्छेदकत्वेन जीवात्मनि सिद्धस्यात्मत्वस्य श्रौतात्मव्यवहारबलेन तत्सम्बन्धमात्रमीश्वरे कल्प्यते नित्तास्थेत्यादिनियमस्य चाप्रयोजकत्वात् अदृष्टरूपसहकार्यन्तराभावादेव कार्याभावस्योपपन्नत्वात् अत्यन्ताजनकव्यावृत्तरूपेणैव कारणताकल्पनं च प्रमाणशून्यत्वप्रयुक्तं प्रकृते च श्रौतात्मव्यवहारस्यैव प्रमाणत्वेनान्यन्ताजनकसाधारणरूपेणापि कारणत्वकल्पनेचतिविरहात् नन्व सुखसमवायिकारणतावच्छेदकं द्रव्यत्वमेवातिप्रसक्तत्वेपि आत्मत्वस्येवावच्छेदकत्वे बाधकाभावादिति चेन्न कारणत्वानतिप्रसक्तस्यैव कारणतावच्छेदकतया गगनादिषु कारणत्वसम्बन्धकल्पनेगौरवात् अन्यथासत्त्वे नापिहेतुत्वापत्तेः संभवति व्याप्यधर्मे कारणतावच्छेदके व्यापकधर्मेणास्यान्यथासिद्धावप्यतिप्रसक्तेरेवबीजत्वात् तस्यासु द्रव्यत्वेपि तुल्यत्वात् आत्मत्वे तथात्वेपि श्रौतात्मव्यवहारबलादीश्वरेपि कारणत्वसम्भ-

इह खलु निखिललोकविमोक्षमुख्योपायं

स्यस्य कल्पनीयतया अतिप्रसक्तेरभावात् इत्थं चात्मपदप्रवृत्तावच्छेदकत्वमपि तस्यैवेतिसारम् ।

ननूक्तानु नष्टएव पूर्वदेशसंयोगेउत्तरदेशसंयोगोत्पत्त्या उत्तरदेशसंयोगे पूर्वदेशसंयोगः प्रतिबन्धको वाच्यस्तत्र नतावत्पूर्वदेशत्वं उत्तरदेशभिन्नत्वम् उत्तरदेशभिन्नजतुरूपपूर्वदेशसंयुक्तस्यैवेषोरुत्तरदेशसंयोगात् किन्त्वात्मत्वं तत् तथात्वात्मसंयोगत्वेन उत्तरदेशसंयोगे प्रतिबन्धकतेत्तायातम् एवंच प्रतिबन्धकतावच्छेदककोटिप्रविष्टत्वेनात्मत्वजातिसिद्धिः । विनिगमनाविरहेण तस्या ईश्वरसाधारण्यमपि मास्वेकस्मिन्नीश्वरे एव सा जातिरास्तां नत्वनन्तेषु जीवात्मस्विति वाच्यम् एकव्यक्तिकत्वेन तस्याजातित्वासंभवात् तादृशधर्मस्वीकारेपि प्रत्येकं जीवमादाय विनिगमनाविरहतादवस्थ्यात् आत्मनिरूपितत्वविशिष्टसंयोगत्वे न प्रतिबन्धकत्वे आत्मनिरूपितत्वसंयोगत्वयोर्विशेष्यविशेषणभावे विनिगमनाविरहेण विजातीयसंयोगत्वेनैव तत्प्रतिबन्धकत्वं स्यात् तथाच तत्प्रतिबन्धकतावच्छेदकोप्रविष्टत्वान्नात्मत्वजातिसिद्धिरिति वाच्यम् विजातीयसंयोगसम्बन्धेनात्मनोपि विनिगमनाविरहेण तत्प्रतिबन्धकत्वस्य दुर्वारत्वात् नचैवं तज्जातेरीश्वरइव गगनादिष्वपि सत्त्वप्रसङ्ग इति वाच्यम् गगनादीनामीश्वरानतिरिक्तत्वेन तत्साधारण्येपि क्षतिविरहादिति पुनर्नैर्व्यलीकः पन्थाइति प्राहुः ।

प्रणम्येतिक्त्वान्तपदस्य क्रियत इत्यनेनान्वयः नमस्कारसिद्धे र्नमःपदेनैव सम्भवेपि प्रणामस्य कर्त्तव्यापेक्षया पूर्वभावे दर्शिते शिष्याअप्येवं कुर्वन्तिति शिष्यशिक्षार्थमेव क्त्वान्तेन तन्निर्देशः अत्र प्रशब्देन भक्तिश्रद्धातिशयोद्योत्यते युक्तिमुक्ताभिरित्यनेन युक्तीनां मुक्तासादृश्यप्रदर्शनेन निर्दोषत्वं मञ्जरीपदेनच स्वीयवाक्यावलीकोमलत्वं सूचितम् ॥ १ ॥

प्रवृत्तिसामान्यं प्रति इष्टसाधनताज्ञानस्य हेतुत्वात्प्रयोजकज्ञानं विना कथमेतद् ग्रन्थे प्रवर्त्ततामित्यत आह 'इहेति' मननोपायमात्मनस्तत्त्वज्ञानं निखिललोकविमोक्षमुख्योपायमामनन्तीति योजना तत्त्वं सकलपुरुषकामनाविषयीभूतापवर्गजनकतत्त्वज्ञानप्रयोजकतया एतद्ग्रन्थे न प्रवृत्त्यनुपपत्तिरिति भावः मोक्षमुख्योपायत्वं च मुक्त्यभावप्रयोजकीभूताभावप्रतियो-

गित्वम् ॥ [illegible]काश्मीरमरणादितोपि श्रवणाद्यधिकारिस्त्रीशूद्रादिलोकस्य मुक्तिसम्भवेन मननोपायकतत्त्वज्ञानाभावस्य तदभावे प्रयोजकत्वाभावाल्लोकपदं श्रवणाधिकारिलोकपरतया व्याख्येयं तत्रापि श्रवणाधिकारिलोकमुक्त्यभावे तत्त्वज्ञानाभावस्य प्रयोजकत्वलब्धया नोक्तदोष इति व्याचक्षते । तदसत्, श्रवणाधिकारिब्रह्मणादीनामपि काश्मीरमरणादितो मुक्तिसम्भवेन तथाविवक्षितेप्यनुपपत्तेर्जागरूकत्वात् तस्मात्तत्त्वज्ञाने मोक्षमुख्योपायत्वं स्वाव्यवहितोत्तरक्षणोत्पत्तिकमुक्त्यभावप्रयोजकीभूताभावप्रतियोगित्वमेव वक्तव्यम् तत्र च नोक्तानुपपत्तिः तथाच लोकपदं यथाश्रुतमेव अत एव काश्मीरमरणजन्यमुक्तेर्मननोपायकतत्त्वज्ञानाजन्यत्वाद् 'विमोचेत्तस्य' काश्मीरमरणाद्यप्रयोज्यमोक्षदृत्यर्थं इति निपुणतरमूहनीयम् अत्र स्वसमानाधिकरणदुःखप्रागभावासमानकालीनदुःखध्वंसत्वं मुक्तित्वं दुःख ध्वंसस्येदानीमपि सत्त्वेनास्मदादीनामपि मुक्तत्वापत्तिवारणाय कालीनान्तम् मुक्त्यात्मकदुःखध्वंसस्यान्यदीयदुःखप्रागभावसमानकालीनत्वाद्ब्रह्मदेवादीनां मुक्तात्मनामप्यमुक्तत्वप्रसङ्गात् स्वसमानाधिकरणत्वं प्रागभावविशेषणम् नच दुःखासमानकालीनत्वे नैव सामञ्जस्यात्प्रागभावेति व्यर्थमिति वाच्यम् यथासन्निवेशे वैयर्थ्याभावात् तथाप्यनतिप्रयोजनकत्वेन स्वसमानाधिकरणदुःखासमानकालीनदुःखध्वंसत्वमेव मुक्तित्वमित्यास्तां तल्लक्षणम् नन्वेवं स्वसमानाधिकरणदुःखासमानकालीनदुःखध्वंसत्वस्य मुक्तित्वरूपत्वे तस्य तत्त्वज्ञानजन्यतावच्छेदकत्वानुपपत्तिः स्वपदस्य दुःखध्वंससामान्यपरत्वे पुरुषान्तरीयदुःखध्वंससमानाधिकरणदुःखासमानकालीनदुःखध्वंसस्येदानीमप्रसिद्ध्यापत्तेः स्वपदस्य तत्तद्दुःखध्वंसपरत्वे च सामान्यतः मुक्तित्वस्यैकस्याभावेन मुक्तित्वावच्छिन्नं प्रति तत्त्वज्ञानत्वेन हेतुतायां असम्भवदुक्तिकत्वापत्तेरिति चेन्न स्वसामानाधिकरण्यकालिकविशेषणतोभयसम्बन्धेन दुःखवान्यस्तद्भिन्नदुःखध्वंसत्वस्यैव मुक्तित्वरूपत्वात् अत्र च स्वत्वस्य परिचायकतया नोक्तविकल्पावसरइति अत्र च ज्ञानादीनां क्षणिकत्ववारणाय विभुसमवेतयोग्यविशेषगुणनाश्यत्वावच्छिन्नं प्रति स्वोत्तरोत्पन्नविशेषगुणत्वेन नाशकतया तत एव मुक्त्यात्मकदुःखध्वंससम्भवे तत्र तत्त्वज्ञानत्वेन हेतुतायां मानाभाव इति यदि विभाव्यते तदा दुरितवद्भिन्नदुरितध्वंसत्वमेव मुक्तित्वमवसेयम् नन्वेवं दुरितानुत्पादात् दुरितवद्भिन्नदुरितध्वंसत्वस्यार्थसमाजग्रस्तत्वात् कथं जन्यतावच्छेदकत्वमिति वाच्यम् प्रमाणाभावस्यैवार्थसमाजग्रस्तधर्मस्य कार्यतानवच्छेदकत्वे बीजतया प्र-

ज्ञाते मुक्तितत्त्वज्ञानयोः कार्यकारणभावबोधकवेदस्यैव बीजत्वे मार्गसमाजग्रस्त्वे पि कार्यतावच्छेदकत्वे बाधकाभावात् नैव सुखदुःखाभावयोरन्यतरस्यैव पुरुषार्थत्वेन मुक्तेरपुरुषार्थत्वप्रसङ्गइति वाच्यम् बलवद्विषयाभावत्वेन पुरुषार्थत्वस्य दुःखाभाव इव दुःखजनकदुरितध्वंसेपि सम्भवादिति चेन्न तथापि काश्यीमरणान्मुक्तिरिति वाक्येन काश्यीमरणस्यापि साक्षान्मुक्तिहेतुत्वप्रतिपादनात् मुक्तित्वावच्छिन्नं प्रति तत्त्वज्ञानत्वेन हेतुत्वे व्यभिचारएवेति चेन्न "तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यते अयनायेति" श्रुत्या तत्त्वज्ञानस्य मुक्तिसामान्यं प्रति पूर्वभावे दर्शिते काश्यीमरणस्य तत्त्वज्ञानद्वारा मुक्तिप्रयोजकत्वमित्येव तदर्थत्वात् सयुक्तिकं चैतत् अन्यथा तयोः परस्परजन्यमुक्तौ व्यभिचारेणोभयत्राप्यव्यवहितोत्तरत्वनिवेशे गौरवात् नच काश्यीमरणस्य तत्त्वज्ञानं प्रति हेतुत्वेपि श्रवणादिजन्यतत्त्वज्ञाने व्यभिचारवारणायाव्यवहितोत्तरत्वनिवेशोऽविशिष्ट इति वाच्यम् गङ्गामरणादिजन्यतत्त्वज्ञाने व्यभिचारवारणाय श्रवणादिजन्यतावच्छेदककोटावव्यवहितोत्तरत्वनिवेशस्य भवतोप्यावश्यकत्वात् श्रवणादिजन्यतत्त्वज्ञाने व्यभिचारवारणाय परं काश्यीमरणजन्यतावच्छेदककोटावव्यवहितोत्तरत्वनिवेशइति तन्निवेशस्यैकधैव सम्भवात् भवन्मते काश्यीमरणजन्यमुक्तौ व्यभिचारभिया तत्त्वज्ञानजन्यतावच्छेदककोटावव्यवहितोत्तरत्वनिवेशः एवं तत्त्वज्ञानजन्यमुक्तौ व्यभिचारवारणाय काश्यीमरणजन्यतावच्छेदककोटावव्यवहितोत्तरत्व निवेशइत्युभयत्राव्यवहितोत्तरत्वनिवेशस्यावश्यकत्वेनातिगौरवादिति चेन्न तथा "प्युभाभ्यामेव पक्षाभ्यां यथा खेपक्षिणां गतिस्तथैव ज्ञानकर्मभ्यां प्राप्यते शाश्वती गति" रित्यनेन कर्मणामपि मुक्तिहेतुत्वप्रतिपादनात् कथं तत्त्वज्ञानस्यैव मुक्तिहेतुत्वमिति चेन्न तस्य तत्त्वज्ञानप्रतिबन्धकाधर्मध्वंसद्वारा तत्त्वज्ञानएवोपक्षयात् नतु मुक्तिं प्रत्येव साक्षात्तस्य हेतुता "नान्यः पन्था विद्यतेऽयनायेति" श्रुतिविरोधात् "तमेतं वेदानुवचनेन ब्राह्मणाविविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेनेति" श्रुतिविरोधाच्च किंच यत्याश्रमविहितकर्मणएव हेतुत्वे गृहस्थस्यामुक्तत्वप्रसङ्गः "कर्मणैव हि संसिद्धिमास्थिता जनकादयः ॥ आरुरुक्षोर्मुनेर्योगं कर्मकारणमुच्यते" योगारूढस्य तस्यैव शमः कारणमुच्यते" गृहस्थोपि विमुच्यतइति" गृहस्थस्यापि मुक्तिश्रवणात् गृहस्थस्याश्रमविहितकर्मणएव हेतुत्वे च यतेरमुक्तत्वप्रसङ्गात् नहि मुक्तौ वैजात्यमस्ति येनोभयोरपि हेतुत्वमुपपादनीयमिति अतएव काश्यीमरणस्य कर्मणां वा साक्षान्मुक्त्युपायत्वनिरासायमोक्षमुख्योपायमित्यत्र मुख्येत्युक्तम् सेतरमो-

मननोपायमात्मनस्तत्त्वज्ञा नमामनन्ति तच्च प्रमाणाधीनमिति प्रमाणं निरूपयति । तत्प्रमायाः करणं प्रमाणम्

व्यासाधारणकारणमित्यर्थः मुक्तित्वावच्छिन्नकार्यतानिरूपितकारणत्वं-व्याप्यासाधारणकारणत्वं तेनप्रागभावादीनां तत्तद्व्यक्तित्वेन हेतुत्वेपि न क्षतिरिति दिक् ।

नन्वात्मशरीरादिभ्योभिन्नइत्याकारकं तत्त्वज्ञानमिदानीमपि सम्भवति तत्कथन्नमुक्तिहेतुरित्यत आह ॥ **मननोपायमिति** । मननमुपायोयस्येत्यर्थः तथाच श्रवणमननिदिध्यासनप्रयोज्यतत्त्वज्ञानमेव मुक्तिहेतुः तच्च नेदानीं सम्भवतीति भावः यद्यपि श्रवणोपायमित्येव वक्तुं युक्तम् तथापि मकारानुप्रासवशात् मननोपायमित्युक्तम् युक्तिभिरनुचिन्तनम् साधकबाधकप्रमाणोपन्यासश्च युक्तिः । 'श्रोतव्यः श्रुतिवाक्येभ्यो मन्तव्यश्चोपपत्तिभिरिति' स्मरणात् श्रुतस्यार्थस्य नैरन्तर्येण दीर्घकालमनुसन्धानं निदिध्यासनमिति बोध्यम् ॥

तदिति तत्त्वज्ञानमित्यर्थः नीलपटो सुन्दरः स च मानीत्यादौ सर्वनाम्नां न नीलादुपस्थापकत्वं किन्तु मुख्यविशेष्यस्यैवेत्ततोऽपि पूर्वोपस्थितत-त्त्वज्ञानस्यैवोपस्थापनन्नतुतन्मननस्येत्यर्थः मननस्य मुख्यविशेष्यतया पूर्वमनुपस्थितत्वेन तद्बोधासम्भवादित्यवधेयम् ॥ **प्रमाणेति** । प्रमाणज्ञानप्रयोज्यमित्यर्थः । श्रवणादिप्रयोज्यमात्मनोतरभिन्नत्वज्ञानमेवहि तत्त्वज्ञानं तच्च नेतरपदार्थतत्त्वज्ञानं विना तत्तु नप्रमाणज्ञानं विना प्रमेयव्यवस्थितेः प्रमाणज्ञानाधीनत्वादिति प्रमाणनिरूपणमावश्यकमितिभावः । यद्वा तत्त्वज्ञानस्य मननद्वारा प्रमाणाधीनत्वसूचनाय मननोपायमित्युक्तम् वस्तुतस्तु बहुषु अवहितोपस्थितविशेषणस्यापि तच्छब्देन परामर्शदर्शनात् अव्यवहितोपस्थितमुख्यविशेष्यमात्रोपस्थापकत्वनियमस्यौत्सर्गिकत्वतात्पर्यस्य नियामकत्वाच्च नोक्तातिप्रसङ्गः एवंच । तच्च । मननंचेत्यर्थः । साधकबाधकप्रमाणोपन्यासरूपयुक्तिभिरनुचिंतनरूपमननस्यप्रमाणज्ञानं विनाऽसम्भवादितिभावः । प्रमाणं-निरूप्यतइति । लक्षणस्वरूपादिप्रकारकवर्त्तमाननिरूपणविषयीभूतं प्रमाणमित्यर्थः । तच्चेति । प्रमाणंनिरूपणीयइत्यर्थः । प्रमायाःकरणमिति । अथ प्रमाणपदवाच्यत्वं लक्ष्यतावच्छेदकं प्रमाकरणत्वंच लक्षणं । नातः प्रमा-

णत्वस्य प्रमाकरणत्वरूपत्वेन लक्षणलक्ष्यतावच्छेदकयोरभेदापत्तिः यथा-च तयोरभेदेनेष्टापत्तिस्तथा विवेचनीयमुपरिष्टात्। ननु प्रमाकरणमिति विहाय प्रमायाः करणमित्युक्तौ किंबीजमिति चेन्न लक्षणवाक्याद्यादृशार्थस्य बोधस्तस्यैव लक्षणत्वेन प्रमानिरूपितकरणत्वस्य लक्षणत्वलाभाय तथोक्तेः अन्यथा तत्पुरुषे पूर्वपदलक्षणया प्रमासम्बन्ध्यभिन्नं करणमित्यर्थलाभे इतरभेदानुमाने हेतौ वैयर्थ्यस्य दुर्वारत्वाद् गुरुत्वाच्च लक्षणवाक्यतात्पर्यविषयीभूतार्थस्यैव लक्षणत्वोपगमेन प्रमानिरूपितकरणत्वएव तात्पर्येण तस्यैव हेतुत्वोपपादने तु प्रयासगौरवमिति। वस्तुतस्तु प्रमाकरणमित्यभेदेनान्वयभ्रमनिराकरणाय प्रमायाःकरणमित्युक्तिः । असाधारणधर्मोहि लक्षणम् यथा सास्नाशृङ्गवती गौरिति सास्नावत्त्वमात्रं सरटे शृङ्गवत्त्वमात्रं महिषादावतिव्याप्तमिति सास्नाशृङ्गवत्त्वविशिष्टधर्मोलक्षणं तदितरावृत्तित्वे सति सकलतद्वृत्तित्वमसाधारणत्वं शृङ्गवत्त्वगगनकृष्णरूपवत्त्वादेर्गोलक्षणत्ववारणाय सत्यन्ततद्वृत्तित्वमाकल्यानां यथायथंसन्निवेशः। तदिदमुक्तम् "लक्षणे तान्येव पदानि ग्राह्याणि यैः पदैरतिव्याप्त्यव्याप्तिसम्भवादयोदोषानिराक्रियन्ते" अलक्ष्ये लक्षणगमनमतिव्याप्तिः यथा शृङ्गवती गौरिति। लक्ष्यैकदेशे लक्षणस्यावर्त्तनमव्याप्तिः। यथाकृष्णागौरिति। लक्ष्ये क्वाप्यवर्त्तनमसम्भवः। यथैकशफा गौरिति। इत्थं चात्र छिदिक्रियाकरणं कुठारादावतिव्याप्तेर्वारणाय 'मा'पदोपादानम्। दोषदुष्टचक्षुरिन्द्रिये भ्रमात्मकज्ञानकरणत्वादतिव्याप्तिवारणाय प्रपदम्। प्रमात्वं प्रमाणमित्युक्तौ चक्षुरिन्द्रियेऽव्याप्तिरतःप्रमाकरणमिति विशिष्टमुपात्तम्। ननु दोषदुष्टचक्षुरिन्द्रियेणापि कदाचित्प्रमाजननात्तत्र प्रमाणव्यवहारोप्यक्षतएव नच दुष्टतादशायां तादृग्व्यवहारापत्तिरिति वाच्यम् न ह्येदंकालघटितं लक्षणं येन तस्मिन्काले आपत्तिः स्यात् किन्तु तत्तदिन्द्रिये आपादनीयं तत्र तु दोषशून्यतादशायामिष्टापत्तेरितिचेन्न। यत्र घर्षणादिना खण्डचक्षुरुत्पन्नं भ्रममेवोत्पाद्य तत्राग्रेपि तत्र प्रमाया अजनके केनापि प्रमाणव्यवहारस्यास्वीकारादतिव्याप्त्या, प्रपदस्यावश्यकत्वात् दोषवशेनान्यदीयेदन्त्वस्यैव भानसम्भवेन सर्वांशे भ्रमस्यापि सम्भवात् यद्दिच "सर्वं ज्ञानं धर्मिण्यभ्रान्तं प्रकारेतु विपर्यय" इति नियमात्सर्वांशे न भ्रमसम्भवः तथापि तत्तदर्थमादायैव प्रमाणव्यवहारात्। पीतः शङ्ख इति भ्रमजनके पीतत्वांशे प्रमाणत्ववारणाय तत्तद्भ्रमात्वलाभाय प्रपदस्यावश्यकत्वात् अनुभवस्यापि संस्कारद्वारा स्मृतिरूपज्ञानकरणत्वादतिव्याप्तेश्च प्रपदमिति।

प्रमाचयथार्थानुभवः । "तदाहुराचार्याः,, यथार्थानुभवोमानमिति ननु किमिदं याथार्थ्यं किंवानुभवत्वमिति । उच्यते । तद्वति तत्प्रकारकत्वं याथार्थ्यं भवति हि रजते इदं रजतमिति ज्ञानं तद्वति तत्प्रकारकमिति यथार्थम् । शुक्तौ इदं रजतमिति ज्ञानं तु नतद्वति तत्प्रकारकमिति न यथार्थम् ।

ननु विशिष्टबुद्धिं प्रति विशेषणज्ञानस्य हेतुत्वात्प्रमाज्ञानं विनाकथं प्रमाकरणत्वज्ञानमित्यत आह । प्रमाचेति । यद्वा ननु प्रमात्वं यथार्थज्ञानत्वं तथाच स्मृतेरपि प्रमात्वेन तत्करणेऽनुभवे प्रपदोपादानेऽतिव्याप्तितादवस्थ्यमित्यत आह । प्रमाचेति । तथाचानुभवत्वघटितप्रमात्वस्य च स्मृतावसत्त्वेन न तत्करणेऽनुभवेऽतिव्याप्तिरितिभावः । अत्र चानुभवत्वस्यैव प्रमात्वरूपत्वे भ्रमेऽतिव्याप्तिः । यथार्थत्वस्यैव तद्रूपत्वे च स्मृतावतिव्याप्तिरित्युभयोपादानम् । ननुप्रमात्वस्यानुभवत्वघटितत्वे प्रमाणाभावः । नचेत्थं स्मृतिरूपप्रमाकरणतयाऽनुभवस्य प्रमाणत्वापत्तिः इष्टत्वात् अनुमित्युपमितिशाब्दभिन्नप्रमितिकरणत्वेन च प्रत्यक्षप्रमाणविभजनान्न विभागव्याघातोपीत्यतआह । तदाहुरिति । मानमित्यादि । यथार्थानुभवोमानमपेक्षतयेष्यतइति यावत् । भावव्युटामानंमितिः प्रमितिरिति यावत् । अनपेक्षतया इतरप्रामाण्यानधीनप्रामाण्यकतया । स्मृतेःप्रमात्वं हि अनुभवप्रमात्वाधीनमिति स्मृतेरप्रमात्वमित्यर्थः । यदसाधारणंसहकार्यासाद्य मनोबहिर्गोचरां प्रमां जनयति तस्यैव प्रमाणान्तरत्वमितिनियमेनानुभवसहकारेण मनसः स्मृतिरूपप्रमाजनकत्वादनुभवस्य प्रमाणान्तरत्वापत्तिरतः स्मृतिव्यावृत्तमेवानुभवत्वघटितं प्रमात्वमवश्यं वाच्यम् । एवं प्रत्यक्षं निवेश्यानुमिति मनिवेश्य प्रत्यक्षोपमिति शाब्दभिन्नप्रमितिकरणत्वेनानुभवस्यानुमानेप्यन्तर्भावापत्तिः विनिगमनाविरहादितिभावः ।

तद्वतीति । तद्विशेष्यकत्वेसतीत्यर्थः । नचैवंवह्निशुन्नापुन्नयोरिमौशुन्नापुन्नवन्ही इति विपरीतभ्रमे वन्ह्यंशे वन्हित्ववद्विशेष्यकत्वस्य शुन्नापुन्नांशे च वन्हित्वप्रकारकत्वस्य सत्त्वात् तत्रापिप्रमात्वापत्तिरितिवाच्यम् । तद्विशेष्यकत्वावच्छेदेन तत् प्रकारकत्वस्य विवक्षितत्वात् । तद्वन्निष्ठविशेष्यतानिरूपिततन्निष्ठप्रकारताशालित्वमितितन्नि-

नन्वेवंरजतेइदंरजतंनवेतिसंशयोपि प्रमाख्यादितिचेन्न । रजतत्वांशेप्रमैव । "तद्वति तत्प्रकारकमनुभवस्तत्प्रमेति प्रमाणिकाः" । ननु शाखावच्छेदेन कपिसंयोगवति वृक्षे मूले वृक्षः कपिसंयोगीतिप्रत्ययोपि प्रमाख्यात् । कपिसंयोगवति वृक्षे

ष्कर्षः । तथाच तत्सम्बन्धावच्छिन्नतद्निष्ठविशेष्यतानिरूपिततत्सम्बन्धावच्छिन्नतन्निष्ठप्रकारताशालिज्ञानत्वं तत्सम्बन्धावच्छिन्नतत्प्रकारकप्रमात्वमितिफलितम् । तत्सम्बन्धावच्छिन्नतद्वत्त्वनिवेशात् तेनसम्बन्धेन तद्विरहिण्यपि कालिकादिसम्बन्धेन तद्वत्त्वस्य सत्त्वेपि न भ्रमेऽतिव्याप्तिः । एवं रजते एवसंयोगादिसम्बन्धेन रजतत्वप्रकारकज्ञानस्यापि समवायसंसर्गकरजतत्वप्रमात्वापत्तिरित्युभयत्र तत्सम्बन्धावच्छिन्नत्वनिवेशः । लक्ष्ये लक्षणमाहयति । अवतिहीति । तद्वति । रजतत्ववति । तत्प्रकारको । रजतत्वप्रकारो । अलक्ष्ये लक्षणासत्त्वप्रदर्शनव्याजेन तद्वतीत्यस्य व्यावृत्तिमाह । शुक्तावित्यादिना । तद्वतीति । रजतत्ववतीत्यर्थः किन्तु रजतत्वाभाववतिरजतत्वावगाहित्वाद् भ्रमइति भावः एते नतद्भाववतितत्प्रकारकं ज्ञानं भ्रमइति भ्रमलक्षणं सूचितम् । ननु वृक्षः कपिसंयोगीति ज्ञानस्यापि मूलावच्छेदेन संयोगाभाववति संयोगप्रकारकत्वात् भ्रमत्वापत्तिरितिचेन्न प्रतियोगिव्यधिकरणतद्भाववत्त्वस्य विवक्षितत्वात् वृक्षे संयोगाभावस्य न प्रतियोगिव्यधिकरणइति नानुपपत्तिः ।

ननुवैवंमूलेवृक्षः कपिसंयोगीतिज्ञानस्य भ्रमत्वानुपपत्तिरित्यपाच्यम् । तत्रावच्छेदकत्वांशेएव भ्रमत्वाङ्गीकारात् नतुसंयोगांशेपीति।

ननुतद्वतितत्प्रकारकज्ञानत्वस्यैव प्रमात्वरूपत्वे संशयेऽति व्याप्तिरतः निश्चयत्वघटितमेवतद्वत्त्वमित्याशयेनाशङ्कते । नन्वेवमिति । एवं । निश्चयत्वावघटितस्यैवप्रमात्वरूपत्वे रजतत्वांशइति । एकधर्मिकविरुद्धनाना कोटिकज्ञानंसंशयइति रजतत्वसंशये रजतत्वरजतत्वाभावौ कोटी तत्र रजतत्वाभाववति रजतत्वाभावप्रकारकत्वाभावात् रजतत्वाभावांशेऽप्रमात्वेपि रजतत्ववति रजतत्वावगाहित्वात्तदंशे प्रमात्वमिष्यतएवेतिभावः । निश्चयत्वावघटितमेव प्रमात्वमित्यत्र प्राचीनसंमतिमाह । तदुक्तमिति । स्मृतिव्यावर्त्तनायानुभवत्वघटितं परमङ्गीकुर्वंति नतुसंशयव्यावर्त्तनायनिश्चयत्वघटितमपीतिभावः । शङ्कते । नन्वेति । क्वचिन्नन्वित्येवपाठः कपिसंयोगरहिते

तदवगाहित्वादिति चेन्न । वृक्षे कपिसंयोगप्रत्ययःप्रमैव । मूले अवच्छेदकत्व प्रत्ययस्तु न तथा । तस्यतदनवच्छेदकत्वादिति । स्मृतिभिन्नज्ञानत्वमनुभवत्वं जातिविशेषोवा । अनुभवामीत्यनुगतप्रतीतेर्बाधकंविना जातिविषयकत्वात् ।

वृक्षे कपिसंयोगवत्त्वाभावान्न प्रमात्वसम्भवइत्यतः कपिसंयोगवति वृक्षइति । तत्रापि मूलावच्छेदेन कपिसंयोगसत्त्वे प्रमात्वे इष्टापत्तिरतः शाखावच्छेदेनेति सावधारणं शाखावच्छेदेनैव नतुमूलावच्छेदेनापीत्यर्थः । वृक्षः कपिसंयोगीतिप्रत्ययस्य प्रमात्वे अविवादान्मूलइति । मूलावच्छेदेनान्ततोगगनादिसंयोगस्य सत्त्वात् मूले वृक्षः संयोगीतिप्रत्ययस्य प्रमात्वं सर्वसंमतमेवेत्यतः कपिसंयोगीति । अवच्छेदकत्वप्रत्ययस्तु । कपिसंयोगावच्छेदकत्वप्रत्ययस्तु । नतथा । नप्रमा । तस्य । मूलस्य तदनवच्छेदकत्वात् । कपिसंयोगानवच्छेदकत्वात् । कपिसंयोगवतिवृक्षे कपिसंयोगप्रकारकत्वात् कपिसंयोगांशे प्रमात्वमेव । अवच्छेदकत्ववति अवच्छेदकत्वप्रकारकत्वाभावाच्च न तदंशे प्रमात्वमितिभावः । अनुस्मृतिभिन्नज्ञानत्वमनुभवत्वमितत्र संस्कारजन्यज्ञानत्वमेव स्मृतित्वं वाच्यं तच्च प्रत्यभिज्ञायामतिप्रसक्तमनुगतंदुर्वचं संस्कारत्वेन तज्जन्यत्वं च स्मृतित्वस्य जातित्वमन्तरा संस्कारत्वेन जनकतयां मानाभावेनासम्भवि तस्य जातित्वेच संस्कारजन्यत्वघटितत्वाद् गुरुतरलक्षणंस्यात् । यदिचस्मृतित्वं जातिः तदवच्छिन्नप्रतियोगिताकभेदस्यैवच निवेशान्न गौरवमिति विभाव्यते तदाऽनुभवत्वमपिजातिः तद्विशिष्टत्वमेवच लक्षणमास्तां कृतमेतावत्कुरुष्वेत्याशयेनाह । जातिविशेषोवेति ।

अनुभवत्वकिंमानमतआह । अनुभवामीति । अनुगतप्रतीतेरनुगतधर्मंविनानुपपत्तेरनुगतधर्मोऽभ्युपेयस्तस्य चोपाधिरूपत्वे गौरवाज्जातित्वमेवन्याय्यइतिभावः । अभावइत्यनुगतप्रतीत्याऽभावत्वरूपजातिसिद्ध्यापत्तिरतो बाधकंविने ति । तच्चतु जातिबाधकस्यैव सत्त्वात् नित्यानेकसमवेतस्यैव जातित्वादितिभावः । तथाचोक्तम् । व्यक्तेरभेदस्तुल्यत्वं सङ्करोथानवस्थितिः । रूपहानिरसम्बन्धोजातिबाधकसंग्रहः । व्यक्तेरभेदः स्वाश्रयव्यक्तैक्यम् । यथाऽऽकाशत्वादि । व्यक्तेस्तुल्यत्वम् । अन्यूनानतिरिक्तव्यक्तिकत्वम् । यथाघटत्वकलशत्वादि । परस्परात्यन्ताभावसमानाधिकरणयोर्धर्मयोरेकत्वसमा-

---

* प्रामाणिकास्तुदन्त्यमेवपठन्ति ।

करणत्वंच व्यापारवदसाधारणकारणत्वम् । घटंप्रतिकपाल संयोगवारणायव्यापारवदिति । ईश्वरज्ञानादिवारणायाऽसाधारणेति । नन्वेवं ज्ञानं प्रति आत्मापि करणं स्यात् आत्ममनःसंयोगस्यव्यापारस्य सत्त्वात् । तज्जनकत्वे सति तज्जन्यजनकोऽवान्तरव्यापारः भवति चात्ममनःसंयोगआत्मजन्यः आत्मजन्यज्ञानजनकश्चेतिचेत् । स्यादेव ।

वेशः सङ्करः यथाभूतत्वमूर्त्तत्वादि अनवस्था यथाजातित्वादि । विशेषत्वजातिस्वीकारे रूपहानिः रूपस्य लक्षणस्य सामान्यभिन्नत्वे सति समवेतत्वेऽसतिसामान्यरहितत्वरूपविशेषलक्षणस्य हानिः विशेषत्वरूपजातिरेवेतरव्यावर्त्तकत्वात् स्वतएव आहृत्तत्वरूपविशेषस्वरूपहानिरितिवार्थः । असम्बन्धः । असमवेतत्वम् यथाकम्बुग्रीवादिमत्त्वादीति । कश्चित्तु स्मृतीत्य भिचारवारणाय विशिष्टवैशिष्ट्यावगाह्यनुभवत्वस्यैव विशेषणतावच्छेदकप्रकारकनिर्णयजन्यतावच्छेदकत्वमुपेयम् । तथाच तज्जन्यतावच्छेदकको टिप्रविष्टत्वेनानुभवत्वजातिसिद्धिरित्याहुः । अत्र स्वर्गाद्यनुमिति शाब्दबोधानन्तरंस्वर्गादिकमनुभवामीति प्रत्ययापत्तेः साक्षात्कारत्वमेव अनुभवत्वमनुभवामीति प्रत्यक्षविषयइति न तादृशप्रत्यक्षविषयतया प्रत्यक्षादिचतुष्टयसाधारणजातिसिद्धिः । यद्पि विशेषणतावच्छेदकप्रकारकनिर्णयजन्यतावच्छेदकतया* तत्सिद्धिरिति । तदपि न । नित्यव्यावर्त्तनाय जन्यानुभवत्वमेव तत्कार्यतावच्छेदकमुपगन्तव्यं तच्च जन्यत्वं ध्वंसप्रतियोगित्वं प्रागभावप्रतियोगित्वं †वा कालिकसम्बन्धेन घटत्वादिमत्त्वंवेति निर्वक्तुम शक्यतया जन्यप्रत्यक्षमात्रवृत्तिवैजात्यमेव कार्यतावच्छेदकंवाच्यं तथाचकुतःसकलप्रत्यक्षादि साधारणानुभवत्वजातिसिद्धिरित्यास्तामसद्विवेचेन ।

प्रमाकारणत्वघटकासाधारणत्वंलक्षयति । व्यापारवदिति । कयालेति । तत्राप्यसाधारणकारणत्वसत्त्वादितिभावः । असाधारणेति । असाधारणकारणत्वं च कार्यत्वानवच्छिन्नकार्यतानिरूपितकारणतात्रयत्वम् । ईश्वरज्ञानस्य तु उपादानप्रत्यक्षविधयाकार्यत्वावच्छिन्नप्रत्येवहेतुत्वान्ना-

---

* जन्यतावच्छेदककोटिप्रविष्टतयत्यपिपाठान्तरम् ।

† घटादिमत्त्वेवेत्यपिपाठान्तरम् ।

[illegible]णां करणत्ववादी नां भेदाच्च व्यवहारभेदः । [illegible] वि-
वक्षातः कारकविभक्तयोनानाभवन्तीति भाट्टिकाः । अतए-
वात्मानमात्मनावेत्तीतित्वतीया । भिवादित्यभिप्रायेण तु करणा-
व्याकारानुगतमतेः करणत्वादिक्रमखण्डो पाधिरूपसामा-
न्यमङ्गीकुरुतः । तच्च प्रमाणं चतुर्विधमित्याह भगवान्सूचका-
रः "प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानीति,, [illegible] सम्य-
ग्ज्ञानरूपप्रमाकरणं प्रत्यक्षं । साक्षात्कारित्वंच साक्षात्करो-
मीत्यनुगतप्रतीतिसाक्षिकोजातिविशेषएव । नचेयमिन्द्रिय-
जन्यज्ञानत्वविषया ज्ञानमात्रस्यमनोरूपेन्द्रियजन्यत्वात् । इ-
न्द्रियाऽप्रतीतावपि तथाप्रतीतेश्च । नापिचाक्षुषत्वादिजा-
तिविषया ।

तिव्याप्तिरितिभावः नतुकार्यत्वावच्छिन्नकार्यतानिरूपितकारणताशून्य-
त्वन्तत् तथासति कार्यमात्रं प्रति कालस्यहेतुत्वेन कालोपाधिवि-
धया चक्षुरादीनामपि कार्यमात्रं प्रति हेतुतयाऽसङ्गत्यापत्तेरितिध्ये-
यम् । [illegible]फलायोगव्यवच्छिन्नं कारणमेव करणम् अतएवात्मान ज्ञा-
नकरणं तस्यनित्यत्वेन फलायोगव्यवच्छेदाभावादित्यभिप्रायेणाह कृते ।
[illegible]नेवमिति । एवम् । एवंविधलक्षणकरणे । व्यापारस्य सत्त्वादिति ।
जन्यज्ञानत्वावच्छिन्नं प्रत्यसाधारणकारणत्वाच्चेत्यपि द्रष्टव्यम् । तज्जन्यत्वे स-
तीति । तज्जन्यत्वस्य फलेपि सत्त्वात्तज्जन्यजनकइति । तज्जन्यजनकत्वस्य
चेश्वरज्ञानादावपिसत्त्वात्तज्जन्यत्वे सतीति । [illegible]त्वेनेति । सहकारिविरहे फ-
लायोगव्यवच्छेदस्यासम्भवित्वात् सहकारिसमवधाने फलायोगव्यवच्छे-
दस्यचात्मन्यपि सत्त्वेन त्वन्मतेष्यनवैरितिभावः ।

नन्वेकस्यैव कर्त्तृत्वकरणत्वस्वीकारे कर्त्ताकरणमिति नानाविध-
व्यवहारोऽनुपपन्नः व्यवहर्त्तव्यभेदस्यैव व्यवहारभेदनियामकत्वादित्यत-
आह । उपाधीनामिति । तथाचो "पधेयसङ्करेप्युपाधेरसङ्करादिति"
न्यायेन व्यवहर्त्तव्यभेदेपि व्यवहर्तव्यतावच्छेदकभेदादेव व्यवहारभेद-

यथा घटरूपव्यवहर्त्तव्याभेदेपि घटत्वद्रव्यत्वादिरूपव्यवहर्त्तव्यतावच्छेदकभेदादेवघटो द्रव्यमित्यादिव्यवहारभेदः एवं पाचकपाठकादिव्यवहारभेदोपपत्तिभावः । अतएवेति । एकस्यैव कर्त्तृत्वकरणत्वस्वीकारादेवेत्यर्थः । अतएव । आत्मनःकरणत्वकर्तृत्वस्वीकारादेव । तृतीयेति तृतीयायाः करणत्वार्थकत्वादितिभावः । अङ्गीचक्रुरित्यस्वरसोद्भावनं तद्दीक्षन्तु सर्वत्रैवाखण्डोपाधेरेवानुगतप्रतीतिविषयत्वे सखण्डोपाधिरूच्छेदापत्तिः । ननु कर्त्रादिव्यावृत्तकरणत्वनिर्वचनानुपपत्त्यातस्याखण्डोपाधिरूपत्वमेव न्याय[illegible] तस्य तत्साधारण्येप्यवृत्तेः, व्यवहारभेदस्य व्यवहर्त्तव्यतावच्छेदकभेदादेवान्यत्राप्युपेयत्वादिति । ननु[illegible]मप्यात्मनः प्रमाणत्वापत्तिरितिचेन्न । अनुभवत्वव्याप्यजात्यवच्छिन्नप्रमावृत्तिकार्यतानिरूपितकारणताशालित्वे सति व्यापारवत्त्वस्यैव प्रमाणत्वरूपत्वेनात्मनि तदसम्भवादिति । अनुभवत्वव्याप्यत्वं च तन्निष्ठभेदप्रतियोगितावच्छेदकत्वं स्मृतित्वरूपजातिमादायानुभवेऽतिव्याप्तिवारणाय प्रमापदम् । यद्यप्यनुमितौ भिन्नचाक्षुषत्वस्यालोकजन्यतावच्छेदकत्वादालोकेऽतिव्याप्तेर्जात्यवच्छिन्नेत्यवच्छेदकतापर्याप्तिनिवेशआवश्यकः [illegible] जन्यज्ञानत्वावच्छिन्नं प्रत्यात्मत्वेन हेतुतया ज्ञानत्वजातेरवच्छेदककोटिप्रविष्टत्वेपि कार्यतावच्छेदकतापर्याप्त्यधिकरणत्वाभावान्नतएव वारणेऽनुभवत्वव्याप्येतिनोपादेयमिति । ननु तथापिनित्यवृत्तिधर्मस्यापि कार्यतावच्छेदकत्वोपगमेन ज्ञानत्वावच्छिन्नमात्रेवात्मत्वेनहेतुतया ज्ञानत्ववारणायतदावश्यकत्वादिति । चार्वाकमते प्रत्यक्षस्यैव प्रमाणत्वात् भट्टानांचानुपलब्धेरपि प्रमाणत्वात्तन्निरासायाह । चतुर्विधमिति । तत्रेति । चतुर्विधप्रमाणमध्ये इत्यर्थः । तत्रप्रथमोद्दिष्टं प्रत्यक्षप्रमाणं लक्षयति । [illegible]रूपेति । साक्षात्कारेति, अनुमानादावतिव्याप्तिवारणाय साक्षात्कारप्रमेत्युक्ते साक्षात्करिष्य प्रमेतिभ्रमःस्यात् साक्षात्कारिप्रमेत्युक्तावपि तथेच्छतोरूपेति । इयं । साक्षात्करोमीतिप्रतीतिः । इन्द्रियेति । तथाच न साक्षात्कारत्वरूपजाति सिद्धिरितिभावः । ज्ञानमाचक्ष्येति । तथाचमनोरूपेन्द्रियजन्यत्वस्यानुमित्यादावपिसत्त्वेन तत्रापिसाक्षात्करोमीति प्रतीत्यापत्तिरितिभावः । ननु इन्द्रियत्वावच्छिन्नजनकतानिरूपितजन्यताशालिज्ञानत्वमेवतद्विषयः मनसस्तु मानसज्ञान एव इन्द्रियत्वेनहेतुत्वम् अनुमित्यादिकं प्रतितु मनस्त्वेन इत्यरुचेराह । इन्द्रियत्वावच्छिन्नेति । इन्द्रियत्वा-

अननुगतत्वात् । यद्धीजन्यधीजन्यमात्रवृत्तिजातिशून्यज्ञान-त्वन्तत् भवतिहि जन्यधीजन्यमात्रवृत्त्यनुमितित्वादि तच्छू-न्यत्वं साक्षात्कारमात्रे ।

प्रतीताविति यर्थः । अक्षजन्यत्वेन्द्रियत्वज्ञानं विना तद्वृत्तिधर्मज्ञानाभावात्तादृशधर्मस्य विषयत्वसम्भवदुक्तिभावः । वस्तुतस्तु साक्षात्कारत्वरूपजात्यभावे इन्द्रियत्वेन कार्यकारणभावासम्भवितयेन्द्रियजन्यत्वं नेन्द्रियजन्यज्ञानत्वस्य साक्षात्कारत्वरूपत्वासम्भवान्नेत्यमवतारणीयं परन्तु नन्वु इन्द्रियनिष्ठजनकतानिरूपितविषयतासम्बन्धावच्छिन्नजन्यता ग्रालिङ्गानत्वमेवानुमित्यादिव्यावृत्तं तद्विषय इत्यतआह । इन्द्रियेति । इन्द्रियाज्ञानेपित्यर्थः । तत्प्रतीतेः । साक्षात्करोमीतिप्रतीतेरित्यर्थः । एतेन ज्ञानाकरणकं ज्ञानं प्रत्यक्षमित्यपिनिरस्तम् । तद्ज्ञानेपितत्प्रतीतेर्जायमानत्वादिति ।

अवश्याभ्युपेयचाक्षुषत्वादिजातिरपि नास्याःविषयइत्याशयेनाह । नापीति । अननुगतत्वादिति । अनुगतप्रतीतेश्चानुगतधर्मविनानुपपत्तेरितिभावः । अनुपनीतभानानन्तरं साक्षात्करोमीत्यप्रतीतेर्नौ किंकविषयतायास्तादृशकत्वेनावश्यकत्वाल्लौकिकविषयतायाग्रालिङ्गानत्वमेव साक्षात्करोमीतिप्रतीतिविषयः एवमनुगतप्रतीत्यैवजातिसिद्धौविभुर्विभुरित्यनुगतप्रतीत्या विभुत्वरूपजातिसिद्धिःस्यात्किन्तुकारणतावच्छेदकतयाकार्यतावच्छेदकतया वा तत्सिद्धिः । नचात्रतत्सम्भवति नवेन्द्रियत्वावच्छिन्नकारणतानिरूपितकार्यतावच्छेदकतयातत्सिद्धिरितिवाच्यम् । इन्द्रियत्वस्यैकस्याभावात् इन्द्रियनिष्ठेषेकत्वेषु वैजात्यंस्वीकृत्य विजातीयैकत्वरूपस्य तस्य सम्भवेपिकार्यमात्रवृत्तिधर्मस्यैव कार्यतावच्छेदकत्वेन साक्षात्कारत्वस्यनित्यानित्यवृत्तितया जन्यतावच्छेदकत्वासम्भवात् । जन्यत्वनिवेशे च जन्यत्वस्यध्वंसप्रतियोगित्वप्रागभावप्रतियोगित्वादिविकल्पग्रासेन निर्वक्तुमशक्यतया जन्यसाक्षात्कारमात्रवृत्तिवैजात्यंस्वीकृत्य तस्यैव जन्यतावच्छेदकत्वावश्यकतया कुतस्तत्कोटिप्रविष्टतया साक्षात्कारत्वरूपजातिसिद्धिः । एवं चाक्षुषस्यार्श्वनादौविशिष्यचक्षुरादीनां हेतुत्वावश्यकतया तादृशसामान्यकार्यकारणाभावे मानाभावाच्चेत्यतआह । यद्धीत्यादि । जन्यधीत्यादि । जन्या या धीस्तज्जन्यमात्रवृत्तिर्यजातिस्तच्छून्यज्ञानत्वंसाक्षात्कारत्वमित्यर्थः । लक्ष्ये लक्षणङ्गमयति । भ्रम-

अथ निदिध्यासनजन्यमात्रवृत्तिमोक्षजनकतावच्छेदकजाति-

तिर्निरूपयति । अनुमितित्वादीत्यादिपदादुपमितित्वशाब्दत्वादिपरिग्रहः । तत्रहिजन्यं, ज्ञानं व्याप्तिज्ञानम्, अतिदेशवाक्यार्थज्ञानं पदज्ञानादि, तज्जन्यमनुमित्यादि, तन्मात्रवृत्त्यनुमितित्वादि तच्छून्यत्वं साक्षात्कारेऽन्वेत्यर्थः । अत्र च ज्ञानत्वं साक्षात्कारत्वमित्युक्तावनुमित्यादावतिव्याप्तिरतःशून्यान्तम् । जातिशून्यज्ञानत्वं साक्षात्कारत्वमित्युक्तावसम्भवः ज्ञानत्वादिजातेरेवतत्त्वसत्त्वादित्यतोजन्यधीजन्यमात्रवृत्तीतिजातिविशेषणम् ज्ञानत्वस्य च जन्यधीजन्यभिन्नेश्वरसाक्षात्कारे निर्विकल्पके च वृत्तित्वान्न तन्मात्रवृत्तित्वमिति नासम्भवः । जन्यधीजन्यवृत्तीत्युक्तावपि तथा ज्ञानत्वादेर्जन्यधीजन्ये सविकल्पके वृत्तित्वादतोमात्रेति । जन्यधीजन्यभिन्नावृत्तित्वे सति जन्यधीजन्यवृत्तित्वं चतन्मात्रवृत्तित्वं चाक्षुषत्वादिजातेरपि धीजन्यमात्रवृत्तित्वाद्व्याप्तिरतः प्रथमजन्यपदोपादानम् तस्य च जन्यज्ञानाजन्यनिर्विकल्पकवृत्तित्वान्न तन्मात्रवृत्तित्वम् । जन्यजन्यमात्रवृत्तीत्युक्तावपि निर्विकल्पकस्य जन्यशरीरादिजन्यत्वेन चाक्षुषत्वादेर्जन्यजन्यमात्रवृत्तित्वाद्व्याप्तिरतोधीपदोपादानम् । जन्यधीमात्रवृत्तीत्युक्तावपि चाक्षुषत्वस्य जन्यज्ञानमात्रवृत्तित्वादतोद्वितीयजन्यपदोपादानम् । जन्यमात्रवृत्तीत्युक्तावपि तथेत्यतोजन्यधीति धीमात्रवृत्तीत्युक्तौ ज्ञानत्वादिकमादायासम्भवइति समुदितमुपात्तम् । जन्यधीजन्यमात्रवृत्तिधर्मशून्यत्वमित्युक्तौ सविकल्पकत्वस्य तन्मात्रवृत्तित्वेनाव्याप्तिरतो जातिपदम् । सविकल्पकत्वन्तुजातिः चाक्षुषत्वादिना सङ्करात् । समवायसम्बन्धावच्छिन्नजातिशून्यत्वं चात्रबोध्यम् । अन्यथा कालिकादिसम्बन्धेनानुमितित्वादेरपि प्रत्यक्षादौसत्त्वेनासम्भवापत्तेः एतदर्थमेवच जातिपदम् । घटादावतिव्याप्तिवारणाय ज्ञानत्वमिति । मृदुपादानप्रत्यक्षस्य कार्यमात्रे हेतुतया कपालविषयकोपादानप्रत्यक्षरूपजन्यज्ञानजन्यमात्रवृत्तिघटत्वादिजातिसत्त्वात्तत्रनातिव्याप्तिरितिचेन्न । सर्गादौ कुलालीभूय ईश्वरेणैव घटोत्पादनादौश्वरकपालप्रत्यक्षस्य चाजन्यतयाघटत्वादेर्जन्यधीजन्यमात्रवृत्तित्वाभावाद् घटादावतिव्याप्तिसम्भवात् सामान्यादावतिव्याप्तिसम्भवाच्चेति दिक् ।

निदिध्यासनेत्युपलक्षणम् काशीमरणस्थले तारकोपदेशजन्यज्ञानेत्यपि द्रष्टव्यम् । निदिध्यासनेत्यादिना जन्यधीजन्यमात्रवृत्तित्वं सूचितम् । ननुतत्त्वसाक्षात्कारत्वं श्रवणादिप्रयोज्यात्मविषयकशरीरादिभिन्नत्वप्रकारक

मिति तत्त्वसाक्षात्कारेऽव्याप्तिः । मानसाऽवृत्तित्वेन जातिविशेषगुणीयत्वात् मानसत्वं जातिविशेषइत्यास्तांविस्तरः । नन्वित्थं साक्षात्तु वैशिष्ट्यानवगाहिज्ञानं साक्षात्कारः । अयंघटइत्यादिज्ञानेच साक्षात्कारत्वप्रत्यक्षेऽभ्रान्तिः घटत्वाद्यलौकिकविषयकत्वादित्याहुः । तन्न । बाधकं विनाभ्रान्तित्वाऽयोगात् । न-

---

साक्षात्कारत्वं त्वनु विशिष्टस्यानतिरेकात् साक्षात्कारत्वमेव तच्च न जन्यधीजन्यमाचक्षत्तीति कुतोऽव्याप्तिरित्यतआह । मानसेति । तथा च मुक्तित्वावच्छिन्नकार्यतानिरूपितकारणतावच्छेदकतयासिद्धस्य तत्त्वज्ञानवृत्तिवैजात्यस्यनिदिध्यासनादिजन्यतत्त्वसाक्षात्कारमाचक्षत्वात् तच्छून्यत्वाभावेनाव्याप्तिरितिभावः । मानसेति । तथाच मानसाऽवृत्त्वमनुमितित्वादिकमेव तच्छून्यज्ञानत्वस्यसत्त्वान्नाव्याप्तिरिति भावः । इदमुपलक्षणम् आराध्यत्वप्रकारकज्ञानरूपभक्तिवृत्तिभक्तित्व फलावश्यम्भाविनिश्चयरूपयद्यानिष्ठश्रद्धात्वरूपजात्योर्जन्यधीजन्यमाचक्षत्तित्वान्मानसाऽवृत्तीति जातिविशेषणमावश्यकमितिध्येयम् । ननुमानसत्वंमनोजन्यत्वं तथाचानुमितित्वादेरपि मानसाऽवृत्तित्वाभावादनुमित्यादावतिव्याप्तिः नचतादृशजात्यप्रसिद्धिः देवदत्तप्रभवताच्छेदकशब्दवृत्तिजातेरेवतादृशत्वादित्यतआह । मानसत्वंचेति । ननुमानसत्वस्य जातित्वे प्रमाणाभावइत्यतआह । आस्तांविस्तरइति । आत्ममानसत्वावच्छिन्नं प्रति विजातीयमनःसंयोगत्वेन हेतुतयातज्जन्यतावच्छेदकतयामानसत्वजातिसिद्धिरितिभावः । साक्षात्कारस्तु वैशिष्ट्यानवगाहिज्ञानं निर्विकल्पकं तदेवसाक्षात्कारः । अयंघटइति । वैशिष्ट्यविषयकइतिशेषः । घटत्वाद्यलौकिकेति । तन्मतेऽनुगतधर्मोघटत्वादिरतद्व्यावृत्तिरूपएव । व्यावृत्तिरन्योन्याभावः । अभावश्चतत्सतेतुच्छः । अलौकइतियावत् । तथाचाभावरूपघटत्वस्यालौकस्य विशिष्टज्ञाने भानात्तदसतोऽसम्बन्धाभावाद्विशिष्टोप्यलौकएव असद्विषयकं ज्ञानंच भ्रमइतिसविकल्पकंज्ञानं भ्रमः । निर्विकल्पकेच घटत्वादेरभानात्पारमार्थिकविषयकत्वेन तत्रैव साक्षात्कारत्वप्रमा अर्थजन्यैवप्रत्यक्षत्वादितिभावः । बाधकं विनेति । विषयविसंवाद एव हि प्रमात्वे बाधकः यथाशु-

चालौकिकविषयकत्वं बाधकं घटत्वादेरलौकिक*विषयत्वाऽसिद्धेः । सच्चसाक्षात्कारोद्विविधः । नित्योऽनित्यश्च । नित्योभगवतः । अनित्योऽन्यः । अनित्योद्विविधः । निर्विकल्पकः सविकल्पकश्च । तत्र वैशिष्ट्यानवगाहिज्ञानं, निष्प्रकारकं†, वा ज्ञानं, निर्विकल्पकम् ॥

क्षीरजतत्वस्य प्रकृते घटत्वस्याविसंवाद एवेतिभावः । ननुविषयविसंवादस्य बाधकत्वं नब्रूमः अपित्वलौकिकविषयकत्वस्येत्यभिप्रेत्याह । नचेति । अलौकिकत्वासिद्धेरिति । अभावस्यापि घटादिपदार्थवदनुभूयमानतयाऽलौकिकत्वमसिद्धमिति कुतोऽतद्व्यावृत्तिरूपघटत्वस्यालौकिकत्वम् एवमघटव्यावृत्तिरित्यत्रघटभिन्नं यत्किञ्चित्तत्प्रतियोगिकभेदस्यपटेपि सत्त्वात् घटभिन्नं यावत्तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताक भेदकूटएवघटत्वं वाच्यं तथा च यावत्प्रतियोगिज्ञानाभावाद् घटत्वबुद्धेरुच्छेदएवस्यात् यद्दिचाभावत्वेनाभावज्ञानेएव प्रतियोगि ज्ञानापेक्षा अचतुस्तरूपतएवघटत्वभानान्नानुपपत्ति रितिविभाव्यते तथापि घटत्ववानितिबुद्धेरुच्छेदापत्तिः तत्रघटत्वत्वेनघटत्वस्यभानात्तस्य च भवन्मते यावत्प्रतियोगिज्ञानंविनाऽसम्भवादिति । किञ्चातद्व्यावृत्तिभिन्नस्यैव घटत्वादेरुपलम्भान्नाभावरूपत्वमिति कुत अलौकिकत्वसम्भावनेतिभावः ।

भट्टादिभिरीश्वरानङ्गीकारेण तज्ज्ञानस्य सुतरामसम्भवित्वेन साक्षात्कारस्यैकविधत्वमेवाङ्गीक्रियत इत्यतस्तन्मतंनिराकुर्वन्नाह । सचेति । कार्यमात्रं प्रत्युपादानप्रत्यक्षस्यहेतुतया परमाण्वादिरूपोपादानप्रत्यक्षं विना द्व्यणुकादिरूपकार्यस्यानुत्पत्त्या ईश्वरोऽवश्यमङ्गीकार्यः । तथा च तज्ज्ञानसत्त्वेन द्वैविध्यमेव तस्येतिभावः । द्वैविध्यमेव विवृणोति नित्यइत्यादिना । नित्यत्वं चात्र प्रागभावाप्रतियोगित्वे सति ध्वंसाप्रतियोगित्वम् । सत्यन्तनिवेशान्न ध्वंसेऽतिव्याप्तिः । प्रागभावेऽतिव्याप्तिवाराणाय विशेष्यदलनिवेशः । अनित्यत्वंच प्रागभावप्रतियोगित्वं ध्वंसप्रतियोगित्वंवा । अन्यइति । भगवत्स्वन्यत्यइत्यर्थः । अस्मदादिसाक्षात्कारइति यावत् । तत्र । निर्विकल्पकसविकल्पकयोर्मध्ये । वैशिष्ट्यानवगाहीति । वैशिष्ट्यविषयताशून्यज्ञानत्वमित्यर्थः । निर्विकल्पके विशेषणज्ञानसंपत्त्यर्थं घटत्वविषयकत्वमावश्यकम् । अस्तिभानमन्तरा च जातिभानासम्भवात् घटविषयकत्वमपि तस्याङ्गीक्रियते । वैशि-

---

* घटत्वादेरलौकिकत्वासिद्धेरितिपाठान्तरम् ॥

† निराकारंवेत्यपिपाठान्तरम् ॥

तच्च यद्यपि न प्रत्यक्षसिद्धम् अतीन्द्रियत्वाऽभ्युपगमात् । तथाप्ययं घटइति विशिष्टज्ञानरूपकार्यानुमेयम् । तथाहि जन्यतद्वि-

---

ष्यविषयकत्वे तु न किञ्चिद्बाधकमिति वैशिष्ट्यावगाहित्वमप्रयोजकमेव । सविकल्पके च वैशिष्ट्यस्यापि विषयत्वान्न तत्राव्याप्तिरिति भावः । नृसिंहाकारकज्ञानस्वीकारे तु तन्निरूपितवैशिष्ट्यविषयताशून्यज्ञानत्वं तन्निर्विकल्पकत्वमिति ध्येयम् । ननु चक्षुःसंयोगचक्षुःसंयुक्तसमवायरूपकारणबलात् घटघटत्वयोर्भानवत् चक्षुःसम्बद्धविशेषणतारूपकारणबलात्तत्सम्बन्धस्यापि भाने बाधकाभावः । प्रतिबध्यप्रतिबन्धकभावकल्पने च गौरवं तथाचेदं लक्षणमसम्भवग्रस्तमित्यत आह । निराकारश्चेति । निष्प्रकारकश्चेत्यर्थः । क्वचित्तथैव पाठः । वस्तुतस्तु वैशिष्ट्यावगाहीत्यस्य संसर्गमर्यादया वैशिष्ट्यावगाहीत्यर्थः वैशिष्ट्यनिष्ठसांसर्गिकविषयताशून्यत्वं तत्त्वमिति निष्कर्षः । ननु प्रकारतासामान्यशून्यत्वं विशेष्यतासामान्यशून्यत्वमपि लक्षणं कर्तुं शक्यतएवेति तत्कथं नोक्तमित्यत इष्टापत्त्या तथैवाह । निराकारश्चेति । निष्प्रकारकं निर्विशेष्यकश्चेत्यर्थः । वाकारस्याचा व्यवस्थितविकल्पे द्रष्टव्यइति पुनर्निष्प्रभलोकः पत्याः ॥

नन्वयं घटइति ज्ञानोत्तरं घटत्वेनेमंजानामीत्येवानुव्यवसायः । तत्र च वैशिष्ट्यस्य तृतीयार्थत्वे घटत्वविशिष्टविषयकज्ञानवानिति, प्रकारत्वस्य तृतीयार्थत्वे च घटत्वप्रकारकज्ञानवानित्याकारस्तथाच तादृशानुव्यवसायबलोत्सविकल्पकस्य प्रत्यक्षसिद्धत्वेपि निर्विकल्पकस्य अनुव्यवसायगम्यत्वाभावान्न तत्र प्रत्यक्षं प्रमाणम् नाप्यनुमानमप्रयोजकत्वादिति मीमांसकमतं हृदि स्थीकृत्य शङ्कते । तच्चेति । निर्विकल्पकश्चेत्यर्थः । प्रत्यक्षसिद्धम् । अनुव्यवसायात्मकप्रत्यक्षप्रमितिगम्यम् । अभ्युपगमादिति । नैयायिकैरिति शेषः । अनुमेयम् । अनुमानगम्यम् । तच्चायं घटइत्याकारकः जन्यघटत्वविशिष्टसाक्षात्कारः जन्यघटत्वज्ञानपूर्वकः जन्यघटत्वविशिष्टज्ञानत्वात् । यद्यद्विशिष्टज्ञानं भवति तत्तज्ज्ञानपूर्वकं भवतीति सामान्यमुखव्याप्तौ दण्डीपुरुषइति प्रत्यक्षं दृष्टान्तः । नन्वत्र कार्यकारणभावादिरूपानुकूलतर्काभावादप्रयोजकत्वमित्यत आह । तथाहीत्यादि । जन्येति । जन्यतद्विशिष्टज्ञानत्वावच्छिन्नं प्रति जन्यतद्विशेषणज्ञानत्वेन हेतुत्वमिति कार्यकारणभावएवानुकूलतर्कइति भावः । घटत्वज्ञानादण्डविशिष्टज्ञानवारणाय तत्तदन्तभावः । नित्यव्यावर्तनाय च कार्यतावच्छेदके जन्यत्वप्रवेशः । नित्यस्य स्वरूपयोग्यत्वे फलाव-

शिष्टज्ञानं प्रतिजन्यतद्विशेषणज्ञानं कारणमिति निर्विवादं भवति च प्राथमिकमस्माकमयं घटइति ज्ञानजन्यघटत्वविशिष्टज्ञानम्। अतस्तत्रापि घटत्वज्ञानं कारणम्। नच तदानीं घटत्वविशिष्टज्ञानमस्ति । विशेषणीभूतस्य घटत्वस्याऽज्ञानात् तीवैशिष्ट्यानवगाहि तद्ज्ञानं तदेवच निर्विकल्पकम् । नच जन्मान्तरीयं घटत्वविशिष्टज्ञानं तत्र कारणम्। अव्यवहितपूर्वकालवर्तिनएव विशेषणज्ञानस्य तत्र हेतुत्वात्। नच भागवतं

भ्यभावइति नियमात् कारणतावच्छेदकेपि जन्यत्वप्रवेशः । वस्तुतस्तु सामानाधिकरण्यप्रत्यासत्त्या तस्य हेतुत्वबोधनाय कारणतावच्छेदके जन्यत्वनिवेशनमिति बोध्यम्। निर्विवादमिति । यथाच नविवादस्तथोपरिष्टाद्वक्ष्यते । तथाच कार्यकारणभावरूपानुकूलतर्कसत्त्वान्नाप्रयोजकत्वमनुमानस्येति भावः । पक्षेहेतुं सङ्गमयति । भवतिचेति । धारावाहिकस्थले द्वितीयादिविशिष्टज्ञानस्य पूर्वपूर्वविशिष्टज्ञानजन्यत्वसम्भवान्नतिर्विकल्पकसिद्धिरित्यतः प्राथमिकमिति । तत्रापि । घटत्वविशिष्टज्ञानेपि । ननु घटत्वप्रकारकज्ञानमेवाङ्गीक्रियतामित्याशङ्क्यनिराचष्टे । नचेति । तदानीम् । प्राथमिकघटत्वविशिष्टज्ञानात्पूर्वम् । अज्ञानादिति । तथाच विशेषणज्ञानं विना न तस्य विशिष्टज्ञानत्वमिति भावः । अतइति । विशेषणज्ञानाभावेन तस्यविशिष्टज्ञान*त्वाभावादित्यर्थः । तदिति । घटत्वविषयकं ज्ञानमित्यर्थः । ननु वैशिष्ट्यानवगाहिघटत्वविषयकज्ञानसिद्धावपि न निर्विकल्पकसिद्धिरित्यत आह । तदेवचेति । अनन्यथासिद्धपूर्ववर्त्तिनएव कारणत्वाज्जन्मान्तरीयघटत्वविशिष्टज्ञानस्य पूर्ववर्तित्वादेव कारणत्वमस्त्वित्याशङ्कते । नचेति । अव्यवहितेति । नहि पूर्ववृत्तित्वमात्रं कारणत्वघटकमपित्वव्यवहित पूर्ववृत्तित्वं तच्च न तत्रेतिभावः । कार्यमात्रं प्रति ज्ञानत्वेन हेतुत्वादीश्वरीयज्ञानस्यैव हेतुत्वमस्त्वित्याशङ्कते । नचेति । तज्जनकं । घटत्वविविशिष्टज्ञानजनकं । सामानाधिकरण्येति । एकस्य दण्डज्ञाने पुरुषान्तरस्य दण्डविशिष्टज्ञानकारणाय समवायसम्बन्धेन तद्विशिष्टबुद्धिं प्रति समवायसम्बन्धेन तद्विशेषणज्ञानस्य हेतुत्वमिति सामानाधिकरण्यप्रत्यासत्या तस्य हेतुत्वेन भगवज्ज्ञानस्य न हेतुत्वमिति भावः । व्यधिकरणत्वात् । अस्मदीयघटत्वविशिष्टज्ञानव्यधिकरणत्वात् । तत्रकारणमिति । घटत्वविशिष्टानुभवे कारणमित्यर्थः । तदेव ।

---

* सप्रकारकत्वाभावादिति भावइत्यपि पाठान्तरम् ॥

घटत्वज्ञानं तज्जनकं सामानाधिकरण्यप्रत्यासत्त्या तस्य हेतुत्वात् । भागवतज्ञानस्य च वयधिकरणत्वात् । नन्वस्तु घटत्वविशिष्टस्मरणमेव तत्र कारणम् । नच विशेषणज्ञानं विना तदेव विशिष्टज्ञानं कथमिति वाच्यम् । विशिष्टानुभवे हि विशेषणज्ञानं कारणं । नतु स्मरणेपि तेन विनापितदुपपत्तेः । अन्यथा ऽनवस्थानात् ॥

अस्तुवानिर्विकल्पकं घटत्वस्मरणमिति चेन्न अपूर्वं चैतत्वादिविशिष्टबुद्धौ तदसम्भवात् नहि चैतत्वादिकं पूर्व-

---

स्मरणात्मकविशिष्टज्ञानमेव । पूर्वानुभवस्य समवायसम्बन्धेन स्मरणपूर्वमसत्त्वादिविशिष्टज्ञानत्वस्य विशेषणज्ञानकार्यतानवच्छेदकत्वेन विशिष्टानुभवत्वमेव कार्यतावच्छेदकं वाच्यमित्याह । विशिष्टानुभवेहीत्यादिना । नतु स्मरणेपि । नतु विशिष्टस्मरणेपि । तेन विना । विशेषणज्ञानेन विना । तदुपपत्तेरिति । विशिष्टस्मरणोपपत्तेरित्यर्थः । कदाचिदपि दण्डज्ञानासत्त्वे संस्काराभावेनैव दण्डविशिष्टस्मरणाभावात्तत्र विशेषणज्ञानहेतुत्वस्य निरर्थकत्वात्पूर्वानुभवस्य विनष्टत्वादिशेषणज्ञानस्य स्मरणजनकत्वासम्भवाच्चेति भावः । ननु पूर्वानुभवस्य नष्टत्वादिशेषणज्ञानस्य स्मरणजनकत्वासम्भवेपि विशिष्टस्मरणमेवस्मरणात् पूर्वंकल्पनौयमित्यत आह । अन्यथेति । अन्यथा विशिष्टस्मरणं प्रत्यपि विशेषणज्ञानस्य हेतुत्वे पूर्वमनुभवस्यासत्त्वात्तज्जनकमपिस्मरणमेव वाच्यमेवन्तत्रापि स्मरणान्तरमित्यनवस्थेत्यर्थः ॥

नन्वनुभवत्वजातौ मानाभावेन स्मृत्यन्यज्ञानत्वरूपस्य तस्य निर्विशे गौरवाद्विशिष्टज्ञानमात्रे विशेषणज्ञानस्य हेतुत्वेन विशिष्टस्मरणं प्रत्यपि विशेषणज्ञानं हेतुः नचानवस्था तत्पूर्वनिर्विकल्पकात्मकस्मृतेरेवोपगमात् नच ममापि घटत्वविशिष्टानुभवपूर्वं घटत्वविशिष्टस्मरणस्य तत्पूर्वंच घटत्वनिर्विकल्पकस्मरणस्य कल्पनेन न दोषइति वाच्यम् तत्पूर्वं ज्ञानद्वयकल्पने गौरवात् तदपेक्ष्य घटत्वनिर्विकल्पकानुभवस्यैवस्वीकर्त्तुमुचितत्वादित्यत आह । अस्तुवेति । तथासति ममापि घटत्वविशिष्टानुभवपूर्वं घटत्वनिर्विकल्पकस्मरणमेव कल्प्यतइति न ज्ञानद्वयकल्पने गौरवमिति भावः नच निर्विकल्पकात्मकस्मृतिस्वीकारान्निर्विकल्पकात्मकं ज्ञानं सिद्धमेवेति क्षतिवादइति वाच्यम् तथा-

अनुभूतं यतः स्मरेत् । नचानुभवं विनैव तत्र स्मरणं । तत्र तद्धेतुत्वात् ॥

पि निर्विकल्पकानुभवस्यासिद्धत्वादिति । ननु निर्विकल्पकात्मकस्मरणमेवानुपपन्नम् तद्विशेष्यकतत्प्रकारकस्मृतिं प्रति तद्विशेष्यकतत्प्रकारकसंस्कारत्वेन हेतुत्वाज्ज्ञापमानं सप्रकारकमेव स्यात्तु निष्प्रकारकमिति चेत् तद्विषयकस्मृतिं प्रति तद्विषयकसंस्कारत्वेनापि सामान्यकार्यकारणभावकल्पनादिशेषणज्ञानं विनाजायमानं ज्ञानं निर्विकल्पकमेव जायतइति दिक् । ननु सर्वत्र विशिष्टानुभवपूर्वं विशिष्टस्मरणस्य निर्विकल्पकात्मकस्मरणस्य वा हेतुत्वकल्पने तत्स्मरणे ऽनुभवः कारणं तदनुभवे च स्मरणान्तरमित्यनवस्था किञ्चपूर्वानुभूतपदार्थस्य आद्यानुभवे स्मरणमेव कारणं वाच्यम् तच्च न सम्भवति तज्जनकानुभवाभावात् जन्मान्तरीयानुभवबलादेव स्मरणोपगमे च जन्मान्तरानुभूतानां घटादिपदार्थानामपि स्मृतिप्रसङ्गादिति चेन्न आद्यानुभवजनकस्मरणस्य जन्मान्तरीयानुभवादेवानायत्या अदृष्टविशेषरूपोद्बोधकसहकारादुपपत्तेः नच घटादिस्मृतिप्रसङ्गः तत्र फलोत्पत्तेरभावेनादृष्टस्योद्बोधकत्वाकल्पनात् अनवस्थापाच्च प्रामाणिकत्वेनादुष्टत्वादिति न किञ्चिदेतत् । तदसम्भवात् । स्मरणासम्भवात् । तत्वदृष्टविशेषरूपोद्बोधकवशाज्जन्मान्तरानुभूतचैत्रत्वादिकमपिपर्य्यस्मतामित्यतआह । नहीति । पूर्वमिति । जन्मान्तरइत्यर्थः । अनभूतमिति । चैत्रत्वादिजातेस्तच्छरीरवृत्तित्वेन चैत्रशरीरस्य च जन्मान्तरेऽभावेन तद्वृत्तिचैत्रत्वादेर्ग्राहकाभावादनुभवासम्भवेन तत्स्मृतिसम्भवः तत्स्मरणस्य तदनुभवपूर्वकत्वनियमादितिभावः । नन्वप्रयोजकोयं नियमोनादरणीयइत्यतआह । नचेति । तस्य । अनुभवस्य । तद्धेतुत्वात् । स्मरणहेतुत्वात् । तथाच स्मृतित्वावच्छिन्नं प्रत्यनुभवस्य हेतुतया न तादृशनियमस्याप्रयोजकत्वमिति भावः नचेदृशकार्यकारणभावेमानाभावइति वाच्यम् तथासति कदाचिदननुभूतस्यानुभूतस्य वा तदंशे उपेक्षात्मकज्ञानविषयस्य स्मरणापत्तेरुपेक्षान्यज्ञानत्वे तद्धेतुतायां आवश्यकत्वात् नच संस्काराभावात्तेयमापत्तिरिति वाच्यम् । संस्काररूपव्यापारद्वारातस्यापि हेतुत्वात् व्यापारेण व्यापारिणोऽन्यथासिद्धाभावेन संस्कारेणानुभवान्यथासिद्धेरसम्भवात् उपजीव्यविरोधाच्च तथाहि आशुविनाशिनः कालान्तरभाविफलं प्रति कारणत्वं व्यापारं विनाऽनुपपन्नमित्यनुपपत्तिज्ञानाच्चिरध्वस्तानुभवस्य कालान्तरीयस्मृतिहेतुत्वोपपत्त्यर्थं व्यापारे कल्पनीये संस्कारएव आधारः कल्पातइत्यनुभ-

किञ्च यत्र घटत्वं न स्मृतं तत्र विशिष्टज्ञानसामग्र्यभावा-द् घटघटत्वयोः साक्षात्कारसामग्रीतः साक्षात्कारोत्पत्तौ

वस्य कारणत्वमुपजीव्यैव संस्कारसिद्धिरिति । ननु तर्हि कृत्स्नत्वादनुभवध्वंस-स्य व्यापारत्वमास्तांकृतमकृत्स्नसंस्कारकल्पनेन नचकारणीभूताभावप्रतियो-गित्वस्यैवप्रतिबन्धकत्वपदार्थत्वात्स्मृतिकारणीभूतानुभवध्वंसप्रतियोगित्वस्या-नुभवे सत्त्वात्तत्प्रतिबन्धकत्वापत्त्या न तस्य तद्धेतुत्वमिति वाच्यम् प्रतिबन्ध-कसंसर्गाभावत्वेनैव कार्यमात्रे हेतुतया संसर्गाभावत्वावच्छिन्नकारणतायाः एव प्रतिबन्धकत्वशरीरघटकत्वात् स्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन सं-सर्गाभावत्वावच्छिन्न कारणतावच्छेदकोयोधर्मस्तद्धत्वस्यैव प्रतिबन्धकत्वपदा-र्थत्वात् तद्धर्मावच्छिन्नकार्यतानिरूपितसंसर्गाभावत्वावच्छिन्नकारणतानिरू-पितस्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धावच्छिन्नावच्छेदकतात्र्यधर्मवत्त्वस्य तद्धर्मावच्छिन्नप्रतिबन्धकत्वपदार्थत्वादितिनिष्कर्षः; तथाचानुभवध्वंसस्य ध्वं-सत्वेन कारणतयाऽभावत्वेनाकारणत्वान्न प्रतिबन्धकत्वापत्तिरिति चेत् त-र्हि सर्वांशेउपेक्षात्मकज्ञानादपि स्मरणापत्तेः; अस्मन्मते चोपेक्षान्यज्ञानत्वेन संस्कारहेतुतया तदभावादेवास्मरणात् नच स्मरणं प्रत्येव तेन रूपेण हेतुत्वम सुक्तम मन्तर्गडुनासंस्कारेणेति वाच्यम् उपेक्षात्वस्यैकस्याभावेन तत्तद्व्यक्ति-त्वावच्छिन्नप्रतियोगिताकभेदकूटस्यैव निवेशनीयतया स्मृतिजनकतायां सर्वांशेउपेक्षाभेदानामांशिकोपेक्षाभेदानामेकत्र निवेशप्रसङ्गेन तेषां मि-थोविशेषणविशेष्यभावे विनिगमनाविरहेण कार्यकारणभावानन्त्यप्रसङ्गात् मन्मतेच संस्कारजनकतावच्छेदककोटौ सर्वांशेउपेक्षाभेदानामांशिकोपेक्षा-भेदानां च स्मृतिजनकतावच्छेदककोटौ निवेशेनैकत्र तेषामनिवेशाल्ला-घवमखण्डितमेवेति संस्कार सिद्धेरावश्यकत्वादितिलक्षं पल्लवितेन ॥

ननु प्रमेयवानित्यनुभवे प्रमेयत्वेन चैत्रत्वविशिष्टस्यापि पूर्वमनुभूतत्वाद्-द्रष्टविशेषस्य च प्रमेयत्वांशे उद्बोधकत्वाकल्पनेन केवलंचैत्रत्वविशिष्टस्मरणोप-पत्तिः तदंशेऽन्याप्रकारकतत्प्रकारकस्मृतिं प्रति तदंशेऽन्याप्रकारकत्वेन तु नानुभवस्य हेतुत्वं जातिमानित्यनुभवोत्तरंसघटइतिस्मरणापत्तेश्च । जा-तित्वांशे उद्बोधकलाभस्य कल्पनेनैव वारणात् उद्बोधकलाभालाभयोः फलो-न्मेषादित्यादि अनयैवच दिशा अदृष्टद्वारत्वादिमनः पदादिशक्तिग्रहोपीत्यत आह । किंचेति । नस्मृतमिति । उद्बोधकविरहादिति शेषः । विशिष्टज्ञा-नसामग्र्यभावात् । घटत्वज्ञानरूपघटत्वप्रकारकज्ञानसामग्र्यभावात् । सा-

न किञ्चिद्बाधकमस्ति । तदेवचास्माकंनिर्विकल्पकमिति सङ्क्षेपः
ननु विशेषणज्ञानस्य हेतुतासिद्धौ सर्वमेतदेवंस्यात्तदेव
नुमानन्नपश्यामइति चेन्न ॥ अन्वयव्यतिरेकाभ्यान्तदवधार-
णात् विस्तरस्तुमणिमरीचावनुसन्धेयः ॥ वैशिष्ट्यावगाहि-

साक्षात्कारसामग्रीतः । चक्षुःसंयोगचक्षुःसंयुक्तसमवायरूपचाक्षुषप्रत्यक्षसामग्रीतः । साक्षात्कारोत्पत्तौ । चाक्षुषप्रत्यक्षोत्पत्तौ । अत्रेतावतासाक्षात्कारोत्पत्तावपि न निर्विकल्पकसिद्धिरित्यतआह । तदेवचेति । घटत्वज्ञानशून्यकाले जायमानं प्रत्यक्षमेवेत्यर्थः । अस्माकन्नैयायिकानां । निर्विकल्पकमिति । तथाच घटत्वज्ञानाभावाज्जायमानं घटत्वज्ञाननिष्प्रकारकमेव भविष्यतीति सिद्धन्निर्विकल्पकात्मकं ज्ञानमितिभावः ॥

ननु रक्तो दण्डीनवेति संशये रक्तत्वविशिष्टदण्डवैशिष्ट्यावगाहिज्ञानानुदयादिशिष्टवैशिष्ट्यावगाहिबुद्धिं प्रति विशेषणतावच्छेदकप्रकारकनिर्णयत्वेन हेतुतायाआवश्यकत्वात्तत्तएव दण्डज्ञानशून्यकाले दण्डविशिष्टपुरुषज्ञानानुत्पत्तिनिर्वाहेऽलंविशिष्टबुद्धिं प्रति विशेषणज्ञानस्य हेतुतया नच विशिष्टस्य वैशिष्ट्यमिति, न्यायेन विषयता*शालिबुद्धिं प्रत्येव विशेषणतावच्छेदकप्रकारकनिर्णयस्य हेतुत्वेन दण्डज्ञानशून्यकाले विशेष्ये विशेषणान्तरेपि विशेषणान्तरमिति, न्यायेन दण्डविशिष्टज्ञानापत्तिवारणाय तद्धेतुत्वमावश्यकमिति वाच्यम् तथापि तद्धेतोरेवेति न्यायेन, विशेषणविशेष्ये न्द्रियसन्निकर्षादेव विशिष्टप्रत्यक्षोपपत्तेः अनुमित्यादौ तु परामर्शादिरेव नियामकइतिन्यायेन मीमांसकमाशङ्कते । नन्विति । हेतुतासिद्धौ । विशिष्टज्ञानं प्रति हेतुता सिद्धौ । सर्वमेतत् । निर्विकल्पकादिसाधनम् । एवंस्यात् । पूर्वोक्तन्यायेन सयुक्तिकंस्यात् । तदेवचेति । विशेषणज्ञानस्य विशिष्टज्ञानहेतुत्वएवचेत्यर्थः । मानमिति । विशेषणविशेष्ये न्द्रियसन्निकर्षादेव तदुपपत्तेस्तत्र प्रमाणाभावइत्यर्थः । प्रमाणाभावस्यच प्रमेयाभावव्याप्यत्वादिति भावः । अन्वयव्यतिरेकाभ्यामिति । विशेषणज्ञानसत्त्वे विशिष्टज्ञानं विशेषणज्ञानाभावे विशिष्टज्ञानाभावइत्येवंरूपान्वयव्यतिरेकाभ्यामित्यर्थः । तदवधारणात् । विशेषणज्ञानस्य विशिष्टबुद्धिहेतुत्वावधारणात् । यथान्वयव्यतिरेकाभ्यां दण्डे घटकारणत्वग्रहस्तथा प्रकृतेपीति भावः । ननु न केवलमन्वयव्यतिरेकावेव कारणताग्राहकावतिप्रस-

* विशिष्टज्ञानीय विषयतायाशालि बुद्धिं प्रतीतार्थस्तेन निर्विकल्पकेतुरीय विषयतासत्त्वे पिनदोष इतिभावः ॥

सप्रकारकं, वा ज्ञानं सविकल्पकम् ॥ प्रकारतायाश्चायङ्घटत्वा-दिज्ञाने विशेषणस्य घटत्वादेर्विशेषणत्वापरनामाविष-

---

ङ्गादपिवनन्यथासिद्धान्वयव्यतिरेकावेव प्रकृते च विशेषणविशेष्येन्द्रियसन्नि-कर्षेण विशेषणज्ञानस्यान्यथासिद्धत्वान्न तथाविधयोस्तयोस्सम्भवइत्यत आह । विस्तरस्त्विति । अनुसन्धेयइति । कदाचिद्घटइति स्वरूपतोघटत्वप्रकारक-ज्ञानस्य, कदाचिच्च जातिमानिति जातित्वरूपेणघटत्वप्रकारकज्ञानस्योत्प-त्तिरिति नियमनिर्वाहाय स्वरूपतोघटत्वविशिष्टबुद्धिं प्रति स्वरूपतोघटत्व-ज्ञानत्वेन, जातित्वेन घटत्वविशिष्टबुद्धिं प्रति च जातित्वेन, घटत्वज्ञानस्य हे-तुतायां आवश्यकतया विशेषणज्ञानस्यहेतुतासिद्धिः । अथ घटत्वज्ञानसत्त्वेपि कदाचिदयङ्घटइत्याकारकघटत्वप्रकारकज्ञानस्य कदाचिच्चाघघटत्वमित्या-कारकघटत्वविशेष्यकज्ञानस्योत्पत्त्या तन्निर्वाहायानायत्यातत्तज्ज्ञानेऽदृष्टविशे-षस्यैव नियामकत्वकल्पनमावश्यकं तथाच प्रकृतेप्यदृष्टविशेषेणैव तथाविधका-दाचित्कज्ञानद्वयोपपत्तेरलं विशेषणज्ञानस्य हेतुतयेति चेन्मैवं तत्र गत्यन्त-राभावेनादृष्टस्य नियामकत्वकल्पनेपि प्रकृते दर्शितरीत्या गतिसम्भवेऽदृष्टवि-शेषस्यैव नियामकत्वकल्पनाया अन्याय्यत्वात् एकत्रादृष्टस्य नियामकत्वकल्पना-दन्यत्रापि तस्यैवनियामकत्वकल्पने कार्यकारण भावमात्रोच्छेदापत्तेरिति । ननु तथापि स्वरूपतो घटत्वविशिष्टबुद्धित्वं नाम घटत्वांशेऽन्याप्रकारकघट-त्वप्रकारकबुद्धित्वं तत्र जातित्वादिभासकसामग्रीसत्त्वे जामानं ज्ञानं घटत्वां-शेऽन्यप्रकारकमेवोत्पद्यते तदंशे जातित्वादिभासकसामग्र्यासत्त्वे च घटत्वांशे-ऽन्याप्रकारकमेव जायतइति तादृशधर्मस्य नोलेतरघटत्वादिवदर्थसमाज-ग्यत्वेन जन्यतानवच्छेदकत्वात्कथं तादृशज्ञानं प्रति स्वरूपतो घटत्वज्ञा-नस्य हेतुत्वकल्पयित्वा विशेषणज्ञानस्य हेतुत्वसिद्धिरिति चेन्न । जातित्वभास-कसामग्रीसत्त्वेपि जातिमान् घटइति स्वरूपतोघटत्वविशिष्टबुद्ध्युदयादघट-त्वांशे निरवच्छिन्नप्रकारतायालिबुद्धित्वमेव स्वरूपतो घटत्वविशिष्टबुद्धित्वं तदवच्छिन्नंप्रति च स्वरूपतोघटत्वज्ञानस्यहेतुत्वकल्पनंविना आपत्तिवारणा-सम्भवादिति । ननु नित्यात्यावर्त्तनाय जन्यविशिष्टज्ञानत्वमेव विशेषणज्ञा-नकार्यतावच्छेदकं वाच्यं तत्र जनार्त्वध्वंसप्रतियोगित्वं प्रागभावप्रतियो-गित्वं वा कालिकसम्बन्धेन घटादिमत्त्वेतत्र विनिगमनाविरहइति चेन्न नित्यावृत्तिधर्मस्यापि कार्यतावच्छेदकते क्षतिविरहात् । अथैवं कारणतानु-

पपत्तिः कारणत्वं हि कार्याव्यवहितपूर्वक्षणावच्छेदेन कार्याधिकरणदेशनिष्ठाभावप्रतियोगितानवच्छेदकधर्मवत्त्वं तच्चघटाधिकरणकपालेयत्किञ्चिद्घटाव्यवहितपूर्वक्षणावच्छेदेन दण्डाभावसत्त्वात्कारणत्वानुपपत्तिरिति तत्तत्कार्याव्यवहितपूर्वक्षणावच्छेदेन तत्तत्कार्याधिकरणवृत्तयभावप्रतियोगितानवच्छेदकधर्मवत्त्वंवाच्यं तथासति घटत्वावच्छिन्नं प्रति रासभत्वेनापि कारणत्वप्रसङ्गः यत्किञ्चिद्घटाव्यवहितपूर्वक्षणावच्छेदेन कपाले तस्य सत्त्वात् तथाच कार्यतावच्छेदकावच्छिन्नयावद्व्यक्तीस्तत्तद्व्यक्तित्वेन धृत्वा तत्तत्कार्याव्यवहितपूर्वक्षणावच्छेदेन तत्तत्कार्याधिकरणवृत्तयभावेतेयत्व वाच्यम् एवं च नित्यवृत्तिधर्मस्य कार्यतावच्छेदकत्वे कार्यतावच्छेदकावच्छिन्नयावन्मध्ये नित्यव्यक्तेरपि प्रविष्टतया तदव्यवहितपूर्वक्षणाप्रसिद्धेरिति चेन्न कार्यकारणभेदेनकारणतायाभिन्नतया प्रकृते नित्यव्यक्त्यतिरिक्तव्यक्तीनामेव तत्तद्व्यक्तित्वेनोपादानात्तत्साधारणरूपेणकार्यत्वेपि कारणत्वे बाधकाभावात् एवं समवायकालिकविशेषणतोभयसम्बन्धेन विशिष्टज्ञानत्वस्यकार्यतावच्छेदकत्वेन नित्यसाधारण्याभावाच्च वस्तुतस्तुजन्यप्रत्यक्षमात्रवृत्तिवैजात्यं स्वीकृत्य विजातीयविशिष्टज्ञानत्वस्यैव तत्कार्यतावच्छेदकत्वाच्चाक्षुषत्वादिना सङ्करभयाच्च निर्विकल्पकेपि तद्वैजात्यस्वीकारः अतएव जन्यधीजन्यमात्रवृत्त्येतादृशवैजात्यशून्यत्वाभावाज्जन्यसाक्षात्कारे प्रागुक्तसाक्षात्कारलक्षणस्याव्याप्तिरितिपरास्तम् तस्य निर्विकल्पकसाधारण्येन जन्यधीजन्यमात्रवृत्तित्वाभावात् मानसावृत्तित्वाभावाच्च तल्लक्षणे मानसावृत्तित्वेन ज्ञानत्वविशेषणीयत्वादित्युक्तत्वादितिदिक् ॥

निर्विकल्पकनिरूप्य क्रमप्राप्तं सविकल्पकनिरूपयति । वैशिष्ट्यावगाहीति । सम्बन्धविषयकमित्यर्थः । नन्विन्द्रियसम्बद्धविशेषणतारूपकारणतावलान्निर्विकल्पकेपि सम्बन्धभाने बाधकाभावात्तस्यापि वैशिष्ट्यावगाहित्वमस्तीत्यति व्याप्तिरित्यस्वरसादाह । सप्रकारकंवेति । किञ्चिन्निष्ठप्रकारताशालीत्यर्थः । निर्विकल्पकेच प्रकारतयाघटत्वादेरभानान्न तत्रातिव्याप्तिरितिभावः वस्तुतस्तु वैशिष्ट्यावगाहीत्यस्य संसर्गमर्यादया वैशिष्ट्यावगाहीत्यर्थः किञ्चिन्निष्ठसांसर्गिकविषयताशालित्वमितिपर्यवसितोर्थः । ननुकिञ्चिन्निष्ठप्रकारताशालित्वमित्यपि वक्तुंशक्यतएवेति तत्कुतोनोक्तमित्यत इष्टापत्त्या तथेवाह । सप्रकारकमिति । इदमुपलक्षणम् किञ्चिन्निष्ठविशेष्यताशालित्वमित्यपि तत्त्वमिति बोध्यम् । ननुसप्रकारकमित्यत्र प्रकारत्वनिवेशात्किन्तत्प्रकारत्वमित्यतस्तन्निरूपयति । प्रकारताचेति । ज्ञान-

यताविशेषः विषयता च विषयाकारप्रतीतिसाक्षिकः स्व-
रूपसम्बन्धविशेषः
पदार्थान्तरमित्यन्ये ॥

इति । निरूपितत्वं सप्तम्यर्थः । घटत्वादेरिति । निष्ठत्वंषष्ठ्यर्थः । ज्ञाननिरूपितोघटत्वनिष्ठोविषयता विशेषइत्यर्थः । विषयताविशेषइति । विशेष्यतारूप्यविषयताप्रकारताख्यविषयतासांसर्गकविषयतारूपत्रिविधिविषयताभेदइत्यर्थः । ननुकिन्तद्विषयत्वमतआह । विषयताचेति । विषयेति । घटोज्ञानविषयइत्यनुगतप्रतीतिसाक्षिकइत्यर्थः । स्वरूपसम्बन्धविशेषइति । ज्ञानविषयरूपस्वरूपसम्बन्धइत्यर्थः ॥

ननुविषयतायाः स्वरूपसम्बन्धत्वाङ्गीकर्तृप्राचीनमतेतस्याज्ञानस्वरूपत्वं विषयस्वरूपत्वंवा नतावद्याद्यः ज्ञानरूपघटभूतलवृत्तिविषयतयोरैक्येन घटवद्भूतलमितिज्ञानोत्तरं घटनिष्ठप्रकारतानिरूपितभूतलनिष्ठविशेष्यताशालिज्ञानवानहमित्याद्यनुव्यवसायवद्भूतलनिष्ठप्रकारतानिरूपितघटनिष्ठविशेष्यताशालिज्ञानवानहमित्याद्यनुव्यवसायापत्तेः घटपटाविति समूहालम्बनज्ञानस्य भ्रमत्वापत्तेश्च तज्ज्ञानस्यैक्येन तत्स्वरूपघटपटादिविषयतायाअप्यभेदेन . घटत्वाभाववन्निष्ठविशेष्यतानिरूपितघटत्वनिष्ठप्रकारताशालिज्ञानत्वरूपभ्रमत्वस्य तत्रसत्त्वात् । नहितोयं घटभूतलसंयोगाःघटवद्भूतलमितिसमूहालम्बनविशिष्टबुद्धोर्विषयाणामैक्येनविषयक्षतवैलक्षण्याभावाद्विषयताक्षतमेव वैलक्षण्यंवाच्यं तच्च विषयतायाविषयस्वरूपत्वेनतत्स्वरूपाणां तासामपिवैलक्षण्याभावात्समूहालम्बनविशिष्टबुद्धोर्वैलक्षण्यानुपपत्तिर्जागरूकैव नचसमूहालम्बनाविषयस्य घटप्रतियोगिकत्वभूतलानुयोगिकत्वरूपसम्बन्धसम्बन्धस्यापि विशिष्टबुद्धिविषयत्वान्नवैलक्षण्यानुपपत्तिरिति वाच्यम् । घटभूतलसंयोगप्रतियोगित्वानुयोगित्वानीतिसम्बन्धसम्बन्धविषयकस्यापि समूहालम्बनस्य सम्भवात् नचसमूहालम्बने संयोगत्वेन संयोगभानान्नानुपपत्तिरिति वाच्यम् घटवद्भूतलं संयोगश्चेति विशिष्टज्ञानस्य ताद्दशसमूहालम्बनाद्वैलक्षण्यानुपपत्तेरितितस्याः स्वरूपसम्बन्धरूपत्वं दुर्वचमित्यतआह । पदार्थान्तरमिति । तच्चातिरिक्तायाविषयतायाविषयभेदेन भिन्नतया न पूर्वोक्तानुपपत्तिरिति भावः । केचित्तु । स्वरू-

भट्टास्तु ज्ञातोघटइतिप्रतीतेर्ज्ञानजन्योविषयनिष्ठः प्राक्-द्यापरनामापदार्थोज्ञाततास्वैवचविषयताज्ञानविषययोः स-म्बन्धश्चरूपायुक्तश्चैतत्कथमन्यथा ज्ञानकर्मत्वंघटादेः क्रि-या जन्यफलशालित्वाभावादित्याहुः ॥ तन्न ॥ विनष्टेघटे-ज्ञातोघटइतिप्रतीतेः । नहितत्रज्ञानं किञ्चिज्जनयितुंश-क्नोति तस्यैवासत्त्वात् नचसमवायिकारणं विना भावका-

---

र्यसम्बन्धरूपायाविषयतायाः अननुगमेनानुगतप्रत्ययानुपपत्तिरित्यत आह । पदार्थान्तरमित्याहुः । तदसत् । तस्यातिरिक्तत्वेपि तत्तद्विषयभेदेन-भिन्नतयाऽनुगतप्रत्ययानुपपत्तितादवस्थ्यात् नचानुगतप्रत्ययानुपपत्तिः क-थंवारणीयेति वाच्यम् विषयतात्वमेकमङ्गीकृत्येत्यवेहि अतएव घटत्वविशि-ष्टबुद्धिं प्रति घटत्वविषयकज्ञानत्वेन हेतुतायां विषयतायाः प्रकारतादि-श्रेष्यतादिभेदेन भिन्नतया एकस्याः निर्विशेष्यविधविषयतायालिङ्गानाद् विशिष्टबुद्ध्यनुत्पत्त्यापत्तिरपि निरस्ता । तत्र विषयतात्वेन प्रकारताविशेष्य-तयोरनुगमेनानुपपत्त्यभावादित्यास्तांविस्तरः ॥

घटंजानातीत्यादौ ज्ञानजन्यं घटनिष्ठं ज्ञाततारूयं पदार्थान्तरमङ्गीकार्यम् अन्यथा घटस्य कर्मत्वानुपपत्तेः क्रियाजन्यफलशालित्वस्यैवकर्मत्वरूप-त्वात् तत्र च ज्ञानं, निमित्तकारणं, समवायिकारणञ्च, घटस्तदेवच विष-यत्वमिति निष्कृष्टभट्टमतमादर्शयति । भट्टास्त्विति । ज्ञानजन्यः । नि-मित्तकारणविधया ज्ञानजन्यः । विषयनिष्ठइति । समवायेन विषयवृत्तिरि-त्यर्थः । सैवच । ज्ञाततैवच । सम्बन्धस्वरूपेति । अतिरिक्तसम्बन्धस्वरूपे-त्यर्थः । युक्तं । सयुक्तिकम् । एतत् । ज्ञानजन्यविषयनिष्ठज्ञाततारूपपदा-र्थान्तराङ्गीकरणम् । अन्यथेति । ज्ञानजन्यविषयनिष्ठज्ञाततारूपपदार्थान्त-रानङ्गीकारेइत्यर्थः । ज्ञानकर्मत्वमिति । घटंज्ञानातीत्यादौघटादेः क्रिया-जन्यफलशालित्वरूपकर्मत्वमित्यर्थः । क्रियेति । ज्ञानरूपधात्वर्थजन्यफलव-त्त्वाभावादित्यर्थः । विनष्टइति । घटस्यनष्टत्वेनतत्रज्ञानजन्यज्ञाततायाः असम्भवादितिभावः । तदेवोपपादयति । नहीति । तत्र । विनष्टे घटे । तस्यैव । घट-स्यैव । असत्त्वात् । नष्टत्वात् । ननुयथा मनसा नष्टे घटेपिविषयता-सम्बन्धेनज्ञानमुत्पद्यते तथा ज्ञानेनापि तत्र तदुत्पादनेबाधकाभाव इ-त्यतआह । नचेति । समवायिकारणस्य कार्यसहभावेन हेतुत्वाद् घटनाशेन तदुत्पत्तिसम्भवः अन्यथा समवायिकारणनाशस्य समवेत-

यैवोत्पत्तिः सम्भवति तच्च स्वरूपसम्बन्धएव प्रतीतेर्विषयइति-चेदन्यत्रापि सएवास्तु कृतमधिकेन कर्मविभक्तेरपि तद्वदे-वोपपत्तेरिति सङ्क्षेपः ॥

अन्येतु भासमानवैशिष्ट्यप्रतियोगित्वं प्रकारत्वम् अयंघ

नाशे हेतुत्वाज्ज्ञाततोत्पत्तिद्वितीयक्षणएव तस्यानाशापत्त्याक्षणिकत्वप्रसङ्ग-इति भावः । ननुतत्र विषयतायाज्ञाततारूपत्वाभावेपि स्वरूपसम्बन्धरूप-त्वमेवास्तामित्याशङ्क्यते । तत्रेत्यादिना । तत्र । नष्टघटस्थले । प्रतीतेः । ज्ञातोघटइति प्रतीतेः । अन्यत्रापीति । विद्यमानघटस्थलेपीत्यर्थः । सए-वास्त्विति । स्वरूपसम्बन्धएवविषयोस्त्वित्यर्थः । अधिकेनेति । स्वरूपसम्ब-न्धातिरिक्तज्ञाततारूपविषयतास्वीकारेणेत्यर्थः । ननुसर्वत्र स्वरूपसम्बन्धस्य विषयत्वरूपत्वे तस्य ज्ञानजन्यत्वाभावाद्घटस्य क्रियाजन्यफलशालित्व-रूपमुख्यकर्मत्वाभावेन(कर्मणिद्वितीयेति) सूत्रेण घटज्ञानातीतत्वादीघटपदो-त्तरं द्वितीयाविभक्त्यनुपपत्तिरितिताशङ्क्याह । कर्मविभक्तेरपीति । द्वितीया विभक्तेरपीत्यर्थः । तद्वदेव । नष्टघटस्थलवदेव । तथाचत्वयानष्टघट स्थलेघटपदोत्तरंद्वितीयोपपत्त्यर्थंक्षीणमुख्यसाधारणकर्मत्वविशिष्टपरत्वं (क-र्मणि द्वितीयेति) सूत्रस्थकर्मपदस्यावश्यमङ्गीकार्यं ममापि च तेनैव विद्य-मानघटस्थलेपिघटपदोत्तरंद्वितीयोपपत्तिरितिभावः । एवंचक्रियाजन्यफलशा लित्वरूपमुख्यकर्मत्वाभावेपि सविषयकधातुसमभिव्याहारस्थले वि-षयत्वरूपक्षीणमेव कर्मत्वमिति नानुपपत्तिरिति हृदयम् । ननु तन्मतेऽभा-वोज्ञाततइति प्रतीत्या अभावेपि ज्ञाततायाः अवश्यमङ्गीकारात्समवायि-कारणं विना भावकार्यस्योत्पत्त्यसम्भवइति न नियमस्तथाच .नष्टघटस्थलेपि नानुपपत्तिरित्यत आह । सङ्क्षेपइति । समवायस्यातिरिक्तस्य तैरनङ्गी-कारादिलक्षणस्वरूपसम्बन्धेन तस्याश्रयत्वमेव समवायिकारणत्वम् एवंच वि-लक्षणस्वरूपसम्बन्धेन स्वाश्रयं विना स्वस्यानुत्पत्तिरित्येव नियमः अभावस्थले च विलक्षणस्वरूपसम्बन्धेन स्वाश्रयत्वमभावस्याङ्गीक्रियते । विलक्षणस्वरूप-सम्बन्धेन स्वाश्रयघटस्यासत्त्वाच्च नष्टघटस्थलेऽनुपपत्तिर्जागरूकैवेति भावः स्वमतावष्टम्भेनेदन्दूषणमित्यपि केचित् । वस्तुतस्तु गौणकर्मत्वेनाप्युपपत्ते-रतिरिक्तज्ञाततायां प्रमाणाभावान्न तद्रूपत्वंविषयतायाइत्येव दूषणं सा-रम् ।

प्रकारतानविषयतावि शेषः किन्तुप्रतियोगित्वमेवेत्यङ्गीकर्त्तृणाङ्क्षिपंश्चिन्म-तमाह । अन्येत्वित्यादिना । भासमानं यद्वैशिष्ट्यं सम्बन्धस्तत्प्रति-

टत्वस्य हि घटत्वस्य वैशिष्ट्यमासते तत्प्रतियोगिच घटत्व-मित्याहुस्तन्न । दण्डपुरुषसंयोगादिति समूहालम्बने दण्डी पुरुषइतिवद्दण्डस्य प्रकारतापत्तेः संयोगोहि दण्डस्य वै-शिष्ट्यमासते तत्प्रतियोगी च दण्डइति दिक्॥

तच्चप्रत्यक्षमिन्द्रियात्मकं द्वेधा द्रव्यग्राहकमद्रव्यग्राहकञ्चेत्र-

---

योगित्वमित्यर्थः । पुरुषेदण्डइतिज्ञानेपिदण्डस्य प्रकारतापत्तिः संयोग-प्रतियोगित्वस्य दण्डे सत्त्वादतोभासमानेति तज्ज्ञाने च दण्डप्रति-योगिकसंयोगाभानान्नातिव्याप्तिः । प्रतियोगित्वंच स्वरूपसम्बन्धविशेषएवं । इदमेवसङ्गमयति । अयमिति । घटत्वस्य वैशिष्ट्यम् । घटत्वनिरूपित-समवायः । संयोगोहीति । वस्तुगत्या भासमानोयः संयोगस्तत्प्रतियोगि-त्वस्य दण्डे सत्त्वात्प्रकारत्वापत्तिरित्यर्थः । ननु तत्प्रतियोगिकत्वेनभास-मानंयद्वैशिष्ट्यं तत्प्रतियोगित्वमित्यर्थः समूहालम्बनविशिष्टबुद्ध्योर्भेदानु-पपत्त्याविशिष्टज्ञाने प्रतियोगित्वानुयोगित्वरूपसम्बन्धसम्बन्ध्योपि भासतइ-त्युपेयते समूहालम्बने च दण्डप्रतियोगिकत्वेनसंयोगस्याभानान्नातिव्याप्ति-रितत आह । दिगिति । तथापि दण्डपुरुषदण्डप्रतियोगिकसंयोगादिति समूहालम्बनेऽतिव्याप्तिः नचात्र दण्डप्रतियोगिकत्वस्यसम्बन्धसम्बन्धविधया न भानमितिवाच्यम् तथा सति सांसर्गिकविषयतायां अतिरिक्तत्वाभ्यु-पगमेकिमपराद्धं प्रकारतया । सम्बन्धसम्बन्धस्यविशिष्टज्ञानविषयत्वे गौ-रवञ्च विषयतातवैलक्षण्याभावेपि विषयतातवैलक्षण्येनैव ज्ञानानां वैलक्षण्योपपत्तेरित्याद्यूह्यम् ।

तच्चेति । साक्षात्कारकरूपप्रमाकरणञ्चेत्यर्थः । तृतीयानुव्यवसायरूपप्रमाक-रणत्वस्य व्यवसाये सत्त्वाद्ज्ञानोपादानोपेक्षादिप्रमाकरणत्वस्य च निर्विक-ल्पके सत्त्वात्सविकल्पकादिरूपप्रमाकरणत्वस्य चक्षुरादिसंयोगे सत्त्वात्तस्य बहुविधत्वमितिमतनिराकरणायाह । इन्द्रियात्मकमिति । चक्षुरादिकमेव प्रत्यक्षप्रमाणमन्येषां तु व्यापारत्वमिति भावःवस्तुतस्तु प्रत्यक्षप्रमाभ्रम-निराकरणायाह । इन्द्रियेति । द्रव्यग्राहकत्वम् । द्रव्य विषयकलौकिकसा-क्षात्कारजनकतावच्छेदकधर्मवत्त्वम् तेनोपनीतभानमादायनरसनेन्द्रिया-दावतिप्रसङ्गः अनुपधायकत्वञ्चक्षुषः सङ्ग्रहायजनकतावच्छेदकधर्मव-

व्यग्राहकाणिचक्षुस्त्वङ्मनांसि ॥ अन्यद् घ्राणं रसनं श्रवणं च मनुमनसोद्रव्यग्राहकत्वे सत्यन्यस्यापि विप्रकृष्टघटोपलब्ध्यापत्तिः ॥ नच तदात्ममात्रग्राहकं सर्वविषयकसिद्धान्तव्याघातात् ॥

उच्यते मनः सर्वविषयकमपि बहिर्विषयज्ञानजनने परतन्त्रं परंचचक्षुरादयुपस्थितियोगजधर्मः सामान्यलक्षणा च न पुनश्च क्षुरादिमात्रं संस्कृतपदार्थानां मनसा संसर्गग्राहाच्च

स्वनिवेशः । तद्ग्राहकञ्च । द्रव्यग्राहकञ्चेत्यर्थः । द्रव्यग्राहकत्वं च द्रव्यविषयकलौकिकसाक्षात्कारजनकतावच्छेदकधर्मशून्यत्वम् तेनानुपधायकखण्डचक्षुषि नातिप्रसङ्गः तत्रापि चक्षुष्टस्यसत्त्वादिति । अन्यत् । द्रव्यग्राहकेतरत् । नन्वन्यस्य घटसन्निकर्षे स्वार्थेनं जायतएवेत्यतोविप्रकृष्टेति । दूरवर्तीत्यर्थः । तत् । मनः । आत्ममात्रग्राहकमिति । तथा च मनसआत्माभिन्नाग्राहकत्वान्न तेन घटादिग्रहापत्तिरिति भावः ।

सर्वेति । मनः सर्वविषयकज्ञानजनकमिति सिद्धान्तभङ्गप्रसङ्गादित्यर्थः । सर्वविषयकमपि । सर्वविषयकज्ञानजनकमपि । तथा च नताहग्यसिद्धान्तभङ्ग इति भावः । परतन्त्रमिति । स्वेतरबहिर्विषयकज्ञानजनकसामग्रीसापेक्षमित्यर्थः । तथाचान्यस्यविप्रकृष्टघटादीनांमनसानग्रहापत्तिस्तत्सहकारिचक्षुरादेरभावादिति भावः । किन्तत्परमतमाह । परमिति । मीमांसकैर्ज्ञानलक्षणासामान्यलक्षणायोगजधर्माद्यस्वीकारान्मनसश्चक्षुरादीन्द्रियमात्रसहकारित्वमेवोपेयते अतएवात्मामनसा संयुज्यते मन इन्द्रियेण इन्द्रियमर्थेन इन्द्रियाणां वस्तुप्राप्यप्रकाशकारित्वनियमादितिसङ्गच्छतेइत्यतस्तन्मतन्निराकर्तुमाह । नपुनरिति । चक्षुरादिमात्रमिति । चक्षुरादिकमेव परमिति न पुनरितिवान्वयः । मात्रपदेन ज्ञानलक्षणादिव्यवच्छेदः तथाच चक्षुरादिव्यापारं विनापि ज्ञानलक्षणादिसहकारेण कदाचिन्मनसा ज्ञानजननात्तेषामपि सहकारित्वमावश्यकमुपदर्शितनियमस्तु लौकिकप्रत्यक्षस्थलेएवेति भावः । ननुज्ञानलक्षणासहकारेण मनसा ज्ञानजनने मानाभावइत्यत आह । स्मृतेति । संसर्गेति । परस्परसम्बन्धग्रहादित्यर्थः । ननु परस्परसंसर्गग्रहे काचतिरत आह । कथमन्यथेति । अन्यथा । ज्ञानलक्षणासहकारेण मनसास्मृतपदार्थानां परस्परसंसर्गग्रहेइत्यर्थः । कविकाव्यादीति । कविना स्मृतिविषययीभूतपदार्थानां

कथमन्यथा कविकाव्यादि योगिनांयोगजधर्मप्रत्यासत्तामनसा सर्वसाक्षात्काराच्च ॥ प्रमेयत्वादिसर्वसामान्यलक्षणाप्रत्यासत्या सर्वविषयग्रहाच्च ॥ क्व तर्हिमनःस्वतन्त्रम् अवाह्यवस्तुषु कान्यवाह्यानि ॥ आत्मातद्योग्यगुणास्तदभावस्तद्वृत्तिजातिस्तत्समवायश्चकेतियोग्यगुणाः सविकल्पकज्ञाने च्छा

परस्पर संसर्गग्रहे काव्यं विरच्यते नान्यथा वाक्यप्रयोगे वाक्यार्थज्ञानस्य हेतुत्वात् तथाच तदस्वीकारे संसर्गग्रहाभावेन काव्यरचनोच्छेदप्रसङ्गइति तत्स्वीकारआवश्यकइति भावः । इदमुपलक्षणम् लौकिकसन्निकर्षंविनापि घटोनास्तीत्यादावभावांशे घटस्य भानात् एवंसौरभे लौकिकसन्निकर्षं विनापि सुरभिचन्दनमिति चाक्षुषोदयाच्च तत्स्वीकारस्यावश्यकत्वमिति ध्येयम् । लौकिकान्यतद्विषयतायालिप्रत्यक्षत्वावच्छिन्नं प्रति किञ्चिद्विषयत्वावच्छिन्नतन्निष्ठविषयतायालिङ्गानत्वेन हेतुतेति कार्यकारणभावोबोध्यः कार्यतावच्छेदके लौकिकान्यत्वनिवेशात्प्राथमिकविशिष्टबुद्धौ लौकिकसन्निकर्षजन्यनिर्विकल्पके च न व्यभिचारःकारणतावच्छेदके किञ्चिद्विषयत्वावच्छिन्नत्वनिवेशाच्च न निर्विकल्पकोत्तरमुपनीतभानापत्तिः निर्विकल्पकस्याप्युपनायकत्वाङ्गीकारे तु तद्विषयतायालिङ्गानत्वेनैव हेतुतेतिबोध्यम् । सामान्यलक्षणाजन्यज्ञाने व्यभिचारवारणस्यव्यवहितोत्तरत्वसम्बन्धेन कारणवैशिष्ट्यं निवेश्यैव तद्वृत्तिधर्मप्रकारकज्ञानजन्यत्वनिवेशेतद्वृत्तिघटत्वद्रव्यत्वादिनानाधर्मप्रकारकज्ञाननिरूपितजन्यतानामनुगमकरूपाभावादिति । इत्थं च कार्यतावच्छेदके लौकिकान्यत्वानिवेशेपि न क्षतिरितिध्येयम् । योगजधर्मसामान्यलक्षणाप्रत्यासत्तिस्वीकारेऽनुभवमेव प्रमाणयति । योगिनामिति । योगिनां योगजधर्मसहकारेण मनसा चक्षुरादिव्यापारंविनापि सर्वविषयकालौकिकसाक्षात्कारोदयात्तस्य सहकारित्वमावश्यकमिति भावः । मेयत्वादीति । सर्वत्रप्रमेये चक्षुरादिव्यापारं विनापि प्रमेयत्वेन प्रमेयसामान्यविषयकालौकिकसाक्षात्कारोदयात्तस्यापि सहकारित्वमावश्यकमिति भावः । स्वतन्त्रमिति । बहिर्विषयकज्ञानजनकसामग्र्यनपेक्षमित्यर्थः । अवाह्येति । अवाह्यविषयकज्ञानजननेइत्यर्थः । अवाह्यानीति । योग्यानीतिशेषः । तद्योग्येति । आत्मयोग्यगुणाइत्यर्थः । तदभावः । आत्मयोग्यगुणाभावः । तद्वर्तीति । आत्मतत्समवेतयोग्यगुणवृत्तिजातिरित्यर्थः । साचात्मत्वज्ञानत्वादिः । तदेकत्वेति । आत्मै-

प्रयत्नसुखदुःखद्वेषासंख्यैकत्वपरिमाणे च ॥ तदेकत्वपरिमाणे न योग्ये इतिटीकाकृतः ॥

नन्वित्थं परात्मा परेण गृह्येततद्गुणाश्चगृह्येरन्निति-चेन्न ॥ परात्मतद्गुणानांपरायोग्यत्वात् ॥ स्यादेतत् चक्षुर्यदि द्रव्यग्राहकन्तदा परमाण्वाद्यपि गृह्येरन्निति

कत्वपरममहत्परिमाणेचेत्यर्थः । द्रव्यसाक्षात्कारसामग्रीसत्त्वे तद्गतसङ्ख्यापरिमाणादिग्राहकसामग्र्यामपि सत्त्वाद्द्रव्यसाक्षात्कारस्य सङ्ख्यापरिमाणविषयकत्वनियमेनात्ममानसे तयोरपि मानसम्भवइति भावः । नयोग्ये । न लौकिकमानससाक्षात्कारविषयीभूतेइत्यर्थः । अत्र च मनःसंयुक्तसमवायरूपकारणबलाज्ज्ञानादीनामिव तयोरपि मानसेबाधकाभावः नच तथासति संस्कारादीनामपिमानसापत्तिः सामग्रीसत्त्वादितिवाच्यम् तत्तज्ज्ञानायत्त्या संस्कारस्य प्रातिस्विकरूपेण, विजातीयगुणत्वेन, वा प्रतिबन्धकत्वकल्पनात्तद्गतसङ्ख्यापरिमाणयोरपि प्रातिस्विकरूपेण प्रतिबन्धकत्वे प्रतिबन्धकतावच्छेदकवैजात्यस्वीकारेवा गौरवात्तत्प्रत्यक्षे न किञ्चिद्बाधकम् नच ज्ञानादियोग्यगुणेष्वेव संस्कारव्याप्तवैजात्यं स्वीकृत्य विजातीयगुणविषयकमानसं प्रति विजातीयगुणत्वेन हेतुत्वात्तद्गतवैजात्यस्य तत्सङ्ख्यापरिमाणयोः स्वीकारेगौरवात्तयोरप्ययोग्यत्वमिति वाच्यम् मनः संयुक्तसमवायेन विजातीयगुणं विनापि आत्मत्वमानसजननादिजातीयगुणस्य विशेषसामग्रीत्वाभ्युपगमेन सामान्यसामग्रीबलात्संस्कारप्रत्यक्षापत्तिवाराणाय विजातीयगुणभेदत्वेन हेतुतायाः आवश्यकत्वादात्मत्वमानसे आत्मत्वत्वेनापि हेतुत्वङ्कल्पयित्वा सामान्यसामग्र्या फले जननीये विजातीयगुणात्मत्वयोरन्यतरस्य सहकारित्वकल्पनेन संस्कारप्रत्यक्षापत्तिवारणेत्यतिगौरवात्तदपेक्ष्यविजातीयगुणभेदत्वेन कारणतायाएवौचित्यादिति तयोः प्रत्यक्षस्वीकारएवोचितइत्यस्वरसष्टीकाकृतइत्यनेन सूचितः । द्रव्यमिति । आत्मनः आत्मसमवेतगुणानां च मनसोयोग्यत्वेइत्यर्थः । परात्मा । पुरुषान्तरीयात्मा । तद्गुणाश्च । परात्मसमवेतगुणाश्चेत्यर्थः । चक्षुषेण गुणसमवेतजात्यादीनां तदभावानांच सङ्ग्रहः । समाधत्ते । नेति । परायोग्यत्वात् । पुरुषान्तरीयमनसोयोग्यत्वात् । आत्ममानसत्वावच्छिन्नं प्रति विजातीयमनः संयोगत्वेनात्मसमवेतमानसं प्रति विजातीयमनः

चेन्न ॥ तेषाञ्चक्षुरयोग्यत्वात् ॥ किन्तावच्चक्षुषोयोग्यं-महदुद्भूतरूपवद्द्रव्यम् ॥ परमाणुश्च न महानात्मादयश्चनोद्भूतरूपवन्तस्तद्रूपस्यानुद्भूतत्वादुद्भूतत्वञ्च जातिविशेष इत्येके ॥ अनुद्भूतत्वरूपजात्यभावइत्यपरे ॥

संयुक्तसमवायत्वेनात्मसमवेतसमवेतमानसत्वावच्छिन्नं प्रति विजातीयमनः संयुक्तसमवेतसमवायत्वेनेत्यादिनानाकार्यकारणभावकल्पनात्पुरुषान्तरीयात्मान्यदीयमनसोः संयोगे च वैजात्यानभ्युपगमेन न तत्प्रत्यक्षापत्तिरिति भावः । गृह्णेरन्निति । परमाण्वादिषु चक्षुःसंयोगसत्त्वादिति भावः तेषाम् । परमाण्वादीनाम् । चक्षुरयोग्यत्वादिति । चक्षुर्जन्यलौकिकसाक्षात्कारायोग्यत्वादित्यर्थः । वक्ष्यमाणलौकिकचाक्षुषसामग्यासत्त्वादितिभावः । महदित्यादि । द्रव्यवृत्तिलौकिकविषयतासम्बन्धेन चाक्षुषं प्रति समवायेन महत्त्वेन, उद्भूतरूपत्वेन, च हेतुतेत्यर्थः । परमाणौ महत्त्वाभावात् आत्मनि रूपाभावात् पिशाचादेश्चोद्भूतरूपवत्त्वाभावान्न प्रत्यक्षमितिप्राञ्चः । तदेवाह । परमाणुश्चेत्यादि ना । तद्रूपस्य । पिशाचादिरूपस्य । अनुद्भूतत्वात् । उद्भूतभिन्नत्वात् । यद्यपि पिशाचादिशरीरस्य वायवीयत्वेन तत्र रूपाभावात्तद्रूपस्यानुद्भूतत्वादित्यसङ्गतम् तथापि पिशाचादिपदेन तन्निमित्तकारणपार्थिवोपष्टम्भकभागोबोध्यः । ननुलाघवाद्विजातीयचक्षुः संयोगत्वेनैव द्रव्यचाक्षुषं प्रति हेतुत्वं परमाण्वादिचक्षुःसंयोगेच वैजात्यानभ्युपगमान्नतत्प्रत्यक्षापत्तिरितिकिमनुद्भूतरूपादिहेतुतया नच विजातीयचक्षुः संयुक्तविशेषणतायाअभावचाक्षुषेहेतुतयावायावुद्भूतरूपाभावप्रत्यक्षानुरोधेन तत्र विजातीयचक्षुः संयोगस्यावश्यकतया वायोश्चाक्षुषापत्तिरितितत्रतद्धेतुत्वमावश्यकमिति वाच्यम् । द्रव्यचाक्षुषजनकतावच्छेदकतया वैजात्यान्तरस्वीकारात्तस्य च तत्रानङ्गीकारात् नच तथापि विजातीयचक्षुः संयोगस्य चक्षुष्यपि सत्त्वात्तच्चाक्षुषापत्तिरित्युद्भूतरूपहेतुत्वमावश्यकमिति वाच्यम् स्वप्रतियोगिकसंयोगस्य स्वस्मिन्नभावेन चक्षुषि चक्षुः प्रतियोगिकसंयोगाभावादिति चेन्न विजातीयक्रियाया एव विजातीयसंयोगनियामकत्वेन यत्रैकयैव चक्षुः क्रियया घटेपरमाणौ च युगपत्संयोगस्तत्र परमाणावपि विजातीयसंयोगस्यदुर्वारतया तत्प्रत्यक्षापत्तेर्वारणासम्भवात् । नच तत्तद्दुत्तरदेशस्यापि विजातीयसंयोगनिया-

योगगुणाः योगद्रव्यगतरूपत्वमात्रवृत्तिसङ्ख्या परिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वस्नेहद्रवत्ववेगाः ॥ मात्र पदं घटाकाशसंयोगवारणाय ॥ कर्म च योगद्रव्यसमवेतम् ॥ जातिश्च योगद्रव्यवस्तुगता द्रव्यत्वरूपत्वादिः समवायश्च ॥ त्वचो महदुद्भूतरूपस्पर्शवद्योग्यं द्रव्यम् ॥ तेनपरमाणुवायुप्रदीपप्रभाद्रव्यत्वचा न गृह्यन्ते ॥ परमाणोरमहत्वाद्वायोरूपत्वात् प्रभायाश्चोद्भूतस्पर्शाभावात् ॥ योग्यगुणाश्च रूपादिरि-

---

मकतया परमाण्वादिरूपोत्तरदेशस्य तत्र नियामकत्वाकल्पनेन न तत्र विजातीय संयोग इति वाच्यम् अनन्तोत्तरदेशानां विजातीयसंयोगनियामकत्वकल्पनापेक्षया महदुद्भूतरूपादिहेतुतायाएवोचितत्वादितिदिक् । एकैतत्रेनास्वरसः सूचितः । स चोद्भूतत्वस्य जातित्वे नीलत्वादिना सङ्करप्रसङ्गः । नच नीलत्वादिव्याप्यत्वानैवोद्भूतत्वमिति वाच्यम् । तथा सति चाक्षुषत्वावच्छिन्नं प्रत्युद्भूतरूपत्वेन कारणत्वानुपपत्तेः कारणानुगमेन व्यभिचारादिति । अनुद्भूतत्वमिति । नच नीलत्वादिना सङ्कर्यमत्रापीति वाच्यम् । नीलत्वादिव्याप्यत्वानानुद्भूतत्वस्यैव स्वीकारात् । अनुद्भूतत्वाभावकूटविशिष्टरूपत्वेनच प्रत्यक्षं प्रति हेतुत्वेन व्यभिचाराभावादिति भावः ॥

प्रसङ्गाच्चक्षुर्योग्यगुणानाह । योग्यगुणद्रव्यादिना । चक्षुर्योग्यइति शेषः । योग्यद्रव्यरूपमिति । चक्षुर्योग्यद्रव्यवृत्तिरूपमित्यर्थः । तन्मात्रवृत्तौति । योग्यद्रव्यमात्रवृत्तौत्यर्थः । ननु तन्मात्रवृत्तौत्यत्र मात्रपदमनर्थकमित्यत आह । मात्रपदमिति । घटाकाशसंयोगस्याकाशेपि वृत्तित्वान्न योग्यद्रव्यमात्रवृत्तित्वमिति भावः । ननु त्वाचप्रत्यक्षे त्वक्संयोगस्य हेतुत्वात् परमाणुवायुप्रभादीनां स्वार्थमापत्तिरिति त्वगिन्द्रययोग्यमेव द्रव्यत्वचाग्राह्यते तदेवाच्यं तत्र किन्तद्योग्यमिति हृदिस्थाशङ्कायामाह । त्वचइति । महदित्यादि । तथाच द्रव्यवृत्तिलौकिकविषयतासम्बन्धेन त्वाचप्रत्यक्षं प्रति समवायेनमहत्वत्वे नोद्भूतरूपत्वे नोद्भूतस्पर्शत्वेनच हेतुत्वान्नतत्रप्रत्यक्षापत्तिरिति भावः । सामान्यतो बहिर्द्रव्यप्रत्यक्षत्वावच्छिन्नं प्रत्युद्भूतरूपत्वेन हेतुत्वात् त्वाचप्रत्यक्षेपि रूपं हेतुः तेन न वायोः प्रत्यक्षमिति हृदयम् । यथाक्रमं परमाण्वादिप्रत्यक्षं वारयति । तेनेत्यादिना । प्रभायाइति । नच प्रभाहि तेजसोरूपमितत्रेन प्रभाया रूपत्वमेव न तु द्रव्य

क्षाश्चक्षुषोयोग्याः महदुद्भूतस्पर्शवन्मात्रवृत्तयोमहदुद्भूतस्पर्शश्च॥ अतएव वायुपरिमाणादयस्त्वचा न गृह्यन्ते तच्चक्षुरयोग्यत्वात् नवा दीपप्रभापरिमाणादय उद्भूतस्पर्शवदवृत्तित्वात्नवा घटप्रभासंयोगादय उद्भूतस्पर्शवन्मात्रावृत्तित्वात् तत्र हि अनुद्भूतस्पर्शादयोविद्यन्ते ॥ कर्मचयोगद्रव्यसमवेतं, योगवस्तुगतं सामान्यं, च समवायश्च ॥

मीमांसकास्तु महदुद्भूतस्पर्शवद्द्रव्यत्वेनैव त्वचोयोग्यता लाघवा न तु महदुद्भूतरूपमपि तत्प्रयोजकङ्गौरवात्-तोवायुरपि स्पार्शनप्रत्यक्षः नच बहिरिन्द्रियजन्यद्रव्यसा-

---

त्वमिति वाच्यम् । तदन्यमतानुसारेणैतदुक्तत्वादिति । प्रसङ्गात्त्वगिन्द्रिययोग्यगुणानाह । गुणाश्चेत्यादिना । त्वचोयोग्यादिति शेषः चक्षुर्योग्यस्यापि रूपस्यत्वचा ग्रहणप्रसङ्गादूपादिरिक्तेति । महदुद्भूतस्पर्शवन्मात्रेति । तन्मात्रवृत्तित्वं चतदितरावृत्तित्वे सतितद्वृत्तित्वम् । महदुद्भूतस्पर्शश्चेति । सामानाधिकरण्येन महत्त्वविशिष्टोद्भूतस्पर्शश्चेत्यर्थः । ननु चक्षुर्योग्यादितिव्यर्थमत आह । अतएवेति । अतएव चक्षुर्योग्यत्वविशेषणादेव । वाय्विति । वायुपरिमाणस्य चक्षुरयोग्यत्वादितिभावः । ननूद्भूतस्पर्शवद्वृत्तेश्चक्षुर्योग्यगुणस्यैवाप्रसिद्धत्वान्नैवप्रत्यक्षापत्तिवारणे ह्यतं महदित्यादि विशेषणेनेत्यत आह । नवेति । तथाच प्रभा परिमाणस्य चक्षुर्योग्यत्वात्तस्यापि त्वाचप्रत्यक्षापत्तिरतस्तद्विशेषणमावश्यकमिति भावः । नच चक्षुर्योग्यत्व विशेषणेनैव परमाणुगुणप्रत्यक्षवारणेऽत्र पृथक् महदिति विशेषणवैयर्थ्यमितिवाच्यम् । त्रुटिपरिमाणस्यार्शनवारणाय प्रकृष्टमहत्त्वपरतया तदुपादानस्यावश्यकत्वात् । मात्रपदव्यावृत्तिमाह । नवाघटेति । उद्भूतस्पर्शवन्मात्रावृत्तित्वात् । उद्भूतस्पर्शवदितरवृत्तित्वात् । तथाच न तदितरावृत्तित्वस्वरूपत्तन्मात्रवृत्तित्वन्तस्येति भावः । तत्र हि । प्रभायांहि । कर्मचेति । त्वग्योग्यद्रव्यसममेतद्धर्मत्वग्योग्यमित्यर्थः ॥

वायोरपि स्पार्शनप्रत्यक्षत्ववादिमीमांसकमतन्दर्शयति । मीमांसकास्त्वित्यादिना । लाघवात् । त्वाच प्रत्यक्षे रूपस्य हेतुताकल्पनेन लाघवात् । महदिति । महत्त्वविशिष्टोद्भूतरूपमित्यर्थः । तत्प्रयोजकं । त्वाचप्रत्यक्षप्रयोजकं ।

साक्षात्कारत्वावच्छेदेनोद्भूतरूपस्य हेतुत्वाद्वायौ तदभावान्नव-मितिवाच्यम् ॥ लाघवाद्व्यवाच्चक्षुषत्वावच्छेदेनैव तद्धेतुत्वा दित्याहुः ॥

गौरवात् । प्रभास्वार्शनवारणायोद्भूतस्पर्शस्यस्वार्शनंप्रति हेतुत्वस्यावश्यक-तया त्वाचप्रत्यक्षं प्रति रूपस्य हेतुत्वे गौरवात् । अतइति । उद्भूतरूपस्य त्वाचप्रत्यक्षा प्रयोजकत्वादित्यर्थः । बहिरिन्द्रियेति । आत्मप्रत्यक्षव्ये भिचा-रवारणाय बहिरिन्द्रियजन्यत्वनिवेशः अतएव न नित्यसाधारण्यमपीति भावः । तदभावात् । उद्भूतरूपाभावात् । नेवमिति । न वायोः स्वार्शनप्रत्यक्ष मित्यर्थः । लाघवादिति । बहिरिन्द्रियजन्यद्रव्यसाक्षात्कारत्वापेक्षया द्रव्य चाक्षुषत्वस्यैव कार्यतावच्छेदकत्वे लाघवादित्यर्थः । अत्र मीमांसकानाम-यमाशयः । आत्मप्रत्यक्षे व्यभिचारवारणाय बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षत्वस्य कार्यतावच्छेदकत्वे गौरवादुद्भूतरूपस्य कार्यतावच्छेदकं बहिर्द्रव्यप्र-त्यक्षत्वं वाच्यम् तच्च बहिष्ट्वम् आत्मान्यत्वं मानसविषयान्यत्वं वेति विनिगमनाविरहः । अथ मूर्तप्रत्यक्षत्वमेव तत्कार्यतावच्छेदकं स्पन्दसम-वायिकारणतावच्छेदकतया च मूर्त्तत्वं जातिरितिचेत् । तथापि प्रभायाः स्वार्शनवारणायोद्भूतस्पर्शस्य स्वार्शनं प्रति हेतुत्वावश्यकतया चाक्षुषत्व-मेव रूपजन्यतावच्छेदकमुपेयते । नतुमूर्तप्रत्यक्षत्वं वायोः प्रत्यक्षसन्देहेन तस्य सन्दिग्धव्यभिचारकत्वात् तदुक्तम् (परित्यज्य च निश्चिताव्यभिचारकं रूपङ्गृह्यमाणव्यभिचारकेण कारणत्वकल्पनायाइव कार्यत्वकल्पनाया अयो-गादिति) । तथाच वायोः स्वार्शनेबाधकाभावः । साधिकाच समीरोयं मन्दो वहतीत्यादिप्रतीतिः । नचोद्भूतस्पर्शेनैववायोरनुमानान्न तादृशप्र-तीतेरनुपपत्तिरिति वाच्यम् । व्याप्तिज्ञानादिकं विनापि तादृशप्रतीतेर्जा-यमानत्वात् । अन्यथा घटं स्पृशामीत्यादिप्रतीतेरप्यनुमानेनैवोपपत्तौघटा दीनामपि स्वार्शनोच्छेदापत्तरिति । अत्राहु नैयायिकाः । कारणभावाल्का र्याभावइति प्रतीत्या कार्यसामान्याभावे कारणाभावस्य प्रयोजकत्वन्तत्र च मूर्तप्रत्यक्षत्वावच्छिन्नं प्रत्युद्भूतरूपत्वेनाकारणत्वे च तदवच्छिन्नाभावस्य प्र-योजकत्वासम्भवात् । प्रत्यक्षसामान्याभावेउद्भूतरूपाभावस्योद्भूतस्पर्शाभावस्येति विशेषाभावकूटस्य प्रयोजकत्वं वाच्यमिति गौरवम् । मन्यते चोद्भूतरूपाभा-वस्यैवेति लाघवम् उद्भूतरूपत्वेनाकारणत्वे च तदवच्छिन्नाभावस्य प्रयोजक-त्वासम्भवात्तद्धेतुत्वमावश्यकमेव । ननु तर्ह्युद्भूतस्पर्शत्वेनहेतुत्वमादाय-

विनिगमनाविरहः । भवन्मते वायोरिव मन्मते प्रभायाः प्रत्यक्षानङ्गीकारादिति चेन्न । इहोपरिदेशे विहङ्गमइत्यत्र प्रभामण्डलस्यैवोपरिदेशतयात्मत्वेन प्रत्यक्षानङ्गीकारे इह विहङ्गमइति प्रतीत्यनुपपत्तेः । संयोगप्रत्यक्षेयावदाश्रयप्रत्यक्षस्य हेतुत्वात् । एवं संयोगविभागलिङ्गकं चन्द्रतारादौ गत्यनुमानञ्च स्यात् नच पूर्वोत्तरदेशयोश्चन्द्रादेरुपलम्भानुपलम्भाभ्यां संयोगविभागयोरनुमाना त्ताभ्याङ्गत्यनुमानमिति वाच्यम् । प्रभामण्डलरूपयोस्तयोर्भवन्मतेऽप्रत्यक्षत्वात्तस्मात्प्रभायास्त्वाङ्गीकारस्यावश्यकत्वादुद्भूतस्पर्शत्वेन कारणत्वासम्भवः । नच मूर्तप्रत्यक्षत्वस्य नित्यसाधारणात् कथं जन्यतावच्छेदकत्वमिति वाच्यम् । समवायकालिकविशेषणतोभयसम्बन्धेन प्रत्यक्षत्वस्यैव जन्यतावच्छेदकत्वात् । एवंरीत्या सिद्धे कार्यकारणभावे वायौ रूपाभावेनन तत्प्रत्यक्षमिति । वायुर्वातीति प्रतीतिरनुमानेनैवोपपादनीया घटादौ चोद्भूतरूपसत्त्वेन तत्प्रतीतेः प्रत्यक्षत्वमेवेति । ननु गगनघटसंयोगस्यार्शनवारणाय विजातीय सत्स्पार्शनं प्रतिसामानाधिकरण्यसम्बन्धेनस्पार्शनाभावस्य प्रतिबन्धकत्वावश्यकतयावायोरस्पार्शने वायुस्पर्शस्पार्शनानुपपत्तिः । चतुरणुकस्पार्शने व्यभिचारणाय सतिविजातीय विलक्षण धर्मवत्व* निवेशः । वैजात्यञ्चेदन्द्रव्यव्यावृत्तद्वयणुककर्म साधारणम् । नचप्रतिबध्यतावच्छेदककोटौ विजातीयसति स्पर्शान्यत्वनिवेशान्नानुपपत्तिरिति वाच्यम् । तथासति विजातीयसत्त्वस्पर्शान्यत्वयोर्विशेषणविशेष्यभावे विनिगमनाविरहप्रसङ्गात् । एवं त्वक्संयुक्तसमवायरूपसामान्यसामग्रा स्पार्शनाभावाभावरूपकारणं विनापि वायुस्पर्शस्पार्शनजननात्तस्य विशेषसामग्रीत्वासम्भवेन त्वक्संयुक्तसमवायरूपसामान्यसामग्रीबलाद्गगनघटसंयोगस्पार्शनापत्तेर्दुर्वारत्वाच्च नच स्पर्शस्पार्शनं प्रतिस्पर्शत्वेनापि हेतुत्वङ्गौरवायत्वा सामान्यसामग्रा द्रव्यसमवेत स्पार्शनत्वावच्छिन्नजननीये स्पार्शनाभावाभावस्पर्शयोरन्यतरस्यसहकारित्वकल्पनान्नानुपपत्तिरिति वाच्यम् तथासति प्रतिबध्यतावच्छेदककोटौ स्पर्शान्यत्वनिवेशेन स्पर्शत्वेन हेतुत्वकल्पनेन च वायोरप्रत्यक्षत्ववादिमते गौरवादिति वायुप्रत्यक्षत्वस्वीकारएवोचित इतिचेन्नैवं । तादृशप्रतिबन्धकाभावंविनापित्वक् संयुक्तसमवायेन द्रव्यत्वस्पार्शनजननात् तस्य विशेषसामग्रीत्वासम्भवेन सामान्यसामग्रीबलात् गगनघटसंयोगस्पार्शनापत्तेर्दुर्वारत्वात् । सद्विद्रव्यसमवेतस्पार्शनं प्रति सद्विद्रत्वेनापि का-

---

* विजातीयत्वनिवेश इतरपि पाठान्तरम्

रणत्वं कल्पयित्वा सामान्यसामग्र्याफले जननीये तादृग्प्रतिबन्धकाभावसङ्गिन्योरन्यतरस्य सहकारित्वकल्पनादापत्तिवारणेऽपि गौरवात्तदपेक्षया गगनघटसंयोगस्यार्श्वनवारणाय स्पार्श्वनाभावविशिष्टविजातीयसत्त्वेनैव तादात्म्येन प्रतिबन्धकत्वौचित्यात् विजातीयसत्त्वे स्पार्श्वनाभाववैशिष्ट्यं च * सामानाधिकरण्यसम्बन्धेन । नच विजातीयसत्त्वस्पार्श्वनाभावयोर्मिथोविशेषणविशेष्यभावेविनिगमनाविरहइति वाच्यम् । विजातीयसत्त्वविशिष्टस्पार्श्वनाभावत्वेन प्रतिबन्धकत्वे सामानाधिकरण्यस्यैव प्रतिबन्धकतावच्छेदकसम्बन्धतया गौरवात् स्पार्श्वनाभावविशिष्टविजातीयसत्त्वेन प्रतिबन्धकत्वेतु तादात्म्यस्यैव प्रतिबन्धकतावच्छेदकसम्बन्धतया लाघवात् । प्रतिबध्यतावच्छेदकं च स्पर्शान्यस्पार्श्वनत्वम् । तेन वायोरप्रत्यक्षत्वेपि न तत्स्पर्शस्पार्श्वने व्यभिचारः । नच तादृग्प्रतिबन्धकाभावं विनापि वायुस्पर्शस्पार्श्वनजननात् तस्यविशेषसामग्रीत्वासम्भवेनसामान्यसामग्रीबलाद्गगनघटसंयोगस्पार्श्वनापत्तिरिति वाच्यम् । स्पर्शस्पार्श्वनंप्रतिस्पर्शत्वेनापि हेतुताकल्पनेन सामान्यसामग्र्या फले जननीये स्पर्शतथाविधप्रतिबन्धकाभावयोरन्यतरस्य सहकारित्वोपगमात् । नच प्रतिबध्यतावच्छेदककोटौ स्पर्शान्यत्वनिवेशेन स्पर्शत्वेन हेतुत्वकल्पनेन च लाघवात् प्रत्यक्षत्वानङ्गीकारे गौरवादायुप्रत्यक्षतास्वीकारएवोचितइति वाच्यम् । वायुप्रत्यक्षत्वानङ्गीकारे प्रकारान्तरेण लाघवसम्भवात् । तथाहि परमाण्वादिघटितसन्निकर्षबलाद्द्रव्यत्वस्पार्श्वनवारणाय द्रव्यसमवेतस्पार्श्वनंप्रतित्वक्संयुक्तस्पार्श्वनवत्समवायत्वेन हेतुत्वं वाच्यम् तच्च चतुरणुकस्पार्श्वने व्यभिचारवारणाय द्रव्यान्यद्रव्यसमवेतस्पार्श्वनत्वं कार्यतावच्छेदकमुपेयं । तस्य च सन्निद्रव्यसमवेतस्पार्श्वनत्वस्य कार्यतावच्छेदकत्वमादाय विनिगमनाविरहः । वायोरप्रत्यक्षत्वेतु वायुस्पर्शस्पार्श्वने व्यभिचारेणद्रव्यान्यद्रव्यसमवेतस्पार्श्वनत्वस्य कार्यतावच्छेदकत्वासम्भवेन सन्निद्रव्यसमवेतस्पार्श्वनत्वस्यैव कार्यतावच्छेदकतया विनिगमनाविरहसम्भवात् । नचैवमसन्निकृष्टगुणकर्मस्पार्श्वनापत्तिरिति वाच्यम् । एकाश्रयघटितसन्निकर्षादित्वादिप्रत्यक्षवारणाय विजातीयसत्स्पार्श्वनंप्रति सामानाधिकरण्यसम्बन्धेन त्वक्संयोगाभावस्य प्रतिबन्धकत्वावश्यकतया तेनैव सन्निकृष्टगुणकर्मस्पार्श्वनापत्तिवारणसम्भवात् । नचैवं त्वक्संयुक्तसमवायहेतुतायामेव बीजाभावः । येन तत्कार्यतावच्छेदकेविनिगमनाविरहो वायुप्रत्यक्षतावादिमते प्रस-

* सामानाधिकरण्यघटित सामानाधिकरण्यसम्बन्धेनेत्यपिपाठान्तरम् ॥

वैशेषिकास्तु समवायेनप्रत्यक्षः सम्बन्धप्रत्यक्षे यावदा-

ज्येतिवाच्यम् असन्निकृष्टद्रव्यत्वादि स्पार्शनवारणाय त्वक्संयुक्तस्पार्शनवत्स-मवायत्वेन सद्विद्रव्यसमवेतस्पार्शनत्वावच्छिन्नं प्रतिहेतुता तच्च द्रव्यान्य द्रव्यसमवेतस्पार्शनत्वमादाय न विनिगमनाविरहः । वायोरप्रत्यक्षत्वेनवा-युस्पर्शस्पार्शने व्यभिचारात् । वायुप्रत्यक्षत्ववादिमते तु द्रव्यान्यद्रव्यसम-वेतस्पार्शनमादाय विनिगमनाविरहेणानन्तपुरुषभेदभिन्नानन्तसन्निकर्ष-हेतुत्वकल्पनापत्तेर्वायोरप्रत्यक्षत्वाङ्गीकारएवोचितः । एतन्मते उक्तरूपेण स्पार्शान्यत्वनिवेशेन स्पार्शत्वेनहेतुत्वकल्पनेन च क्रियागौरवसम्भवेपि पुरुषभेद-भिन्नसन्निकर्षहेतुत्वकल्पनापेक्षयालाघवानपायादिति सिद्धान्तानुयायीपन्थाः

नन्वास्तां असन्निकृष्टद्रव्यत्वस्पार्शनवारणाय पुरुषभेदभिन्नसन्निकर्षहे-तुत्वन्नीयते अपितु सद्विद्रव्यसमवेतस्पार्शनं प्रति स्ववृत्तिप्रागभावप्र-तियोगित्वविशिष्टं यत्स्ववृत्तिस्पार्शनंविषयतासम्बन्धेन तद्द्रव्यत्वसमवेतत्व-सम्बन्धेन क्षतित्वे नैवंकारणत्वं स्ववृत्तित्वं च कालिकसम्बन्धेन एवञ्चवायु-प्रत्यक्षत्वस्वीकारे पुरुषभेदभिन्नसन्निकर्षहेतुतायान्तत्कार्यतावच्छेदकेउपद-र्शितगौरवस्यानवकाशात्तद्धेतुत्वस्यैवाकल्पनात् । नच क्षतिकार्यतावच्छेदके द्रव्यान्यद्रव्यसमवेतस्पार्शनत्वमादाय विनिगमनाविरहसम्भवइति वाच्यम् । भवन्मते स्पार्शान्यत्वनिवेशेनस्पार्शत्वेन हेतुत्वकल्पनेन च गौरव-स्यातिस्फुटत्वात् । वस्तुतस्तु व्यापकधर्मेण कारणतायाइव कार्यतायाअप्य-कल्पनाद्द्रव्यान्यद्रव्यसमवेतस्पार्शनत्वेनकार्यतावच्छेदकत्वासम्भवात्सद्विद्रव्य-समवेतस्पार्शनत्वस्यैव वायुप्रत्यक्षतावादिमतेपि सन्निकर्षकार्यतावच्छेकत्वादित्याहुः । वस्तुतस्तु गुरुत्वाद्यतीन्द्रियप्रत्यक्षवारणायतेषा-मत्तद्व्यक्तित्वेन प्रतिबन्धकत्वे गौरवाल्लाघवेन विषयत्वेनैव लौकिकप्रत्य-क्षहेतुत्वं विषयत्वं च लौकिकविषयतया साक्षात्कारवत्त्वमेव । तथाच तेनैव गगनघटसंयोगस्पार्शनवारणे न तदनुरोधेन स्पार्शनं प्रतिस्पार्शनाभावप्र-तिबन्धकत्वमिति न वायुस्पर्शस्यस्पार्शनानुपपत्तिः । नचैवं विषयत्वाभा-वादेव नीरूपत्वाद्यवारणे रूपहेतुत्वमनावश्यकमिति वाच्यम् । घटा-देः पाकादिनानीरूपतादशायां लौकिकप्रत्यक्षतापत्तेः रूपहेतुत्वस्या-वश्यकत्वादितात्तमनल्पजल्पनेन ॥

समवायातीन्द्रियत्ववादिवैशेषिकमतं दूषयितुमुपन्यस्यति । वैशेषि-कास्त्विति । न प्रत्यक्षः । नेन्द्रियजन्यलौकिकसाक्षात्कारविषयः । स-

श्रयप्रत्यक्षस्य हेतुत्वात् कथमन्यथा घटाकाशसंयोगोपि न प्रत्यक्षः नचसमवायस्यसर्वैश्रायथाः प्रत्यक्षाः परमाणवादेरयोग्यत्वादित्याशङ्क्यन्न तथा हेतुतायाम्मानाभावात् नच घटाकाशसंयोगस्य प्रत्यक्षतापत्तिः योग्यमात्रसमवेतगुणस्यैव योग्यत्वात् किञ्च लाघवात् संयोगप्रत्यक्षत्वावच्छेदेनयावदाश्रयप्रत्यक्षस्य हेतुता युज्यते नतु सम्बन्धप्रत्यक्षत्वावच्छेदेन सम्बन्धत्वं हि संयोग समवायान्यतरत्वमिति गौरवात् । घ्राणयोग्यो महत्वसमानाधिकरणोद्भूतोगन्धस्तद्गतं सामान्यं तयोः समवायश्च अतएव परमाणुगन्धो न गृह्यते महत्वासमानाधिकरणत्वान्न वा घ्राणमणिवज्रादिगन्धस्तस्यानुद्भूतत्वात् रसनयोग्यो महत्वसमानाधिकरणोद्भूतो रसस्तद्गतं सामान्यं तयोः समवायश्च तेनपरमाणुरसो न गृह्यते महत्वासमानाधिकरणत्वान्नवा मण्यादिरसोगृह्यते अनुद्भूतत्वात् । श्रवणयोग्यः शब्दस्तद्-

---

म्बन्धप्रत्यक्षेइति । सम्बन्धत्वस्य समवायसाधारणत्वादिति भावः । ननु तादृशकार्यकारणभावेमानाभावइत्यत आह । कथमन्यथेति । अन्यथा । तादृशकार्यकारणभावाकल्पने । नप्रत्यक्षइति । तत्रापि चक्षुः संयुक्तसमवायरूपकारणसत्त्वेन द्रव्यसमवेतत्वाच्चाक्षुषापत्तेरिति भावः । नचेति । नहीत्यर्थः । तथा हेतुतायामिति । सम्बन्धप्रत्यक्षे यावदाश्रयप्रत्यक्षत्वेन हेतुतायामित्यर्थः । घटाकाशसंयोगप्रत्यक्षापत्तिरेव मानमित्याशङ्क्यनिराचष्टे । नचेत्यादिना । योग्येति । द्रव्यत्वादिजाते र्योग्यमात्रसमवेतत्वाभावाद् योग्यत्वन्न स्यादतोगुणेति । योग्यत्वादिति । घटाकाशसंयोगस्य चायोग्याकाशवृत्तित्वेनायोग्यत्वादिति भावः । नन्वेवं वायुस्पर्शस्य शब्दस्यच प्रत्यक्षं न स्यात्तयोरयोग्यवृत्तित्वादित्यत आह । किञ्चेति । लाघवात् । सम्बन्ध प्रत्यक्षत्वापेक्षया लाघवात् । लाघवमेवाह । सम्बन्धत्वं हीति । संयोगत्वस्य जातिरूपतया लाघवम-

ताजाति स्तयोः समवायश्चेति सङ्क्षेपः ॥ तस्येन्द्रियसन्निकृष्टार्थग्राहकत्वात्सन्निकर्षाः सहकारिणः के ते सन्निकर्षाः संयोगः संयुक्त समवायोः संयुक्तसमवेतसमवायः समवायः समवेतसमवायोः विशेषणताच ॥

अथकेनसन्निकर्षेण किंगृह्यते द्रव्यंसंयोगेन गृह्यते । गन्धेतरगुणाः कर्मद्रव्यगता जातिः संयुक्त सम वायेन । भवतिहि

स्येवेति भावः । घ्राणग्राह्यगुणमाह । घ्राणेति । तद्गतं । गन्धगतं सामान्यं । गन्धत्वादि । तयोः । गन्धगन्धत्वयोः । अतएव । गन्धे महत्त्वसामानाधिकरण्यविशेषणादेव । उद्भूतत्वविशेषणव्यावृत्तिमाह । नवेति । रसन योग्यगुणमाह । रसनेति । श्रवणयोग्यगुणमाह । श्रवणेति । ननु चक्षुरादीनां द्रव्यग्राहकत्वे निमीलितनयनस्यापि तद्ग्रहापत्तिरत आह । तस्येति । सन्निकृष्टार्थग्राहकत्वात् सन्निकृष्टार्थसाक्षात्ग्राहकत्वात् । असन्निकृष्टार्थग्राहकत्वादिति यावत् । सहकारिणः । प्रत्यक्षे जननीये अपेक्षणीयाः । तथाचेन्द्रियसंयोगादेरपि प्रत्यक्षहेतुतयानन्निमीलितनयनस्य प्रत्यक्षापत्तिरिति भावः । नन्विन्द्रियत्वस्य तेजस्त्वादिना सङ्कराज्जातित्वासम्भवेन कथं द्रव्यलौकिकप्रत्यक्षत्वावच्छिन्नं प्रतीन्द्रियतत्संयोगयोर्हेतुत्वमिति चेन्न । इन्द्रियनिष्ठेष्वेकत्वेषु वैजात्यं स्वीकृत्य विजातीयैकत्वस्यैवतद्धेतुत्वात् । नच चक्षुः संयोगदशायांस्वार्थनवारणायत्वक्संयोगदशायां च चाक्षुषवारणाय चक्षुस्त्वक्संयोगयोश्चाक्षुषस्वार्थनहेतुत्वस्यावश्यकतयेन्द्रियसंयोगादेः प्रत्यक्षसामान्यहेतुत्वे मानाभाव इति वाच्यम् । प्रत्यक्षसामान्यानुत्पादे चक्षुः संयोगाभावत्वक् संयोगाभावादीनां प्रयोजकत्वे गौरवात्लाघवेनेन्द्रियसंयोगाभावस्यैव प्रयोजकत्वेनेन्द्रियसंयोगहेतुत्वावश्यकत्वात् । * कारणविरहस्य कार्यविरहप्रयोजकत्वात् । इन्द्रियसंयोगस्य संयोगेनेन्द्रियस्य वा हेतुत्वमिति विनिगमनाविरहादिन्द्रियत्वेनापि तद्धेतुत्वमिति ॥

ननु सर्वेषामेव सन्निकर्षाणान्द्रव्यादिग्राहकत्वे आत्मनः प्रत्यक्षानुपपत्तिस्तत्र संयुक्तसमवायाभावात् एवं रूपादेरपि तत्र संयोगाभावादिति प्रत्येकमेव द्रव्यादि ग्राहकतावाच्या तत्र केन किं गृह्यते इति पृच्छति । अथ

---

* अकारणविरहस्य कार्यविरहाप्रयोजकत्वादित्यपिपाठान्तरम्

घटादिकं चक्षुरादिसंयुक्तं तत्र समवेतं रूपादि स्यन्दोद्रव्यत्वादिजातिश्च गृह्णेतरगुणकर्मगताजातिः संयुक्तसमवेतसमवायेन भवतिहि चक्षुरादिसंयुक्तो घटादि स्तत्समवेतं रूपादि तत्र समवायोरूपत्वादेः । शब्दः समवायेन गृह्यतेकर्णशष्कुल्यवच्छिन्ने नभसि शब्दस्य समवायात् ॥ शब्दगता तु जातिः समवेतसमवायेन श्रवणसमवेते शब्दे शब्दत्वस्यसमवायात् । विशेषणतया समवायोऽभावश्चगृह्यते तत्र संयोगसमवाययोरभावात् । सा च विशेषणता द्विविधा । इन्द्रियविशेषणता इन्द्रियसन्निकृष्टविशेषणता च । तत्रेन्द्रियविशेषणतया शब्दाभावो गृह्यते इन्द्रियरूपे श्रवणे तस्य विशेषणत्वात् । इन्द्रियसन्निकृष्टविशेषणतया भूतलादौ घटाभावादि इन्द्रियसन्निकृष्टे भूतले तस्य विशेषणत्वात् इन्द्रियसन्निकृष्टविशेषणतापि बहुविधा । सन्निकर्षस्य बहुत्वादवसेया । ननु संयोगो न प्रत्यासत्तिः संयुक्त-

---

केनेति । उत्तरयति । द्रव्यमिति । संयुक्तसमवायस्य गुणमात्रग्राहकत्वे शब्दग्रहो न स्यात् स्वस्मिन्स्वप्रतियोगिकसंयोगाभावेन श्रोत्रसंयुक्तसमवायस्य शब्देऽसत्त्वादतआह । शब्देतरेति । जातिः । द्रव्यत्वादिः । संयुक्तसमवेतसमवायस्यशब्दत्वेऽसत्त्वाच्छब्दत्वग्रहानुपपत्तेः । शब्देतरगुणेति । शब्देतरेति गुणविशेषणं । तत्र । समवायेऽभावे च । तथा च पञ्चविधसन्निकर्षाभावेन विशेषणतयैव तद्ग्रहइतिभावः । तस्य ।शब्दाभावस्य । अग्रे च तस्य घटाभावस्येत्यर्थः । नन्विन्द्रियसन्निकृष्टविशेषणतेन्द्रियसंयुक्तविशेषणता तथा च रूपादेरसत्त्वाभावग्रहानुपपत्तिरत आह । इन्द्रियसन्निकृष्टेति । बहुविधेति । इन्द्रियसन्निकृष्टविशेषणता इन्द्रियसंयुक्तविशेषणता इन्द्रियसंयुक्तसमवेतविशेषणतेत्यादिरीत्याबोध्या । इन्द्रियसंयुक्तसमवेतविशेषणतया रूपादेरसत्त्वाभावग्रहसम्भवानानुपपत्तिरितिभावः । बहुत्वात् । संयुक्तसमवायादिभेदेन बहुवि-

समवायेनैव घटादिग्रहसम्भवात् इन्द्रियसंयुक्ते कपालादौ तेषां समवायात् । नैवम् आत्मनि तदसम्भवात् तस्या-समवेतत्वादिति सङ्क्षेपः ॥ स्यादेतत् अन्धकारस्थघटादिः किमितिचक्षुषानोपलभ्यते संयोगप्रत्यासत्तेः सत्त्वात् ॥

उच्यते चक्षुषाद्रव्यग्रहे महदुद्भूतरूपालोकसंयोगः सहकारी नचान्धकारस्थघटे सोस्ति ॥ नच महदुद्भूतेति व्यर्थं

धत्वात् । ननु रूपादिग्रहार्थमवश्यमभ्युपेयतया संयुक्तसमवायादि-प्रत्यासत्त्यैव घटादिग्रहोपपत्तेरलं संयोगस्यप्रत्यासत्तित्वेनेत्याशङ्कते । न । न्विति । न प्रत्यासत्तिः । न द्रव्यग्राहकप्रत्यासत्तिः । मानाभावा दिति शेषः । ननु घटादिग्रहान्यथानुपपत्तिरेवमानमत आह । संयुक्तेति । तदसम्भवात् । संयुक्तसमवायासम्भवात् । तस्य । आत्मनः । तथाचात्मप्रत्यक्षे संयोगहेतुतायां आवश्यकत्वेन तत्रैव द्रव्यप्रत्यक्षत्वमेव तज्जन्यतावच्छेदकमुपेयतइति भावः । ननु द्रव्यसमवेतचाक्षुषत्वावच्छिन्नं प्रति चक्षुः संयुक्तसमवायस्य हेतुत्वेन ततएवोपपत्तेरलं चक्षुःसंयोगहेतुत्वेन । यदि चात्मप्रत्यक्षे क्लृप्तत्वात्सामान्यतोद्रव्यप्रत्यक्षत्वमेव तज्जन्यतावच्छेदकमु ररीक्रियते तदा सत्यद्रव्यत्वमेव तथा स्यात् । नच सत्यद्रव्यत्वस्य तथात्वे रूपादिचाक्षुषानुपपत्तिरित्यन्यथानुपपत्तिरेव तत्र बाधिकेति वाच्यम् । तथासतिचक्षुःसंयुक्तसमवायेनैवघटादिचाक्षुषोपपत्तेर्नद्रव्यप्रत्यक्षत्वं जन्यतावच्छेदकं साधकाभावस्यैवप्रकृते बाधकत्वादित्यत आह । सङ्क्षेपइति । चक्षुःसंयुक्तसमवायस्य द्व्यणुकादिरूपेपि सत्त्वाच्चाक्षुषापत्तेश्चक्षुः संयुक्तचाक्षुषवन्निरूपितसमवायत्वेन तद्धेतुत्वं वाच्यं तच्च त्रुटिचाक्षुषे व्यभिचारवारणाय द्रव्यान्यसच्चाक्षुषत्वस्य विजातीयसच्चाक्षुषत्वस्य वा तज्जन्यतावच्छेदकत्वमुपेयम् । एवं च त्रुटिचाक्षुषस्यासङ्गृहीतया चक्षुः संयोगहेतुतावश्यकीति हृदयम् । संयोगप्रत्यासत्तेरिति । परमाणौ महत्त्वन्नास्तीति प्रत्ययात्परमाणाविवघटेप्यालोकोनास्तीति प्रत्ययाद् घटेपिचक्षुः संयोगस्यावश्यकत्वाच्चक्षुःसम्बद्धविशेषणतायाएवाभावग्राहकत्वादितिभावः॥

महदुद्भूतेति । महत्त्वविशिष्टोद्भूतरूपविशिष्टालोकनिरूपितसंयोगः द्रव्यचाक्षुषप्रत्यक्षे कारणमित्यर्थः । सइति । महदुद्भूतरूपालोकसंयो-

तेजःपरमाणु चक्षुरादिसंयोगयोर्विद्यमानत्वात् ॥ नन्वेवं चक्षुषा तेजः प्रत्ययो न स्यात् तत्र तेजः संयोगाभावात् प्रदीपे तत्प्रभासंयोगोस्तीति चेन्न मणिप्रभादौ तदभावात् ॥ दृश्यते च महान्धकारे चन्द्रकान्तमणिविशेषप्रभा । अथालोकेतरद्रव्यचाक्षुषं प्रत्यालोक संयोगः सहकारीति चेन्न । महान्धकारे सुवर्णरूपतेजः साक्षात्कारापत्तेः ॥ अत्रोच्यते द्रव्यचाक्षुषमात्रे आलोकसंयोगःसहकारी । नचालोकचाक्षुषे व्यभिचारः आलोकाकाशसंयोगस्यालोकेपि सत्त्वात् तस्य हिनिष्ठत्वात् नचैवमन्धकारे सुवर्णसाक्षात्कारापत्तिः

गदित्यर्थः । नन्वेवमिति । एवम् । आलोकप्रतियोगिकसंयोगस्य हेतुत्वे । तेजः संयोगाभावात् । तेजोन्तरप्रति योगिकसंयोगाभावात् । स्वस्मिन्स्व प्रतियोगिकसंयोगानभ्युपगमादिति भावः । तत्प्रभा । प्रदीपप्रभा दीपप्रभायांदीपसंयोगस्यैव सत्त्वादतोमणिप्रभादाविति । मणेः पार्थिवत्वेन तत्संयोगस्याहेतुत्वादिति भावः । ननु मणिप्रभादौसौरालोकसंयोगस्यैव सत्त्वादतआह । दृश्यतेचेति । महान्धकारइत्यनेन सौरालोकव्यवच्छेदः । अन्धकारे घटादिप्रत्यक्षापत्तिवाराणायतत्रालोकसंयोगस्य हेतुत्वमास्ताम् आलोकप्रत्यक्षेतु तद्धेतुत्वे माना भावः । अन्धकारेपि तत्प्रत्यक्षोदयादत आलोकभिन्नद्रव्यचाक्षुषत्वावच्छिन्नं प्रत्येव तस्य हेतुत्व मतोन व्यभिचारइत्याशङ्कते । अथेति । सुवर्णेति । सुवर्णस्यालोकभिन्नत्वाभावेन तच्चाक्षुषस्यालोकसंयोगकार्यतावच्छेदकानाक्रान्तत्वादितिभावः । आलोकसंयोगइति । आलोकनिष्ठसंयोगोहेतुरित्यर्थः । यत्रालोकवति भूतले घटमानीतस्तत्रालोकप्रतियोगिकसंयोगाभावादालोकवृत्तिसंयोगत्वेनैव हेतुत्वादिति भावः । तस्य । आलोकसंयोगस्य । हिनिष्ठत्वात् । आलोकालोकभिन्नोभयवृत्तित्वात् । एवम् । उक्तरीत्या आलोकसंयोगस्यालोकेपिसत्वे । सुवर्णेति । तत्राप्यालोकाकाशसंयोगस्य सत्वादिति भावः अनभिभूतेति । अनभिभूतं रूपंयस्येति व्युत्पत्त्याअनभिभूतरूपविशिष्टालोकसंयोगस्य हेतुतयासुवर्णेतदसम्भवः सुवर्णरूपस्याभिभूतत्वात् तथाच

अनभिभूतरूपालोकसंयोगस्यैव हेतुत्वात् सुवर्णरूपत्वमभिभूतमन्यथा सुवर्णरूपालोकसंयोगाद् व्यान्तरग्रहापत्तिः ॥

सम्प्रदायविदस्तु सुवर्णभिन्न तेजोभिन्नद्रव्यचाक्षुषेआलोकसंयोगे हेतुः भवति च सुवर्णमपिसुवर्णभिन्नं यत्तेजस्तद्भिन्नं मतस्तद्दृश्यालोकसंयोगो हेतुस्तेनान्धकारे न सुवर्णसाक्षात्कारइत्याहुः ॥ तथापि पूर्वस्यां दिशि आलोकसंयोगवतः परस्यां तदसंयुक्तस्य भित्त्यादेः परदिगवच्छिन्नपुरुषेण साक्षात्कारःस्यात् । आलोकसंयोगस्य पूर्वदिगवच्छेदेन सत्त्वात् । मैवं यदवच्छेदेनालोकसंयोगस्तदवच्छिन्नचक्षुः संयोगस्य हेतुत्वात् इह च तदभावात् ॥

द्रव्यचाक्षुषत्वावच्छिन्नं प्रत्यनभिभूतोद्भूतरूपविशिष्टालोकसंयोगस्य हेतुत्वमिति भावः । अन्यथा । सुवर्णरूपस्यानभिभूतत्वे । द्रव्यान्तरेति । अन्धकारे घटादौ सुवर्णसंयोगाद् घटग्रहापत्तिरितराभिभूतत्वं तस्येतभावः । बलवत्तजातीयग्रहणकृतमग्रहणञ्चाभिभवइति ॥

संप्रदायविदस्त्वित्यादि । आलोकेतरद्रव्यचाक्षुषे आलोकसंयोगस्य हेतुत्वेऽन्धकारे सुवर्णसाक्षात्कारापत्तिरितश्च: सुवर्णभिन्नत्वमालोकेविशेषणम् तथाच सुवर्णभिन्नयत्तेजस्तद्भिन्नद्रव्य सुवर्णघटादिच तत्रतादृशे आलोकप्रतियोगिकसंयोगो हेतुरतोनान्धकारे सुवर्णादिसाक्षात्कार इत्यखण्डलार्थः कार्यतावच्छेदके गौरवमेवाचास्वरसः । केचित्तु । द्रव्यचाक्षुषे आलोकसंयोगस्य प्रभासंयोगत्वेनैवहेतुता । प्रभात्वं च सुवर्णादिवृत्तमित्याहुः । सुवर्णादिसंयोगस्यादृष्टं वैजात्यमुपेत्यविजातीयालोकसंयोगत्वेनैव हेतुत्वमित्यपि केचित् । आलोकसंयोगानवच्छेदकावच्छेदेन चक्षुः संयोगीघटादिग्रहः स्यात्तत्रालोकसंयोगस्य चक्षुः संयोगस्य च परस्परानवच्छेदकावच्छेदेन सत्त्वादित्याशङ्कते । तथापीति । तथापि आलोकसंयोगस्य हेतुत्वेपि । परस्याम् । परदिगवच्छेदेन । तदसंयुक्तेति । आलोकासंयुक्तेत्यर्थः । पुरुषेणेति । परदिगवच्छेदेन चक्षुः संयोगवतेति शेषः । यदवच्छेदेनेति । आलोकसंयोगावच्छेदकावच्छिन्न चक्षुः

स्यादेतत् । विशेषणता न प्रत्यासत्तिः समवायाभावयो-रेवासत्त्वात् नहि तयोर्मानमस्ति । नन्वयं घटोऽयं रूपवानयं

संयोगत्वेन हेतुत्वादिति भावः । अथ मूर्तयोः समानदेशताविरोधाद् घटादावेकावच्छेदेन संयोगसम्बन्धेनालोकचक्षुषोरसम्भवादालोकसंयोगावच्छेदकावच्छिन्नचक्षुः संयोगः कथमुपपद्यतइति चेन्न । निबिडयोरेव मूर्तयोः समानदेशतानङ्गीकारात् । आलोकचक्षुषोस्तैजसत्वेन निबिड-त्वाभावात् । वस्तुतस्तु वृत्तितानियामकसम्बन्धेनैव मूर्तयोर्विरोधः । ननु यथाकथंचित्सम्बन्धेनापि चक्षुःसंयोगस्यवृत्त्यनियामकत्वादालोक संयोगावच्छेदकावच्छेदेनापि तत्सत्त्वमव्याहतमेव । नच तथाप्यालो-कसंयोगस्यकारणतावच्छेदककोटिप्रविष्टत्वान्नकारणत्वमिति वाच्यम् । तादृशचक्षुःसंयोगत्वेन चक्षुः संयोगावच्छेदकावच्छिन्नालोकसंयोगत्वेन वा हेतुत्वमिति विनिगमनाविरहेण तस्यापि कारणत्वात् । नचालोकसं योगं विनापि बिडालादेः साञ्जनचोरादेश्चान्धकारे प्रत्यक्षोदयात्कथं तस्य कारणत्वमिति वाच्यम् । विजातीयचाक्षुषं प्रत्येवालोकसंयोगस्य हेतुत्वात् । बिडालादिसाञ्जनपुरुषीयचाक्षुषस्यावृत्तं चैतद्वैजात्यमिति । केचित्तु अ-ञ्जनाभावविशिष्टालोकसंयोगाभावत्वेन द्रव्यचाक्षुषत्वावच्छिन्नं प्रति प्रति-बन्धकत्वं तदभावत्वेन च कारणता अञ्जनाभावश्च स्वसंयुक्तचक्षुःसंयोगि-त्वसम्बन्धावच्छिन्नप्रतियोगिताकः । आलोकसंयोगाभावेऽञ्जनाभाववैशिष्ट्य-स्वसमानाधिकरणेन आलोकसंयोगाभावस्य स्वसमानाधिकरणैकत्वस-म्बन्धावच्छिन्नप्रतियोगिताकोबोध्यः । तेन संयोगस्याव्याप्यवृत्तित्वेपिन क्षतिः । सच विशिष्टाभावः । क्वचिद्विशेषणाभावप्रयुक्तः क्वचिद्विशेष्या-भावप्रयुक्तः साञ्जनपुंसोञ्जनाभाव विरहप्रयुक्तोविशिष्टाभावः । आलोक-संयोगस्थले चालोकसंयोगाभावविरहप्रयुक्त इत्युभयत्रापि प्रतिबन्धका भावसत्त्वमव्याहतं । बिलाडादिचाक्षुषेऽभिचारवारणाय च तत्पुरुषी-यत्वं निवेशनीयमित्याहुः ॥

समवायाभावग्रहार्थमेव विशेषणता प्रत्यासत्तिरित्युक्तं तत्तु समवाया भावयोः प्रमाणसत्त्वे एव सम्भवति तदेवनेत्याशङ्कते । स्यादेतदिति । सम-वायाभावग्राहकत्वेनैव तत्प्रत्यासत्तित्वं स्यादित्यत आह । समवायेति । प्रमाणसत्त्वे कथं तयोरसत्त्वमतआह । नहीति । तथाच प्रमाणाभावस्य प्रमेयाभावव्याप्यत्वात्तयोरसत्त्वमिति भावः । नन्वयं घटइतादिप्रतीतिर्यं घट

चलतीति प्रत्यक्षमेव घटत्व रूप चलन सम्बन्धविषयकं समवाये मानं नहि घटादौ तेषामन्यः सम्बन्धोस्तीति चेन्न स्वरूपसम्बन्धस्यैवाधाराधेयभावाख्यस्य सत्त्वात् नहि समवायएव घटत्वस्याधारता पटादावपि सत्त्वात् एकएव हि घटत्वपटत्वयोः समवायः ॥ नैवं घटे घटत्वं रूपं च समवेतं तन्तुषु पटः समवेतः इह कर्म समवेतमित्यनुगतसमवायाकारप्रतीत्या तत्सिद्धेः ॥ नचाऽभावोऽसन् घटोनास्तीतिप्रतीत्यातत्सिद्धेः ॥

घटत्वयोः सम्बन्धविषयकं तत्र च समवायातिरिक्तसंयोगादीनां बाधात्समवायसिद्धिः । तथा चेतरबाधसहकृतप्रत्यक्षप्रमाणस्यैव सम्भवात् कथं प्रमाणाभावइत्याशङ्कते । अयङ्घटइत्यादि । ननु समवायातिरिक्तस्यैव कस्यचित्सम्बन्धस्यैव सत्त्वान्नेतरबाधइत्यतआह । नहीति । तेषां । घटत्वरूपचलनादीनाम् । अन्यः सम्बन्धः । संयोगादिः । सत्त्वादिति । तथा च समवायातिरिक्तस्याधाराधेयभावाख्यस्वरूपसम्बन्धस्य सत्त्वात्तद्विषयकत्वेनैव प्रतीतेरुपपत्तौ न तदन्यथानुपपत्त्या समवायसिद्धिरिति भावः । नन्वाधारता समवायइति पर्यवसितं सिद्धं समवायेनेत्यत आह । नहीति । पटादावपीति । सत्त्वात् । समवायस्य सत्त्वात् । तथा च समवायस्यैवाधारतात्वे पटादावपि समवायरूपघटत्वाधारतासत्त्वेन तत्रापि घटत्वविशिष्टबुद्ध्यापत्तेः समवायातिरिक्तैवाधारता स्वीकार्या तथा च किं समवायेनेति भावः । ननु पटे घटत्वसमवायाभावादेव न तथा प्रतीत्यापत्तिरतआह । एकएवहीति । तत्सिद्धेरिति । तथाच समवेतमितिप्रतीतेः स्वरूपसम्बन्धविषयकत्वेनोपपादयितुमशक्यत्वात्समवायस्वीकारइति भावः वस्तुतस्तु अयंघटइत्यादिप्रतीतीनामनन्तस्वरूपसम्बन्धविषयकत्वे गौरवाल्लाघवेनातिरिक्तसमवायविषयकत्वमित्यवधेयम् । समवाये प्रमाणमुक्त्वा अभावे तदाह । नचेति । असन्निति । अप्रामाणिकइत्यर्थः । तत्सिद्धेः । अभावसिद्धेः ॥

अत्रप्राभाकराः नाभावोधिकः किन्तु केवलाधिकरणस्वरूपएव अतः किं तद्ग्रहाय प्रत्यासत्त्यन्तरकल्पनेन । ननु किमिदं कैवल्यं भूतलरूपं चेत्तद्घटभूतलस्यापि तत्त्वापत्तिः घटाभाववत्त्वं चेत्सिद्धमभावेनेति चेन्न । यत्राधिकरणे भवद्भिरभावोङ्गीक्रियते तदधिकरणस्यैवाभावत्वाङ्गीकारात् नचाभेदेआधाराधेयभावानुपपत्तिः । घटाभावे घटोनास्तीतिप्रतीतेरभेदेपि त्वया घटाभावे तथाभावाङ्गीकारात् । नचान्यएव घटाभावेघटाभावः अनवस्थापत्तेरप्रसिद्धान्ताच्च । अत्रोच्यते यदि भूतलविशेषणएव घटाभावस्तदा भूतले घटाभाववदित्याधारतात्प्रत्ययो न स्यात् नहि भूतलं भूतलाधिकरणं भूतले भूतलमिति प्रतीत्यापत्तेः । किञ्चयत्रेदानीं घटआनीतस्तदधिकरणं घटाभावो नवा आद्ये इदानीं घटोनास्तीतिप्रतीतिः स्यात् । अन्त्ये अन्यत्रापि घटोनास्तीति प्रत्ययो न स्यात् ॥

ननु वयमभावोनास्तीति न ब्रूमः किन्तु तस्याधिकरणस्वरूपत्वेनैवोपपत्तेरतिरिक्तत्वे मानाभावइति प्राभाकरमतमुपन्यस्यति । अत्रप्राभाकराइति । अतिरिक्तः । अधिकरणादतिरिक्तः । तद्ग्रहाय । अभावग्रहाय । प्रत्यासत्तेरिति । विशेषणतारूपप्रत्यासत्त्यन्तरकल्पनेनेत्यर्थः । यद्यपि समवायग्रहार्थमवश्यंतत्प्रत्यासत्तेरङ्गीकारः । तथाप्यभावग्राहकत्वेन तत्प्रत्यासत्तित्वं यत्रैवायिकैरुपेयते तदेव खण्डयतइतिभावः । इदम् । अभावप्रतीतिविषयीभूतं । तत्त्वापत्तिः । अभावस्वरूपत्वापत्तिः तथाच तत्रापि घटाभाववत्तावुद्विप्रसङ्गइतिभावः । अभावइति । अभावाधिकरणमित्यर्थः । यत्रेति । यत्कालावच्छेदेन घटाभावाधिकरणता भूतले उपेयते तत्रैवतत् स्वरूपत्वमङ्गीक्रियतइति भावः । नचाभेदइति । अभेदे । अभावाधिकरणयोरभेदे । तथा भावः । अधाराधेयभावः । अनवस्थापत्तेरिति । घटाभावेऽतिरिक्ताभाववद् घटाभाववत्यभावेप्यतिरिक्तः कल्प्यतेतथाचानवस्थेत्यर्थः । ननु यद्धर्मविशिष्टे यद्धर्मावच्छिन्नवत्ता नप्रतीयते तद्धर्मावच्छिन्ने तद्धर्मावच्छिन्ननिरूपिताधिकरणता नोपेयते । एवंच भूतले भूतलत्वावच्छिन्ननिरूपिताधिकरणत्वाभावान्न भूतले भूतलमिति प्रतीत्यापत्तिः । भूतले घटाभावत्वावच्छिन्ननिरूपिताधिकरणतायाः स्वीकारात्च भूतले

किञ्च कपाले घटोभविष्यति घटोनष्टइति प्रतीते रस्तिकपाले पूर्वंघटप्रागभाव उत्तरकाले घटध्वंसः स यदि कपालात्मा तदा सर्वदा तत्प्रतीतिः स्यात् कपालस्य सत्त्वात् अन्यथा कपालप्रतीतिरपि न स्यात् । किञ्चैवंमोक्षो दुःखाभावः आत्मरू-

---

घटाभावइति प्रतीतिरुपपन्नैवेत्यस्वरसादाह । किंचेति । आद्ये । तदधिकरणस्य घटाभावस्वरूपत्वे । इदानीमित्यनन्तरमिहेति शेषः । अन्त्ये । तदधिकरणस्य घटाभावास्वरूपत्वे । अन्यदापीति । घटे नीतेपीत्यर्थः ॥

नन्वतिरिक्ताभाववादिमते घटे आनीते घटाभावो न नश्यति नवा गच्छति तस्य नित्यत्वादभावत्वाच्चेति कुतो न घटाभाववत्तावुद्धिः । कथं वा भावाभावयोरेकाधिकरणावृत्तित्वरूपो विरोधस्तत्रोभयोःसत्त्वात् । अथ घटानधिकरणकालावच्छिन्नतत्तद्भूतलादिकमेव घटाभावस्य सम्बन्धः तथाच घटवद्भूतले अनेन सम्बन्धेन घटाभावस्याविद्यमानत्वान्न घटाभाववत्तावुद्धिः घटाभावस्य तेनसम्बन्धेनाविद्यमानत्वाच्च न विरोधिताघटकसम्बन्धेन तदधिकरणावृत्तित्वरूपविरोधव्याघातोपीतिचेत् । तर्हि विशिष्टसत्तायां अनतिरेकेपि यथा विशिष्टनिरूपिताधिकरणतायां गुणेऽसत्त्वात् गुणो गुणकर्मान्यत्वविशिष्टसत्तावानिति न प्रत्ययस्तथा सघटभूतलेपि तत्कालावच्छेदेन घटाभावाधिकरणतायां अनङ्गीकारान्नघटाभाववत्तावुद्धिप्रसङ्ग इत्यस्वरसादाह । किञ्चकपालइति । केचित्तु ननत्वा दविनाशशालिनी एकातिरिक्ताऽधिकरणतोपेयते तस्माच्च घटे आनीते नाशोपगमेन न तद्वत्तावुद्धिप्रसङ्ग इत्यस्वरसमाहुः । तदसत् प्रतिक्षणमप्रामाणिकानन्ताधिकरणत्वतन्नाशादुपगमे गौरवेणातिरिक्ताभावस्यैव कल्पयितुमुचितत्वात् । नच त्वदुक्तेप्येष दोषइतिवाच्यम् । मन्मते घटाभावाधिकरणतायांघटाधिकरणकालस्यावच्छेदकत्वानभ्युपगमेनानुपपत्त्यभावात् । सइति । घटप्रागभावोघटध्वंसश्चेत्यर्थः । सर्वदेति । प्रागभावनाशकालेध्वंसानुत्पत्तिक्षणेचेत्यर्थः । कपालमात्रइत्यर्थइतिकश्चित् । अन्यथा । प्रागभावध्वंसयो र्घटकाले सत्त्वेपि प्रतीत्यस्वीकारे । कपालप्रतीतिरपीति । कपालस्वरूपप्रागभावध्वंसयोरप्रतीतौ कपालमपि कथं प्रतीयेत चयावामैक्येनैकस्याप्रतीतौ न कस्यापि प्रतीतिः स्यात् । कस्यचित्प्रतीतौ सर्वमेव प्रतीयेतेति भावः । अन्यथा । कपालासत्त्वेइत्यर्थइति कश्चित् । नन्व

पः स्यात् तथाच असाध्यतापत्तिस्तस्य नित्यत्वादिति सङ्क्षेपः। स्यादेतत् एवं घटाभावो नास्तीति प्रतीत्या घटाभावाभावोऽप्यधिकः स्यात् स्यादेवेति चेत्तर्हि तदभावोऽप्यधिकः स्यादित्यनवस्था केवलाधिकरणं तदभावइति चेत्तर्हि सर्वत्र स एवाभावोऽस्तु कृतमधिकेन भवदुक्तदूषणगणप्रसङ्गश्चैवंरूपात् ।

वापि घटकालावच्छेदेन घटप्रागभावध्वंसाधिकरणतायां अनभ्युपगमान्न तत्काले तद्वत्तावुद्धिरित्यस्वरसादाह । किञ्चमोक्षइति । ननूत्पादविनाशयोर्नित्यनिष्ठयोरधिकरणतामङ्गीकृत्य घटकाले घटप्रागभावाधिकरणतायाः नाशाद् ध्वंसाधिकरणतायाश्च अनुत्पत्तेश्च न तद्वत्तावुद्धिरित्यस्वरसात्किञ्चेतीति केचित् । तन्तु पूर्वमेव दूषितत्वादनादेयम् । असाध्यत्वेति । इष्टापत्तौतुश्रवणमनन निदिध्यासन ध्यान धारणा समाधिकृतमनेकविधं दुःखञ्कोपि*नानुभूयादिति बोध्यम् । ननु नित्यसुखाभिव्यक्तेरेव मुक्तित्वेनासाध्यतापत्तिरित्यत आह । सङ्क्षेपइति । तैरीश्वरानङ्गीकारादीश्वरीयनित्यसुखमप्रसिद्धंजिवस्य तु नित्यसुखे प्रामाणाभावेन नित्यसुखाभिव्यक्तिर्मुक्तिरिति मुक्तिलक्षणमसम्भवि । तस्माद्दुःखध्वंसरूपमुक्तेरसाध्यत्वापत्तिरस्तीतिभावः । इदन्तु चिन्तामणौ तन्मते दुःखध्वंसनिरूपिताधिकरणतायाः साध्यत्वं सम्भवतीव मोक्षाधिकरणतायाः साध्यत्वोपगमादिति प्राभाकरमते न कश्चिद्दोषः । वस्तुतस्तु भूतले घटोनास्ति पर्वते घटोनास्तीत्यादिप्रतीतीनामनन्ताधिकरणभेदेन तत्तदधिकरणस्वरूपाभावविषयकत्वकल्पने गौरवादेकातिरिक्तघटत्वावच्छिन्नप्रतियोगिताकाभावविषयकत्वमेव समुचितम् । एवं घटवत्तावुद्धिं प्रति घटाभाववत्ताज्ञानत्वेन प्रतिबन्धकतायां सघटभूतलेपि यत्किञ्चिद्घटाभावस्यसत्त्वाद्घटाभावकूटवत्ता ज्ञानत्वेनैव प्रतिबन्धकित्वं वाच्यम् । तदपेक्षया घटत्वावच्छिन्नप्रतियोगिताकाभाववत्ताज्ञानत्वेनैव प्रतिबन्धकस्यैवौचित्यमित्यादिरीत्या अतिरिक्ताभावसिद्धिरिति निपुणतरमूहनीयम् । तदभावइति । घटाभावाभावस्याप्यभावइत्यर्थः । केवलाधिकरणमित्यादि । केवलाधिकरणम् । घटाभावानधिकरणं भूतलं । तदभावः । घटाभावाभावः । सर्वत्र । घटाभावस्थलेपि । स एव । अधिकरणस्वरूप एव । ननु सर्वत्राधिकरणस्वरूपत्वे पूर्वं दूषणमुक्तमेवेत्यत आह । भव-

---

* नानु भवेदितिपाठोयुक्तः ॥

अपराङ्कः घटाभावाभावोघटएव तत्सत्त्वे घटाभावोनास्तीति प्रतीतेः नच केवलाधिकरणरूपः उक्तयुक्तेरिति संप्रदायः ॥ नन्यास्तु घटाभावाभावोऽधिकएव अभावत्वेन प्रतीतेः नचायं भ्रमः बाधकाभावात् तदभावस्तु घटाभावएव नाधिकइतिनानवस्थानमित्याङ्कः । स्यादेतत् भूतलं घटभेदभिन्नं न्वा अन्त्ये आयातं भूतलमेव घटभेदइत्यनेन । आद्ये तद्भेदो ऽप्यधिकः स्यात् स्यादेवेति चेत्तद्भेदोप्यधिकः स्यादित्यनवस्था । अथानवस्थाभयाद्भेदोनाधिकः किन्त्वधिकरणरूपइति चेन्न भवदुक्तदूषणगणप्रसङ्गात् । अचाङ्कः भेदभेदोऽधिकएव नचैवं तद्भेदोऽप्यधिकः स्यादिष्टत्वात् नचेयमनवस्था दोषाय प्रामाणिकत्वात् । तदाङ्कः "सर्वतो बलवतीह्यन्यथानुपपत्तिरिति" सङ्क्षेपः । सचायमभावो द्वेधा अन्योन्याभावः संसर्गाभावश्च । तत्रेदमिदन्न भवति दृदमेत-

---

दुक्तेति । एवम् । घटाभावाभावस्याधिकरणस्वरूपत्वे । तथाच यानि दूषणानि घटाभावस्याधिकरणस्वरूपत्वे त्वयोक्तानि तानि त्वन्मतेऽप्यविशिष्टानीति भावः । तत्सत्त्वे । घटसत्त्वे । उक्तयुक्तेरिति । आधाराधेयभावानुपपत्तिरूपदूषणादित्यर्थः ॥

सम्प्रदायमतेऽस्वरसं वदन्नव्यमतमाह । नव्यास्त्विति । अयम् । अभावत्वेन प्रतीतेः । बाधकाभावात् । प्रमात्वे बाधकाभावात् । अन्योन्याभावस्यलेप्याङ्गते । स्यादेतदिति । अन्त्ये । भूतले घटभेदभिन्नत्वाभावे । आद्ये । भूतलस्य घटभेदभिन्नत्वे । तद्भेदोपीति । घटभेदस्यभेदोपीत्यर्थः । भवदुक्तेति । अधाराधेयभावानुपपत्तिरूपदूषणगणप्रसङ्गादित्यर्थः । । प्रामाणिकत्वादिति । बीजाङ्कुरानवस्थायाइव प्रमाणसिद्धत्वादित्यर्थः । सङ्क्षेपइति । घटभेदाभावोघटत्वस्वरूपइत्यादि बोध्यम् । सचायमिति । प्रागुक्तयुक्त्या अतिरिक्तत्वेन सिद्धोऽभावश्चेत्यर्थः । तत्र प्रथमोदिष्टमन्योन्याभावं लक्षयति । तत्रेति । प्रतीतिसाक्षिकइति । ईदृग्यप्रतीतिसिद्धमखण्डोपाधिरूपमन्योन्याभावत्वमेवान्योन्याभावलक्षणमित्यर्थः । प्राचीनोक्तमन्योन्याभावलक्षणन्दूषयति । यदिदमाहुरित्यादिना । तादात्म्येति । तदात्मनोभावस्तादात्म्यम् घटतादात्म्यं हि घटत्वं तथाच घटान्योन्याभावबोधे घटत्वं सम्बन्धविधया प्रकारतया च प्रतियोगितावच्छेदकंभासतइति द्विविधत-

द्भिन्नमिति प्रतीतिसाक्षिको ऽभावोऽन्योन्याभावः यद्दिङ्मात्रम् "तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकोऽभावः" इति तदन्योऽभावः संसर्गाभावः । सोपि त्रिविधः अत्यन्ताभावप्रागभावप्रध्वंसाभावभेदात् । नास्तीत्यनुभवसिद्धो नित्यः संसर्गाभावोऽत्यन्ताभावः ॥

यावटत्वस्यभानं । नच संयोगितादात्म्यं संयोगएवेति संयोगावच्छिन्नप्रतियोगिताकसंयोग्यत्यन्ताभावेऽतिव्याप्तिरिति वाच्यम् । तादात्म्यसामान्यसम्बन्धावच्छेदेति तदर्थात्तादात्म्यत्वविशिष्टत्वमेव हि तादात्म्यसामान्यत्वं तादात्म्यं च सम्बन्धताविशेषः प्रतीतिसाक्षिकः घटत्वादिरूपतादात्म्यं तादात्म्यत्वेनैव घटान्योन्याभावप्रतियोगितावच्छेदकमितिलक्षणसमन्वयः । संयोग्यत्यन्ताभावे च संयोगत्वेनैव सम्बन्धत्वं नतु तादात्म्यत्वेनेति नानुपपत्तिः । अत्र ध्वंसप्रागभावयोरिवान्योन्याभावस्य प्रतियोगितावच्छेदकसम्बन्धे मानाभावः । नचात्यन्ताभावस्यापि तथास्विति वाच्यम् । संयोगसम्बन्धावच्छिन्नघटात्यन्ताभाववत्ताज्ञाने सत्यपि समवायादिसम्बन्धेन घटवत्ताज्ञानोदयात्संयोगसम्बन्धावच्छिन्नघटनिष्ठप्रकारतायालिङ्गानं प्रति संयोगसम्बन्धावच्छिन्नप्रतियोगिताकघटाभावप्रकारकज्ञानत्वेन प्रतिबन्धकत्वात् । अत्यन्ताभावस्य प्रतियोगितावच्छेदकसम्बन्धावश्यकत्वा दन्योन्याभावस्य च नानासम्बन्धावच्छिन्नप्रतियोगिताकत्वाभावेन समवायेन घटत्ववत्ताज्ञानं प्रति घटान्योन्याभावधीज्ञानत्वेनैव प्रतिबन्धकतयाऽन्योन्याभावस्य तथानावश्यकत्वादित्यखण्डोपाधिरूपत्वमेव तस्य सम्यगित्यस्वरसमाहुरित्यनेनसूचितः । तदन्यइति । अन्योन्याभावान्यइत्यर्थः । तथाचान्योन्याभावभिन्नाभावत्वंसंसर्गाभावत्वमितितल्लक्षणमितिभावः । अत्र च यद्यपि नास्तीति प्रतीतिसाक्षिकोऽभावः संसर्गाभावस्तदन्यो ऽभाव अन्योन्याभावइत्यपि वक्तुमुचितम् । तथापि नास्तीतिप्रतीतेरत्यन्ताभावविषयकत्वेनैवोपपत्तेरतिरिक्तसंसर्गाभावत्वे मानाभावान्न तथोक्तम् । सोपि । संसर्गाभावोपि । अत्र नास्तीत्यनुभवेत्यादि अग्रे च विनष्टइत्यादिप्रतीतिप्रदर्शनमत्यन्ताभावध्वंसयोः प्रमाणदर्शनाय नतु लक्षणेपि तन्निवेशइति बोध्यम् । नित्यत्वमात्रोक्तौ गगनादौ संसर्गाभावमात्रोक्तौ च प्रागभावध्वंसयोरतिव्याप्तिरित्युभयोपादानं । नित्यत्वं चात्र प्रागभावाप्रतियोगित्वे सतिध्वंसाप्रतियो

विनष्टइति प्रतीतिसाक्षिकोत्पत्तिमानभावो ध्वंसः । सच न विनाश्यग्राह्यो तद्विनाशकल्पनायां मानाभावात् नहिविनाशो विनष्टइति प्रत्येति कश्चित् तत्प्रागभावश्च घटादिरूपप्रतियोगी तत्प्रागभावश्च उभयत्र । ध्वंसोभविष्यतीति प्रत्ययात् । विनाश्यभावः प्रागभावः सच भविष्यतीत्यनुगतानुभव साक्षिको दुरपन्हवः ॥ तस्य च ध्वंसः घटादिरूपप्रतियोगी त-

---

गित्वम् । ध्वंसस्य प्रागभावप्रतियोगित्वात् प्रागभावस्य ध्वंसप्रतियोगित्वाच्च तत्रातिप्रसङ्गः । एकतरमात्रोक्तौ वा न्यतरातिव्याप्तिरितिध्येयम् ॥

उत्पत्तिमानिति । उत्पत्तिमत्त्वमात्रोक्तौ घटादावभावत्वमात्रोक्तौ चात्यन्ताभावादावतिव्याप्तेर्वारणायोभयोपादानम् । आद्यक्षणसम्बन्धउत्पत्तिः । स्वाधिकरणक्षणावृत्ति प्रागभावप्रतियोगिक्षणसम्बन्धउत्पत्तिरिति यावत् । अध्वस्त क्षणयोगस्य क्षणयोगोजनिर्मतेति वा तदर्थः । स्वाधिकरणक्षणध्वंसानधिकरण क्षणसम्बन्धएवोत्पत्तिरिति । महाप्रलयाङ्गीकर्तृमते तु क्वचिदपि यदीयसमयसम्बन्धे यत्समयवृत्तिध्वंसप्रतियोगित्वं नास्ति तस्य तत्समयसम्बन्धउत्पत्तिरिति तदर्थः । स्ववृत्तिपदार्थप्रागभावानधिकरणत्वं स्ववृत्तिध्वंसप्रतियोग्यनधिकरणत्वं वा क्षणत्वमिति बोध्यम् । सच । ध्वंसस्य । ननु प्रतीतिरेव मानमतआह । नहीति । ध्वंसस्य ध्वंसाप्रतियोगित्ववत्प्रागभावाप्रतियोगित्वमपि स्यादिति भ्रमं निराकर्तुमाह । तत्प्रागभावश्चेति । ध्वंसप्रागभावश्चेत्यर्थः । अत्रे च प्रतियोगिप्रागभावएवतत्प्रागभावपदेन ग्राह्यः । अत्र प्रतीतिं प्रमाणयति । उभयत्रेति । प्रतियोगि दशायां प्रतियोगिप्रागभावदशायांचेत्यर्थः इदमुपलक्षणं । ध्वंसप्रागभावानधिकरणकालस्य प्रतियोग्यधिकरणत्वनियमेन ध्वंसस्य ध्वंसस्वीकारे घटाद्यञ्जनप्रसङ्गाद् ध्वंसस्यध्वंसः । एवं घटप्रागभावकाले ध्वंसोऽञ्जनप्रसङ्गाद् घटप्रागभावस्य घटध्वंसप्रागभावरूपतेत्यपि द्रष्टव्यम् । प्रागभावं लक्षयति । विनाशेति । घटादौ अत्यन्ताभावादौ चातिव्याप्तिवारणाय यथा क्रमं विशेषणद्वयोपादानं । ननु प्रागभावाङ्गीकारे मानाभावइत्यत आह । सचेति । तथाच भविष्यतीति प्रतीतिविषयतया प्रागभाव आवश्यक इति भावः । ननु भविष्यत्त्वस्य वर्तमानप्रागभावप्र-

ध्वंसस्य चोभयत्र विनष्टः प्रागभावइति प्रतीतेः । अत्यन्ताभावान्यान्यभावौच नित्यौ ॥

नित्यश्चाभावो द्विविधः । एकमात्रवृत्तिधर्मावच्छिन्नप्रतियो-

तियोगित्वरूपत्वे प्रागभावासिद्धिः । तदेव न किन्तु वर्तमानकालोत्तरकालोत्पत्तिकत्वमेव तत्त्वम् । नच यत्सामग्र्यव्यवहितोत्तरोयः क्षणः सतदुत्पत्तिनानिति सामग्र्योव्याप्ते घटादिद्वितीयक्षणे घटादेरुत्पत्तिवारणाय प्रागभावहेतुत्वमावश्यकमितिवाच्यम् । उत्पत्त्यन्तर्भावेन सामग्र्योव्याप्तेरनुपगमात् अपितुतदधिकरणत्वान्तर्भावेनैव अस्तुवा तथातथापि जन्यद्रव्यत्वावच्छिन्नं प्रति समवायेन द्रव्यत्वेन प्रतिबन्धकत्वोपगमेनानुपपत्तेरभावात् अनन्तप्रागभावकल्पनामपेक्ष्यैकप्रतिबध्यप्रतिबन्धकभावकल्पनाया एवोचितत्वादितिचेत् । अत्राहुः । सहस्रतन्तुकपटस्थले स्वानधिकरणतन्त्वादौ पटोत्पत्तिवारणाय तावत्संयोगानान्तत्तत्तन्तूनां वा तत्तद्व्यक्तित्वेन कारणत्वमपेक्ष्यैकप्रागभाव कारणत्वमेव वक्तुमुचितं । प्रागभावस्यच प्रतियोगिसमानदेशत्वनियमेन पटादीनां देशनियमोपपत्तिः । नच त्रिच*तुर्ष्वत्पन्नेषु संयुक्तेषु च तन्तुषु तत्पटोत्पत्तिवारणाय तत्तत्तन्तूनां तत्तत्तन्तुसंयोगानां वा हेतुत्वमावश्यकमिति वाच्यम् । चरमतन्तुसंयोगव्यक्तेरेव तद्व्यक्तित्वेन हेतुत्वोपगमात् । चरमसंयोगानधिकरणतन्तावपि तत्पटोत्पत्त्या तद्विरहेण तन्त्वन्तरे तत्पटोपादानवारणासम्भवात् प्रागभावस्वीकारस्यावश्यकत्वात् । चरमसंयोगस्य च तत्पटं प्रति समवायेन न हेतुता चरमसंयोगानधिकरणतन्तावपि तत्पटोत्पत्तेः किन्तु समवायसम्बन्धेन तत्पटं प्रति कालिकसम्बन्धेन चरमसंयोगोहेतुरित्यलमप्रकृतविचारेण । तस्य चेति । प्रागभावस्यचेत्यर्थः । तद्ध्वंसस्य । प्रतियोगिध्वंसस्य । प्रतीतिं प्रमाणयति । उभयत्रेति । प्रतियोगिदशायां प्रतियोगिध्वंसदशायांचेत्यर्थः । इदमुपलक्षणं । प्रागभावोन्मज्जनप्रसङ्गोपि द्रष्टव्यः ॥

नित्याविति । नित्यत्वं चात्र प्रागभावाप्रतियोगित्वे सति ध्वंसाप्रतियोगित्वं ग्राह्यम् अतएव ध्वंसप्रागभावयोर्न विभागइति भावः । प्रसङ्गाद् व्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकाभावमतिरिक्तं साधयितुं प्रणालीमारभते । नित्यश्चेत्यादिना । एकमात्रेति । एकमात्रपर्याप्तवृत्तिकेत्यर्थः ।

---

* त्रिचतुरेषु इतिपाठं सम्यञ्चं प्रतिपद्ये ॥

गिताकोऽन्यश्च । न चान्त्ये मानाभावः । घटवति घटपटौ नस्तः घटो न घटपटौ । एकघटवति न घटौ । एको न द्वावित्यादिप्रतीतेः एकघटवति द्वित्वावच्छिन्नतदत्यन्ताभावस्यैकस्मिन्नुभयान्योन्याभावस्य च सत्त्वात् । नच प्रतियोगिमति

अन्त्ये इति । एकमात्रापर्याप्तवृत्तिकधर्मावच्छिन्नप्रतियोगिताकश्चेत्यर्थः । नचान्त्ये । एकमात्रापर्याप्तवृत्तिकधर्मावच्छिन्नप्रतियोगिताके अभावे । घटवतीत्यादिप्रतीतिविषयप्रदर्शनमत्यन्ताभावान्योन्याभावभेदेन । घटवतीति । व्यासज्यवृत्तिधर्मावच्छिन्नाभावानभ्युपगमे तादृश्यप्रतीत्यनुपपत्तिरिति भावः । नच तादृश्यप्रतीतेः पटाभावविषयकत्वेनैवोपपत्तेर्नातिरिक्ताभावसाधकत्वमिति वाच्यम् । तथासति क्वचिद् घटाभावः क्वचित्पटाभावोविषयइति तादृश्यानुगतप्रतीत्यनुपपत्तेः । अनुगतधर्मंविनाऽनुगतप्रतीत्यभावात् । नन्वायातु द्वित्वावच्छिन्नप्रतियोगिताकाभावस्तथापि क्वचिन्नानामेव द्वित्वसमानाधिकरणघटत्वपटत्वाद्यवच्छिन्नप्रतियोगिताकाभावानां प्रतियोगितावच्छेदकतदुपेयते । तथाच तस्यातिरिक्तत्वे मानाभावएवेत्यत आह । एकघटवतीति । घटौ न स्तइति प्रतीतेर्यदि घटप्रतियोगिताकाभावोविषयस्तर्हि घटद्वयवत्यपि यत्किञ्चिद् घटप्रतियोगिकाभावसत्त्वात् तादृश्यप्रतीत्यापत्तिः । यदिचघटत्वावच्छिन्नाभावोविषयस्तदा एकघटवत्यपिघटौ नस्तइतिप्रतीत्यनुपपत्तिरित्यनायत्या अतिरिक्तोऽभावोऽभ्युपेयतेइति भावः । ननु तद्घटवति तद्घटान्यघटत्वावच्छिन्नाभावः घटान्तरवति च तदन्यघटत्वावच्छिन्नाभावोविषयो वक्तुं शक्यत एवेति चेन्न । तथाप्यनुगतधर्मं विनानुगतप्रतीतेरुपपादयितुमशक्यत्वमित्यादेः प्रागेव निवेदितत्वात् । ननु यत्किञ्चिद् घटवति घटपटौ नस्तइति प्रतीतेर्द्वित्वसामान्यं न प्रतियोगितावच्छेदकं तथाविधयत्किञ्चिद् घटासत्त्वेन तदवच्छिन्नाभावासत्त्वात् । नापि द्वित्वविशेषः । तत्तद्द्वित्वत्वेनाप्यनुपस्थितेः । तत्तद्द्वित्वत्वानुपस्थितिदशायामपि तादृशाभावप्रतीतेः । केवलघटादिमत्यपि तथा प्रत्ययेन प्रत्येकघटत्वपटत्वादिकमपि नतथेति त्वन्मतेप्यनुगतप्रत्ययानुपपन्नएवेति चेन्न । द्वित्वं द्वित्वधर्मितावच्छेदकीभूतं घटत्वं पटत्वं च तथा । प्रतियोगितावच्छेदकताचाच व्यासज्यवृत्तिर्वाच्या प्रतियोगितावच्छे-

कथं तदभाव स्त्रयोर्विरोधादिति वाच्यम् । प्रतियोगितावच्छेदकावच्छिन्ने नैवाभावस्य विरोधात् । नचैकोद्दित्वावच्छिन्न एकोद्दित्वप्रतीतेः । अतएव दण्डिपुरुषाद्दण्डे अपनीते पुरुषे सत्यपि दण्डीपुरुषो नास्तीति धीबलाद्दि विशिष्टाभावो विशेषणावच्छिन्नविशेष्याभावरूपो भ्युपेयते । नचेयं दण्डाभाव विषया । दण्डवत्त्वपि तथा प्रतीतेः । नच पुरुषाभावविषया तस्य सत्त्वात् । तस्मात्तत्र विशेषणाभावो विशेष्याभाव उभयाभावो वा तत्र विशिष्टाभावोऽधिकोऽवसेयः ॥

दकावच्छिन्नंच घटपटोभयमिति नानुपपत्तिलेशोपीति ध्येयम् । तयोरिति । प्रतियोग्यभावयो रेकाधिकरणावृत्तित्वरूपविरोधादित्यर्थः । नन्वेकस्मिन्नपि समवायेन द्वित्वमस्त्येवेत्यतआह । एकोद्दावितिं । एकस्मिन्समवायेन द्वित्वस्य सत्त्वेन एकोद्दाविति प्रतीत्यापत्तिरतः समवायेनतत्सत्त्वेपि पर्याप्तिसम्बन्धेन तदसत्त्वात्र तथा प्रतीतिरित्युपेयम् । एवंच प्रतियोगितावच्छेदकपर्याप्त्यधिकरणेनैवाभावस्य विरोधात्रतदनुपपत्तिरिति भावः । प्रतियोगितावच्छेदकावच्छिन्ने नैवाभावस्य विरोधात्प्रतियोगिसत्त्वेपि नातिरिक्तविशिष्टाभावोविरुद्धइत्यत आह । अतएवेति । प्रतियोगितावच्छेदकावच्छिन्नेनैवाभावस्य विरोधादेवेत्यर्थः । दृश्यं । दण्डीपुरुषोनास्तीति धीः । तस्य । पुरुषस्य । न च क्वचिद्दण्डाभावोविषयः क्वचित्पुरुषाभावोविषयइति वाच्यम् । विषयानुगमंविनाऽनुगतप्रतीत्यनुपपत्तिरित्यस्यसकृदावेदितत्वात् ॥

नन्वायातु उपदर्शितरीत्या अतिरिक्तोऽभावः । तथापि तद्ग्राहिका न विशेषणता प्रत्यासत्तिः किन्तु चक्षुरादिना वस्त्वादिज्ञानासम्भवात् यथाऽनुमानादेः प्रमाणान्तरत्वं तथाऽभावग्रहे ऊनानांसंयोगादिसन्निकर्षाणामभावेनेन्द्रियादेर्ग्राहकत्वासम्भवात् प्राप्यकेन्द्रियस्य ग्राहकत्वात् । अन्यथा निमीलितनयनस्यापि घटादिग्रहापत्तेरितरानुपलब्ध्याख्यं प्रमाणान्तरमभावग्राहकमेवेतिस्थम् । नच विशेषणतैव सन्निकर्षः । तस्यास्त्वेनाऽकृतत्वात्समवायानङ्गीकारेण समवायग्राहकत्वेनाप्यकृतत्वाच्च । तथाच

भट्टास्तु अभावो नेन्द्रियग्राह्यः कृत्स्नसन्निकर्षाणामभावात् किन्त्वनुपलब्धिरूपप्रमाणगम्य इत्याहुः । तन्न । प्रमाणान्तरकल्पनातः सन्निकर्षान्तरकल्पनाया लघुत्वात् । अन्यथा संयोगादीनां कृत्स्नानां सन्निकर्षणामभावात् शब्देपि प्रमाणान्तरकल्पनाप्रसङ्गः । तच्च शब्दं साक्षात्करोमीति प्रतीतेः प्रत्यक्षएवायमिति चेत् । इहापि पश्यामि घटाभावमिति प्र-

घटाभावस्यानुपलब्धिरूपप्रमाणजन्यमनुपलब्धरूपमेव ज्ञानं नतु साक्षात्कारः साक्षात्कारत्वस्येन्द्रियजन्यत्वव्याप्यत्वात् । नचैवं निमीलितनयनस्यापि घटाभावग्रहापत्तिः । सङ्गामभावोनिरूप्यइति नियमात् । अभावग्रहेऽधिकरणप्रत्यक्षस्य जनकतया तज्जननार्थमिन्द्रियापेक्षणात् अतएवतज्जनकतया ऽन्यथासिद्धमिन्द्रियं नाभावग्रहे हेतुः । नचा धिकरणप्रत्यक्षस्य व्यापारतया न तेन तदन्यथासिद्धिः । व्यापारेण व्यापारिणोऽन्यथासिद्धासम्भवात् । अन्यथा चक्षुः सन्निकर्षेण चक्षुषोप्यन्यथासिद्धिः प्रसज्येत इति वाच्यम् । इन्द्रियस्य जनकत्वसम्भवेपि अधिकरणप्रत्यक्षस्य तद्व्यापारत्वं तदेव न कृत्स्नसन्निकर्षाभावात् । एवंचानुपलब्धिरूपप्रमाणस्यापि सत्त्वाच्चत्वार्येव प्रमाणानीत्यप्यङ्गतमिति निष्कृष्टं भट्टमतं दूषयितुं तन्मतमुपन्यस्यति । भट्टास्त्विति । नेन्द्रियग्राह्यः । नेन्द्रियजन्यलौकिकसाक्षात्कारविषयः । कृत्स्नसन्निकर्षाणां । संयोगादिपञ्चानांसन्निकर्षाणाम् अभावात् । अभावे असम्भवात् । ननुतर्हिअभावग्रहानुपपत्तिरत आह । किन्विति । इदंप्रमाणान्तरजन्यज्ञानेच न सन्निकर्षापेक्षेति नेन्द्रियसमानतेति भावः । प्रमाणान्तरेति । धर्मिकल्पनातोधर्मकल्पनायालघीयस्त्वमिति न्यायादनुपलब्धेरकृत्स्नविजातीयप्रमां प्रति करणत्वकल्पनामपेक्ष्य कृत्स्नप्रत्यक्षप्रमाहेतुतया विशेषणता रूपसन्निकर्षकल्पनमेव लघीयइत्यर्थः । तथाचेन्द्रियेणैव तद्ग्रहइति भावः । अन्यथेति । सन्निकर्षकल्पनयोपपत्तावपि प्रमाणान्तरकल्पनेदृत्यर्थः । अन्यथा सन्निकर्षान्तराकल्पने इतरार्थइतरापि कश्चित् । कृत्स्नानां संयोगादित्रयाणां सन्निकर्षाणां सङ्गते । तच्चेति । प्रत्यक्षएव । प्रत्यक्षविषयएव । अयं । शब्दः । तथाच जन्यसाक्षात्कारत्वावच्छिन्नं प्रति सन्निकर्षत्वेन हेतुतया शब्देपि सन्निकर्षकल्पनमावश्यकं । सन्निकर्षश्चसंयोगाद्यन्यतमस्त्वमिति भावः । अथेत्यतएवेत्यानन्तर्यमभावइति शेषः । त-

तीतेः प्रत्यक्षएवेतितुल्यम् । किञ्चानुपलब्धेः प्रमाजनने व्यापाराभावात् कथं प्रमाकरणत्वम् । व्यापारवद्धि कारणं करणमित्युक्तम् । नन्वेवं घटाभाववति घटोपलब्धावपि घटाभावप्रत्ययः स्यात् इन्द्रियसम्बद्धविशेषणतायाः सत्त्वादिति चेन्न । योग्यानुपलब्धेरप्यभावग्रहेहेतुत्वात् । अथ केयं योग्यानुपलब्धिः योग्यस्य प्रतियोगिनोनुपलब्धिः

थाचाप्यभावग्रहार्थं सन्निकर्षापेक्षणमावश्यकमितिभावः । ननुशब्देपि प्रमाणान्तरापत्तेरितियुक्तं प्रतिबन्देरनुत्तरत्वादितिस्वरसादाह । किञ्चेति ननु व्यापाराभावेपि फलायोगव्यवच्छिन्नकारणत्वरूपकरणत्वमुपपद्यतएव । अतएव "साधकतमं करणमिति" सूत्रमपीतिभावः । व्यापारवदिति । निमीलितनयनदशायामन्धकारेच चक्षुषोपि फलायोगात् स्वेतरयावत्कारणसमवधाने यदव्यवहितोत्तरक्षणे कार्योत्पत्तिस्तत्त्वमेव फलायोगव्यवच्छिन्नत्वं वाच्यम् । एतस्य च यावत्कारणघटिततया गुरुत्वेन व्यापारवत्कारणत्वस्यैव करणत्वरूपत्वोचितत्वेनानुपलब्धेः प्रमाणत्वव्याघातइति भावः । उक्तमिति । उक्तप्रायमितिभावः । वस्तुतस्तु । धर्मिकल्पनान्याय्येनैव सन्निकर्षकल्पनं नतु प्रमाणान्तरकल्पनमिति पूर्वोक्तयुक्तिरतिरमणीयेति हृदयम् ॥

अनुपलब्ध्याख्य प्रमाणानङ्गीकारे घटाभाववति घटभ्रमदशायां घटाभावसत्त्वादिन्द्रियसम्बद्धविशेषणतया घटाभावप्रत्यक्षापत्तिः । मन्यते च घटोपलम्भसत्त्वेनानुपलब्धेरभावान्न तत्रप्रत्यक्षापत्तिरितिनाय्यत्वा प्रमाणान्तरकल्पनमावश्यकमितिनाय्येन मीमांसकः शङ्कते । नन्वेवमिति । एवम् । अनुपलब्ध्याख्यप्रमाणमनङ्गीकृतेन्द्रियसम्बद्धविशेषणतायाअतिरिक्तायाः प्रत्यासत्तित्वे । योग्यानुपलब्धेरपीति । चक्षुषा घटाभावप्रत्यक्षेजननीये भवतामतिरिक्तप्रमाणत्वेनाभ्युपगतायाः योग्यानुपलब्धेः सहकारित्वं करिष्यते । घटाभाववति च घटोपलम्भेन योग्यानुपलब्ध्यभावादेव न घटाभावप्रत्यक्षापत्तिरिति भावः । नन्वेवं किमविशिष्टमनुपलब्धेः प्रमाणत्वेन प्रत्युतेन्द्रियस्य कारणत्वे विशेषणतारूपप्रत्यासत्तिकल्पनमधिकमिति चेन्न । विजातीय प्रमाणकल्पनापेक्षया प्रत्यासत्त्यन्तरकल्पनायान्याय्यत्वात् । व्यापारवत्त्वाभावेन प्रमाणत्वासम्भवस्य पूर्वमेव दर्शितत्वाच्चेति । अभावग्रहे । अभावलौकिकप्रत्यक्षे । अथ केयमिति । इयम् । अभावग्रहे हेतुः । योग्यस्यानुपल-

सहकारिणीतिमतं तन्न । पृथिवीत्वाभावस्य जलपरमाणौ ग्रहापत्तेः भवति हि पृथिवीत्वं चक्षुर्योग्यं तदनुपलब्धिश्च जलपरमाणौ किञ्च स्तम्भे पिशाचभेदग्रहानुपपत्तेः पिशाचस्तम्भेदप्रतियोगिनोऽयोग्यत्वात् । अथ योग्येऽधिकरणे प्रतियोगिनानुपलब्धेः सहकारिणीति चेन्न । भूतले पिशाचात्यन्ताभावग्रहापत्तेः । परमाणौ महत्त्वाभावग्रहानापत्तेश्च ॥ यत्तु अत्यन्ताभावग्रहे योग्यप्रतियोग्यनुपलब्धेरन्योन्याभावग्रहे च योग्येऽधिकरणे प्रतियोगितादात्म्यानुपलब्धेः सहकारिणी ति मतं तन्न । जलपरमाणौपृथिवीत्वात्यन्ताभावग्रहापत्तेः । वायावुद्भूतरूपवद्ग्रहानापत्तेश्च । नचेष्टापत्तिः । अनुभवविरोधात् ॥

अत्रोच्यते योग्या सहकारिसम्पन्नानुपलब्धेः कारणम् । अतएवान्धकारे न घटाभावग्रहश्चक्षुषा । तच्चालोकाधिकरणसन्निकर्षस्यापि हेतुत्वात्नवा जलपरमाणौ पृथिवीत्वाभावग्रहः योग्यसन्निकर्षाभावात् । कः सन्निकर्षो योग्यः पृथि-

---

ब्धिरिति वा योग्येऽनुपलब्धिरितिवायोग्यानुपलब्धिशब्दार्थइत्यर्थः । तत्राद्यमाशङ्कते । योग्यस्येति । जलपरिमाणाविति । महत्त्वाभावप्रत्यक्षानुरोधेन विजातीयचक्षुः संयुक्तविशेषणतया अवश्यमङ्गीकार्यतया पृथिवीत्वाभावस्यापि ग्रहापत्तिरिति भावः । दूषणान्तरमाह । स्तम्भेति । द्वितीयमाशङ्क्य निराचष्टे । अथयोग्येति । स्वैकदेशिमतं दूषयितुं तन्मतमनुपन्यस्यति । यस्मिन्निति । वायाविति । वायोरयोग्यत्वादिति भावः । परमाणौ महद्रूपग्रहानापत्तेश्चेत्यपि द्रष्टव्यम् । अनुभवेति । वायुर्नरूपवान् परमाणुर्न महान्इत्यादि प्रत्यक्षप्रतीतीनां विलोपप्रसङ्गादित्यर्थः ॥

योग्याचासावनुपलब्धिश्चेति कर्मधारयमभिप्रेत्याह । अत्रोच्यतइति । योग्येत्यस्य विवरणं सहकारीति । तथाचाभावप्रत्यक्षसामग्री विशिष्टा प्रतियोग्यनुपलब्धिरेवयोग्यानुपलब्धिरित्यर्थः । अतएव । सहकारिसम्पन्नत्वरूपयोग्यत्वविशेषणदानादेव । योग्येति । योग्यसन्निकर्षस्यैव अभावप्र-

योग्यताभावग्राहकमिति चेत् इन्द्रियसन्निकृष्टमहत्त्वोद्भूतरूपविशेषणता । उद्भूतरूपाभावे तु इन्द्रियसन्निकृष्टमहत्त्वविशेषणता योग्यः सन्निकर्षोऽतोमनसि न तद्ग्रहः । भवति च महति वायावेव मन्यापि योग्य सन्निकर्षः कार्यवशादुन्नेयः । पिशाचात्यन्ताभावस्तु योग्यत्वादेव न गृह्यते । का पुनरत्यन्ताभावे योग्यता । योऽयमात्मप्रतियोगिके

त्मकसामग्रीघटकत्वेन परमाणौ न पृथिवीत्वाभावग्रहइति भावः । ननु महत्त्वोद्भूतरूपवद्विशेषणतायाः पृथिवीत्वाभावग्राहकत्वेऽपि नोद्भूतरूपाभावग्राहकत्वमुद्भूतरूपाभाववति वायौ तस्याअसम्भवादिति तत्रेन्द्रियसम्बद्धविशेषणतायाएव योग्यसन्निकर्षत्वमुपेयम् । एवंच मनस्यपि उद्भूतरूपाभावप्रत्यक्षस्यादित्यतआह । उद्भूतरूपाभावेत्विति । उद्भूतरूपाभावग्रहेत्वित्यर्थः । तथाच प्रकृते रूपमनिवेश्य महत्त्वं निवेशनीयमिति भावः । अतः । महत्त्वविशेषणात् । तद्ग्रहः । उद्भूतरूपाभावग्रहः । वायावित्यत्र तद्ग्रहइत्यनुषज्यते । ननुमहत्त्वाभावग्रहे कः सन्निकर्षो योग्यः । एवं गुणादौ पृथिवीत्वाभावप्रत्यक्षानुपपत्तिस्तत्रेन्द्रियसन्निकृष्टमहत्त्वादिमद्विशेषणता विरहात् । एव मन्योन्याभावग्राहकः योग्यः कः सन्निकर्षइत्यत आह । एवमन्यत्रापीति । महत्त्वाभावादावपीत्यर्थः । सन्निकर्षादिति । महत्त्वाभावे इन्द्रियसन्निकृष्टोद्भूतरूपवद्विशेषणतायोग्यः सन्निकर्षः गुणादौ पृथिवीत्वाभावग्रहेत्विन्द्रियसन्निकृष्टविशेषणतैवयोग्यः सन्निकर्षः । अन्योन्याभावे तु पृथिवीभेदादौ इन्द्रियसन्निकृष्टमहत्त्वादिमद्विशेषणतायोग्यः सन्निकर्षइत्यर्थः । ननु कुत्रचिदिन्द्रियसन्निकृष्टमहत्त्वादिमद्विशेषणता कुत्रचिच्चेन्द्रियसन्निकृष्टविशेषणतायोग्यः सन्निकर्षइत्यत्र किं नियामकमतआह । कार्यवशादिति । तत्र तत्र तत्तदभावग्रहानुरोधादित्यर्थः । ननु पिशाचात्यन्ताभावादीनामपि प्रत्यक्षापत्तिस्तत्र योग्यसन्निकर्षसत्त्वेन योग्यानुपलब्धिसत्त्वादत आह । पिशाचात्यन्ताभावस्त्विति । अयोग्यत्वादिति । प्रत्यक्षे विषयस्य हेतुतया अभावप्रत्यक्षेयोग्याभावत्वेन हेतुत्वोपगमादिति भावः । अयोग्यप्रतियोगिकस्यापि स्तम्भे पिशाचभेदस्य प्रत्यक्षोदयादत्यन्ताभावग्रवपृच्छति । का पुनरत्यन्ताभावेयोग्यतेति । उत्तरमपि तत्रैव बोध्यम् । योग्यमात्रेति । पिशाचस्यायोग्यत्वे-

योग्यधर्मावच्छिन्नप्रतियोगिताकत्वविशेषणम् एवमन्यचापि अनुभवानुसारेण योग्यतावाच्या । सर्वाभावसाधारणं किं योग्यत्वमिति चेन्न । किञ्चिदिति गृह्यताम् । तत्किं नानैवाभावयोग्यतेति चेदोम् । गुणयोग्यतावदनन्वगतस्यैव तत्त्वादिति संक्षेपः ॥

नयोग्यप्रतियोगिकत्वाभावादेव न तदभावप्रत्यक्षमिति भावः । घटपिशाचान्यतराभावप्रत्यक्षवारणाय । मात्रेति । अतीन्द्रियाद्वृत्ति प्रतियोगिताकत्वमिति तदर्थः । ननु वायौ रूप सामान्याभावप्रत्यक्षानुपपत्तिस्तस्यातीन्द्रियरूपप्रतियोगिकत्वेन योग्यमात्रप्रतियोगिकत्वाभावात् । एवमेतद्रूपत्ववदत्यन्ताभाव प्रत्यक्षापत्तिश्चेत्यस्वरसाद्राह । योग्यधर्मेति । पिशाचत्वघटपिशाचान्यतरत्वादीनां योग्यधर्मत्वाभावेन न तदवच्छिन्नाभावप्रत्यक्षमिति भावः । वस्तुतस्तु योग्यमात्रप्रतियोगिके ,योग्यधर्मावच्छिन्नप्रतियोगिताकत्वं विशेषणमित्येव पाठः । योग्यमात्रप्रतियोगिकेऽभावे योग्यधर्मावच्छिन्नप्रतियोगिताकत्वं विशेषणयोग्यतेत्यर्थः । योग्यमात्रप्रतियोगिताकत्वे सति योग्यधर्मावच्छिन्नप्रतियोगिताकत्वं योग्यतेतियावत् । तच्च भूतले द्रव्यसामान्याभावप्रत्यक्षवारणाय योग्यमात्रवृत्तिप्रतियोगिताकत्वम् । एतद्रूपत्ववदत्यन्ताभाववारणाय योग्यधर्मेति । वायौ रूपसामान्याभावप्रत्यक्षं नेष्यतएवेति तदसङ्गतेन दोषाय । एतद्रूपैतद्रूपत्वान्यतरावच्छिन्नाभाववारणायच योग्यधर्मत्वस्य योग्यधर्मावच्छिन्नप्रतियोगिताकत्वमिति तदर्थइत्यवधेयम् । ननु पिशाचवदन्योन्याभावोऽयोग्यत्वादेवन गृह्यते इतिवाच्यम् । तत्रान्योन्याभावे का योग्यता न तावत् योग्यप्रतियोगिकत्वं स्तम्भे पिशाचभेदग्रहानापत्तेः; पिशाचवद्भेदग्रहापत्तेश्चेत्यत आह । एवमन्यचापीति । अन्योन्याभावेपीत्यर्थः । अनुभवानुसारेणेति । तत्तद्धर्मावच्छिन्नप्रतियोगिताकत्वमेव तत्तदन्योन्याभावयोग्यत्वमित्यर्थः । अतएव कापुनरत्यन्ताभावे योग्यतेति सामान्यरूपात्यन्ताभावे योग्यताऽनिरुक्तान्योन्याभावेतु अननुगतैव सेतिध्येयम् । सर्वेति । अत्यन्तान्योन्याभावेत्यर्थः । तत्किमिति । अत्यन्ताभावे योग्यसार्वत्रादिरूपान्योन्याभावेतत्तदन्योन्याभावत्वमितरवंरूपा नानैवाभावेयोग्यतेत्यर्थः । ओमित्यङ्गीकारार्थकमव्ययं । गुणयोग्यतावदिति । यथारूपत्वस्यादौतत्तद्रूपत्वेन्द्रियग्राह्यत्वं नैकं तथाप्रकृतेपीतार्थः ॥

अथ किमिदं चक्षुरादि उच्यते । तैजसमिन्द्रियं रूपग्राहकं महदिन्द्रियं वा चक्षुः । वायवीयमिन्द्रियं स्पर्शग्राहकं महदिति वा त्वक् । आप्यमिन्द्रियं रसग्राहकं महदिन्द्रियं वा

केचित्तु विजातीयचक्षुः संयोगाश्रयविशेषणतया अभावग्राहकत्वेन न परमाणौ पृथिवीत्वाभावग्रहः । पिशाचादावत्यन्ताभावादिप्रत्यक्षवारणं तु गुरुत्वादिवत्तादात्म्येन तत्तदभावत्वेन साक्षात्कारप्रतिप्रतिबन्धकत्वाङ्गीकारेणेत्याहुः । तदसत् । परमाणौ महत्त्वाभावप्रत्यक्षानुरोधेन विजातीयचक्षुःसंयोगस्यावश्यकतया तेन तत्र पृथिवीत्वाभावप्रत्यक्षवारणासम्भवात् । पूर्वोक्तं चक्षुरादिकं लक्षयितुं पृच्छति । अथ किमिदमिति । तैजसमिति । आलोकप्राणादावतिव्याप्तेर्यथाश्रुतमुभयोपादानम् । चक्षुषस्तैजसत्वे विवादादाह । रूपग्राहकमिति । रूपग्राहकत्वमात्रोक्तौ मनस्यतिव्याप्तिरतो महदिति । महत्त्वमात्रोक्तौ घ्राणादावतिव्याप्तिरतो रूपग्राहकमिति । रूपग्राहकं महदित्युक्ता वाय्वन्यतिव्याप्तिरत इन्द्रियमिति । अत्रैकेचित् चक्षुषः प्राप्यकारित्वे चन्द्रमसोग्रहणानुपपत्तेः । शाखाचन्द्रमसोस्तुल्यकालं ग्रहणानुपपत्तेश्च अप्राप्यकार्येव तदाह्यम् एवं चाप्राप्यकारित्वाविशेषात् गोलकमेव तदिति पार्थिवत्वमेव तस्य तत्राहुः । तदसत् । चक्षुषोऽप्राप्यकारित्वे निमीलितनयनस्यापि चाक्षुषापत्तेः प्राप्यकार्येव तदाह्यम् । चक्षुषस्तैजसत्वेनातितीव्रगामितया चन्द्रमसासंयोग उपपद्यते । शाखाचन्द्रमसोस्तुल्यकालग्रहणं त्वसिद्धं यथा मया युगपच्छतं शतपर्वाणि छिन्नानीति वत् । तथाच गोलकस्यैव घटादौ संयोगाभावेनातिरिक्तं तैजसं चक्षुः स्वीकार्यमिति । एवमन्यत्रापि बोध्यम् । वायवीयमिति । वायवीयत्वमात्रं वायाविन्द्रियत्वमात्रं चक्षुरादावतिव्याप्तमिति मिलितोपादानं । त्वचो वायवीये विवादादाह । स्पर्शग्राहकमिति । चक्षुर्मनआत्मानां वारणाय विशेषणत्रयोपादानम् । आप्यमिति । जलचक्षुरादावतिव्याप्तिवारणाय विशेषणद्वयोपादानम् । रसनस्याप्यत्वे विवादादाह । रसग्राहकमिति । चक्षुर्मनआत्मानां वारणाय यथा श्रुतं विशेषणत्रयोपादानम् । पार्थिवमिति । व्याकृतिः पूर्ववत् । इन्द्रियत्वं च शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वम् । आत्मन्यतिव्याप्तिवारणाय सत्यन्तनिवेशः । शब्दरूपविशेषगुणसत्त्वाच्छ्रोत्रेऽव्याप्तेः शब्देतरेति गुणविशेषणं । चक्षुषि तादृशरूपस्य सत्त्वात् । उद्भूतेति । उद्भूतत्वं च नीलत्वादिव्याप्यानुद्भूतत्वाभावकूटत्वमेव तस्य च संयोगसाधारणतया चक्षु-

रसनं । पार्थिवमिन्द्रियं गन्धग्राहकं महदिन्द्रियं वा घ्राणं महत्पदं मनोवारणाय । कर्णशष्कुल्यवच्छिन्नं नभः श्रोत्रं । शब्दग्राहकं महदिन्द्रियं वा । निःस्पर्शमणुमनः । निःस्पर्शपदं पार्थिवाद्यणुवारणाय अणुपदं विभुवारणाय ॥ २८ ॥

अचक्षुर्मीमांसकाः मनो नाणु किं तु विभु निःस्पर्शद्रव्यत्वात् आत्मवत् मनस्त्वं च आत्मान्यत्वे सति ज्ञानासमवायिकारणसंयोगाश्रयत्वमित्याहुः । तन्न । विभुत्वे मनसा सहात्मनः

रादावव्याप्तेरतो विशेषेति । चक्षुष्टादेः मत्त्वाद् गुणेति । कालादावतिव्याप्तेरज्ञानकारणेति । इन्द्रियावयवार्थावयवसंयोगस्यापि प्रत्यक्षकारणतया इन्द्रियावयवेऽतिव्याप्तिवारणाय मनः संयोगेति । श्रोत्रं लक्षयति । कर्णेति । घटावच्छिन्नभसोऽपि श्रोत्रत्वापत्तेः कर्णशष्कुलीति । नभसः श्रोत्रत्वे विवादादाह । शब्दग्राहकमिति । मनो लक्षयति । निःस्पर्शमिति ॥

मनोवैभववादिनां मीमांसकानां मतमादर्शयति । अचक्षुर्मीमांसका इति । आणुत्वभाववत्त्वेऽपि विभुत्वासिद्धिरत आह ॥ किन्त्विति । निःस्पर्शत्वं गुणादौ व्यभिचारीति । द्रव्यत्वादिति । द्रव्यत्वं च घटादौ व्यभिचारीति विशिष्टहेत्वनुधावनं । नन्वेवं तर्हि मनस्त्वस्य निःस्पर्शाणुत्वरूपत्वासम्भवेन पक्षतावच्छेदकासिद्धिरत आह । मनस्त्वेति । आत्मन्यतिव्याप्तिवारणायात्मान्यत्वे सतीति । संयोगाश्रयत्वं कालादावपीति ज्ञानासमवायिकारणेति । चक्षुर्मनोयोगस्य ज्ञानकारणत्वाज्ज्ञानकारणसंयोगाश्रयत्वं चक्षुरादावतिव्याप्तमिति मत्वाह । असमवायीति । ज्ञानासमवायिकारणं चात्ममनःसंयोग एवेति नातिव्याप्तिः । केचित्तु नवीनमतेऽदृष्टविशेषगुणवृत्तेर्मनस्त्वेन पक्षतावच्छेदकस्यैक्याभावात् कथं पक्षतावच्छेदकावच्छेदेनानुमितिः चुटी विभुत्वस्य बाधेन कथं वा तत्र विभुत्वानुमितिरत आह । मनस्त्वेति । ज्ञानासमवायिकारणेति । पुरुषान्तरीयात्मप्रत्यक्षवारणाय तत्तदात्मसमवायावच्छिन्नं प्रति तत्तदात्ममनःसंयोगत्वेन हेतुतायां मनस्त्वटीनामवच्छेदककोटौ निवेशे गौरवेण लाघवेनैकैकमनःसिद्धिः । नच विजातीयसंयोगत्वेन तस्य हेतुतया न तत्र मनसो निवेश इति वाच्यम् । तथापि समवायेन विजातीयसंयोगस्य विजातीयसंयोगसम्बन्धेन म-

संयोगानुपपत्तेः । तथाहि द्विविधः संयोगः कर्मजोऽवयवसंयोगजश्चेति । न चविभोरात्मनः कर्मास्ति मनोपि च यदि विभु तदा तस्यापि कर्माभावात् कुतः कर्मजसंयोगसम्भवः । न च तयोरवयवोस्ति येन तत्संयोगजः स्यात्संयोगः । नच नित्य एव विभ्वोः संयोगः । अजसंयोगनिषेधात् कुतो निषेधदृतिचेन्मानाभावात् । संयोगत्वावच्छेदेन द्रव्यजन्यत्वावधारणाच्च । अप्रयोजकं चेदमनुमानमिति संक्षेपः ॥

नसो वा हेतुत्वमिति विनिगमनाविरहादिति भाव इत्याहुः । विभुत्वे । मनसो विभुत्वे । संयोगानुपपत्तेरिति । तथाचोपदर्शितानुमाने पक्षतावच्छेदकसिद्धि र्बाधश्चेति भावः । कर्मजः । यथाग्नेनक्रियया ग्नेनस्य वृक्षे संयोगः । अवयवसंयोगजः । कारणाकारणसंयोगात् कार्याकार्यसंयोगः । यथा हस्ततरुसंयोगात् कायतरुसंयोग इत्यर्थः । नच विभोरिति । मूर्तेतरद्रव्यत्वं विभुत्वं स्पन्दत्वावच्छिन्नं प्रति मूर्त्तद्रव्यत्वेन कारणतया मूर्तत्वाभावेनात्मनि न कर्मोत्पत्तिरिति भावः । । अनयोः । आत्ममनसोः । तत्संयोगजः । अवयवसंयोगजः । मानाभावादिति । नित्यसंयोगग्राहकप्रत्यक्षादेरभावादनुमानस्यचाप्रयोजकत्वादित्यर्थः । साधकाभावमुक्त्वा बाधकमाह । संयोगत्वावच्छेदेनेति । संयोगत्वावच्छिन्नं प्रति द्रव्यत्वेनहेतुतायां तत्कार्यतावच्छेदकं जन्यसंयोगत्वमेव नित्यसंयोगाङ्गीकर्त्ता वाच्यम् कार्यमात्रवृत्तिधर्मस्यैव कार्यतावच्छेदकत्वात् तथाच जन्यत्वनिवेशे गौरवमेव प्रतिकूलतर्कइति भावः । ननु समवायेन रूपादिकं प्रति सामान्याधिकरण्यसम्बन्धेनावयवरूपादीनां हेतुतया कपालगन्धादावपि रूपोत्पत्तापत्तौ जन्यत्वावच्छिन्नं प्रति द्रव्यत्वेन हेतुत्वावश्यकतया संयोगत्वावच्छिन्नं प्रति तत्तुल्ये मानाभावइति न दर्शितगौरवमत आह । अप्रयोजकत्वेदमिति । यद्वा नित्यवृत्तिधर्मस्यापि कार्यतावच्छेदकत्वेचतिविरहादत आह । अप्रयोजकत्वेदमिति । इदं । विभुत्वसाधकमनुमानमित्यर्थः । अनुकूलतर्कोभावादितिभावः । संयोगत्वावच्छेदेनेति । संयोगत्वस्य द्रव्यजन्यत्वव्याप्यत्वेन नित्यसंयोगस्वीकारे तादृशनियमभङ्गप्रसङ्गादिति

इतिश्रीमद्दाचार्यचूडामणिश्रीमद्वरदनारायणयज्वसूनुश्रीमद्वेङ्कटनाथविरचितायां न्यायसिद्धान्तमञ्जरीदीपिकायां प्रमाणपरिच्छेदः ॥

भावः । ननु तादृग्नियमे मानाभाव इत्यत्रोच्यते । अप्रयोजकत्वेतीतरपरीक्षा नाना तर्कविचारदक्षमतिना यत्किञ्चिदुक्तं मया तद्गृह्णन्तु हृदा विभाव्य सुधियः सारार्थसङ्ग्राहकाः । दूषितयद्दिधारयेदपि जनः सञ्जायते सोऽचिराद्दोन्दूः परवाचिदूषणमताधानैकदक्षः क्षती ॥ १ ॥

इतिश्रीमद्दिग्वसुकुटमाणिक्यराजिमौराजनाराजितपदद्वन्द्वन्यायवागीश्वरश्रीदीक्षितप्रतिलब्धवर्णविरचितायां न्यायसिद्धान्तमञ्जरीदीपिकायां प्रमाणपरिच्छेदः समाप्तः ॥

अथानुमानं निरूपयते । तत्करणमनुमानम् । अनुमितित्वं चानुमितीतरविशेषः । तद्-

---

योगक्षेमायलम् । प्रत्यक्षनिरूपणानन्तरमुपजीव्योपजीवकभावसङ्गत्याऽनुमाननिरूपणं † प्रतिजानीते । अथेति । अथ शब्दोऽानन्तर्यवचनः । तत्र च प्रत्यक्षनिरूपणस्यार्थाद्बाधित्वमवगम्यते । अतएव च सिद्धत्वमपि । निरूप्यतइति वर्त्तमानार्थकलट्प्रत्ययेन चानुमाननिरूपणस्य साध्यत्वलाभः । एवं च सिद्धसाध्यसमभिव्याहारे सिद्धं साध्यार्थोपयुज्यतइति न्यायेन मङ्गलेनैवपुःश्लाघाइत्यत्रेवात्रापि प्रत्यक्षानुमाननिरूपणयोरेवोपजीवोपजीवकभावलाभः । तथाचोपजीवकत्वसङ्गत्याऽनुमाननिरूपणमिति भावः । यद्यप्यनुमितिकरणत्वेनानुमानज्ञाने न प्रत्यक्षज्ञानापेक्षेति तन्निरूपणयोरुपजीव्योपजीवकभावासम्भवः । तथापि सविशेषणे हीति न्यायेन* निरूप्य प्रत्यक्षानुमानयोरेवोपजीव्योपजीवकभावलाभः । अत्र क्वचिदुपजीवकनिरूप्याप्युपजीव्यनिरूपणादुपजीवकत्वादिसङ्गतेरानन्तर्यानियामकत्वेपि स्वतन्त्रस्येति न्यायेन इच्छाया एव नियामकत्वान्न पौर्वापर्यनियम इति ध्येयम् । ननु निरूपणप्रतिज्ञायाः विषयान्तरसञ्चाररहितत्वरूपशिष्यावधानप्रयोजकत्वेप्युन्मत्तप्रलपितत्वादिशङ्कानिरासाय सङ्गताभिधानस्यैवोचितत्वम् । ननु सङ्गतिप्रदर्शनस्यापि व्यर्थत्वादिति चेन्न । द्विविधं हि शिष्यावधानमनुपेक्षणीयत्वरूपं विषयान्तरसञ्चाररहितत्वरूपं च तत्रासङ्गतत्वज्ञानेनोपेक्षासम्भवात् सङ्गतिप्रदर्शनमावश्यकं तथाच सङ्गतिज्ञाने सत्यसङ्गतत्वज्ञानासम्भवान्नासङ्गतत्वज्ञानप्रयुक्तमुपेक्षणीयत्वं । द्वितीयं च निरूपणप्रतिज्ञयेति परमरहस्यमत्रानुसन्धेयम् । ग्रन्थमध्येपि मङ्गलाचरणात् अथ शब्दोमङ्गलार्थकएवेत्यपि कश्चित् । आनन्तर्यं चात्र ध्वंसाधिकरणक्षणवृत्तित्वं तथाच प्रत्यक्षनिरूपणध्वंसाधिकरणक्षणवृत्ति वर्त्तमाननिरूपणविषयोऽनुमानमिति शाब्दबोधः । तत्र । लक्षणस्वरूपप्रामाण्यादिप्रकारकनिरूपणविषयेऽनुमाने । करणत्वमात्रस्य कुठारादौ मितिकरणत्वस्य च प्रत्यक्षादावतिव्याप्तेर्वारणायानुमितिकरणमिति विशिष्टोपादानम् । नन्वनुपस्थान्मिति-

---

† अनुमाननिरूपयन् । शिष्यावधानाय प्रतिजानीते इत्यपिपाठान्तरम् ।

* स विशेषणे हि विधिनिषेधौ विशेषणमुपसङ्क्रामतः सतिविशेष्ये बाध इति न्यायस्वरूपम् ॥

ज्ञानमिति व्युत्पत्त्या किञ्चिज्जन्यज्ञानकरणत्वं क्वचणं लभ्यं वह्यादिप्रमाकरणमेवेत्यत आह । अनुमितित्वञ्चेति । तथाच न किञ्चिज्जन्यज्ञानत्वमनुमितित्वमपितु जातिविशेषएव तदवच्छिन्नकरणत्वं च न प्रत्यक्षादाविति नातिव्याप्तिरिति भावः । यद्वा नतु व्याप्तिर्व्यवहारोवा लक्षणस्य प्रयोजनमिति नियमेनेतरभेदानुमापकमेवेतल्लक्षणं वाच्यम् । इतरभेदानुमानं चानुमानं प्रत्यक्षादिभ्योभिद्यते अनुमितिकरणत्वात्तु यदेवं तदेवं यथा प्रत्यक्षादित्याकारकं । तच्च चानुमितेः प्रत्यक्षप्रमितिवैलक्षण्यान्नाने प्रत्यक्षप्रमाभेप्यनुमितिकरणत्वग्रहसम्भवेन प्रत्यक्षे प्रत्यक्षभेदासत्त्वेन च व्यभिचारज्ञानापत्तेरिति लक्षणप्रयोजनमनुपपन्नमित्यत आह । अनुमितित्वञ्चेति । प्रत्यक्षप्रमित्यनन्तरमनुमिनोमीत्यनुव्यवसायानुदयात्प्रत्यक्षवावृत्तमनुमितित्वमेव तद्विषयः । तच्च न प्रत्यक्षे इति प्रत्यक्षप्रमितिविलक्षणप्रमितिकरणत्वहेतुकमितरभेदानुमानं सुकरमेवेति न कोपि दोषइति सारम् । केचित्तु व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यज्ञानकरणत्वमेवानुमितिकरणत्वं वाच्यं तेच च व्याप्तिज्ञानत्वादेरेव गमकत्वसम्भवेनाधिकस्य वैयर्थ्यमितीतरभेदानुमानमनुपपन्नमित्यत आह । अनुमितित्वञ्चेति । तथाच जातिरूपानुमितित्वावच्छिन्नकरणत्वमेव तल्लक्षणं नतूक्तरूपमिति न व्यर्थत्वगन्धोपी त्याहुः ।

नन्वनुमानत्वमनुमितिकरणत्वं तथाचेतरभेदानुमाने पक्षतावच्छेदकहेत्वोरभेदेनान्वयव्याप्तिज्ञानस्यैवानुमितिहेतुतया हेतौ साध्याधिकरणवृत्तित्वरूपव्याप्तिज्ञाने जायमाने एव तुल्यवित्तिवेद्यतया साध्येपि हेत्वधिकरणवृत्तित्वग्रहसम्भवेन पक्षतावच्छेदकाप्रसिद्धे: सिद्धसाधनापत्तिरिति तयोर्भेद आवश्यकः । यदि च हेतौ साध्याधिकरणवृत्तित्वं ज्ञातेपि पक्षतावच्छेदकावच्छेदेन साध्यसिद्धेरनुदयान्न सिद्धसाधनावकाशः । अन्यथा पृथिवी इतरभेदवती पृथिवीत्वादित्यत्रापि पृथिवीत्वाधिकरणे घटादाविदरभेदस्य निश्चितत्वादनुमितेरुच्छेद एव स्यात् । किञ्च व्यतिरेकव्याप्तिज्ञानस्याप्यनुमितिकरणतया साध्यसामानाधिकरण्यस्य तत्राघटकत्वेन न सिद्धसाधनमिति विभावयते । तथाप्युद्देश्यतावच्छेदकविधेयतयोरैक्येन प्राब्दबोधानुपपत्तिरेव । अन्यथा दण्डवान् दण्डवानित्यादेर्निराकाङ्क्षत्वानुपपत्तेरिति चेन्नैवम् । अनुमानपदवाच्यत्वस्य लक्ष्यतावच्छेदकत्वेन तत्रा प्यनुपपत्तेरभावादिति । केचित्तु नामार्थयोः साक्षादभेदान्वितिरिक्तसम्बन्धेनान्वयबोधानभ्युपगमादनुमितिकरणमित्यस्यानुमितिसम्बन्धभिन्नकरणमर्थः ।

ज्ञानजन्यत्वाव्यभिचारि । जन्यशब्दधीजन्यत्वव्यभिचारि जातिमदनुभवत्वं वा । प्रथमत्ववारणाय जन्यज्ञानजन्यत्वाव्यभिचारीतिज्ञानाजन्ये नित्ये निर्विकल्पके च तद्धीजन्यत्वं व्यभिचरति । तथापि प्रथमजन्यपदं चाक्षुषत्वादिवारणाय । तद्धीश्वरज्ञानजन्यत्वाव्यभिचारि । सर्वेषां तदाश्रया-

---

अनुपूर्वकमाधातुनाऽनुमितिकरणल्युटा च करणं बोध्यते । तथाचानुमितिकरणमनुमितिसम्बन्धाभिन्नकरणमिति शाब्दबोधीनानुपपत्तः करणतायाः कार्यघटितत्वेनानुमितिकरणस्य करणपदार्थत्वेऽनुमितिकरणमनुमितिसम्बन्धभिन्नानुमितिकरणमिति शाब्दबोधोपि नानुपपन्नः । विधेयतापर्याप्ताधिकरणोद्देश्यतावच्छेदकयोरैक्य एव शाब्दबोधानभ्युपगमात् अन्यथा दण्डवान् रङ्गादण्डवानिति बोधानुपपत्तेरित्याहुः ॥ १

नन्वनुमितित्वस्यैवानुमितिलक्षणत्वेन लक्षणलक्ष्यतावच्छेदकयोरैक्यमित्या ह । जन्यज्ञानेति । जन्यज्ञानजन्यत्वाव्यभिचारिणी जन्यशब्दधीजन्यत्वव्यभिचारिणी च या जातिस्तदनुभवत्वमनुमितित्वमिति लक्षणार्थः । जन्यज्ञानं व्याप्तिज्ञानं तज्जन्यत्वाव्यभिचारिणी तज्जन्यत्वव्याप्याजन्यशब्दधीजन्यत्वव्यभिचारिणी च या जातिरनुमितित्वं तदनुभवमादाय लक्षणसमन्वयः । तथाच तस्य स्वरूपतो लक्ष्यतावच्छेदकत्वेन तादृशजातित्वेन च लक्षणत्वेन न तयोरैक्यमिति भावः । ननु जन्यशब्दधीजन्यत्वव्यभिचारिजातिमदनुभवत्वमेव लक्षणमस्तु किमेतावद्विशेषणेनेत्यत आह । प्रत्यक्षत्वेति । अतिव्याप्तिं निराकरोति । ज्ञानाजन्यादिति । जन्याज्ञानाजन्यादित्यर्थः । नित्ये । ईश्वरसाक्षात्कारे । तद्धीति । तज्जन्यत्वं । धीजन्यत्वं । जन्याज्ञानजन्यत्वं । तथाच प्रत्यक्षत्वस्य जन्याज्ञानजन्यत्वाव्याप्यत्वान्नाति व्याप्तिरिति भावः । तत्रापि । जन्याज्ञानजन्यत्वाव्यभिचारित्वदलेपि । अतिव्याप्तिमुपपादयति । तद्धीति । चाक्षुषत्वं हीत्यर्थः । तदाश्रयाणामिति । चाक्षुषत्वाश्रयाणामित्यर्थः । जन्यपदोपादाने च चाक्षुषत्वस्य जन्याज्ञानाजन्ये निर्विकल्पके सत्त्वेन जन्याज्ञानजन्यत्वाव्यभिचारित्वाभावान्न तदादाय* प्रत्यक्षे ऽतिव्याप्तिरिति भावः । जन्याजन्यत्वाव्यभिचारीत्युक्तावपि चाक्षुषत्वस्य जन्यशरीरादिजन्यत्वव्याप्यत्वात्तत्रैव वा-

---

* तदाश्रये प्रत्यक्षे इत्यपि पाठान्तरम् ।

स्वामीश्वरशब्दजन्यत्वात् । उपमितित्वशाब्दत्वव्यापकाभ्यां व्यभिचारीत्यन्तम् । तद्धिनयथोक्तज्ञानजन्यत्वव्यभिचारि । उपमितीनां सर्वासां शब्दविषयकातिदेशवाक्यार्थज्ञानजन्यत्वात् । शब्दानुभवानां च सर्वेषां शब्दज्ञानजन्यत्वात् । नच

तिव्याप्तिरित्यत आह । ज्ञानेति । यदि च ज्ञानपदोपादानेपि काञ्चोपाधिविधया जन्यज्ञानजन्यत्वं निर्विकल्पकेपीतिचाक्षुषत्वमादायोक्तदोषतादवस्थ्याज्जन्यज्ञाननिरूपितासाधारणजन्यताऽवश्यं निवेशनीया । तथा च ज्ञानपदानुपादानेपि जन्यज्ञानत्वावच्छिन्नं प्रत्येव शरीरत्वेन हेतुतया जन्यशरीरादिनिरूपितासाधारणजन्यत्वं न निर्विकल्पके इति तदैयर्थ्यमिति विभावयते । तथापि चाक्षुषत्वावच्छिन्नं प्रति चक्षुष्ट्वे न हेतुतया जन्यं चक्षुरादि तज्जन्यत्वव्याप्यत्वं चाक्षुषत्वस्येति तदोषवारणाय ज्ञानपदनिवेशः । तथाच जन्यज्ञाननिरूपितासाधारणजन्यत्वमित्यर्थइति नकाप्यनुपपत्तिः । ज्ञानत्वाव्यभिचारीत्युक्तौ प्रत्यक्षत्वादेरवारणात् जन्यत्वाव्यभिचारिज्ञानजन्यत्वाव्यभिचारीत्युक्तावपि चाक्षुषत्वादेरवारणात् जन्यज्ञानजन्यत्वाव्यभिचारीत्युक्तम् । जन्यज्ञानजन्यत्वसमानाधिकरणेत्युक्तौ सत्यज्ञानत्वप्रत्यक्षत्वादेरवारणात् अव्यभिचारीति । ननु तथापि जन्यज्ञानजन्यत्वाव्यभिचारिजातिमदनुभवत्वं तत्त्वमित्यास्तामलं व्यभिचारीत्यन्तेनेत्यत आह । उपमितित्वेति । उपमितित्वशाब्दत्वयोरतिदेशवाक्यार्थज्ञानपदज्ञानादिरूपजन्यज्ञानजन्यत्वाव्यभिचारित्वेनातिव्याप्तिरितिभावः । अतिव्याप्तिं निराकरोति । तद्धीति । उपमितित्वं शाब्दत्वं हीत्यर्थः । यथोक्तज्ञानेति । जन्यशब्दज्ञानेत्यर्थः । तदेवोपपादयति । उपमितीनामिति । अतिदेशेति । गोसदृशो गवयपदवाच्य इत्याकारकशब्दविषयकज्ञानजन्यत्वादित्यर्थः । सर्वासामिति । अनेनोपमितित्वस्य सादृश्यज्ञानजन्यत्वव्याप्यत्वं लब्धम् । एवं च तद्व्यभिचारित्वस्य तथासम्भवान्नातिव्याप्तिरिति भावः । शाब्दानुभवानां । शाब्दबोधाजन्यानुभवानां । क्वचित् शब्दानुभवानामिति पाठः । तच्च शब्दप्रयोज्यानुभवानामित्यर्थः । नन्वत्र प्रथमजन्यत्वोपादानवैयर्थ्यमित्याशयेन शङ्कते । नचेति । व्यभिचा-

शब्दज्ञानजन्यत्वव्यभिचारित्वेन सम्यक् । अनुमितित्वस्य दुष्टशब्दज्ञानजन्यत्वाव्यभिचारित्वेनासम्भवात् । नच मोक्षजनकतावच्छेदकं तत्त्वज्ञानत्वमिति सम्भवन्नं शब्दज्ञानजन्यमाचष्ट इत्यतिव्याप्तिः । तस्य शब्दविशेषविषयकमनजन्यमाचष्टित्वेन जन्यशब्दज्ञानजन्यत्वाव्यभिचारित्वात् । जातिपदं वा मानसाचष्टित्वजातिपरम् । अतएव भ-

---

रीति । व्यभिचारोक्त्येव कारणेच प्रथमजन्यत्वव्यवच्छेदः । उत्तरयति । अनुमितित्वस्येति । असम्भवादिति । तथाच तादृशजात्यप्रसिद्धा तद्धर्मत्वमादाय न लक्षणगमनसम्भव इति भावः । अतिव्याप्तिं शङ्कते । नचेति । निषेधति । तस्येति । तत्त्वज्ञानवृत्तिवैजात्यस्येत्यर्थः । शब्देति । आत्मा शरीरादिभ्यो भिन्नः तत्त्वमसीत्यादिवाक्यविशेषविषयके त्यर्थः । इदं च मननं शब्दस्याप्युपनीतभानमभिप्रेत्य । अव्यभिचारित्वादिति । तथा च तस्य शब्दज्ञानजन्यत्वव्यभिचारित्वाभावादेव वारणमिति भावः । ननु निदिध्यासनोपक्षीणं मननं न तत्त्वज्ञानजनकमत स्तस्यापि शब्दज्ञानजन्यत्वव्यभिचारित्वमेवत्यत आह । जातिपदंवेति । वाकारश्च तत्त्वज्ञानस्य मननजन्यत्वानङ्गीकारेपि न क्षतिरिति सूचनाय । यद्वा । ननु शरीरादिभिन्नत्वेन श्रुतस्यात्मनः युक्तिभिरनुचिन्तनं मननं । तदुक्तं । "श्रोतव्यः श्रुतिवाक्येभ्यो मन्तव्यश्चोपपत्तिभिरिति" । तच्चानुमानादिजन्यमनुमित्यात्मकमेव । अनुमितावुपनीतभाननिषेधेन च तस्य शब्दविषयकत्वासम्भवात्तद्विषयकलैङ्गिकभाने प्रमाणाभावेन लिङ्गविषयापि शब्दस्यानुमितौ भानासम्भवाच्च । तथाच जन्य शब्दज्ञानजन्यत्वव्यभिचारित्वं तस्याक्षतमेवेत्यतआह । जातिपदं वेति । वाकारश्चात्र मननस्य शब्दविषयकत्वानभ्युपगमेपि न क्षतिरित्येतत्सूचनायेति । केचित्तु शब्दविशेषविषयकेति । "श्रोतव्यो मन्तव्येत्यादि" श्रुतिवाक्यरूपशब्दजन्येत्यर्थः । जन्यशब्देत्यादि । जन्यत्वं प्रयोज्यत्वं जन्यशब्दज्ञानप्रयोज्यत्वाव्यभिचारित्वादित्यर्थः । तथाच जन्यशब्दधीजन्यत्वव्यभिचारित्वपदेनजन्यशब्दज्ञानप्रयोज्यत्वव्यभिचारित्वमेवविवक्षणीयं तत्त्वज्ञानवृत्तिवैजात्यस्य च जन्यशब्दज्ञानप्रयोज्यत्वव्याप्यत्वादेव नातिव्याप्तिरिति भावः । ननु

क्लित्वश्रद्धात्वादेर्व्युदासः । अनुभवपदं स्मृतिवारणायेति दिक्

भक्तित्वादिवारणाय जातिपदस्य मानसाहृत्तिजातिपरत्वावश्यकत्वे तदेवा व्याप्तिप्रसङ्गवारणे किं जन्यत्वपदस्य प्रयोज्यत्वपरत्वमङ्गीकृत्य तादृशा तिव्याप्तिवारणेनेत्यत आह । जातिपदं वेति । वाकारश्च जन्यत्वपदस्य प्रयोज्यत्वपरत्वाभावेपि न क्षतिरिति सूचनायेत्याहुः । तदसत् । जन्यशब्द ज्ञानप्रयोज्यत्वव्यभिचारित्वविवक्षणे वेदादिवाक्यरूपशब्दज्ञानजन्यादृष्ट-जन्यत्वस्यानुमितावपि सत्त्वेनानुमितित्वस्यापि तत्प्रयोज्यत्वव्यभिचारित्वा-भावादसम्भवापत्तेरिति । अतएवेति । जातिपदस्य मानसाहृत्तिजातिपर-त्वादेवेत्यर्थः । भक्तित्वेति । आराध्यत्वेन ज्ञानं भक्तिः आराधना च गौर-वितप्रीतिहेतुभूता क्रिया फलावश्यं भावनिश्चयश्च श्रद्धेति तल्लक्षणे बोध्ये । आराध्यव्यक्तिज्ञानं विना आराध्यत्वेन ज्ञानासम्भवात् एवं फलज्ञानं विना फलावश्यं भावनिश्चयासम्भवाच्च । भक्तित्वश्रद्धात्वयो र्जन्यज्ञानजन्यत्वाव्य-भिचारित्वस्य सत्त्वात् जन्यशब्दधीजन्यत्वव्यभिचारित्वस्यापि सत्त्वाच्च त-दतिव्याप्तिः । जातिपदस्य मानसाहृत्तिजातिपरत्वे चैतयो र्मानस हृत्तित्वेन नातिप्रसङ्ग इति । ननु भक्तित्वश्रद्धात्वादे र्जातित्वे मानाभावा-देव नातिव्याप्तिरित्यत आह । आदेरिति । आदिना आपत्तित्वपरिग्रहः । आपाद्यत्वस्य विधेयत्वातिरिक्तत्वे मानाभावेन वह्न्यनुमित्यनन्तरमपि वह्नि-मापादयामीति प्रतीत्यापत्तेः । तादृशानुव्यवसायं प्रति वह्निविधेयका-पत्तित्वेनैव हेतुतया आपत्तित्वजातेरावश्यकत्वेन तद्वारणाय जातिप-दस्य मानसाहृत्तिजातिपरत्वमावश्यकमिति हृदयम् । अनुभवपदव्याहृत्ति-माह । अनुभवपदमिति । स्मृतिवारणायेति । स्मरामीत्यनुगतप्रतीत्या अनुभवसामग्रीप्रतिबध्यतावच्छेदकतया वा सिद्धं स्मृतित्वमादायातिव्या-प्तिवारणायेत्यर्थः । अनुभवपदोपादाने च स्मृतिभिन्नज्ञानत्वरूपानुभवत्व-स्य स्मृतावसत्त्वान्नातिव्याप्तिरिति भावः । ननु तथाप्ये तादृशपरोक्षत्व-जातिमादायैतल्लक्षणस्य शाब्दबोधादावतिप्रसङ्गः । नच तादृशजातौ मा-नाभावः । अनुमित्यादिस्थलीयबाधादिप्रतिबध्यतायामाहार्यप्रत्यक्षे व्य भिचारवारणाय प्रत्यक्षान्यज्ञानत्वस्यावश्यं निवेशनीयतया तयो र्मिथो-विशेषणविशेष्यभावे विनिगमनाविरहेण गौरवात्तदपेक्ष्य परोक्षत्वजाते-रेव प्रतिबध्यतावच्छेदकत्वौचित्यादित्यत आह । दिगिति । अनुभवत्वं वि-

ज्ञाय परोक्षत्वं स्मृतौ परोक्षत्वं विहायानुभवत्वं प्रत्यक्षे अनुमितौ चोभयोः समावेश इति अनुभवत्वेन सङ्करान्न परोक्षत्वं जातिः । एवं भिन्नविषयकानुमित्याविशिष्टानुमितिसामग्रीप्रतिबध्यतावच्छेदकतया सिद्धानुमित्यन्यज्ञानत्वरूपजातिमादाय सङ्कराच्च । विधेयतायां आपत्तिसाधारणेन बाधप्रतिबध्यतावच्छेदकतासम्भवेप्यनुमित्यादौ विशिष्यानुमितित्वादिकं निवेश्यैव बाधबुद्धेः प्रतिबन्धकत्वमिति नाहार्यप्रत्यक्षे व्यभिचारः । अतएव शाब्दबोधे बाधबुद्धेः प्रतिबन्धकत्वस्याकृप्ततया लाघवाद्योग्यताज्ञानं शाब्दहेतुरिति सिद्धान्तः । अनयोस्तु प्रत्यक्षान्यज्ञानत्वं निवेश्यैव वाहार्यप्रत्यक्षे व्यभिचारो वारणीयः । वस्तुतस्तु जन्यतासम्बन्धेन बाधविशिष्टान्यज्ञानत्वावच्छिन्नं प्रति बाधाभावस्य हेतुत्वोपगमेन प्रत्यक्षानुमित्यादिसाधारणैककार्यकारणभावेनैवोपपत्तेः । परोक्षत्वनिवेशस्यानर्थक्यात् । इच्छाविशिष्टत्वावच्छिन्नं प्रति इच्छात्वेन हेतुतया च नेच्छाशून्यकाले बाधकाले विशिष्टबुध्यापत्तिः । अन्यथेच्छाया उत्तेजकत्वेऽप्रामाण्यज्ञानाभावादिभि र्विशेषणविशेष्यभावे विनिगमनाविरह इत्यादिकं बहुतरमूहनीयं । नन्वनुमितित्वजातौ मानाभावेन लक्षणमसम्भवि । नचानुमिनोमीत्यनुव्यवसायविषयतया तत्सिद्धिः । योग्यात्मविशेषगुणानां विषयविनिर्मोकेण मानानुपगमात् । केवलमनुमिनोमीत्यनुव्यवसायस्यासिद्धेः । नच पर्वते वह्निमनुमिनोमीत्यनुव्यवसायविषयतया तत्सिद्धिरिति वाच्यं । वह्निप्रकारकानुमितित्वस्य तद्विषयत्वे वह्निमान् पर्वतो घटवान् इत्यनुमित्यनन्तरं तादृशानुव्यवसायापत्तेः । वह्निनिष्ठविधेयताशालिज्ञानत्वस्य तद्विषयत्वावश्यकत्वेऽनुमितित्वस्यानिवेशात् तद्विषयतया तत्सिद्धेरभावात् । नच पर्वतोद्देश्यकवह्निविधेयकानुमितित्वस्य धूमपरामर्शजन्यतावच्छेदकतया तत्कोटिप्रविष्टत्वेन तत्सिद्धिरिति वाच्यं । साधनादिभेदेन व्याप्तेर्भिन्नतया आलोकपरामर्शजन्यानुमितौ व्यभिचारवारणाय स्वाव्यवहितोत्तरक्षणोत्पत्तिकत्वस्वसामानाधिकरण्योभयसम्बन्धेन धूमपरामर्शविशिष्टानुमितित्वस्य तत्कार्यतावच्छेदकत्वावश्यकत्वे तत्रानुमितित्वमनिवेश्य धूमपरामर्शविशिष्टज्ञानत्वस्यैव तत्त्वोपगमात् तत्कोटिप्रविष्टतया तत्सिद्धेरसम्भवात् । एवंसिध्यभावविशिष्टज्ञानत्वस्यैव सिध्यभावकार्यतावच्छेदकतया तत्कार्यतावच्छेदकतयापि न तत्सिद्धिरिति चेन्नैवं । वह्निनिष्ठविधेयताशालिज्ञानत्वस्य वह्निमनुमिनोमीत्यनुव्यवसायविषयत्वे पर्वतो वह्निमान् स्यादित्यापत्त्यनन्तरमपि तादृशानुव्यवसायापत्तेः । तथाहि व-

न्हिमापादयामीत्यनुव्यवसायस्य वन्हिप्रकारकापत्तिविषयकत्वे वन्हिमान् पर्वतो भटवान् स्यादित्यापत्त्यनन्तरमपितादृशानुव्यवसायापत्त्या वन्ह्याद्यापत्तित्वमेव तद्विषयो वाच्यः । तत्र चापाद्यत्वस्यापाद्यभेदेन भिन्नस्यातिरिक्तस्य कल्पने गौरवादनुमितत्वादिसाधारणविधेयत्वमेवापाद्यत्वं तथाचानुमितत्वानन्तरमापादयामीतानुव्यवसायापत्त्या आपत्तित्वस्यैवापत्त्यनन्तरमनुमिनोमीतानुव्यवसायापत्तेरनुमितित्वस्यापि सिद्धेः । एवं पर्वते वन्हिरितादृशशाब्दबोधानन्तरमपि तादृशानुव्यवसायापत्तिः । शाब्दबोधे प्राङ्निर्दिष्टस्यैवोद्देश्यत्वेन चरमनिर्दिष्टस्य च विधेयत्वेन तत्र वन्हौ विधेयतायाः आवश्यकत्वात् । अन्यथा तत्र वन्हिपर्वतयोरुद्देश्यविधेयभावस्वीकारे पर्वते वन्हिः वन्हिः पर्वत इति शाब्दबोधयोरुद्देश्यविधेयभावावैलक्षण्येनावैलक्षण्यप्रसङ्गात् । अथ विधेयतायामनुमितित्वे च मानाभावः वन्हिप्रकारकज्ञानत्वस्यैव वन्हिमनुमिनोमीत्यनुव्यवसायविषयत्वात् विषयतया तादृशानुव्यवसायं प्रति तत्तदनुमितिसामग्रीविशिष्टज्ञानत्वेन तादात्म्यप्रत्यासत्त्या हेतुत्वं । कार्यतावच्छेदकं च वन्हिप्रकारकतत्तदनुमितिसामग्रीविशिष्टज्ञानविषयकमानसत्वमेव । तत्तदनुमितिसामग्रीच बाधाभावसिध्याभावतत्तत्परामर्शादिरूपा । सामग्र्या वैशिष्ट्यं च स्वसामानाधिकरण्येन स्वाव्यवहितोत्तरक्षणोत्पत्तिकत्वसम्बन्धेन । नचतदपेक्ष्य वन्हिनिष्ठविधेयतायाश्चानुमितित्वेन हेतुत्वे लाघवादिधेयतायाः अनुमितित्वस्य च सिद्धिरिति वाच्यं । लाघवमात्रेणातिरिक्तविषयता सिद्धौ अव्यवहितोत्तरत्वादेर्निवेशे गौरवेण धूमपरामर्शजन्यतावच्छेदककोटिप्रविष्टत्वेनाप्यतिरिक्तविषयतासिद्धिप्रसङ्गात् । एवमनुमितिं प्रति विलक्षणविषयताशालिज्ञानत्वेन हेतुतयैवोपपत्तौ व्याप्यादिविषयतानिवेशे प्रयोजनाभावाच्चेति लाघवमात्रेणातिरिक्तविषयतासिद्धेरभावात् विधेयतायां मानाभावेन सामग्रीविशिष्टज्ञानत्वेन हेतुत्वस्यावश्यकत्वे विधेयतायामिवानुमितित्वेपि मानाभाव इति चेन्न । लाघवेनातिरिक्तविषयतायाः अनभ्युपगमेपि आपत्त्यनन्तरं तादृशानुव्यवसायवारणाय बाधाभावस्यावच्छेदककोटौ निवेशे गौरवात् । तदघटितानुमितिसामग्रीविशिष्टवन्हिप्रकारकानुमितित्वेन हेतुत्वेनैवापत्त्यनन्तरं तादृशानुव्यवसायवारणे लाघवेनानुमितित्वजातेरावश्यकत्वात् । वस्तुतस्तु सामग्रीजन्यत्वानुपस्थितिदशायामपि वन्हिं नानुमिनोमीत्यनुव्यवसायोद-

ननु किमिदं तत्कारणमिति चेत् । व्याप्तिविशिष्टपक्षधर्मताघटकलघुपदार्थज्ञानमितिगृहाण ।

॥ ननु कीयं व्याप्तिः न तावत्साध्यात्यन्ताभाववद्वृत्तित्वं पर्वतीयवन्ह्यात्यन्ताभाववति धूमस्य सत्त्वात् । नच साध्यवदन्या-

---

यासामग्रीजन्यज्ञानत्वावच्छिन्नाभावस्य तद्विषयत्वाभावेन वह्निनिविधेष्टतायाश्चानुमितित्वावच्छिन्नाभावस्य तद्विषयत्वावश्यकत्वात् । वह्निनिष्ठविधेयतायां अनुमितित्वजातेश्च सिद्धिः । नच स्वव्याप्यवत्तापरामर्शादिघटितसामग्रीविशिष्टज्ञानत्वसम्बन्धावच्छिन्नसाध्यनिष्ठप्रतियोगितावच्छेदकतावच्छेदकज्ञानाभाव एव तद्विषय इति वाच्यं । तस्य सम्बन्धत्वे मानाभावात् तादात्म्यातिरिक्तस्वनियामकसम्बन्धस्याभावप्रतियोगितानवच्छेदकत्वस्वनियामकसम्बन्धस्याभावप्रतियोगितावच्छेदकतानवच्छेदकत्वाच्चेतिशतं यत्नवितेन ॥ १

ननु ज्ञायमानलिङ्गस्यानुमितिकरणत्वेऽतीतानागतहेतुकानुमितेरप्रसिद्धस्यानुमितेः पूर्वमसत्त्वात् अन्यस्य च व्याप्यत्वेनाज्ञानात् व्याप्तेरैक्याभावेन यत्र विशेष्ये विशेषणमिति न्यायेन परामर्शस्तत्र परामर्शपूर्वं व्याप्तिज्ञानस्यासम्भवेन चव्याप्तिज्ञानत्वेनापि न करणत्वसम्भवइत्याशयेन पृच्छति । नन्विति । लघुपदार्थेति । हेतुसाध्याभावज्ञानादिकमित्यर्थः । नचाभावज्ञानत्वेन चानुमितिहेतुत्वे परामर्शादिशून्यकालेप्यनुमित्यापत्तिरिति वाच्यं । विशेषसामग्र्यैक्यकल्पतायां एव सामान्यसामग्र्याः फलोपधायकत्वेन परामर्शाद्यभावेनापत्त्यभावादिति वक्ष्यति । अत्र यद्यपि व्याप्तिघटकेत्येव वक्तुमुचितं तथापि व्याप्तिविशिष्टपक्षधर्मताज्ञानरूपपरामर्शद्वारा तस्य करणत्वसूचनाय तथोक्तम् । ननु व्याप्तेर्निर्वक्तुमशक्यतया कथं तद्घटकपदार्थज्ञानं करणमित्याशयेन पृच्छति । ननु कीयमिति । साध्यात्यन्ताभाववदिति । वह्निमान् धूमादित्यादौ वह्न्यभाववति जलह्रदादौ धूमस्याविद्यमानत्वाल्लक्षणसमन्वयः । धूमवान् वह्नेरित्यत्र धूमाभाववति अयोगोलकादौ वह्नेर्विद्यमानत्वादति व्याप्तिः । पर्वतीयेति । पर्वतीयवह्नेस्तादृशव्यक्तित्वेनात्यन्ताभाववतीत्यर्थः । पूर्वत्रापि हृत्तित्वविशिष्टवह्न्यभाववह्निघटोभयाभावसमवायसम्बन्धावच्छिन्नवह्न्यभावादीनां वैशिष्ट्यस्यासज्यवृत्तिधर्मावच्छिन्नसाध्यतावच्छेदकसम्बन्धावच्छि-

न्नप्रतियोगिताकत्वेन साध्याभावविशेषणेन वारणं सम्भवतीति तत्परित्यागः । ननु साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभावाधिकरणनिरूपितहेतुतावच्छेदकसम्बन्धावच्छिन्नवृत्तित्वसामान्याभाववत्त्वं व्याप्तिः । समवायसम्बन्धावच्छिन्नह्रदित्वावच्छिन्नप्रतियोगिताकवह्न्यभाववारणाय साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वसाध्यतावच्छेदकावच्छिन्नत्वनिवेशः । अतएव पर्वतीयवह्न्यभावस्यापि निरासः । नच पर्वतीयवह्नित्वं पर्वतीयत्वविशिष्टवह्नित्वं तथाच विशिष्टस्यानतिरेकाद् वह्नित्वावच्छिन्नप्रतियोगिताकत्वमस्तीति वाच्यं । साध्यतावच्छेदकावच्छिन्नेत्यस्य साध्यतावच्छेदकपर्याप्तावच्छेदकताकत्वार्थकत्वेन पर्वतीयत्ववह्नित्वोभयपर्याप्तावच्छेदकतायाः शुद्धवह्नित्वपर्याप्तत्वाभावेनानुपपत्त्यभावात् । यदिचोभयादेः प्रत्येकानतिरिक्ततया पर्वतीयत्ववह्नित्वोभयपर्याप्तावच्छेदकतायाः अपि शुद्धवह्नित्वादुन्नाहोपस्तदवस्थ एवेति विभाव्यते । तदा साध्यतावच्छेदकभिन्ननिष्ठावच्छेदकत्वानिरूपकत्वे सति किञ्चिद्वच्छेदकत्वानिरूपितसाध्यतावच्छेदकनिष्ठावच्छेदकतानिरूपकप्रतियोगिताकत्वमिति निष्कर्षो बोध्यः । सत्यन्तनिवेशात् पर्वतीयत्ववह्नित्वोभयावच्छिन्नप्रतियोगिताकमादाय विशेषणदलनिवेशाच्च पर्वतीयत्वविशिष्टवह्नित्वावच्छिन्नाभावमादाय यथायथं नाप्रसङ्गः । वन्ह्यभाववति धूमावयवे धूमस्य समवायेन सत्त्वात् हेतुतावच्छेदकसम्बन्धनिवेशः । धूमाभाववत्तप्तायःपिण्डवृत्तित्वाभावस्य वह्नौ सत्त्वात् धूमवान् वह्नेरित्यादावतिव्याप्तिवारणाय सामान्याभावेति । इत्थंचायोगोलकवृत्तित्वस्यापि सामान्यान्तर्गततया तदभावस्य हेतावसत्त्वान्नातिव्याप्तिः । नच तथाप्ययोगोलकवृत्तित्वघटोभयाभावस्य हेतौसत्त्वादतिप्रसङ्गतादवस्थ्यमिति वाच्यं । तादृग्वृत्तित्वत्वावच्छिन्नाभावस्य सामान्याभावपदेन लाभात् । अथ कालिकसम्बन्धेन वन्ह्यभाववति पर्वतादौ धूमस्य सत्त्वात् साध्याभाववत्त्वमभावीयदैशिकविशेषणतयाविशेषेणैव वाच्यम् एवं घटत्वाभाववान् पटत्वादित्यादौ घटत्वाभावाभावस्य, घटत्वरूपस्य समवायेनैव सत्त्वादभावीयविशेषणतया तदधिकरणा प्रसिद्धिः ।

अत्र केचित् । भूतले घटोनास्तीत्यत्रैव घटाभावो नास्तीति प्रतीतावपि अभावीयदैशिकविशेषणतात्विषयकत्वमनुभूयत इति भावाभावसाधारणीं विशेषणतामङ्गीकृत्याप्रसिद्धिं परिहरंति । तदसत् । तथा सति

कालिकसम्बन्धावच्छिन्नप्रतियोगिताकस्याकाशाभावाभावस्य साध्यतायामसत्वादिहेतावव्याप्तेः आकाशाभावरूपसाध्याभावीयविशेषणतया आत्मनि वृत्तेः एवं भावाभावसाधारणविशेषणतास्वीकारेऽभावीयविशेषणतया भूतलवृत्तिर्घट इति प्रतीत्यापत्तिश्चेति चेन्नैवं । साध्यवत्ताग्रहविरोधितानियामकसम्बन्धेन साध्याभाववत्त्वस्य विवक्षितत्वात् घटत्वाभाववान् पटत्वादित्यादौ समवाय एव घटत्वाभाववत्ताग्रहविरोधितानियामक इत्यप्रसिद्धेरसम्भवात् । ननु तथापि जातिमान् सत्त्वादित्यादौ जात्यभाववत्सामान्यादिनिरूपितहेतुतावच्छेदकसमवायेन वृत्तित्वाप्रसिद्धाऽव्याप्तिरिति चेन्न । स्वाधिकरणावृत्तिसाध्याभावकत्वमित्यस्य तदर्थत्वात् । अथैवमपि धूमाधिकरणे कालिकसम्बन्धेन वन्ह्यभावसत्त्वादव्याप्तिः । अभावीयविशेषणतया ऽवृत्तित्वनिवेशे च घटत्वाभाववान् प्रमेयत्वादित्यत्राति-व्याप्तिः । घटत्वाभावाभावस्य घटत्वस्य विशेषणतया वृत्तेः तथाच साध्यवत्ताग्रहविरोधितानियामकसम्बन्धेन वृत्तित्वस्यावश्यं निवेशनीयतया सत्ताभाववान् जात्यभावादित्यत्राव्याप्तिः जात्यभावाधिकरणसामान्यादिनिरूपितसाध्यवत्ताग्रहविरोधितानियामकसमवायसम्बन्धावच्छिन्नवृत्तित्वाप्रसिद्धेरिति चेन्न । स्वाधिकरणावृत्तिसाध्याभावाधिकरणताकत्वस्य विवक्षितत्वात् । साध्याभावाधिकरणता च साध्यवत्ताग्रहविरोधितानियामकसम्बन्धावच्छिन्ना बोध्या । अत्र वृत्तित्वं स्वरूपसम्बन्धेनैव ग्राह्यम् । इत्थं च जात्यभावाधिकरणसामान्यादिनिरूपितस्वरूपसम्बन्धावच्छिन्नवृत्तित्वस्य प्रमेयत्वादौ प्रसिद्धत्वात् तदभावस्य च सत्ताभावाभावाधिकरणत्वे सत्त्वेनानुपपत्त्यभावादिति । अव्याप्यवृत्तिसाधकेऽव्याप्तिवारणाय प्रतियोगिवैयधिकरण्यमप्यत्र निवेशनीयम् । केचित्तु हेतुतावच्छेदकसम्बन्धावच्छिन्नवृत्तित्वीयस्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकः साध्याभाववद्वृत्तित्वसामान्याभावोऽव्याप्तिः । तेन सत्तावान् जातेरित्यादौ न क्वापि दोष इत्याहुः । अपरे तु साध्याभाववद्वृत्तित्वमित्यत्र सत्तावान् जातेरित्यादावप्रसिद्धिवारणाय हेतुतावच्छेदकसम्बन्धसामान्ये साध्याभाववदनुयोगिकत्वस्वप्रतियोगिकत्वतदुभयाभावविशिष्टस्वत्वं व्याप्तिरित्याहुः । इति न क्वाप्यनुपपत्तिरिति चेत् । अत्रोच्यते । तथापि केवलान्वयिनि साध्याभावाप्रसिद्धया व्याप्तिलक्षणमव्याप्तमेव । नन्वव्याप्तिर्नाम अनुमितिकरणत्वेनाभिमतस्य व्याप्तिज्ञानस्य व्यतिरेकव्यभिचार एव स च न सम्भवति वस्तुगत्या वाच्यत्वाभावाप्रसिद्धावपि प्रतियोगितया वा-

वृत्तित्वं वाच्यपर्वतान्यत्वत्वरवृत्तित्वाद् धूमस्य । अथ साध्यवत्त्वावच्छिन्नान्योन्याभाववद्वृत्तित्वं विवक्षितं । नच धूमवति

त्वीयोऽभाव इत्याकारकभ्रमात्मकज्ञानमादायानुमितेरुपपन्नत्वात् । तथाहि साधानिष्ठनिरूपितानिरूपिताभावनिष्ठविषयतानिरूपित अधिकरणनिष्ठविषयतानिरूपितवृत्तित्वनिष्ठविषयतानिरूपिताभावनिष्ठविषयतानिरूपितहेतुतावच्छेदकावच्छिन्न हेतुनिष्ठविषयतानिरूपितपक्षनिष्ठविषयताशालिज्ञानत्वेनैवानुमितिहेतुत्वं तच्च भ्रममादायोपपद्यत एव । अथ अभावो न वाच्यत्वीय इत्येतादृग्विशेषदर्शनकाले तदनुपपत्तिरेव । न च तदानेयत एवानुमितिरिति वाच्यं । तस्या स्तदाप्यनुभूयमानत्वादिति चेत् तथापि निर्धर्मितावच्छेदकज्ञानस्य बाधबुद्धिप्रतिबध्यतयाऽभावो न वाच्यत्वीय इति ज्ञानकालेपि प्रतियोगितया वाच्यत्वीय इति निर्धर्मितावच्छेदकज्ञानोत्पत्तौ बाधकाभावेनानुमितेरुपपत्तेः । अभावत्वमनिवेश्य साधौ यवदवृत्तित्वज्ञानस्यैव चानुमितिहेतुत्वादिति चेन्नैवम् । अवृत्तित्वज्ञानस्य निर्धर्मितावच्छेदकज्ञानं प्रत्यपि प्रतिबन्धकतया प्रतियोगितया वाच्यत्वमवृत्तीति ज्ञानकाले वाच्यत्वीयवदवृत्तित्वज्ञानस्याप्यसम्भवेनानुमित्यपलापस्य दुरुद्धरत्वादिति निपुणतरमालोचनीयं सूक्ष्मदर्शिभिरिति ॥

ननु नीलघटे यत् किञ्चिद्घटप्रतियोगिकभेदसत्त्वेन नीलघटो घटान्यइत्यादिवाक्यस्यापि प्रामाण्यापत्तिरित्य न्वयिता वच्छेदकावच्छिन्नप्रतियोगिताकान्योन्याभावबोधं प्रत्येव किञ्चित्पदसमभिव्याहृतान्यादिपदज्ञानत्वेनहेतुत्वमुपेयम् । एवं च प्रकृतेपि साध्यवत्पदसमभिव्याहृतान्यादिपदज्ञानस्य साध्यवत्त्वावच्छिन्नप्रतियोगिताकान्योन्याभावबोधकत्वमेव तथाच साध्यवत्त्वावच्छिन्नप्रतियोगिकान्योन्याभाववद्वृत्तित्वमेव लक्षणं लभ्यते । तत्र च नोक्तदोष इत्याशयेनाशङ्कते । अथेति । साध्यवत्त्वेति । साध्यतावच्छेदकावच्छिन्नसाध्यवत्त्वेत्यर्थः । अन्यथा साध्यवत्त्वस्य साध्यस्वरूपत्वेन पर्वतीयवह्निमदन्योन्याभावाव्यावारणात् । साध्यतावच्छेदकनिष्ठावच्छेदकतानिरूपितसाध्यनिष्ठावच्छेदकतानिरूपकप्रतियोगिताकान्योन्याभाववद्वृत्तित्वमिति तु निष्कर्षः । साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकसाध्याभावविवक्षणेन पूर्वोक्तलक्षणेपि चालनीन्यायेनाव्याप्तिनिरासस्संभवेप्यत्यन्ताभावस्याव्याप्यवृत्तितया संयोगि

वह्निमत्त्वावच्छिन्नान्योन्याभावो वर्तते । धूमवान्वह्निमान्मे-त्यप्रतीतेरिति चेन्न । केवलान्वयिसाध्यकाद्याप्तेः । अत्र मी-मांसकाः केवलान्वयिसाध्यकमनुमानमेव न क्व तावदत्याप्तावकाश इत्याकुरुतन्न । इह मेयत्वमनुमिनोमीत्यनुभवाप-लापापत्तेः । नच कारणबाधाद्भ्रान्तिरियं । व्यभिचारे णैव तद्बुद्धेः कारणत्वोसिद्धेः ॥ सौगतास्तुकेवलान्वयिनि

द्रव्यत्वादित्यादावव्याप्तिः । इह चान्योन्याभावस्य साध्यवृत्तितया संयोग-वदन्योन्याभावस्य द्रव्ये ऽसत्त्वेनैव नाव्याप्तिरिति पूर्वत्र प्रतियोगिवैयधि-करण्यादिनिवेशाद्गौरवमिति न तत्र तथा विवक्षितमिति ध्येयम् । अव्याप्तिं निरस्यति । नचेति । नहीत्यर्थः । केवलान्वयीति । इदं प्रमेयं वाच्यत्वादित्यादा वित्यर्थः । अत्यन्ताभावाप्रतियोगित्वं केवलान्वयित्वं प्रमेयत्वस्य च सार्वत्रिक-त्वेन तद्वदन्याप्रसिध्या व्याप्तिरिति भावः । लाघवात्साध्यवदन्यावृत्तित्वरू-पव्याप्तिज्ञानमेवानुमितिहेतु केलान्वयिनि च तादृग्ज्ञानासंभवेनानुमि-तिरेवानोपपद्यते एवं च नक्वाप्यव्याप्तिरिति मीमांसकमतमुपदर्शयति । अत्र मीमांसका इति । इहमेयत्वमिति । साध्यवदन्यावृत्तित्वज्ञानाभावेनानुमि-त्यसंभवादनुमिनोमीत्याकारकतल्लौकिकप्रत्यक्षानुदयापत्तिरित्यर्थः । नचा-न्योन्याभावे प्रमेयत्ववत्प्रतियोगिकत्वभ्रमदशायामेव तादृशानुभवोपपत्ति-रिति वाच्यं । तथापि प्रमेयत्वस्य केवलान्वयित्वज्ञानदशायां तादृशप्रतीत्यनुपप त्तितादवस्थ्यात् । कारणबाधात् । विशेषदर्शनदशायां साध्यवदन्यावृत्ति त्वज्ञानस्यानुमितिकारणत्वेनाभिमतस्य बाधात् । असंभवात् । भ्रान्तिरि-ति । इयं । मेयत्वमनुमिनोमीति प्रतीतिः । मेयत्वविधेयकानुमितिरेव ता-दृशानुव्यवसायविषयः कारणबाधेन च प्रमेयत्वविधेयकानुमितेरनुत्पत्त्याविष यबाधेन तादृशप्रतीतेर्भ्रमत्वमित्यर्थः । व्यभिचारेण । व्यतिरेकव्यभिचारेण तद्बुद्धेः । साध्यवदन्यावृत्तित्वरूपव्याप्तिबुद्धेः । कारणत्वासिद्धेरिति । सिद्धे तस्य कारणत्वे तदभावेन न तथानुमितिरित्युपेयं तादृशानुमितावेवव्य-भिचारेण च तस्यैव कारणत्वमसिद्धं । न च परेण तादृशानुमितिरेव नेष्यत इतिवाच्यं । तत्रानुभवस्य प्रमाणत्वेन दर्शितत्वात् । यथाकथञ्चित् प्रतीतेः प्रमात्वस्य शक्योपपादनत्वे प्रतीतेर्भ्रमत्वकल्पनाया अन्याय्यत्वाच्च । अन्यथा क्वापि विषयव्यवस्थानस्यादिति भावः । साध्यवदन्यत् । प्रमेयत्ववदन्यत् अलौकिकमित्यनेन प्रमेयत्वशून्यत्वं सूचितम् । नन्वलौकिकस्यज्ञान विषयत्वे माना

साध्यवदन्यदलीकमेव असत्ख्यातिसिद्धं तत् । तदृत्तित्वज्ञानादेवानुमितिरित्याहुः । तन्न ॥ असत्ख्यातेरसिद्धेः । किंच ज्ञेयत्वसाध्यके इत्थमप्यव्याप्तिर्दुर्वारा । न त्वयलोकमज्ञेयं भवद्भिरिष्यते । अन्येतु कात्स्न्र्येन सम्बन्धो व्याप्तिरित्याहुः । अत्र वदन्ति । कोयं कात्स्न्र्येन सम्बन्धः । कृत्स्नेन साध्येन हेतोः सम्बन्धः । कृत्स्ने हेतौ साध्यसामानाधिकरण्यं वा । कृत्स्ने हेतुमति साध्यवत्त्वं वा । नाद्यः प्रसिद्धानुमानेऽव्याप्तेः । नहि धूमे सकलवह्निसामा-

---

भाव इत्यत आह । असदिति । शशशृङ्गमिति । प्रतीतिविषयस्य शशीयशृङ्गस्यापारमार्थिकत्वेनालौकिकत्वमेवेति भावः । असत् ख्यातेरिति । ज्ञानविषयत्वस्य कालसम्बन्धित्वव्याप्यत्वादित्यर्थः । तेन न सिद्धसिद्धिव्याघातः । असतोपि भाने कालसम्बन्धिन्यलौकिक एव ज्ञानविषयत्वसत्त्वेन न तद्व्याप्यत्वं तस्य सम्भवतीत्यर्थतस्तन्निरासात् । शशशृङ्गमित्यादिप्रतीतेश्च शृङ्गस्य शशीयत्वेन भानोपगमेनान्यथाख्यातावेवोपपत्तेरिति न तदन्यथानुपपत्त्या तत्सिद्धिरिति भावः । ननु यावत्सत्ख्यातिस्तथापि प्रमेयत्वसाध्यकाव्याप्तिपरिहारेपि ज्ञेयत्वादिसाध्यके सा दुर्वारेतिचेत् "तुष्यतुदुर्जन" इति न्यायेनाह । किञ्चेति । कचित्तु सिद्धसिद्धिव्याघातादाह । किञ्चेतीति । तदसत् । उक्तरीत्या तत्परिहारात् । इत्थमपीति । असत्ख्यातिस्वीकारेपीत्यर्थः । अव्याप्तिः । साध्यवदन्यावृत्तिनिबन्धनाव्याप्तिः । तथा व्याप्तिमेव दर्शयति । नहीति । भवद्भिः । असत्ख्यातिवादिभिः । विरोधादिति शेषः । लौकिकावलीकारमतमाशङ्कते । अन्येत्विति । सम्बन्धः । साध्यसामानाधिकरण्यं । धूमवान् वह्नेरित्यादौ वह्नौ धूमसामानाधिकरण्यसत्त्वादतिव्याप्तिरतः । कात्स्न्र्येनेति । अयोगोलकीयवह्नौ धूमसामानाधिकरण्याभावेन कात्स्न्र्येन सम्बन्धाभावान्नदोषः । अत्राक्षरसमाह । तच्चेति । तत्र । लक्षणवाक्ये । वदन्ति । दूषणंवदन्ति । कात्स्न्र्यं साध्ये साधने साधनवतिवेति प्रश्नमुखेन तदेवाह । कोयमिति । साध्ये कात्स्न्र्यं दूषणेनैव साधनवति कात्स्न्र्यविवक्षणे दूषणसम्भवेन पृथक् तन्नोद्दिष्टं । प्रसिद्धानु-

नाधिकरण्यमस्ति । अयः पिण्डीयवह्नेः सामानाधिकरण्याभावात् न द्वितीयः एकव्यक्तिकहेतावव्याप्तेः । न तृतीयः एकमात्रवृत्तिहेतावव्याप्तेः ॥

माने । वह्निमान् धूमादित्यादौ । अथवाग्निमेवविशेषणोति । नहीति । अयः पिण्डीयवह्नेरिति । अत्र निरूपितत्वं षष्ठ्यर्थः । अयःपिण्डीयवह्निनिरूपितसामानाधिकरण्याभावादित्यर्थः । एकव्यक्तौति । द्रव्यं पृथिवीत्वादित्यादावित्यर्थः । अत्र हेतोरैक्येन अनेकाश्रेयत्वरूपत्वकात्स्न्यसंभवाद्व्याप्तिरिति भावः । एकमात्रवृत्तीति । एतद्रूपवान् एतद्रूपादित्यादावित्यर्थः । तत्र हेतुमत ऐक्येन हेतुमति उक्तरूपकात्स्न्यसंभवादिति भावः ॥

ननु हेतावेव कात्स्न्यं विवक्षितं तथाच प्रकृते कात्स्न्यस्य व्यापकत्वरूपतया हेतुतावच्छेदकव्यापकसाध्यसामानाधिकरण्यवत्त्वमिति निष्कर्षदूतिचेन्न । द्रव्यं सत्त्वादित्यादौ सत्तायाएकव्यक्तिकत्वेन सत्तात्वव्यापकद्रव्यत्वसामानाधिकरण्यसत्त्वादतिव्याप्तेः । ननु तथापि हेतुमति कात्स्न्यं विवक्षितं तथा च हेतुव्यापकसाध्यसामानाधिकरण्यं तत्त्वं । व्यापकत्वं चावच्छेदकतया यत्र यत्र धूमस्तत्र तत्रावच्छेदकतया वह्निसामानाधिकरण्यसत्त्वाद् वह्निमान् धूमादित्यादौ लक्षण समन्वयः । पर्वते धूमेवह्निसामानाधिकरण्यमिति प्रतीतेः । अथवा हेत्वधिकरणताव्यापकसाध्याधिकरणताकत्वं तत्त्वमिति चेन्न साध्याधिकरणवृत्तित्वरूपसाध्यसामानाधिकरण्यस्य तत्तदाधेयभेदेन भिन्नतया तद्वृत्तिभावाप्रतियोगित्वरूपव्यापकत्वस्यासंभवात् प्रथमस्य दुष्टत्वात् द्वितीयेचैतदपेक्ष्य हेतुव्यापकं यत्साध्यं तत्सामानाधिकरण्यस्यैव लघुत्वात् तस्यापि च वक्ष्यमाणव्याप्यपेक्षया गुरुत्वेन हेयत्वादिति न किञ्चिदेतत् । ननु साध्यसमानाधिकरणाः स्वसमानाधिकरणाः यावन्तस्तत्त्वं व्याप्तिरित्येनेन यावन्तः साध्यसमानाधिकरणास्ते सर्वेपि हेतुसमानाधिकरणा इत्यर्थलाभः स्यात् । तत्र चायं गौरश्वत्वादित्यादौ गोत्वसमानाधिकरणद्रव्यत्वादीनामश्वत्वसमानाधिकरणत्वादतिव्याप्तिवारणाय यावत्पदनिवेशः इत्थं च गोत्वप्रकारकप्रमाविशेष्यत्वादीनामपि यावदन्तः पातितया अश्वत्वसामानाधिकरण्याभावेन च नातिव्याप्तिः

अत्रोच्यते साध्यसमानाधिकरणस्वसमानाधिकरणयावत्कत्वं व्याप्तिः । यत्समानाधिकरणायावन्तः साध्यसमानाधिकरणास्तत्त्वं व्याप्तिरिति यावत् । भवति च धूमसमानाधिकरणायावन्तो वह्निसमानाधिकरणा इति धूमे वह्निव्याप्तिः । नतु वह्नौ धूमस्य नहि वह्निसमानाधिकरणा यावन्तो धूमसमानाधिकरणाः । अयःपिण्डत्वस्य वह्निसमानाधिकरणस्य धूमासमानाधिकरणत्वात् ।

इदं तु न सङ्गच्छते । इदं वाच्यं प्रमेयत्वादित्यत्र वाच्यत्वसमानाधिकरणानां यावतां प्रमेयत्वसमानाधिकरणत्वात् लक्षणसत्त्वेपि वह्निमान् धूमादित्यादौ वह्निसमानाधिकरणानामयोगोलकत्वादीनां धूमसामानाधिकरण्याभावादव्याप्तिः धूमवान् वह्नेरित्यादावतिव्याप्तिश्चेत्यत आह । यत्समानाधिकरणा इति । वह्निसमानाधिकरणद्रव्यत्वादीनां धूमसमानाधिकरणत्वादर्थाभिचारिण्यतिव्याप्तिवारणाय यावन्त इति । इदमेव समुदयति । भवतिचेत्यादिना । धूमस्येति । निरूपितत्वं षष्ठ्यर्थः । धूमनिरूपितावह्निनिष्ठा व्याप्तिर्नेत्यर्थः । अथ द्रव्यं गुणकर्मान्यत्वे सति सत्त्वादित्यादौ विशिष्टसत्तायाः शुद्धसत्तायाश्चैक्येन सत्तासमानाधिकरणानां गुणत्वादीनां द्रव्यत्वसामानाधिकरण्याभावादव्याप्तिः । एवं गुणकर्मान्यत्वविशिष्टसत्तावान् जातेरित्यत्रातिव्याप्तिश्च । जातिसमानाधिकरणानां सर्वेषां सत्तासामानाधिकरण्यादिति चेन्न । विशिष्टस्यातिरिक्तत्वमङ्गीकृत्यैतल्लक्षणाभिधानात् । विशिष्टसत्तायाः शुद्धसत्तायाश्चैक्ये गुणः सत्तावानिति प्रतीतिवद् गुणो गुणकर्मान्यत्वविशिष्टसत्तावानिति प्रतीत्यापत्तेर्विशिष्टस्यातिरिक्तत्वमेवोपेयते । एवंच नोक्तव्याप्त्यतिव्याप्ती । ननु विशिष्टस्यातिरिक्तत्वेपि सत्ताधिकरणतायाः विशिष्टसत्ताधिकरणतायाश्चैक्येन गुणो गुणकर्मान्यत्वविशिष्टसत्तावानिति प्रतीत्यापत्तिवारणाय विशिष्टस्यातिरिक्तत्वाङ्गीकार्यापि विशिष्टनिरूपिताधिकरणतायाः अतिरिक्तत्वमवश्यमङ्गीकार्यम् एवं च किं विशिष्टस्यातिरिक्तत्वेनेति पूर्वोक्तदोषस्तदवस्थएवेत्य-

यद्विशिष्टसमानाधिकरणायावन्तः साध्यसमानाधिकरणा

तो विशिष्टस्यानतिरिक्तत्वेपि लक्षणमाह । यद्विशिष्टेति । यद्विशिष्टसमानाधिकरणाः यावन्तः साध्यसमानाधिकरणास्तद्वत्त्वं वेति पाठः । यत्पदं हेतुतावच्छेदकपरं । केचित्तु । विशिष्टस्यानतिरिक्तत्वे पूर्वोक्ताव्याप्तिरतिव्याप्तो इत्यतआह । यद्विशिष्टेति । तथाच पूर्वलक्षण एव हेतुतावच्छेदकसाध्यतावच्छेदकनिवेश इति भाव इत्याहुः । तदसत् । तद्वत्त्वं वेत्यनेन लक्षणान्तरत्वकथनस्यासङ्गतत्वापत्तेः । तस्मात्पूर्वोक्तरीतिरेवात्रानुसर्त्तव्या । द्रव्यं गुणकर्मान्यत्वे सति सत्त्वादित्यत्र विशिष्टस्यानतिरिक्तत्वेनाव्याप्तिरतो यद्विशिष्टेत्युक्तं । नचैवमपि गुणकर्मान्यत्वविशिष्टसत्तावान् जातेरित्यत्रातिव्याप्तेः साध्यतावच्छेदकस्यापि निवेश आवश्यक इति वाच्यं । विशिष्टसत्तायाः विशिष्टनिरूपिताधारतासम्बन्धेन साध्यतायां जातिसमानाधिकरणगुणत्वादीनां विशिष्टनिरूपिताधारतासम्बन्धेन विशिष्टसत्ताधिकरणद्रव्यवृत्तित्वाभावेनातिव्याप्तेरभावात् । समवायेन तस्याः साध्यत्वे तु सत्त्वेतुत्वादेवोक्तदोषाभावादित्यभिप्रायात् । यदिच समवायेनैव तत्साध्यता गुणे गुणकर्मान्यत्वविशिष्टसत्तानास्तीति धीबलात् गुणकर्मान्यत्वविशिष्टसत्ताभावस्य गुणे सत्त्वेन विशिष्टसत्तात्वावच्छिन्नाभाववद्वृत्तितया व्यभिचारित्वं । नच विशिष्टसत्ताभावो न प्रतियोगिव्यधिकरण इति वाच्यं । प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणसाध्याभाववद्वृत्तित्वस्यैव व्यभिचारतया तस्य तत्रापि सत्त्वात् अन्यथा भूतत्वमूर्त्तत्वोभयवान् मूर्त्तत्वादित्यादेर्व्यभिचारित्वानुपपत्तेः । लाघवेन निरवच्छिन्नसाध्याभाववद्वृत्तित्वस्यैव व्यभिचारत्वाच्चेति । समवायेन विशिष्टसत्तायाः साध्यतायामपि अतिव्याप्तिरिति विभाव्यते । तदा साध्यतावच्छेदकमपि निवेश्यम् । अतएवं यद्विशिष्टसमानाधिकरणा यावन्तः साध्यतावच्छेदकावच्छिन्नसाध्यसमानाधिकरणास्तद्वत्त्वं वेति । तेन द्रव्यं गुणकर्मान्यत्वे सति सत्त्वादित्यत्र विशिष्टसत्तायाः अनतिरिक्तत्वेपि नाव्याप्तिः । तत्र चानतिरिक्तत्वे पौत्यपिना विशिष्टस्यातिरिक्तत्वमङ्गीकृत्य पूर्वलक्षणं सूचितमिति न काप्यनुपपत्तिः । नवा गुणकर्मान्यत्वविशिष्टसत्तावान् जातेरित्यादावतिव्याप्तिरिति पुस्तकेषु तू त्तोल्लितः पाठो दृश्यते । इदमेव लक्षणं

स्तद्वत्त्वं वा । भवति च धूमत्वविशिष्टसमानाधिकरणावयवन्तो वह्निसमानाधिकरणास्तद्वत्त्वं च धूमे । नचेदृशं धूमं प्रति

सङ्गमयति । भवतीति । नचेदृशमिति । स्वविशिष्टसमानाधिकरणं सर्वं धूमसमानाधिकरणमिति नेत्यर्थः । वह्नित्वविशिष्टसमानाधिकरणश्चावदन्तर्गतायोगोलकत्वादेर्धूमसमानाधिकरणत्वादिति भावः । धूमव्याप्तिः । धूमनिरूपिता व्याप्तिः । अत्र च साधनतावच्छेदकसम्बन्धेन साधनाधिकरणत्वं बोध्यम् । अन्यथा समवायेन धूमाधिकरणवृत्तिधूमावयवत्वादीनां वह्निसामानाधिकरण्याभावादव्याप्तेः । एवं साध्याधिकरणत्वमपि साध्यतावच्छेदकसम्बन्धेन अन्यथा वह्निसमानाधिकरणायोगोलकत्वादीनामपि कालिकसम्बन्धेन धूमाधिकरणायोगोलकवृत्तित्वादतिप्रसङ्गापत्तेः । धूमसमानाधिकरणानां संयोगेन वह्न्याधिकरणपर्वतादिवृत्तित्वात् समवायेन वह्निसाध्यके संयोगेन धूमहेतुकेऽतिव्याप्तेश्च । एवं साधनाधिकरणवृत्तित्वघटकसम्बन्धेन साध्याधिकरणवृत्तित्वं वाच्यम् । अन्यथा वह्निसमानाधिकरणायोगोलकत्वादीनामपि धूमाधिकरणमहानसादौ कालिकसम्बन्धेन वृत्तित्वादतिव्याप्तिस्तादवस्थ्यमिति । नन्वत्र साधनाधिकरणवृत्तित्वं यदि साधनतावच्छेदकसम्बन्धेन विवक्षितं तदा इदमेतद्रूपभिन्नं गुणत्वादित्यादौ गुणत्वाधिकरणसमवेतानां यावतामेतद्रूपभिन्नसमवेतत्वादतिव्याप्तिः । एतद्रूपमात्रसमवेतस्याप्रसिद्धेः नापि साध्यतावच्छेदकसम्बन्धेन । जातिमान् मेयत्वादित्यत्र मेयत्वाधिकरणसमवेतानां यावतां जातिमत्त्वसमवेतत्वादतिप्रसङ्गात् । नच विषयतया तद्वृत्तित्वं विवक्षणीयं वह्निमान् धूमादित्यादौ विषयतया धूमाधिकरणवृत्तीनां धूमत्वमात्रविषयकज्ञानादीनां वह्न्याधिकरणे विषयतया वृत्तेर्लक्षणसमन्वयः । धूमवान् वह्नेरित्यादावयोगोलकमात्रविषयकज्ञानादीनां धूमासमानाधिकरणत्वान्नातिव्याप्तिरिति वाच्यं । घटभिन्नं मेयत्वादित्यत्र मेयत्वाधिकरणवृत्तिज्ञानानां घटभिन्नघटत्वसमानाधिकरणत्वादतिव्याप्तेः । घटमात्रविषयकज्ञानस्य चाप्रसिद्धत्वात् । नच येन केनचित्सम्बन्धेन साधनाधिकरणवृत्तित्वं विवक्षितमिति वाच्यं । द्रव्यं सत्त्वादित्यादौ सत्ताधिकरणवृत्तीनां यावतामेव कालिकसम्बन्धेन द्रव्यत्वाधिकरणमहाकालवृत्तित्वादतिव्याप्तिरितिचेन्न । येन येन सम्बन्धेन साधनाधिकरणवृत्तयो या-

वन्हित्वं ज्ञातौ वन्हौ धूमव्याप्तिः । अस्ति चेदं केवलान्वयि-नि अभिधेयत्वविशिष्टसमानाधिकरणानां यावतां मेयत्वस-मानाधिकरणत्वात् । एवं च लाघवात् साध्यवदन्याहृत्तित्वे सति साध्यसमानाधिकरणत्वं व्याप्तिः । नचेदं केवलान्वयिन्य-स्ति । अतो नेदमनुमानमिति मीमांसकमतमप्रास्तं । ततो-

---

वत्तस्तेन तेन सम्बन्धेन साध्याधिकरणवृत्तित्वस्य स्वस्य विवक्षितत्वात् । यदिचैवमननुगम इति विभाव्यते तदा विशेषणताविशेषेण साधनाधि-करणवृत्तयो यावत्तः विशेषणताविशेषसम्बन्धेन साध्याधिकरणवृत्तित्व-स्तत्त्वमिति बोध्यं । धूमवत्त्वप्रकारकप्रमाविशेष्यत्वादीनां वन्हिसमानाधिक-रणत्वान्नाव्यधिकसमन्वयः । अयोगोलकत्वप्रकारकप्रमाविशेष्यत्वस्य च धूमासम-नाधिकरणत्वान्न व्यभिचारिण्यतिव्याप्तिरिति निगर्वः । केवलान्वयिनि लक्षणमुपपादयति । अस्तिचेदमिति । इदं । निरुक्तव्याप्तिलक्षणं के-वलान्वयिनि । केवलान्वयिसाध्यके । प्रमेयमभिधेयत्वादित्यादौ । एवमि-ति । मतमप्रास्तमित्यनेनान्वयः । एवं च । एतादृशस्य व्याप्तित्वे च । ला-घवादिति । हेतुव्यापकसाध्यसामानाधिकरण्यरूपव्याप्त्यपेक्षया लाघवा-दित्यर्थः । तत्र प्रतियोगिवैयधिकरण्यादिनिवेशेन गौरवादिति भावः । साध्यवदिति । साध्यवदन्याहृत्तित्वस्य गगनादावपि सत्त्वेन वन्हिसाध्य-कगगनादावतिव्याप्तिरतः साध्यसामानाधिकरण्यमिति । नच तत्र व्याप्ति सत्त्वेपि पक्षधर्मताज्ञानविरहेणैवानुमितिवारणे किं तद्वारणाय विशेषणोपा-दानेति वाच्यं । गगनमहृत्तीत्यहृत्तित्वज्ञानस्य गगनं पर्वतहृत्तीति ज्ञाने बाधाभावावगाहितया प्रतिबन्धकत्वेन तदनुत्पत्तावपि भिन्नविषयकस्य गगनवान् पर्वत इति ज्ञानस्योत्पत्तौ बाधकाभावेन पक्षधर्मताज्ञानस्या-पि सम्भवेन तद्वारणाय विशेषणोपादानस्यावश्यकत्वात् । एवं इदं द्रव्यं घटत्वपटत्वोभयत्वादित्यत्र विरुद्धेऽतिव्याप्तिवारणाय तस्यावश्यकत्वम् । इदं तु साध्यसामानाधिकरण्यज्ञानस्याप्यन्वयव्यतिरेकाभ्यां कारणत्वाभिप्रायेण अन्यथा तु वृत्तिमत्त्वनिवेशेनापि गगनादिवारणसम्भव इति बोध्यम् । नचे-दमिति । साध्यवदन्याहृत्तित्वमित्यर्थः । नेदमनुमानमिति । न केवलान्व-

प्यस्यलघुत्वात् । अत्र चार्वाकाः । अस्त्वित्थं व्याप्तिः नत्वेयं ग्रहग्रहा किंविद् धूमसमानाधिकरणं वन्ह्यसमानाधि-

---

धिसाध्यकानुमानमित्यर्थः । व्याप्तिग्रहाभावात्तादृश्यानुमितेरसिद्धया न तत्करणतया तदनुमानस्वीकारइति भावः । ततोपीति । साध्यवदन्याहृत्तित्वविशिष्टसाध्यसामानाधिकरण्यरूपव्याप्तिस्वरूपतोपि । अस्य । निरुक्तव्याप्तिस्वरूपस्य । लघुत्वात् । अभावाप्रवेशेन लघुत्वात् ॥ ४

ननु यावत्त्वस्य व्यापकत्वादन्यस्य दुर्वचतया व्यापकत्वस्याभावघटितत्वेन गुरुतया कुतोऽस्य लघुत्वमिति चेन्न । अपेक्षाबुद्धिविशेषविषयत्वरूपस्यैव यावत्त्वस्याप्रवेश्यत्वात् । वस्तुतस्तु साध्यवदन्याहृत्तित्वस्य स्वाधिकरणाहृत्तिसाध्याभावकत्वरूपस्यावश्यं विवक्षणीयत्वेनाहृत्तित्वस्य च साध्यवत्तायहविरोधितानियामकसम्बन्धेनावश्यं वक्तव्यतया विरोधितानियामकत्वस्य समवायाभावीयविशेषणतासाधारण्यानुगतस्याभावाद्गौरवेण निरुक्तव्याप्तिस्वरूपस्यैव लघुत्वात् । निरुक्तव्याप्तिस्वरूपे च विशेषणताविशेषेणैव सामानाधिकरण्यनिवेशेन व्यापकत्वांशे प्रतियोगिवैयधिकरण्याप्रवेशेन लाघवस्यातीवस्फुटत्वात् । एवं गुरुधर्मावच्छिन्नसाध्यके साध्यतावच्छेदकावच्छिन्नाभावाप्रसिद्धयाऽव्याप्तिवारणाय साध्यतावच्छेदकावच्छिन्नवन्निष्ठाभावप्रतियोगितानवच्छेदकधर्मावच्छिन्नाभाववदवृत्तित्वं व्याप्तिरिति वक्तव्यं । तच्च तादृशप्रतियोगितानवच्छेदकत्वतादृशप्रतियोगितावच्छेदकत्वावच्छिन्नप्रतियोगिताकभेदनिवेशनं न सम्भवति घटत्वावच्छिन्नवन्निष्ठात्यन्ताभावप्रतियोगितावच्छेदकत्वापेक्षया कम्बुग्रीवादिमत्त्वावच्छिन्नवन्निष्ठाभावप्रतियोगितावच्छेदकत्वस्य गुरुत्वात्तादृशाभावाप्रसिद्धेः किन्तु तादृशप्रतियोगितावच्छेदकं तत्तद्व्यक्तित्वेनोपादाय तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदकूटएव निवेश्यतइति गौरवाद् दुर्ग्रहत्वाच्च न तादृशव्याप्तिज्ञानं हेतुरिति ध्येयम् । इदमुपलक्षणं । प्रमेयत्वमनुमिनोमीत्यनुव्यवसायबलादेव तत्स्वीकारस्यावश्यक इति प्रागेवोक्तमिति । सर्वत्र अभिचारशङ्कासम्भवेन व्याप्तिग्रहानुदयात् कारणाभावेनानुमितेरसिद्धया न तत्करणतया ऽनुमानप्रामाण्यमिति चार्वाकमतं दूषयितुं तन्मतमुपन्यस्यति । अत्र चार्वाका इति । अत्रानुमितिकरणत्वेन व्याप्तिनिश्चयस्याप्रमाणत्वे चार्वाकाः पूर्वपक्षयन्तीति शेषः । किञ्चिदिति । धूमस-

करणं भविष्यतीति शङ्कायां दुर्वारत्वात् । नचेदृशशङ्कायां व्याप्तिनिश्चयो भवितुमर्हति । तस्यास्तत्प्रतिबन्धकत्वात् । नच भूयो दर्शनात्तन्निवृत्तिः । शतशः सहचरितयोरपि व्य-

---

मानाधिकरणत्वसामानाधिकरण्येन वह्निसामानाधिकरण्याभावसंशये धूमसमानाधिकरणत्वावच्छेदेन वह्निसमानाधिकरणत्वरूपव्याप्तिग्रहानुदयादित्यर्थः । ननु तादृशशङ्कायामपि व्याप्तिग्रहे किं बाधकमत आह । नचेति । नहीत्यर्थः । ईदृशशङ्कायां । धूमसमानाधिकरणत्वसामानाधिकरण्येन वह्निसामानाधिकरण्याभावशङ्कायां । तस्याः । तादृशशङ्कायाः । तत्प्रतिबन्धकत्वात् । तादृशव्याप्तिग्रहप्रतिबन्धकत्वात् । ननु भूतत्वसामानाधिकरण्येन घटाभाववत्ताज्ञानस्य निर्णयात्मनः भूतत्वावच्छेदेन घटवत्ताज्ञानेबाधनिर्णयविधया प्रतिबन्धकत्वेपि तादृशशङ्कायाः कथं तत्प्रतिबन्धकत्वं ग्राह्यसंशयस्यापि प्रतिबन्धकत्वे च पर्वतो वह्निमान् वेति संशयेऽनुमित्यादेरनुत्पत्त्यापत्तिरिति चेन्न । "यद्यो सामग्रीप्रतिबन्धिका यच्च विशेषादर्शने तद्वीरपि तच्चेति" न्यायेन विशिष्टप्रत्यक्षे विशेषदर्शनाभावविशिष्टतदभावप्रकारकज्ञानत्वेन संशयस्यापि प्रतिबन्धकत्वाङ्गीकारात् । अन्यथा स्थाणुर्वा पुरुषो वेति संशयोत्तरं विनैव विशेषदर्शनं संशयोत्तरप्रत्यक्षापत्तेः । तत्र बाधनिर्णयस्याभावात् संशयस्य च तव नये अप्रतिबन्धकत्वादिति । यदि चाप्रामाण्यज्ञानाभावादिभिर्विशेषणविशेष्यभावे विनिगमनाविरहेण विशेषदर्शनस्योत्तेजकत्वासम्भवान्न विशेषदर्शनाभावविशिष्टतदभावप्रकारकज्ञानत्वेन संशयस्य प्रतिबन्धत्वं विशेषदर्शनशून्यकाले संशयोत्तरप्रत्यक्षानुत्पत्तिश्च संशयोत्तरप्रत्यक्षे विशेषदर्शनस्य हेतुत्वकल्पनेन तदभावादेवोपपन्नेति विभाव्यते तदा तादृशसंशयसामाग्री प्रतिबन्धिका बोध्येति निगर्वः । ननु बहुषु धूमाग्न्योः सामानाधिकरण्यदर्शनमेव तादृशशङ्काविरोधीत्याशयेनाह । नचेति । भूयो दर्शनात् । बहुषु साध्यसाधनयोः सहचारदर्शनात् । तन्निवृत्तिः । व्यभिचारशङ्कानिवृत्तिः । शतशइति । घटादिरूपापृथिवी लोहलेख्या पार्थिवत्वादित्यादौ घटादिषु पार्थिवत्वलोहलेख्यत्वयोः सामानाधिकरण्यग्रहेपि हीरके व्यभिचारग्रहादित्यर्थः । तथाच व्यभिचारेण भूयो दर्शनस्य न तादृशशङ्काप्रतिबन्धकत्वमिति भावः । ननु धूमवन्ह्योः कार्यकार्यकारण

भिचारोपलम्भेः । नच तर्कान्तन्निवृत्तिः । तस्य व्याप्तिनिश्चयमूलकत्वेनानवस्थानात् । इत्थं च ग्राहकाभावाद् व्याप्तेरग्रहे कुतोऽनुमानंस्यादित्याहुः । तन्न । व्यभिचारज्ञानविर-

---

भावात् । धूमो यदि वह्निव्यभिचारी स्यात्तर्हि वह्निजन्यो न स्यादिति तर्क एव धूमो वह्नेर्व्यभिचारी नवेति शङ्कानिवर्त्तकः । पार्थिवत्वलोहलेख्यत्वयोस्तु कार्यकारणभावाद् यदि लोहलेख्यत्वं न स्यात्तदा पार्थिवत्वं न स्यादिति तर्कासम्भवात्र तत्र व्यभिचारशङ्काविरह इत्याशङ्कते । नच तर्कादिति । धूमो यदि वह्निव्यभिचारी स्यात्तर्हि वह्निजन्यो न स्यादितितर्कादित्यर्थः तन्निवृत्तिः । व्यभिचारशङ्कानिवृत्तिः । व्याप्तिग्रहमूलकत्वेन । पार्थिवत्वादेः कार्यत्वस्य व्याप्तिग्रहमूलकत्वेन । अनवस्थानादिति । तर्कमूलभूतव्याप्तावपि व्यभिचारशङ्कानिरासार्थं तर्कान्तरापेक्षायामनवस्थेत्यर्थः । तथाच मूलशैथिल्यान्न तर्कस्य तच्छङ्कानिवर्त्तकत्वमिति भावः । अत्र विपर्यये तत्कोटिमात्रापर्यवसानं, इष्टापत्तिः, मूलशैथिल्यं, चेति तर्के त्रयो दोषाः । विपर्यये तत्कोटिमात्रपर्यवसान एव तर्कस्य तदभावग्रहानिवर्त्तकत्वात् । तदितरकोटिपर्यवसाने च तदसम्भवाद् विपर्यये तत्कोटिमात्रापर्यवसानस्य दूषकत्वं बोध्यम् । इष्टापत्तेश्च तर्ककारिणीभूतापाद्यव्यतिरेकनिर्णयविघटकत्वेन । मूलशैथिल्यस्य च तत्कारणीभूतापाद्यापादकयोर्व्याप्तिग्रहप्रतिबन्धकत्वेन यथायथं दूषकता बोध्या । उपसंहरति । इत्थं चेति । व्यभिचारशङ्काप्रतिबन्धकस्याभावेन जागरूके व्यभिचारसंशयेचेत्यर्थः । ग्राहकाभावात् । व्यभिचारज्ञानाभावरूपग्राहकाभावात् । कुतइति । कुतो हेतोरनुमानं प्रमाणं स्यादित्यर्थः । अनुमितिकरणतयैवानुमानस्य प्रामाण्यं व्याप्तिनिश्चये चानुमितेरभावात् तत्करणतयाऽनुमानस्य प्रामाण्यं दूरापास्तमिति भावः । व्यभिचारज्ञानविरहादिकमिति । तदुक्तज्ञानं प्रति तदभावस्य ज्ञानाभावस्य हेतुतया व्यभिचाररूपव्याप्तिग्रहे साध्याभाववद्वृत्तित्वादिरूपव्यभिचारज्ञानाभावो हेतुरित्यर्थः । आदिना सहचारज्ञानपरिग्रहः । नच साध्याभाववद्वृत्तित्वांशे संशयात्मकव्यभिचारज्ञानसत्त्वे

हादिकमेव व्याप्तिग्राहकं । नच तच्छङ्काविरहो दुःशङ्कः । क्वचित्तर्कात्क्वचित्तन्मूलभूतव्याप्त्यादौ कोटिस्मरणाद्यभावादपि तन्निवृत्तेः । नहि सर्वदा व्यभिचारशङ्काकोटिस्मृतिर्वास्ति अनुभूयते वेति दिक् ॥

व्याप्यग्रहात्संशयनिश्चयसाधारणव्यभिचारज्ञानाभाव एव हेतुर्वाच्यस्तथाच पक्षीयसाध्यसन्देहात्मकव्यभिचारज्ञानस्यापि प्रतिबन्धकत्वप्रसक्त्या वनुमानमात्रोच्छेदप्रसङ्ग इति वाच्यं । साध्याभाववत्त्वांशे निश्चयात्मकवृत्तित्वांशे संशयनिश्चयसाधारणव्यभिचारज्ञानाभावस्यैव हेतुत्वात् ननु ज्ञानादीनामव्याप्यवृत्तितया व्यभिचारज्ञानसत्त्वेपि घटावच्छेदेनात्मनि समवायेन तदभावसत्त्वाद् व्याप्तिग्रहापत्तिरिति चेन्न । समवायसम्बन्धावच्छिन्नप्रतियोगिताकव्यभिचारज्ञानविशिष्टाकत्वाभावस्य स्वसमानाधिकरणैकत्वसम्बन्धेन व्यभिचारज्ञानाभावस्य वा हेतुत्वात् । तस्य च व्याप्यवृत्तित्वादिति । अथ तथापि धूमवह्नयोः सहचारज्ञानस्य व्याप्तिग्रहहेतुत्वे मानाभावः । नच विरुद्धे सहचारभ्रमाद् व्याप्तिभ्रमदर्शनादन्वयव्यतिरेकाभ्यान्तस्य कारणत्वमिति वाच्यं । ग्राहकसामग्र्यो क्रमयौगपद्याभ्यामेव सहचारग्रहव्याप्तिग्रहक्रमयौगपद्ययोरुपपत्तेः । तयोः परस्परहेतुत्वे मानाभावादिति चेन्नैवं । यत्समानाधिकरणाः यावन्तो धर्माइत्यत्र धर्मे हेतुसामानाधिकरण्यरूपसहचारज्ञानस्य विशेषणज्ञानत्वेन हेतुतया तस्यैवादिपदेन सङ्गृहीतत्वात् ननु साध्यसाधनसहचारज्ञानस्यापि एवं प्रतिबन्धकाभावान्तरस्यापि आदिपदेन सङ्गृहीतत्वादिति दिक् ॥

ननु व्यभिचारज्ञानविरहःसंशयनिश्चयसाधारणज्ञानाभावः सर्वत्र तत्संशयसत्त्वे च कथं सघटते इत्याशङ्क्य निराचष्टे । नचेति । तर्कात् । धूमो यदि वह्न्यभिचारी स्यात् तर्हि वह्निजन्यो न स्यादिति तर्कात् । अनवस्थां निरस्यति । क्वचित्तन्मूलभूतेति । तर्कमूलभूतेत्यर्थः । तन्निवृत्तेः । व्यभिचारशङ्कानिवृत्तेः । ननु सर्वत्र व्यभिचारशङ्काकोटिस्मृतिर्वास्त्वतआह । अनुभूयतेवेति । तथाच प्रमाणाभावेनसंशयसामग्र्येव न कल्प्यतइति भावः ।

ननु तर्कस्य व्यभिचारशङ्कानिवर्त्तकत्वे मानाभावः । अनाहार्यशङ्कायास्तर्ककारणीभूतज्ञानेनैव निरस्तत्वात् । तथाहि आपत्तिं प्रति पक्षधर्मतांशे आहार्यरूपमापाद्यत्वाप्यापादकवत्ताज्ञानमापाद्यव्यतिरेकनिश्चयहेतुः व्याप्तिग्रान्वयतो व्यतिरेकतश्च । तथाच धूमो यदि वन्हिव्यभिचारी स्यात्तर्हिवन्हिजन्यो न स्यादित्यत्र वन्हिव्यभिचारित्वं वन्हिजन्यत्वाभावव्याप्यमिति अन्वयव्याप्तिज्ञाने वन्हिजन्यत्वाभावे वन्हिव्यभिचारित्वव्यापकत्वग्रहाद् वन्हिव्यभिचारित्वव्यापको वन्हिजन्यत्वाभाव इति ज्ञानसम्पत्त्या आपाद्यव्यतिरेकनिर्णयविधया तदभावज्ञानस्य च सत्त्वाद् वन्हिव्यभिचारित्वव्यापकाभाववत्ताज्ञानसम्भवान्नानाहार्यव्यभिचारित्वशङ्कासम्भवः । एवं वन्हिजन्यत्वव्यापकीभूताभावप्रतियोगिवन्हिव्यभिचारित्वमिति व्यतिरेकव्याप्तिग्रेऽपि वन्हिव्यभिचारित्वाभावे वन्हिजन्यत्वव्यापकत्वग्रहे तुल्यवित्तिवेद्यतया वन्हिजन्यत्वेऽपि वन्हिव्यभिचारित्वाभावव्याप्यत्वग्रहे वन्हिव्यभिचारित्वाभावव्याप्यं वन्हिजन्यत्वमिति ज्ञानसम्भवेन तदभावव्याप्यवत्ताज्ञानस्य चापाद्यव्यतिरेकनिर्णयविधया सत्त्वेन तदभावव्याप्यवत्ताज्ञानस्य सत्त्वान्न तादृशशङ्कोदयः । नचान्वयिनि आपादकव्यापकमापाद्यं तदभाववांश्चायमिति ज्ञाने विद्यमानेपि तद्व्यापकाभाववत्ताज्ञानस्य विशिष्टवैशिष्ट्यावगाहिन एव तदभावज्ञानप्रतिबन्धकतया कथं तस्य विरोधित्वम् । एवं व्यतिरेकिणि आपादकाभाववत्ताप्यः आपाद्याभावः तदभांश्चायमिति ज्ञानसम्भवेपि तदभाववत्ताप्यवत्ताज्ञानस्यापि विशिष्टवैशिष्ट्यावगाहिन एव तत्र प्रतिबन्धकत्वात् तदसम्भव एवेति वाच्यं । धूमव्यापको वन्हिः वन्ह्यभाववांश्चायमिति ज्ञानद्वयमाधारण्याय तद्धर्मावच्छिन्नविशेष्यकव्यापकत्वग्रहकालीनतद्धर्मावच्छिन्नाभाववत्ताज्ञानस्य तद्व्यापकाभाववत्ताज्ञानस्य प्रतिबन्धकत्वात् । एवं पुरुषत्वव्याप्यं करादि तदभांश्चायमिति ज्ञानद्वयसाधारण्याय तद्धर्मावच्छिन्नविशेष्यकव्याप्यत्वग्रहकालीनतद्धर्मावच्छिन्नवत्ताज्ञानत्वेनैव तदभाववत्ताव्याप्यवत्ताज्ञानस्य प्रतिबन्धकत्वादुक्तज्ञानद्वयसत्त्वे तत्संशयाभावात् । यदि च व्यतिरेके आपादकाभावे आपाद्याभावव्यापकत्वग्रहेपि आपाद्याभावे

आपादकाभावव्याप्यत्वभानस्य न नेयत्वं । तुल्यवित्तिवेद्यत्वे मानाभावात् । एवं व्यापकाभावज्ञानस्य तदभावव्याप्यवत्ताज्ञानस्य च विशिष्टवैशिष्ट्यावगाहिन एव लाघवात् प्रतिबन्धकत्वम् । उक्तज्ञानद्वयस्याप्रतिबन्धकत्वेऽपि तदुत्तरोत्पन्नविशिष्टज्ञानादेव प्रतिबन्धदृष्टि प्रकृते आपादकसंशयोत्पत्तौ बाधकाभावदृष्टि विभाव्यते तथापि आपाद्याभाववत्तानिश्चयस्यापादकज्ञाने व्यावर्त्तकधर्मदर्शनविधया प्रतिबन्धकत्वमव्याहतमित्यनाहार्यव्यभिचारित्वसंशयासम्भवात् आहार्यशङ्कायास्त्वविरोधित्वात्तर्कस्य वैयर्थ्यमिति चेत् । अत्रोच्यते । अनाहार्यशङ्कानिवृत्यसम्भवेऽप्याहार्यशङ्कानिवर्त्तकत्वेनैव तर्कस्योपयोगः तस्या अप्रतिबन्धकत्वे तु तत्सामग्र्याः प्रतिबन्धकत्वमेव । नच तथापि तर्कस्याहार्यज्ञानरूपस्य कथमाहार्य शङ्काप्रतिबन्धकत्वम् आहार्यज्ञानस्याप्रतिबन्धकत्वाद्प्रतिबध्यत्वाच्चेति वाच्यम् । अनिष्टप्रसञ्जनात्मकतर्केण आपादकज्ञाने आपाद्यज्ञानरूपानिष्टसाधनत्वज्ञानजनने आपादकज्ञानेन इष्टोत्पत्त्या तच्चेच्छानुत्पत्तावनिच्छारूपकारणाभावेनाहार्यशङ्कानुदयात् । तर्के तन्निवर्त्तकत्वस्यार्थवशसंपन्नत्वात् । अतएवापादकांशे संशयनिश्चयसाधारण्यज्ञानमपि तर्के हेतुः । अन्यथा तन्निर्णयस्यैवहेतुत्वे कारणीभूते आपादकनिर्णय एव तर्कात्मकानिष्टसाधनताज्ञानसम्भवेऽपि संशये इष्टसाधनताज्ञानाभावेन तच्चेच्छोत्पत्तौ बाधकाभावेनाहार्यशङ्का निवर्त्तकत्वासम्भवात् । केचित्तु । तदापादकापत्तित्वेनाहार्यानाहार्यसाधारणतद्विशिष्टबुद्धित्वेन प्रतिबध्यप्रतिबन्धकभावः समानविषयकत्वाभावेऽपि फलबलात्कल्पनीय इति तर्कोपयोगित्वमाहुः । अन्येतु व्यभिचारशङ्कायामुक्तेजकतयातर्कोपयोग इत्याहुः । यद्यपि बाधकालीनेच्छाजन्यं ज्ञानमाहार्यं तथापि प्रकृते इच्छाजन्यत्वमात्र मापादकांशे आहार्यत्वं वाच्यं । तर्कश्च द्विविधः । व्याप्तिग्राहको विषयपरिशोधकश्च । आद्यश्चोक्त एव । द्वितीयस्तु पर्वतो यदि निर्वह्निः स्यात्तर्हिनिर्धूमः स्यादित्याकारकः विषयस्यानुमितिविषयस्य साध्यस्य परिशुद्धिः विरोधिशङ्काविधूननम् । ननु साध्याभाववत्ताप्रकारकनिश्चयस्यैव साध्यसंशयस्यानवतारात् कुतस्तस्य विरोधित्वं ग्राह्यसंशयस्याप्रतिबन्धकत्वाच्चेति तर्केणापि वा कथं तन्निरास इति चेन्नैवम् । स्वरसवाहिनः संशयस्य विशेषदर्शनप्रतिबध्यत्वेऽपि अनु-

ननु सेयं व्याप्तिर्दृष्टान्तवृत्तिधूमादौ गृहीता । नच पक्षीयेपि तथाच कथं तदनुमितिः पक्षवृत्तिधूमे व्याप्तिग्रहस्याऽनुमितिहेतुत्वादिति चेत् अवाङ्मः उक्ता व्याप्तिर्दृष्टान्तवृत्तिहेतौ धूमत्वेन गृहीता पर्वते धूमं दृष्ट्वा स्मर्यते ततो विशेषणज्ञानरूपात्तस्मादस्ति बाधके व्याप्तिविशिष्टत्वेन पक्ष-

---

मित्यप्रतिबन्धकत्वेपि चान्याहितस्य तस्याप्रतिबध्यत्वात् प्रतिबन्धकत्वाच्च । तथाच यथा धूमाद्वह्निमताऽनेन भवितव्यं तथा कुतश्चिद्बाधाभावसाधकाद् वह्न्याभाववतापि भवितव्यमिति शङ्का तदा च किं वह्निविरहसाधकमिति जिज्ञासा जायते विरोधिप्रमाणजिज्ञासया च बाधकप्रमाणशङ्का तयाच साध्याभावशङ्काजन्यते । साच सत्यपि परामर्शेऽन्याहितत्वादुत्पद्यते । अप्रामाण्यशङ्काहिते चार्थशङ्का सत्यप्यर्थनिश्चये निर्वह्निः स्यात्तर्हि निर्धूमः स्यादिति तर्केण चानिष्टप्रसञ्जनात्मना विरोधिप्रमाणजिज्ञासानुत्पत्तौ बाधकप्रमाणशङ्कानिवृत्तौ तदाहितसाध्याभावशङ्काया अपि निवृत्तिः अन्यविधायास्तु साध्यशङ्कायाः सति परामर्शे ऽसम्भवात् अप्रतिबन्धकत्वाच्चेति सर्वमवदातम् । दृष्टान्तेति । महानसीयधूमवन्होः सन्निकर्षेण तत्रैव व्याप्तिग्रहो नतु पर्वतीयधूमेपि पर्वतीयवन्हेरसन्निकर्षेण तन्निरूपितव्याप्तिग्रहासम्भवादिति भावः । स्मर्यत इति । महानसीयधूमे धूमत्वं धर्मितावच्छेदकीकृत्य व्याप्यनुभवः ततः पर्वतीयधूमे धूमत्वज्ञानात् एकसम्बन्धिज्ञानमपरसम्बन्धिस्मारकमिति न्यायेन तादृशव्याप्तेः स्मरणं जायते ततो * व्याप्तिस्मरणरूपविशेषणज्ञानाद् वन्हिव्याप्यो यं धूमः पर्वतवृत्तिरिति व्याप्यांशे उपनीतभानात्मकं प्रत्यक्षं ततश्चानुमितिरित्याखण्डलार्थः । नच महानसीयधूमवृत्तिव्याप्तेः पर्वतीयधूमेऽसत्त्वात् कथं तत्र तत्प्रत्यक्षमिति वाच्यं । यद्विशिष्टसमानाधिकरणाः सर्वे साध्यसमानाधिकरणास्तद्धर्मवत्त्वमित्यत्र तद्धर्मवत्त्वं तद्धर्मत्वेनैवेत्यर्थघटनालोचनया धूमत्वस्यैव व्याप्तित्वलाभात् तस्य च पर्वतीयधूमेपि सत्त्वात् । नचैवं

---

* जाते च व्याप्तिस्मरणवृत्तावपिपाठान्तरम् ॥

धर्मधूमज्ञानं जायते यद्वा दृष्टान्ते व्याप्तिज्ञानं जायमानं धूमत्वरूपसामान्यलक्षणाप्रत्यासत्त्या सकलधूमगोचरमेव जायतइत्यदोषः ॥

धूमत्वस्यैव व्याप्तित्वे तस्यव्याप्यतावच्छेदकत्वानुपपत्तिः । अभेदे अवच्छेदावच्छेदकभावानभ्युपगमादिति वाच्यं । घटकारणतात्व घटकारणतावच्छेदकत्वयोर्दण्डत्व इव उपहितानुपहितभेदादेव तस्य समर्थनीयत्वात् । अतएव परामर्शग्रन्थे स्मृतव्याप्तेः पक्षधर्मधूमे सत्त्वादेकैव हिसा व्याप्तिरित्यनेन चिन्तामणिकारेणापि तथाभिहितम् । नच यो यत्र पूर्वमवगतः स एव तत्र संस्कारवशात् यथार्थप्रत्यक्षे भासत इति नियमात् पर्वतीयधूमे पूर्वं व्याप्तेरनवगमात् कथं तत्र व्याप्तेरुपनीतभानं यथा यत्र चन्दने सौरभं घ्राणेनोपलब्धं तत्रैव चक्षुषा सुरभिचन्दनमित्युपनीतभानमन्यत्र त्वनुमानादिति वाच्यं । यद्धर्मावच्छेदेन यद्दत्वं गृहीतं तद्धर्मावच्छेदेनतदुपनीतभानमित्येव नियमात् । अस्तिचात्र धूमत्वेनैव व्याप्तेर्ग्रहाद् धूमत्वेनैव व्याप्तेरुपनीतभानमिति । इदं तु सामान्यलक्षणाभङ्गीकारेणोक्तं । वस्तुतस्तु सामान्यलक्षणाङ्गीकारेण व्याप्तेर्नानात्वेपि तादृशनियमाभ्युपगमेपि च नक्षतिः । महानसीयधूमे धूमत्वेनैव वह्निव्याप्तिज्ञानं जायमानं धूमत्ववह्नित्वसामान्यलक्षणया यावद्धूमवह्निभाने यावद्वह्निनिरूपितयावद्धूमनिष्ठं व्याप्तिज्ञानमेव जायतइति पर्वतीयधूमेपि व्याप्तेः पूर्वं गृहीतत्वेन तदुपनीतभाने बाधकाभावात् अनुमितिरुपपद्यतेत्याशयेनाह । यद्वेति । केचित्तु उक्तेत्यादिमहानसीयधूमनिष्ठव्याप्तिः तत्रैव गृहीता ततः पर्वतीयधूमे धूमत्वदर्शनात् महानसीयधूमनिष्ठव्याप्तेरेव स्मरणं ततः पक्षवृत्तिधूमे महानसीयधूमनिष्ठव्याप्तेरुपनीतभानं ततोऽनुमितिरित्यर्थः । तथाच भ्रमात्मकपरामर्शादेवानुमितिरिति भावः । ननु सन्निकृष्टपरामर्शस्यैव प्रमात्मकानुमितिहेतुतया यथार्थपरामर्शाभावेन कथं प्रमात्मिकानुमितिरत आह । यद्वेत्याहुः । तदसत् । धूमत्वस्यैव व्याप्तित्वेन सन्निकृष्टपरामर्शस्यैव पूर्वकल्पेपि सम्भवात् । यद्यपि यत्सामानाधिकरण्यादत्रापि तत्त्वं व्याप्तिरित्युक्तौ व्याप्तेर्नानात्वमपि ग्रन्थ

क्तदभिमतं तथापि यद्दिग्निष्टेति द्वितीयलक्षणस्यैव निर्दुष्टत्वेन तदभिप्रायेण सन्निकर्षपरामर्शमादायैव योजयितुं शक्यत्वे भ्रमात्मकपरामर्शमादायोक्तदुष्टेरनादरणीयत्वादिति न किञ्चिदेतत् । धूमत्वसामान्यलक्षणाप्रत्यासत्तेति । अत्र च ज्ञायमानं सामान्यं प्रत्यासत्तिर्बोध्या । तच्चेन्द्रियसम्बद्धं तथा तेन निमीलितनयनस्य न सामान्यलक्षणाप्रत्यासत्तिजन्यज्ञानापत्तिः । तथाचेन्द्रियसंयुक्ते धूमे धूम इति ज्ञानानन्तरं धूमत्वसामान्यलक्षणया यावद्धूमविषयकं धूमा इत्याकारकं ज्ञानं जायते इन्द्रियसम्बन्धस्य न संयुक्तसमवायः धूलीपटले धूमत्वभ्रमानन्तरं धूमा इति ज्ञानानुदयापत्तेः । तथाच तदुत्तरं धूलीपटले धूमत्वेन व्याप्तिग्रहात् जायमानायाः वह्न्यनुमितेरुच्छेदप्रसङ्गात् पर्वतीयधूमे व्याप्तिग्रहात् किंतु इन्द्रियसम्बद्धविशेष्यकज्ञानप्रकारत्वरूपो वैज्ञानिकः सम्बन्धः । इन्द्रियसम्बन्धश्च लौकिकोग्राह्यः । तेन निमीलितनयनस्य न तदापत्तिः । ज्ञानं च तदिन्द्रियजन्यं ग्राह्यं तेन पुरोवर्त्तिनि दोषवशादगृह्यमाणेन स्मर्यमाणघटत्वेन न यावद्घटचाक्षुषापत्तिः । इदं च बहिरिन्द्रियस्थलेबोध्यं । तेन तथाविधमानसोदयेपि न क्षतिः । अत्र च ज्ञायमानसामान्यस्य प्रत्यासत्तित्वे यत्र नानाकपालेषु एकएव घटः प्रत्यासन्नस्तत्र तद्घटनागृहीतायां तद्घटत्वसामान्यलक्षणया यावद्घटवतां ज्ञानं न स्यात् । सामान्यस्यतदानीमभात् । नच तत्र घटत्वमेव तद्वत्तिघटितसम्बन्धेन परम्परयाप्रत्यासत्तिरितिवाच्यम् । यत्र परम्परया तद्वत्तिसम्बन्धेन घटत्वादिकं न भातं किंतु तद्वत्तित्वेन (तद्वत्तिप्रकारेण तद्वत्तिमतां) ज्ञानं तत्र गत्यभावात् । नच तत्र परम्परयातद्वत्तित्वमेव प्रत्यासत्तिरिति वाच्यं । तद्वत्तित्वस्य तद्वृत्तिरूपाद्यात्मकतया तस्यापि नष्टत्वादिति तथाविधसामान्य ज्ञानं प्रत्यासत्तिर्बोध्या । तच्च न तावद् घटत्वाश्रययावद्वत्तिप्रत्यक्षे इन्द्रियसम्बद्धविशेष्यकज्ञानप्रकारीभूतघटत्वत्वेन तथाविधघटत्वज्ञानत्वेन वा हेतुता यावद्विषयकत्वस्य कार्यतानवच्छेदकत्वेपि विनिगमनाविरहेण यावद्विषयकत्वस्यार्थवशसम्पन्नत्वेन तन्निवेशे प्रयोजनाभावात् ॥

अथ संयोगाजन्यस्वविषयकज्ञानाजन्यघटत्वान्यविशिष्टघटवृत्तिधर्मप्रकारकघटप्रत्यक्षं प्रति तथाविधघटत्वेन तथाविधघटत्वज्ञानत्वेन वा हेतुता नि-

ननु सामान्यं यदि प्रत्यासत्तिस्तत्प्रकारकतदाश्रयलौकिक-साक्षात्कारजनिका तदा विमुद्रितनयनस्यापि धूमत्वेन

र्विकल्पकोत्तरोत्पन्नघटप्रत्यक्षे व्यभिचारवारणाय संयोगाजन्यत्वनिवेश : । पटत्वेन घटभ्रमानन्तरं यत्र पटवदित्युपनीतभानं तत्र पटत्वेन घटप्रत्यक्षोदयात्तत्र घटत्वज्ञानाभावाद्व्यभिचारवारणाय स्वविषयकज्ञानाजन्यत्वनिवेशः । द्रव्यत्वसामान्यलक्षणाजन्यप्रत्यक्षवारणायघटत्वातिरिक्तेत्यादीति चेन्न । तथासति घटत्वद्रव्यत्वोभयसमूहालम्बनस्थले परापरकार्यकारणभावापत्तेःकिंतु घटत्वादिप्रकारतानिरूपितलौकिकान्यघटादिमुख्यविशेष्यतायांचाक्षुषत्वाद्यवच्छिन्नं प्रति चाक्षुषप्रकारीभूतघटत्वादिना घटत्वादिप्रकारतायांचाक्षुषत्वादिना वा हेतुता बोध्या । प्रथमे विषयत्वसमवायोभयघटितसामानाधिकरण्यं प्रत्यासत्तिः । द्वितीये समवायसमवायोभयघटितसमाधिकरण्यं प्रत्यासत्तिः । विशेष्यतायां घटत्वादिप्रकारतानिरूपितत्वनिवेशाद् द्रव्यत्वादिना सामान्यलक्षणाजन्यज्ञाने न व्यभिचारः । निर्विकल्पकानन्तरोत्पन्नघटमुख्यविशेष्यकलौकिकचाक्षुषे व्यभिचारवारणाय लौकिकान्यत्वनिवेशः । घटत्वप्रकारकतद्घटस्मरणजन्ये घटाद्युपनीतभाने घटत्वप्रकारकचाक्षुषरूपकारणविरहाद् व्यभिचारवारणाय विशेष्यतायां मुख्यत्वनिवेशः मुख्यविशेष्यतात्वं च प्रकारतान्यविशेष्यतात्वं । बहिरिन्द्रियजन्यज्ञाने उपनीतं विशेषणतयैव भासते मानसेत्वनियम इति नियमाद् विशेषणत्वेनैव घटादेर्भानन्न मुख्यविशेष्यत्वमिति कारणतावच्छेदककोटौ घटत्वादिप्रकारतात्वनिवेशान्न निर्विकल्पकोत्तरसामान्यलक्षणाजन्यया दृघटप्रत्यक्षापत्तिः । पुरोवर्त्तिनि दीपवशात्प्रयत्नेनागृह्यमाणेन स्मरणप्रकारीभवता घटत्वेन यावद्घटचाक्षुषवारणाय चाक्षुषत्वनिवेशः । समवायेन घटत्वप्रकारकज्ञानबलात् कालिकादिसम्बन्धेन घटत्वाश्रयायाश्चत्यक्षापत्तिवारणाय सम्बन्धविशेषोपि निवेशनीय इति प्राचीनमत निगर्वः । नवीनमतं दर्शयितुं यङ्क्ते । नन्विति । तदाश्रयेति । सामानाश्रयेत्यर्थः । साक्षात्कारः स्यादिति । चाक्षुषसाक्षात्कारः स्यादित्यर्थः । तेन मानससा-

सकलधूमसाक्षात्कारः स्यात् इति चेन्न । यत्सामान्यं प्रत्यासत्तिस्तत्प्रकारकतदाश्रयस्य लौकिकसाक्षात्कारजनकसामग्र्या अपि सामान्यलक्षणप्रत्यासत्तौ सहकारित्वात् ।

साक्षात्कारोदयेपि न क्षतिः । नवीनमतमभिप्रेत्य सिद्धान्तयति । यत्सामान्यमिति । यदित्यस्य सामान्यमित्यनेनाभेदान्वयः । तत्प्रकारकतदाश्रयेति । मानससाक्षात्कारसामग्रीसत्त्वाल्लौकिकेति । सामग्री च तत्तत्सन्निकर्षालोक संयोगादिरूपा । सहकारित्वादिति । बहिरिन्द्रियजन्यज्ञाने सहकारित्वादित्यर्थः । निमुद्रितनयनस्यापि चक्षुःसंयोगादिरूपसामग्रीसत्त्वान्न प्रत्यक्षमिति भावः । नच धूलीपटले धूमत्वभ्रमानन्तरं धूमा इति ज्ञानं न स्यात् धूमत्वाश्रयलौकिकप्रत्यक्षसामग्रीसत्त्वादिति वाच्यं । तदाश्रयेत्यस्य तद्धर्मनिष्ठप्रकारतानिरूपितविशेष्यताश्रयेत्यर्थात् । धूमत्वनिष्ठप्रकारतानिरूपितविशेष्यताश्रये धूलीपटले लौकिकप्रत्यक्षसामग्रीसत्त्वेनादोषात् । ननु प्राचीनमते तत्पुरुषीयधूमत्वाश्रयविषयकालौकिकचाक्षुषत्वावच्छिन्नं प्रति तत्पुरुषीयचक्षुःसन्निकृष्टयत्किञ्चिद्विशेष्यकतत्पुरुषीयचाक्षुषप्रकारीभूतधूमत्वेन हेतुतया तेनैव विमुद्रितनयनस्यापि प्रत्यक्षापत्तिवारणे गुरुतरसामग्र्याः सहकारित्वकल्पने नव्यमते गौरवमिति चेन्नैवम् । अन्यतमसौदामिनीसम्पातजनितद्रव्यविषयकचाक्षुषोत्तरमालोकसंयोगविगमेपि तादृशकारणसत्त्वात् सकलद्रव्यसाक्षात्कारधारायां आपत्तेः तादृशसामग्र्याः सहकारित्वकल्पनस्यावश्यकत्वात् । एवं च धूमत्वाश्रयप्रत्यक्षे ज्ञानप्रकारीभूतधूमत्वेनैव हेतुत्वं नत्विन्द्रियभेदेन पुरुषभेदेन वा कार्यकारणभाव इत्यपि लाघवम् । अथैवं चक्षुःसन्निकृष्टपुरोवर्त्तिनि घटत्वग्रहप्रतिबन्धकदोषसत्त्वे घटत्वस्मरणबलात् यावद्घटचाक्षुषापत्तिः । नच तदाश्रयेत्यस्य तद्धर्मविशिष्टेत्यर्थस्तथाच तद्धर्मविशिष्टलौकिकप्रत्यक्षसामग्र्याः सहकारित्वात्तद्धर्म्यांशेपि लौकिकप्रत्यक्षसामग्री सहकारित्वलब्धा प्रकृते च घटत्वांशे दोषाभावघटितसामग्रीसत्त्वान्न घटत्वाश्रययावत्प्रत्यक्षापत्तिरिति वाच्यं । तथासति धूलीपटले धूमभ्रमात् * धूम इति ज्ञानानुदयापत्तेः धूमत्वांशे लौकिक-

* धूम भ्रमानन्तरं धूमा इति ज्ञानानुदयापत्तेरित्यपि पाठान्तरम् ॥

प्रत्यक्षसामग्र्यसत्त्वादिति चेन्न । तच्च यावदृष्टचानुपस्वीकारे त्विष्टापत्तेरिति नव्यमतनिगर्वः । अत्र केचित् ज्ञानलक्षणाप्रत्यासत्त्यस्वीकारे सुरभिचन्दनमित्यादौ सौरभत्वादेर्भानानिर्वाहात् तत्स्वीकार आवश्यकः सौरभत्वसामान्यलक्षणया सौरभभाननिर्वाहेपि सौरभत्ववृत्तिधर्मज्ञानाभावेन सौरभत्वभानस्य सामान्यलक्षणया निर्वाहासम्भवात् अतएव दीधितिकारः "अतएव सुरभिचन्दनमित्यादौ सौरभत्वादेरपि भान" मित्याह । तन्तु न सङ्गच्छते । सौरभत्वप्रकारक सौरभनिष्ठविशेष्यताशालिलौकिकप्रत्यक्षत्वावच्छिन्नं प्रति सौरभत्वप्रकारकज्ञानत्वेन सामान्यलक्षणाप्रत्यासत्तेर्हेतुत्वोपगमेन सौरभत्ववृत्तिधर्मज्ञानाभावेपि सौरभत्वज्ञानबलादेव सौरभत्वभानोपपत्तेरिति ज्ञानलक्षणाप्रत्यासत्तिस्वीकारो निरर्थकः । अथ सामान्यलक्षणया प्रत्यक्षे जनन्यै तद्धर्मप्रकारतानिरूपितविशेष्यताश्रये लौकिकप्रत्यक्षसामग्र्याः सहकारित्वात्तां विना कथं सामान्यलक्षणया सुरभिचन्दनमित्यादौ सौरभस्य सौरभत्वस्य वा भानमिति ज्ञानलक्षणास्वीकार आवश्यक इति चेन्न । सामान्यलक्षणया तद्धर्माश्रयमुख्यविशेष्यताशाल्यलौकिकप्रत्यक्षे जनन्यै एव तदाश्रयलौकिकप्रत्यक्षसामग्र्याः सहकारित्वात् प्रकृते च तदभावेपि सौरभविशेषणकालौकिकप्रत्यक्षे * जनन्यै बाधकाभावादित्याहुः । तन्न । यत्र सौरभत्वांशे उपनीतभानात्मकं सौरभत्वप्रकारकं चन्दनविशेष्यकं सौरभं चन्दनमिति भ्रमात्मकं ज्ञानं तत्र सौरभत्वज्ञानरूपसामान्यलक्षणया न निर्वहति सौरभत्वप्रकारतानिरूपितसौरभनिष्ठविशेष्यताशालिज्ञानत्वस्यैव सौरभत्वज्ञानरूपसामान्यलक्षणाप्रत्यासत्तेः कार्यतावच्छेदकत्वात् । तदुक्तं दीधितिकृता । "इयं च धर्मविषयकं ज्ञानं धर्मिणां प्रत्यासत्तिरितरा तूयद्विषयकज्ञानं तस्यैवेति" । तथाच चन्दनस्य सौरभत्वानाश्रयत्वेन तत्र सौरभत्वभानार्थं ज्ञानलक्षणा स्वीकार आवश्यकः । नच तत्र दोषबलादेव सौरभत्वांश्य भानमिति वाच्यं । प्रत्यक्षस्य विषयेन्द्रियसन्निकर्षजन्यत्वनियमेन सौरभत्वांशेऽन्द्रियसन्निकर्षस्यावश्यकत्वात् । अतएव रजतत्वांशे लौकिक-

---

* सौरभविशेषणकालौकिकप्रत्यक्षजनने बाधकाभावादिति पाठान्तरम् ॥

ननु व्याप्तिज्ञानस्यानुमितिहेतुत्वे यत्र धूमो वह्निव्याप्य इति ज्ञानं तत्राप्यनुमितिः स्यात् । नच पक्षवृत्तिधूमे व्याप्तिज्ञानं कारणं तच्चात्र नास्तीति वाच्यं । धूमत्वेन सामान्यलक्षणप्रत्यासत्तिभूतेन सर्वत्रैव धूमे व्याप्तिज्ञानात् । नच हेतोः पक्षधर्मताज्ञानमपि सहकारीति वाच्यं । धूमो वह्निव्याप्यो द्रव्यं पर्वतवृत्तीति ज्ञानादप्यनुमित्यापत्तेः द्रव्यत्वेन रूपेण पर्वते धूमज्ञानस्यापि सत्त्वात् ॥

सन्निकर्षाभावात् अलौकिकसन्निकर्षस्य चाक्षुषत्वान्नान्यथाख्यातिरिति प्राभाकराः । तथाच तादृग्नियमस्य सर्वसिद्धत्वात्तौरभत्वभानार्थं ज्ञानलक्षणास्वीकार इति । ननु व्याप्तिज्ञानस्यानुमितिहेतुत्वसम्भवेपि केवलव्याप्तिज्ञानकालेप्यनुमित्यापत्तिरित्याशङ्कते । नन्विति । ननु पक्षवृत्तिधूमविशेषकं व्याप्तिज्ञानं कारणं तच्च पक्षवृत्तिर्धूमो वह्निव्याप्य इत्याकारकं तत्त्वेचानुमित्युत्पत्तौ न कस्यापि विवाद इत्याशयेनाशङ्कते । नचेति । सर्वत्रैवधूम इति । पक्षवृत्तित्वावगाहिज्ञानं कारणमिति तावद्दुर्वचं वह्निव्याप्य धूमवान् पर्वत इति ज्ञानादप्यनुमित्यनापत्तेः । तत्राधेयतायाभानेमानाभावात् । किंतु वस्तुगत्या पक्षवृत्तिविषयकं तत्त्वंच धूमो वह्निव्याप्यद्रव्यमपि धूमत्वेन पर्वतीयधूमविषयकत्वादज्ञातमिति ततोऽनुमित्यापत्तिरिति भावः । यत्तु दृष्टान्ते धूमो वह्निव्याप्यइति ज्ञानाद् दृष्टान्तेऽनुमित्यापत्तिरित्याशङ्कते । नन्विति । तत्तुच्छं । दृष्टान्ते महानसादौ वह्निमत्ताज्ञानसत्त्वेन पक्षताविरहादेवानुमितेरनुदयात् अन्यथा सिद्धान्तेप्यगतेः नहि व्याप्यत्वरूपेण पक्षताविशिष्टे हेतुमत्तानिश्चयः कारणमिति तदर्थः । तथासति पक्षतायाः परामर्शकुक्षिनिक्षेपापत्त्या कारणतावच्छेदकतापत्त्या कारणत्वानुपपत्तेः । किंतु पक्षत्वं साध्याधिकरणत्वमेव तथाच व्याप्तिविशिष्टवैशिष्ट्यावगाहिज्ञानं कारणमित्यर्थो लभ्यते तत्तु महानसादावपि सम्भवत्येवेति पक्षताविरहान्न तत्रानुमितिरित्येवोपेयमिति । द्रव्यत्वे-

उच्यते व्याप्यत्व प्रकारेण पक्षे हेतुनिश्चयो ऽनुमितौ हेतुः ॥

नेति । एकरूपावच्छिन्नवह्निव्याप्यपक्षधर्मतावगाहिज्ञानत्वेन हेतुत्वोक्तौ तु वह्निव्याप्यवानिति ज्ञानादनुमित्यनापत्तिरिति भावः । व्याप्यत्वप्रकारेणेति । व्याप्तिविशिष्टवैशिष्ट्यावगाहिज्ञानं कारणमित्यर्थः । नन्वेवं खण्डशः अव्यभिचारसहचारयोर्यद्वह्व्यभिचरितवह्निसहचरितधूमवानिति ज्ञानात् एवं "विशेष्ये विशेषणं तत्रापि च विशेषणान्तरमिति" न्यायेन वह्निव्याप्यधूमवानिति ज्ञानाच्चानुमित्यनुदयापत्तिरिति चेन्न । व्याप्तिविशिष्टवैशिष्ट्यावगाहिनिश्चयत्वेन लाघवात् कारणत्वे सिद्धे ततोऽनुमितिभावे इष्टापत्तेः लाघवं च व्याप्यांशे निश्चयत्वानिवेशादेव । अन्यथा वह्निव्याप्तिवह्निव्याप्यभाववद् धूमवान् पर्वत इति व्याप्यांशे संशयात्मकज्ञानादनुमित्यापत्तेः व्याप्यांशे निश्चयात्मकतादृशज्ञानत्वेन कारणता वाच्येति गौरवात् । मन्मते च विशिष्टवैशिष्ट्यावगाहिबोधे विशेषणतावच्छेदकप्रकारकनिश्चयत्वेन विशेषणतावच्छेदकाभावप्रकारकज्ञानाभावत्वेन कार्यकालवृत्तितया वा कारणत्वेन व्याप्यांशे संशयात्मकतादृशज्ञाने विशिष्टवैशिष्ट्यविषयकत्वाभावेनैवापत्त्यभावादिति दिक् । व्याप्तिविशिष्टवैशिष्ट्यावगाहित्वं च व्याप्यवच्छिन्नप्रकारतानिरूपितपक्षनिष्ठविशेष्यतात्वम् । नच व्याप्यपक्षोभयवैशिष्ट्यावगाहित्वं तत् व्याप्यावच्छिन्नविषयतानिरूपितपक्षनिष्ठविषयतात्वमिति यावत् । एवं च वह्निव्याप्यो धूमः पर्वते इत्याधेयतासंसर्गकपर्वतप्रकारकज्ञानस्यापि सङ्ग्रह इति वाच्यम् । अप्रामाण्यज्ञानाभावद्वयस्योत्तेजकत्वानुरोधेन निश्चयत्वद्वयनिवेशानुरोधेनच तयोः पृथगेव हेतुतायाः आवश्यकत्वात् अन्यथा एकविधपरामर्शसत्त्वेऽनविधाप्रामाण्यज्ञानसत्त्वेऽनुमित्यनापत्तेर्मिथो विशेषणविशेष्यभावे विनिगमनाविरहाच्च नानासम्बन्धावच्छिन्ननानाधर्मावच्छिन्नावच्छेदकतायाश्चैक्यासम्भवेनावच्छेदकतायाः व्यासज्यवृत्तित्वासम्भवात् । नन्वेवं वह्निव्याप्यो धूमः पर्वते इति ज्ञानादनुमित्यनुदयापत्तिः तत्रोक्तविशिष्टवैशिष्ट्यावगाहिज्ञानाभावादिति चेन्न । तस्यापि स्वातन्त्र्येण हेतुत्वोपगमात् अव्यवहितोत्तरत्वनिवेशेन च परस्परजन्यानुमितौ न व्यभिचारः ।

नतु व्याप्तिज्ञानमात्रं ॥ नच धूमो वह्निव्याप्यो द्रव्यं पर्वतइतीति ज्ञानं व्याप्यत्वेन पर्वते धूममवगाहते येन ततोऽनुमितिः स्यात् ॥ पर्वतो* धूमवान्नवेति संशयवारणाय निश्चयपदम् ॥

वस्तुतस्तु अनुमितेः पक्षविशेष्यकत्वनियमेन "गुरपि विशेषोध्यवसायकरं" इति न्यायेन पक्षविशेषक परामर्श एव हेतुः नतु व्याप्यविशेष्यकोपीतिध्येयम् । ऊहाति प्रसङ्गंवारयति । नचेति । नचैवंवह्निव्याप्यो धूमः धूमवान् पर्वत इति ज्ञानादनुमित्यनुदयापत्तिरिति वाच्यंतदुत्तरं परामर्शाङ्गीकारेण तदुपपत्तेरिति भावः । निश्चयपदमिति । निश्चयत्वं च तद्भावा प्रकारकत्वे सति तत्प्रकारकत्वं तथाच शुद्धपर्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्निव्याप्यधूमाभाव प्रकारताशून्यत्वे सति शुद्धपर्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्निव्याप्यधूमप्रकारताशालिज्ञानत्वेन पर्वतोद्देश्यकवह्निविधेयकानुमितौ हेतुत्वं नीलपर्वतो वह्निव्याप्यधूमाभाववान् पर्वतो वह्निव्याप्यधूमवांश्चेति निर्णयसङ्कोचाय प्रथमशुद्धत्वनिवेशः । नीलपर्वतो वह्निव्याप्यधूमवान्नवेति संशयवारणाय द्वितीयशुद्धत्वनिवेशः । नीलपर्वतो वह्निव्याप्यधूमवानिति निश्चयस्य तादृशानुमितौ स्वातन्त्र्येण हेतुतया न ततोऽनुमित्यनुपपत्तिः । अथ पर्वतत्वसामानाधिकरण्येन धूमधूमाभावावगाहि वह्निव्याप्यधूमवान् वह्निव्याप्यधूमाभाववांश्च पर्वत इति ज्ञानादनुमित्यनोपपत्तिरिति चेन्न । धर्मितावच्छेदकसामानाधिकरण्येनोभयकोट्यवगाहिज्ञानं समुच्चयः । धर्मितावच्छेदकावच्छेदेनान्यतरकोट्यवगाहिज्ञानं संशय इति निश्चयमात् । तथाच पर्वतत्वसामानाधिकरण्येन वह्निव्याप्यवत्ताज्ञानस्य हेतुतायां पर्वतत्वव्यापकत्वविशिष्टदैशिकविशेषणतासम्बन्धावच्छिन्नधूमाभावप्रकारताशून्यत्वनिवेशः । पर्वतत्वावच्छेदेन वह्निव्याप्यवत्ताज्ञानस्य हेतुतायां च शुद्धदैशिकविशेषणतासम्बन्धावच्छिन्नधूमाभावप्रकारताशून्यत्वनिवेश इति । अनुमितिं प्रति परामर्शत्वेन हेतुत्वे कारणत्वघटकानन्यथासिद्धत्वनियतपूर्ववृत्तित्वरूपधर्मद्वयं विशिष्टपरामर्शत्वावच्छेदेन कल्प-

---

* पर्वतोवह्निव्याप्यधूमवान्नवेति संशयादनुमितिर्माभूदितिनिश्चयपदमिति पुस्तकान्तरस्थः पाठः ॥

मीमांसकास्तु व्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानं व्याप्तिज्ञाने सहकारि व्याप्यतावच्छेदकं च धूमत्वं तद्रूपेण व्याप्तिग्रहात् नतु द्रव्यत्वं। नातो द्रव्यं पर्वतवृत्तीति ज्ञानाद्नुमितिः। एवं च धूमो वह्निव्याप्यो धूमवान् पर्वत इति ज्ञानद्वयादप्यनुमितिरित्याहुः। तन्न। व्याप्यप्रकारकपक्षधर्मताज्ञानस्य हेतुतायां लाघवात्। किञ्चैवं वह्नि-

---

नीयं वह्निव्याप्यो धूमः धूमवान् पर्वत इति ज्ञानद्वयस्यानुमितिहेतुत्वे तु परामर्शस्य हेतुत्वेन ज्ञाननियतपूर्ववृत्तिताकस्य तस्येवान्यथासिद्धत्वमाचकल्पनं तथाच विशिष्टपरामर्शत्वेन हेतुत्वमसम्भवदुक्तिकमिति निष्कृष्टमीमांसकमतं दर्शयति। मीमांसकास्त्वित्यादिना। व्याप्यतावच्छेदकेति। व्याप्यतावच्छेदकत्वेन गृहीतो यो धर्मस्तत्प्रकारकं पक्षधर्मताज्ञानमित्यर्थः। अत एवानुपदं तद्रूपेण व्याप्तिग्रहादिति वक्ष्यति यथाश्रुते व्याप्यांशे भ्रमात्मकज्ञानादनुमित्यनुदयापत्तेः। तत्र वस्तुगत्या व्याप्यतावच्छेदकत्वाभावात्। व्याप्तिज्ञाने। व्याप्यतावच्छेदकप्रकारकव्याप्तिज्ञाने। सहकारि। तादृश्यव्याप्तिज्ञानेनानुमितौ जनन्यायां सहकारि। धूमो वह्निव्याप्यो द्रव्यंपर्वतवृत्तीतिज्ञानादनुमित्यापत्तिं वारयति। व्याप्यतावच्छेदकमिति। व्याप्यतावच्छेदकतया गृहीतमित्यर्थः। स्वमते लाघवं दर्शयति। एवंचेति। ज्ञानद्वयादपीत्यपीना वह्निव्याप्यधूमवान् पर्वत इति ज्ञानसङ्ग्रहः। तथाच नैयायिकमते ज्ञानद्वयात्परामर्शं कल्पयित्वा अनुमितिस्वीकारे गौरवमिति भावः। लाघवादिति। विशिष्टनिश्चयत्वरूपलक्ष्यैकधर्मावच्छेदेनानन्यथासिद्धत्वनियतपूर्ववृत्तित्वकल्पनायाः गुरुधर्मद्वयावच्छेदेनानन्यथासिद्धत्वकल्पनापेक्षया लघुत्वादित्यर्थः। ननु कारणतावच्छेदकलाघवेपि यत्र धूमो वह्निव्याप्यो धूमवान् पर्वत इति ज्ञानं ततोऽनुमितिस्तत्र भवता विशिष्टपरामर्शं कल्पयित्वाऽनुमितिकल्पनेन तज्ज्ञानतदध्वंसादिकल्पने गौरवं क्षणापलापश्चेत्यत आह। किञ्चेति। वह्निव्याप्यवानिति। व्याप्य-

व्याप्यवानयमिति ज्ञानादनुमितिर्न स्यात् ॥ धूमत्वेन पक्ष-

तावच्छेदकधूमत्वादीनां तत्राभानादित्यर्थः । तथाच लाघवाद् विशिष्टवैशिष्ट्यावगाहिज्ञानत्वरूपलघ्वेकधर्मावच्छेदेन कारणत्वे सिद्धे यत्तादृग्ज्ञानद्वयं तत्राप्यन्तराविशिष्टपरामर्शं कल्पयित्वाऽनुमितिस्वीकारः । लाघवानुरोधेन क्षणापलापस्यापि न्याय्यत्वात् फलमुखगौरवस्यादोषत्वात् मीमांसकमते तु व्याप्यांशे निर्धर्मितावच्छेदकाद् वह्निव्याप्यवानिति शाब्दपरामर्शात् सर्वथैवानुमित्यपलाप इति । वस्तुतस्तु व्याप्यतावच्छेदकप्रकारकव्याप्तिज्ञान व्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानयो र्हेतुत्वेपि वह्निव्याप्यो धूम आलोकवान् पर्वत इति ज्ञानादनुमित्यापत्तिः । आलोकत्वस्य वस्तुगत्या व्याप्यतावच्छेदकत्वात् व्याप्यतावच्छेदकत्वेन गृह्यमाणधर्मप्रकारकपक्षधर्मताज्ञानत्वेन हेतुत्वेपि तथा । आलोकत्वस्यापि कदाचिद् व्याप्यतावच्छेदकत्वेन ग्रहात् तत्कालीनतत्पुरुषीयव्याप्यतावच्छेदकत्वप्रकारकग्रहविषयधर्मेत्युक्तौ तु तत्कालीनतत्पुरुषीयत्वनिवेशे गौरवात् । एतेन गृह्यमाणव्याप्यतावच्छेदकधर्मप्रकारकपक्षधर्मताज्ञानत्वेन पक्षधर्मतायाग्रहप्रकारीभवद्धर्मावच्छिन्नविशेष्यकव्याप्तिज्ञानत्वेन वा एकधर्मेण मयापि कारणत्वं कल्प्यत इत्यपि परास्तं । कालादिप्रवेशेन गौरवादिति । धूमत्वप्रकारकव्याप्तिज्ञानत्वेन धूमत्वप्रकारकपक्षधर्मताज्ञानत्वेन वा हेतुत्वं वाच्यं । तथाच वह्निव्याप्यो धूमः धूमवान् पर्वत इति ज्ञानद्वयस्य न तावत् पर्वतोद्देश्यकवह्निविधेयकानुमितिसामान्ये नियतपूर्ववृत्तित्वं क्लृप्तं । वह्निव्याप्यालोकवान् पर्वत इति परामर्शजन्यतादृशानुमितौ तयोः पूर्ववृत्तित्वाभावात् । किंतु अनुमितिविशेषे तथात्वं वक्तव्यं तच्च विशिष्टपरामर्शस्यापि वह्निव्याप्यवानिति शाब्दपरामर्शजन्यानुमितावस्त्येवेति किं लाघवमेतन्मते न जानीम इति दिक् । ननु अभिचारज्ञानकालेपि निर्धर्मितावच्छेदकव्याप्यवत्तापरामर्शसत्त्वेनानुमित्यापत्तेर्व्यभिचारस्य हेत्वाभासत्वानुपपत्त्या हेतुतावच्छेदकमनिवेश्य नियतत्वनिर्वचनानुपपत्त्या व्याप्तेर्निर्वक्तुमशक्यतया च हेतुतावच्छेदकगर्भव्याप्यवत्ता

धर्मतानवगाहनात् ॥ तस्माद्वह्निव्याप्यवानयमित्येवंरूपाद्व्याप्तिविशिष्टपक्षधर्मताज्ञानात्तृतीयलिङ्गपरामर्शत्वेन प्रसिद्धादेवानुमितिः ॥ तृतीयत्वं कथमिति चेत् ॥ प्रथमं दृष्टान्ते धूमदर्शनं ततो व्याप्तिज्ञानं ततस्तद्विशिष्टपक्षधर्मताज्ञानमित्येवंरूपेणेति गृहाण ॥ तृतीयकं प्रापकमित्युक्तं ननु तेन रूपेण हेतुत्वं गौरवाद्व्यभिचाराच्चेति ध्येयम् । सोऽयं प-

---

परामर्श एव हेतुर्वाच्यः । तथाच वह्निव्याप्यवानिति शाब्दपरामर्शस्थले कथमनुमितिरित्यत्रस्थस्मादाह। तस्मादिति। वह्निव्याप्यवानित्येवं रूपादिति। वह्निव्याप्यधूमवानित्येवं रूपादित्यर्थः । प्रसिद्धादेवेत्येवकारेण मीमांसकाभिप्रेतज्ञानद्वयव्युदासः । आद्यांशे संशयात् पक्षधर्मतांशे संशया चानुमित्यापत्तिवारणाय वाद्यांशे निश्चयत्वं पक्षधर्मतांशे च निश्चयत्वं निवेश्यं नैयायिकमते च आद्यांशे निश्चयत्वमनिवेश्य व्याप्तिविशिष्टवैशिष्ट्यावगाहिनिश्चयत्वेनैव हेतुत्वमुपेयते आद्यांशे संशयात्मकज्ञाने च विशिष्टवैशिष्ट्यविषयकत्वाभावेनैवापत्त्यभावादिति पूर्वमेवावेदितवान् एवं धर्मद्वयावच्छेदेन हेतुत्वकल्पनात् एकधर्मावच्छेदेनैव तत् कल्पनमित्यास्तां विस्तरेण । तृतीयमिति । ननुनिश्चिकारणीभूतलिङ्गपरामर्शस्य तृतीयत्वं कथमित्यर्थः प्रथममिति । दृष्टान्ते यद्धूमदर्शनं तत्प्रथममित्यन्वयः । तत इति । पर्वते धूमदर्शनानन्तरं धूमो वह्निव्याप्य इति स्मरणात्मकव्याप्तिज्ञानं द्वितीयमित्यर्थः । तद्विशिष्टेति । व्याप्तिविशिष्टेत्यर्थः । स्मृतायां व्याप्तौ वह्निव्याप्यधूमवान् पर्वतइति ज्ञानमेव तृतीयमिति भावः । केचित्तु दृष्टान्ते धूमदर्शनं प्रथममित्यर्थः।व्याप्तिज्ञानं । दृष्टान्तीयधूमस्य व्याप्तिमत्त्वाज्ञानं द्वितीयमित्यर्थः । तद्विशिष्टेति । दृष्टान्ते प्रागनुभूतव्याप्तिविशिष्टस्य हेतोः । पक्षवृत्तित्वावगाहिज्ञानं तृतीयमित्यर्थइति व्याचक्रुः । गौरवादिति । लिङ्गपरामर्शत्वापेक्षया तृतीयलिङ्गपरामर्शत्वेन हेतुत्वे तु गौरवादित्यर्थः । ननु प्रामाणिकगौरवं न दोषायेत्यत आह । व्यभिचाराच्चेति । महानसादौ

रामर्शो नानुमितेः करणं व्यापाराभावात् । नच प-
रामर्श्यानंतरिङ्गं परामर्श्यापारकं भूतभाविभ्यां लिङ्गाभ्यां
अनुमित्यनुदयापत्तेः । अनन्यथासिद्धनियतपूर्ववृत्तिहिका-

सिद्धिसत्वेपि सिद्धाधीयत्वधीनानुमित्युत्पत्त्या तत्र तृतीयलिङ्गपरामर्शाभावेन व्यभिचारादित्यर्थः । फलायोगव्यवच्छिन्नकारणत्वरूपकारणत्वमभिप्रेत्य परामर्श एवानुमानमिति केचित् । एवं लिङ्गपरामर्शस्यानुमितिहेतुत्वे लिङ्गस्यापि तत्त्वं विशेष्टे कारणताग्राहकंप्रमाणमस्तीति बाधके विशेषणस्यापि कारणत्वं गृह्णातीति न्यायाद् विशेषणीभूतलिङ्गस्यापि कारणत्वग्रहाद्दण्डत्वादेरपि घटकारणतापत्त्यासत्यन्तनिवेशः तवान्यथासिद्धेरेव बाधकत्वात् । एव विनिगमनाविरहेणापि लिङ्गस्यानुमितिकरणत्वमित्यामनन्त्याचार्याः , तदुभयमतं निराकुर्वन् क्षमतमाह । सोयमिति । व्यापाराभावादिति । फलायोगव्यवच्छिन्नकारणत्वस्य च व्यापारवदसाधारणत्वापेक्षया गुरुत्वेन हेयत्वादितिभावः । यथाचैतत्तथा प्रत्यक्षपरिच्छेदे विवेचितम् । ननु यच परामर्शोत्तरं सिद्धिनाशस्तत्तदनुमितिस्तच योग्यविभुविशेषगुणनाशत्वावच्छिन्नं प्रति स्वोत्तरोत्पन्नगुणत्वेन नाशकतया परामर्शस्यापि सिद्धिनाशरूपव्यापारसत्त्वात्कारणत्वं संभवत्येवेति चेन्न । यं जनयित्वैव यस्य यज्जनकत्वं तस्यैव तद्व्यापारत्वमिति नियमेन तज्ज्ञानीये अन्यत्र तथात्वासंभवेन तस्यानुमानत्वाङ्गीकारस्यासंभवितत्वादिति । लिङ्गमिति । अनुमितिकारणमित्यनुषज्यते । परामर्शव्यापारकमित्यनेन कारणलक्षणसत्त्वं सूचितम् । भूतेति । अतीतानागतधूमविषयको यत्र मानसो वह्निव्याप्यत्वधीः परामर्शस्तत्रानुमित्यनुदयापत्तेरित्यर्थः । नच तत्र तत्प्रागभावादीनामेव लिङ्गत्वमास्तामिति वाच्यम् तेषां तदा तद्व्याप्यत्वेनापरामृश्यमानत्वादिति भावः । ननु अतीतलिङ्गस्थलेऽनुमितिपूर्वं तस्य सत्त्वेन हेतुत्वमत्तत्तमत आह । अनन्यथेति । अनुमित्यव्यवहितपूर्वक्षणावच्छेदेन तत्सत्त्वमिति भावः । ननु कारणत्वं कार्याव्यवहितपूर्वक्षणावच्छेदेन कारणतावच्छेदकसंबन्धावच्छिन्नकार्याधिकरणक्षत्यभावप्रतियोगितानवच्छेदकधर्मत्वं तच्चातीतानागतधूमस्थले ऽनुमित्यव्यवहितपूर्वं धूमासत्त्वेपि

तत्संबन्धावच्छिन्नप्रतियोगिताकाभावस्यासंभवादक्षुण्णमेव । तथाहि न तावत्तादृगभावौ ध्वंसप्रागभावौ भवतः तयोः संबन्धावच्छिन्नप्रतियोगिताकत्वे सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वे च मानाभावेन तथात्वासंभवात् । तत्त्वे वाप्रमाणमत्त्वे च एकविशेषवति सामान्यधर्मावच्छिन्नप्रतियोगिताकध्वंसप्रागभावयोरनभ्युपगमेन धूमाधिकरणे तयोस्तथात्वासंभवात् । नाप्ययन्ताभावः प्रतियोगिवद् ध्वंसप्रागभावयोरत्यन्ताभावविरोधित्वादिति चेन्न । तयोर्विरोधित्वे मानाभावात् । अन्यथा अन्तराग्न्यभावे रक्तं रूपं नास्तीति प्रतीत्यनुपपत्तेः । तस्याः ध्वंसादिविषयकत्वे भूतभाविरक्तघटेऽपि तदापत्तेरिति । एकत्र ध्वंसप्रागभावयोरत्यन्ताभावविरोधित्वे भग्ने अन्यत्रापि तयोस्तत्सामानाधिकरण्ये बाधकाभावः इत्यं चालीतभाविधूमवत्यपि धूमोनास्तीति प्रतीत्या धूमात्यन्ताभावमत्त्वे नानुमितिरूपकार्यसमानाधिकरणाभावप्रतियोगितानवच्छेदकधर्मवत्त्वरूपकारणत्वासंभवात् न्यायमानसिद्धमनुमानमिति दिक् । ननु धूमवति धूमात्यन्ताभावसत्त्वेपि अव्याप्यवृत्तिक्रियादीनां संयोगादीनां संयोगादिकं प्रति हेतुत्वोपपत्तये कारणतालक्षणे कार्याधिकरणवृत्त्यभावेत्यभावे प्रतियोगिवैयधिकरण्यं वृत्तिमत्त्वं वा हेतुमत्तायां विरोधितानियामकसंबन्धेनावश्यं विवक्षणीयम् । एवं च धूमाधिकरणे धूमात्यन्ताभावमत्त्वेपि तस्य प्रतियोगिवैयधिकरण्याभावात् धूमवत्तायां विरोधितानियामकसंबन्धेन वृत्तिमत्त्वाभावाच्च न तादृशत्वं किन्त्वन्य एवातादृशो भावस्तत्प्रतियोगितानवच्छेदकधर्मवत्त्वं धूमे अक्षुण्णमेव । नच धूमानधिकरणकालावच्छेदेन धूमाभावोपि प्रतियोगिव्यधिकरण एवेति वाच्यम् । प्रतियोगिव्यधिकरणत्वं हि न प्रतियोग्यधिकरणावृत्तित्वं सामानाधिकरण्याभावाव्यवृत्तित्वे मानाभात् किंतु प्रतियोग्यनधिकरणवृत्तित्वम् । अन्योन्याभावस्य व्याप्यवृत्तितया प्रतियोग्यधिकरणेन प्रतियोग्यनधिकरणत्वसंभवः अन्यथा अव्याप्यवृत्त्यन्योन्याभावस्यादित्यादि धूमाभावस्य प्रतियोगिव्यधिकरणत्वाभावात् । नचैवं रासभसंयोगादीनामपि घटकारणत्वापत्तिः त्वदुक्तरीत्या तस्यापि प्रतियोगिवैयधिकरण्याभावादिति वाच्यम् । अनन्यथासिद्धपदेनैव तद्वारणात् । न च रासभादीनामपि तेनैव वारणे कारणतालक्षणे नियतपदवैयर्थ्यमिति वाच्यं । रासभसामान्यस्य घटसामान्यं प्रति हेतुत्ववारणाय तत्तार्थ्यादिति स्वयमेव तावद्विभावनीयम् । नच रासभसंयोगादिवल्लिङ्गसंख्यापि अन्यथासिद्धत्वमिति वाच्यम् ।

अन्यथासिद्धेरेकस्या निर्वक्तुमशक्यतया तत्तद्व्यक्तिभेदकूटस्यैव निवेशनीयतया गौरवेण धूमव्यक्तिभेदानिवेशात् । विशिष्टे कारणतावच्छेदके प्रमाणमसति बाधके विशेषणस्यापि कारणत्वं गङ्गास्रोतोनियमस्य साधकत्वस्य सत्त्वाच्च । अन्यथा इन्द्रियसंयोगादीनां हेतुत्वे इन्द्रियस्यापि हेतुत्वानुपपत्तेः एवं विषयितया लिङ्गविशिष्टज्ञानं करणं विषयतया ज्ञानविशिष्टलिङ्गं वेत्यत्र विनिगमनाविरहेऽपि तद्धेतुत्वसाधकः । ननु परामृश्यमानलिङ्गस्यानुमितिसामान्ये न हेतुत्वं धूमोपटलादपि भ्रमानुमित्युदयेन तत्र लिङ्गाभावात् । नच प्रमानुमितौ तद्धेतुः अनुमितिसामान्ये तु परामर्शएव हेतुरिति वाच्यं । यत्सामान्ये यत्सामान्यं प्रयोजकं तद्विशेषे तद्विशेषस्यैवासति बाधके प्रयोजकत्वात् परामर्शप्रमात्वस्यैवानुमितिप्रमात्वे प्रयोजकत्वौचित्यादितिचेन्न । लिङ्गत्वं न तद्व्याप्यधर्मतावत्त्वं येन धूमोपटले धूमभ्रमानन्तरं तन्न स्यात् किंतु तद्धेतुत्वं तच्च तत्राप्यक्षतत्वादिति न किंचिदेतत् इत्याचार्यमतमखण्डितमेवेतिचेन् मैवं । कार्याधिकरणवृत्तित्वं व्याप्तियोग्याधिकरणता तद्वच्छेदककार्यान्यवहितपूर्ववर्त्तिता-वच्छेदेन कार्याधिकरणवृत्त्यभावाप्रतियोगित्वानवच्छेदकधर्मवत्त्वे सति कार्याधिकरणे सत्त्वस्यैव कारणत्वप्रदार्थत्वात् तत्र चातीतानागतलिङ्गस्यलेऽसत्त्वादिति दिक् । मतीनास्तु नहि वयं लिङ्गज्ञानत्वेन कारणतां ब्रूमो येनोक्तनियमबाधः विनिगमनाविरहो वा भवेत् किन्तु ज्ञानत्वेनैवेति न लिङ्गस्य हेतुत्वं व्याप्तिप्रकारकपक्षधर्मताज्ञानरूपपरामर्शात्मकविशेषज्ञानयोर्विरहाच्च न यत्किञ्चिज्ज्ञानादनुमित्यापत्तिरित्याहुः । ननु यत्र विशेष्ये विशेषण तत्र च विशेषणान्तरमिति न्यायेन परामर्शादनुमितिस्तत्र व्याप्तिज्ञानस्य परामर्शद्वारा कारणत्वासंभवादत्यत आह । साध्यज्ञानंवेति । ननु साध्यत्वं सिद्धिकर्मत्वादिरूपतयागुरुतरमत आह । लिङ्गज्ञानंवेति । लिङ्गनिवेशेपि गौरवादाह । जन्यज्ञानेति । जन्यपदं नित्यस्य स्वरूपयोग्यत्वे फलावश्यंभव इति नियमाभिप्रेत्य तदनङ्गीकारे तु नोपादेयमेव तत् । अतिप्रसङ्गइति । परामर्शशून्यकालीनघटज्ञानादनुमितिप्रसङ्ग इत्यर्थः । व्यापारेण । परामर्शरूपव्यापारेण । तन्निरासात् । अतिप्रसङ्गनिरासात् । नचैवं घटज्ञाने पर्वतो वह्निमानित्यनुमितिजनकत्वव्यवहारापत्तिरिष्टत्वात् । कार्यत्वेन ज्ञानत्वेन कार्यकारणभावात् भयज्ञानेपि तज्जनकत्वव्यवहारस्याङ्गीकृतत्वात् । नचानुमितित्वावच्छिन्नजनकत्व

रणं किंतु व्याप्तिज्ञानं साध्यज्ञानं वा लिङ्गज्ञानं वा जन्य-ज्ञानमात्रं वा परामर्शव्यापारकं । नचातिप्रसंगः । व्यापारेण तन्निरासात् । ज्ञानपदं च सविषयकमात्रपरं नातः स्मरणात्मकपरामर्शस्थलेऽव्यभिचारः तत्र व्याप्तिविषयकसंस्कारस्य परामर्शव्यापारकस्य करणत्वात् पूर्वानुभवएवकरणमिति संक्षेपः॥ तच्चानुमानं त्रिविधं । केवलान्वयिकेव-

---

त्वव्यवहारो नानुभूयतइति वाच्यं । सावधारणेऽपि क्वचित्प्रयोगादर्शनात् । नन्वेवं तावता परामर्शरूपव्यापारद्वारा ज्ञानमनुमितिकरणमिति सिद्धं तथाच यत्र वह्निव्याप्यधूमवानिति स्मरणात्मकपरामर्शात्तानुमितिर्न स्यात् । परामर्शव्यापारकस्य ज्ञानस्य तत्राभावादित्यतआह । ज्ञानपदमिति । सविषयकेति । तथाच सविषयकत्वेनैवानुमितिकरणत्वेन संस्कारस्यैव स्मरणात्मकपरामर्शद्वारा करणत्वसंभवात्तानुपपत्तिरितिभावः । ननु सविषयकत्वस्य ज्ञानत्वापेक्षया गुरुत्वेन ज्ञानत्वमेव तज्जनकतावच्छेदकं नचोक्तानुपपत्तिः । तत्रापि स्वजन्यसंस्कारजन्यस्मरणरूपपरामर्शस्यैव व्यापारत्वसंभवादित्यभिप्रेत्याह । पूर्वानुभवएवेति । इदमत्र प्रबन्धेनानुमानस्वरूपं निरूप्य तद्विभागमाह । तच्चेति । अनुमानम् । अनुमितिकरणं । ननु केवलान्वयित्वमत्यन्ताभावाप्रतियोगित्वम् इत्थं च इदं वाच्यं ज्ञेयत्वादित्यत्रचोपपत्तावपि इदं वाच्यं घटत्वादित्यादेरतथात्वप्रसङ्गादित्यतः पारिभाषिकं केवलान्वयिपदार्थमाह । तत्रेति । तेषु मध्ये इत्यर्थः । केवलान्वयिसाध्येति । केवलान्वयिसाध्यविधेयकानुमितिजनकत्वं तत्त्वमित्यर्थः । इत्थंच इदं वाच्यं घटत्वादित्यत्रापि केवलान्वयिवाच्यत्वरूपसाध्यकत्वात्तासङ्गइति भावः । साध्यविशेषणीभूतं केवलान्वयित्वं दर्शयति । तत्रयइति अत्यन्ताभावाप्रतियोगित्वं केवलान्वयित्वमित्यर्थः । नन्वेवमाकाशाभावादीनां केवलान्वयित्वानुपपत्तिः । आकाशादिरूपाभावप्रतियोगित्वादिति चेन्न । वृत्तिमदत्यन्ताभावाप्रतियोगित्वस्य विवक्षितत्वात् । आकाशस्य न वृत्तिमदभाव इति न दोषः । केचित्तु घटाभावो नास्तीति प्रतीत्या घटाभावाभावसिद्धावपि आकाशाभावो नास्तीति प्रतीतेरभावादाकाशाभावाभावे मानाभावः प्रतियोगित्वं च स्वरूपसंबन्धविशेष एव नतु स्वाभावविरहात्मत्वमिति आकाशे नाकाशाभावप्रतियोगित्वानुपपत्तिः एवं च वृत्तिमत्वविशेष-

त्यतिरेव्यन्वयिव्यतिरेकिभेदात् तच्च केवलान्वयिसाध्यकमनुमानं केवलान्वयि तच्च यो धर्मः सर्वत्रैव वर्तते

णानुपादानेपि नञ्तिरित्याहुः । यस्मात्तस्मात् अत्यन्ताभावाप्रतियोगित्वं तत्त्वं ।

संयोगाभावादीनां केवलान्वयित्वोपपत्तये प्रतियोगिवैयधिकरण्यमप्यत्र निवेशनीयं । प्रतियोगिवैयधिकरण्यं चात्र प्रतियोग्यनधिकरणवृत्तित्वं नतु प्रतियोग्यधिकरणावृत्तित्वं तथासति अधिकरणभेदेन अभावभेदे मानाभावात्संयोगाभावस्य संयोगाधिकरणवृत्तित्वाभावेन तादृशाभावान्तराप्रतियोगित्वात्संयोगस्यापि केवलान्वयित्वापत्तेः तथा विवक्षिते तु संयोगानधिकरणवृत्तित्वविशिष्टसंयोगाभावप्रतियोगित्वाभावात्तदनुपपत्तिः इत्थं चाकाशरूपाभावस्य निरुक्तप्रतियोगिवैयधिकरण्याभावेनैवाकाशाभावस्य केवलान्वयित्वोपपत्तेर्वृत्तिमत्त्वमत्यन्ताभावेन देयमानचैवमप्याकाशाभावस्य प्रतियोगिवैयधिकरण्याप्रसिद्धया तादृशाभावान्तराप्रतियोगित्व तदाकाशेऽतिव्याप्तिरिति वाच्यम् यादृशप्रतियोगितावच्छेदकसंबन्धसामान्ये यत्तादृशप्रतियोगिप्रतियोगित्वयादृशाभावाधिकरण्यं तत्त्वाच्चिद्रूपत्वानुयोगिकत्वोभयाभावस्यादृशप्रतियोगितशून्यत्वस्य विवक्षितत्वात् तस्य चाकाशाभावसाधारण्यतया वृत्तिनियामक संयोगादिरूपाधिकरणसंबन्धावच्छिन्नप्रतियोगिताकएवाकाशाभावः केवलान्वयी तथाच वृत्तिनियामकसंयोगी आकाशप्रतियोगिप्रतियोगिकत्वाभावेनोभयाभावसत्त्वात्सोपि प्रतियोगिव्यधिकरण एवेति नातिव्याप्तिः इत्थं च वृत्तिमत्त्वमत्यन्ताभावेन देयमेव आकाशाभावाभावस्याकाशस्य निरुक्तप्रतियोगिवैयधिकरण्याभावेनैवाकाशाभावस्य केवलान्वयित्वोपपत्तिरिति । अन्योन्याभावप्रतियोगितानवच्छेदकत्वे सति वृत्तिमत्त्वं वा तत्त्वमिति दिक् ॥

साध्यं दर्शयति । यदेति । नन्वभिधाविषयत्वमभिधेयत्वम् अभिधाचाक्षाच्छब्दादयमर्थोबोद्धव्य इत्याकारिकेच्छा सा चास्माकीनैव तथाचास्माकीनयावत्तादृशेच्छाविषयतवं वा यत्किञ्चित्तादृशेच्छाविषयत्वं वा तत्त्वं तच्च साध्यं यावदिच्छाविषयत्वस्य क्वाप्यसंभवात् । नाप्यन्त्यः अस्मदीययत्किञ्चिदिच्छाविषयत्वस्य सर्वत्रासत्त्वादत आह । अभिधेयत्वमिति । भगवदिच्छायाः सर्वविषयकत्वेन तद्विषयत्वस्य सर्वत्र सत्त्वादिति भावः । एतदेवो-

सकेवलान्वयी यथा अभिधेयत्वज्ञेयत्वप्रमेयत्वादि अभिधेयत्वं च भगवदिच्छारूपशब्दशक्तिविषयत्वं तच्च सर्वत्रैव वर्तते सर्वस्यैव भगवदिच्छारूपशब्दशक्तिविषयत्वात् वस्तुपदशक्यत्वाच्चैवं ज्ञेयत्वं ज्ञानविषयत्वं तच्च सर्वत्रैवास्ति सर्वस्यैव भगवज्ज्ञानविषयत्वात् एवं प्रमेयत्वं प्रमाविषयत्वं तच्च सर्वत्रैवास्ति सर्वस्यैव भगव-

---

पपादयति । तच्चेति । तादृशशक्तिविषयत्वं चेत्यर्थः । अभिधेयत्वस्य तादृशेच्छारूपशब्दशक्तिरूपत्वे विषयतासंबन्धस्य तुल्यनियामकत्वेन इदमभिधेयमित्याधेयत्वावगाहिप्रतीत्यनुपपत्तेः । तादृशशब्दशक्तिविषयत्वरूपत्वमेव तात्पर्याभिहितमित्याधेयम् । ननु सामान्यतस्तत्पदजन्यत्वप्रकारकतत्तद्बोधविशेष्यकेच्छाविषयत्वमेकः धर्मो नास्त्येव सर्वसाधारणतत्त्वस्याभावात् किंतु यियियघटपदजन्यत्वप्रकारकघटबोधविशेष्यकेच्छाविषयत्वादिकमेव तत्त्वं तच्च न प्रत्येकं केवलान्वयि इत्यत आह । वस्तुपदेति । तथाच वस्तुपदजन्यत्वप्रकारकवस्तुबोधविशेष्यकेच्छाविषयत्वं सर्वसाधारणं संभवत्येवेति नोक्तानुपपत्तिरित्यर्थः । भगवज्ज्ञानविषयत्वादिति । प्रमेयत्वादिसामान्यलक्षणाप्रत्यासत्त्या तत्त्वात्तदादिज्ञानविषयत्वस्यापि केवलान्वयित्वमित्यपि बोध्यम् । अनुमितिं प्रति साध्यसन्देहरूपपक्षतायाः कारणतया केवलान्वयिसाध्यकस्थले साध्यसन्देहाभावेनानुमितिसामग्र्याभावात् नेदमनुमानमिति मीमांसकमतं दर्शयति । अत्रैकेचिदिति । पक्षतायाः हेतुत्वेयुक्तिमाह । यत्रेति । साध्यत्वेनेति । सन्दिग्धसाध्यत्वं पक्षत्वमिति प्राचीनमतेन लक्षणस्य यद्दि सन्देहविषयीभूतसाध्यत्वमर्थः तदातीतानागतसाध्यकानुमितेरुच्छेद इति साध्यप्रकारकसन्देहविषयत्वमेव पक्षत्वमिति भावः । अतः कथमिति । तथाच न पूर्वोक्तोविभागइत्यर्थः । सिषाधयिषेति । अत्र साध्यनिश्चयस्य सिषाधयिषाविरहवैशिष्ट्यमेककालावच्छेदेनैकात्मवृत्तित्वम् अतो विभक्तकालीनपुरुषान्तरीयसिषाधयिषाविरहस्य वेपि न सिषाधयिषाधीनानुमित्यनुपपत्तिः केवलान्वयिनि पक्षतामुपपादयति । साचेति ॥

इहापि । केवलान्वयिसाध्यकस्थलेपि ॥ संशयइत्यनन्तरपक्षतेति शेषः संशय विनेति । धननर्जितेन मेवानुमानस्थले इत्यादिः । यत्र च संशयोस्ति तत्रापि लिङ्गदर्शनस्मारणादिना तत्राभाव तस्यानुमित्यव्यवहि-

त्प्रसाविषयत्वात्। अवश्यकेचित् यत्रसाध्यनिश्चयोस्ति तत्रानुमिते-रनुत्पत्तेः पक्षतानुमितेरङ्गं। सा च साध्यवत्त्वेन सन्दिह्यमानत्वं नच मेयत्वेन संशयो भवितुमर्हति व्यतिरेककोटेः प्रसिद्धेः। अतः कथमिदमनुमानमिति। तन्न। सिषाधयिषाविरह-विशिष्टसाध्यनिश्चयाभावो हि पक्षता सा चेहाप्यस्ति न-तु संशयः संशयं विनाप्यनुमितेरानुभविकत्वात्। साध्य-निश्चये सत्यपि अनुमित्सायां सत्यामनुमितेरुत्पत्तेस्तत्र प-

---

तपूर्वकत्वे सति भावः। ननु साध्यनिश्चयेऽनुमित्यनुत्पत्त्या साध्यनिश्चयाभाव-स्यैव पक्षतात्वमस्तु किं विशिष्टान्तेनेत्यत आह। साध्येति। विशिष्टा-न्तमिति। सिषाधयिषाविरहविशिष्टत्वं साध्यनिश्चयविशेषणमित्यर्थः तथा विविक्षिते तु न दोष इत्याह। तत्रेति। विशेषणाभावप्रयुक्तो विशिष्टाभा-वस्तत्राप्यस्त्येवेति भावः सिषाधयिषाविरहाभावस्य सिषाधयिषाया एव पक्षतात्वे सिषाधयिषाशून्यकाले ऽनुमितिं च साध्यनिश्चयेऽनुमित्यनुत्पत्त्या-विशेषनिवेशेन विशिष्टाभावस्यैव पक्षतात्वमवश्यं नतुपर्वतोहेश्यक व-ह्निविधेयकानुमिति प्रति सिषाधयिषाविरहविशिष्टवह्निप्रकारकपर्वतवि-शेष्यकनिश्चयत्वावच्छिन्नाभावरूपपक्षतायाः हेतुत्वे पाषाणमयो वह्नि-मान्पर्वतस्तेजस्वीत्यादिवह्निप्रकारकपर्वतविशेष्यकनिश्चयसत्त्वे पर्वतोवह्नि-मानित्यनुमित्यनुपपत्तेः। एवं पर्वतो वह्निमानिति सिद्धिसत्त्वे द्रव्यं वह्नि-मत् पर्वतो द्रव्यवानित्यनुमित्यनुदयापत्तिरत आह। मंचे व इति। पर्वतत्वाव-च्छिन्नोहेश्यतानिरूपितवह्नित्वावच्छिन्नविधेयतायाश्चालि संयोगसंसर्गकानुमि-तिं प्रति पर्वतोहेश्यकवह्निविधेयकानुमितिगोचरेच्छाविरहविशिष्टपर्वतत्वा-वच्छिन्नविशेष्यतानिरूपितवह्नित्वावच्छिन्न प्रकारतानिरूपितसंयोगनिष्ठसं-सर्गकविषयतायाश्चालिनिश्चयत्वावच्छिन्नाभावत्वेन हेतुत्वान्नोक्तानुपपत्तिरि-ति भावः। अत्र च घटानुमितीच्छासत्त्वे पर्वतो वह्निमानित्यनुमितिवा-रणायपर्वतोहेश्यकवह्निविधेयकानुमितिगोचरेच्छात्वेनेच्छायाः निवेशः अनुमितिर्जायतामित्याद्यननुगतेच्छानां तु तत्तद्व्यक्तित्वेन पर्वते वह्नि-मनुमिनुयामित्यनुगतेच्छानां तु पर्वतोहेश्यकत्वप्रकारतानिरूपितवह्नित्वि-धेयकत्वप्रकारतानिरूपितसंयोगादिनिष्ठसंसर्गकविषयकत्वप्रकारतानिरू-पितभूमित्वादिप्रकारतकानुमितिगोचरेच्छात्वेनोक्तेजकत्वं बोध्यं नतु सर्वसाधारणपर्वतोहेश्यकवह्निविधेयकानुमितिगोचरेच्छात्वेन तथासति घ

ज्ञतासंपत्तये विशिष्टान्तर्भावच सिषाधयिषासहितसाध्यनिश्च योक्ति नतु तद्विरहसहितइतिसंक्षेपः । असत्प्रतिपक्षः केवलव्य

टानुमितिसामग्रीकत्वे पर्वतो वह्निमानिति सिद्धिसत्वेऽनुमितिर्जायतामितीच्छात्मत्वे वह्न्यनुमित्यापत्तेः । सिद्धप्रतिबध्योभूतघटानुमित्युत्पत्त्यापीच्छायाः विषयसिद्धया इष्टापत्तेरयोगात् । तासां तत्तद्व्यक्तित्वेन उत्तेजकत्वे तु भन्यानुमितिसामग्रीसमवधानकालीनानामेव तथाविधेच्छानामुत्तेजकतया घटानुमितिसामग्रीकालीनायास्तस्या अनुत्तेजकत्वात् । अनुगतेच्छानांतु बाधकाभावात् पूर्वोक्तानुगतरूपेणोत्तेजकत्वमिति । ननु धूमपरामर्शसत्वे पर्वतोवह्निमानिति सिद्धिसत्वे सतांचालोकेन वह्निमनुमिनुयामिति इच्छायां पर्वतो वह्निमानित्यनुमित्यापत्तिरिचेन्न । धूमलिङ्गकानुमितिं प्रति धूमलिङ्गकत्वप्रकारकेच्छाविरहविशिष्टसिध्यभावत्वेन हेतुत्वात् । एवं आलोकादिस्थलेपि । तदुक्तं दीधितिकृता । "लिङ्गविशेषेणापि नियंत्रितं पक्षत्वमिति,, अथ वह्निव्याप्यधूमवान् वह्निव्याप्यालोकवांश्च पर्वत इति समूहालंबनात्मकपरामर्शकाले सिद्धिसत्वे आलोकेन वह्निमनुमिनुयामितीच्छाकाले आलोकलिङ्गकानुमित्युत्पत्त्या तस्याश्च धूमपरामर्शजन्यत्वेन धूमलिङ्गकत्वात् पूर्वं धूमलिङ्गकत्वप्रकारकेच्छाविरहविशिष्टसिध्यभावरूपकारणाभावाद्व्यभिचारइति आलोकलिङ्गकपरामर्शविशिष्टालोकलिङ्गकेच्छाया अपि तदुत्तेजकत्वमावश्यकम् एवं रूपलिङ्गकपरामर्शविशिष्टरूपलिङ्गकेच्छाया अपि एवं च धूमलिङ्गकेच्छाया अपि धूमपरामर्शविशिष्टाया एव लाघवेनोत्तेजकत्वेन एकएवानुमितिपक्षतयोः कार्यकारणभाव इति लिङ्गभेदेन पक्षतायाः कारणत्वे मानाभाव इति चेन्न । स्वाव्यवहितोत्तरक्षणोत्पत्तिकत्वसम्बन्धेन धूमलिङ्गकेच्छाविरहविशिष्टसिद्धिविशिष्टं यत्तदन्यानुमितिं प्रति धूमलिङ्गकेच्छाविरहविशिष्टसिध्यभावस्यहेतुत्वंगमात् । उक्तसमूहालम्बनस्थले च धूमलिङ्गकेच्छाविरहविशिष्टसिद्धिविशिष्टानुमितेरुत्पत्त्याव्यभिचाराभावात् । नचोक्तस्थले धूमलिङ्गकेच्छाविरहविशिष्टसिद्धाभावं विनापि तादृशसामग्रीबलाद् धूमलिङ्गकानुमितिरुत्पन्ना तादृशसामग्रीबलाद् धूमलिङ्गकपरामर्शकाले सिद्धिसत्वेप्यनुमित्यापत्तिरिति वाच्यं धूमलिङ्गकेच्छाविरहविशिष्टसिध्यभावधूमपरामर्शोभयघटितसमूहालम्बनात्मकालोकलिङ्गकेच्छाविरहविशिष्टसिध्यभावप्रा-

तिरेकी तत्त्वं च पक्षातिरिक्ताऽनिश्चितसाध्यसाधनसहचारकत्वं तथाहि पृथिवी इतरेभ्यो भिद्यते पृथिवीत्वात् यन्नेतरेभ्यो भिद्यते तन्न पृथिवी यथा जलं नचेयं पृथिवी तथा तस्मादितरेभ्यो भिद्यत इति व्यक्तिरेकिणमुदाहरंति नच पक्षातिरिक्ते जलादौ साध्यसाधनयोः साहचर्यमस्ति निश्चीयते वा नचानिश्चितसाध्यकत्वमेवसम्यक् घटादौ सा-

---

लोकपरामर्शं भयघटितसामग्र्योरन्यतरस्यैव तत्र नियामकत्वात् अन्यथा तत्तल्लिङ्गकपरामर्शविशिष्टतत्तल्लिङ्गकेच्छानामुत्तेजकत्वे तादृशाभावकूटस्यैकत्र निवेशे तेषां मिथो विशेषणविशेष्यभावे विनिगमनाविरहप्रसङ्गात् । ननु पर्वतादृश्यकवह्निविधेयकानुमितिं प्रति स्वीयव्याप्तिप्रकारतानिरूपितविशेष्यतावच्छेदकीभूतधर्मवल्लिङ्गकत्वप्रकारकत्वस्वसामानाधिकरण्योभयसम्बन्धेन वह्निव्याप्यवत्तानिर्णयविशिष्टा या सिषाधयिषा तद्विरुद्धविशिष्टासिध्यभावत्वेन कारणत्वे एकरूपेणैवेच्छाया उत्तेजकत्वं । ननु लिङ्गभेदेन समूहालम्बनस्थले चालोकलिङ्गकपरामर्शविशिष्टालोकलिङ्गकेच्छाया एव तथात्वेन व्यभिचारानवकाशादिति चेन्न । तथापि अनुमितिर्जायतामित्यननुगतेच्छानामनुगमकरूपाभावेन तत्तदिच्छाभावकूटस्यैव एकत्र निवेशनौयतया तेषां मिथो विशेषणविशेष्यभावे कामचारात् । अवच्छेदकतायां व्यासज्यवृत्तित्वस्यानिरस्तत्वात् । तत्तल्लिङ्गकपरामर्शकालीनतत्तदिच्छाभावं निवेश्य तत्तल्लिङ्गभेदेन पक्षतायाः हेतुत्वमेवोचितमितिदिक् ॥ ॥ ॥

केवलव्यतिरेकिणं लक्षयति । असत्सपक्षइति । सिद्धासिद्धिव्याघातादाह । तत्त्वंचेति । असत्सपक्षत्वं चेत्यर्थः । पक्षातिरिक्ते इति । अनिश्चितसाध्यसाधनसहचारकत्वमिति स्वरूपकीर्त्तनं ननु विवक्षितं तथा निवेशे प्रयोजनाभावात् । किंतु अनिश्चितसाध्यकत्वं तत्त्वं । साध्यसाधनयोः । इतरभेदपृथिवीत्वयोः । ननु साहचर्यासत्त्वेपि भ्रमात्मकतन्निश्चयसत्त्वात् नानिश्चितसाध्यकत्वमत आह । निश्चीयतेवेति । साधनसहचारनिवेशे प्रयोजनाभावेन तदनिवेश्याऽनिश्चितसाध्यकत्वमेव तदस्तु कृतं पक्षतातिरिक्त

धास्येतरभेदस्य प्रत्यक्षतएव निश्चितत्वात्। अन्यथा साध्याप्रसिद्धौ तद्घटितव्याप्तिनिरूपणानापत्तेः। नच घटे साध्यनिश्चये तस्य पक्षत्वमिति वाच्यं। पृथिवीत्वावच्छेदेन साध्यनिश्चयस्यैव तदवच्छेदेन पक्षतताविरोधित्वात्। नचे ६-

---

इति विशेषणेनेतिशङ्कते। नचेति। एवकारेण पक्षातिरिक्त इत्यस्य व्यवच्छेदः। उत्तरयति। घटादाविति। प्रत्यक्षतएवेति। घटो न जलादिरितिप्रतीतेः। नच परमाणुसंसर्गाभाववत् अतीन्द्रियप्रतियोगिकत्वेन कथमितरभेदः प्रत्यक्षः योग्यानुपलब्धिविरहात् स्तंबे पिशाचान्योन्याभावोपि न प्रत्यक्षः किंतु वायुर्वातीतिवत् तस्य लिङ्गग्रहोपक्षीणत्वात् इति वाच्यं। तर्कितं यत्सत्वं अनुपलब्धिविरोधि तदभावस्यैव योग्यत्वात्। नत्वैन्द्रियकप्रतियोगिकभावत्वम्। अन्यथा जलपरमाणौ पृथिवीत्वप्रसक्तेः। इत्थं च पिशाचभेदस्येवेतरभेदस्यापि प्रत्यक्षत्वोपपत्तेः। निश्चितत्वादिति। तदुपादाने च घटस्य पक्षत्वात्तत्र तन्निश्चयेपि पक्षातिरिक्ते निश्चितसाध्यकत्वमस्त्येवेति भावः। पक्षतावच्छेदकावच्छिन्नातिरिक्तत्वं बोध्यं। नातो घटादेरपि यत्किञ्चित्पक्षातिरिक्तत्वादुक्तदोषः। अन्यथेति। घटादावितरभेदानिश्चयेइत्यर्थः। तद्घटितेति। साध्यघटितेत्यर्थः। विशिष्टबुद्धिं प्रति विशेषणज्ञानस्य हेतुतया साध्यज्ञानं विना साध्यघटितव्याप्तिज्ञानासम्भवादितिभावः। साध्यनिश्चये। इतरभेदत्वनिश्चये। तस्य। घटस्य। पक्षत्वमिति। सिध्यभाववत्त्वादिरूपंपक्षत्वमित्यर्थः घटे इतरभेदनिश्चयेनेतरभेदनिश्चयाभावरूपपक्षत्वाभावात् कथं पृथिवीसामान्यस्य पक्षत्वमिति भावः। पृथिवीत्वेति। पक्षतावच्छेदकावच्छेदेन अनुमितौ पक्षतावच्छेदकावच्छेदेन साध्यसिद्धेरेव प्रतिबन्धकतया प्रकृते पृथिवित्वसामानाधिकरण्येन घटादावितरभेदनिश्चयोपि पृथिवीत्वावच्छेदेनानुमितौ न क्षतिरिति भावः। नचैवमंशतः सिद्धसाधनस्य दूषकत्वविलोपप्रसंगइति वाच्यं। पक्षतावच्छेदकैक्ये तद्दूषकत्वस्येष्टत्वात्। पक्षतावच्छेदकनानात्वे एव तद्दूषकत्वाङ्गीकारात्। यथा वाह्यनित्ये ऽनित्ये मूर्त्तत्वादित्यत्राप्रसिद्धावागमिति बुद्धेरिष्टापत्तेः सिद्धसाधनोभयधर्मा-

सौस्ति सर्वत्र पृथिव्यां तन्निश्चयाभावात् अत्रच व्यतिरेक-
योः सहचारात् उक्तव्याप्तिर्गृह्यतइति प्राञ्चः। साध्याभाव
हेत्वभावयो र्व्याप्तिग्रहादनुमितिः नचान्यव्याप्तिग्रहात् कथ-

वच्छेदेनानित्यत्वानुमितिरिति । तदवच्छेदेन । पृथिवीत्वावच्छेदेन । पक्षतेति । इतरभेदनिश्चयाभावरूपपक्षताविरोधित्वादित्यर्थः । विरोधित्वं च सहानवस्थानरूपं बोध्यम् । इह । घटे । सः । पृथिवीत्वावच्छेदेन इतरभेदनिश्चयः। सर्वत्रेति । परमाण्वादिरूपपृथिव्या मित्यर्थः । तन्निश्चयेति इतरभेदनिश्चयाभावादित्यर्थः । परमाण्वादेरयोग्यतया प्रत्यक्षेण तत्र तस्य निश्चेतुमशक्यत्वात् । तथा च पृथिवीत्वसामानाधिकरण्येन निश्चयसत्त्वेपि अवच्छेदकावच्छेदेन निश्चयाभावसत्त्वात् घटादेः पक्षत्वमव्याहतमेवेति भावः । इदं च घटादौ पृथिवीत्वेनेतरभेदनिश्चयमभिप्रेत्य । वस्तुतस्तु घटत्वेनैव तत्रेतरभेदनिश्चयेन पृथिवीत्वेन तदनिश्चयात् पृथिवीत्वधर्मितावच्छेदकानुमित्युत्पत्तौ बाधकाभावः तद्धर्मधर्मितावच्छेदकानुमितौ तद्धर्मधर्मितावच्छेदकसिद्धेरेव प्रतिबन्धकत्वादिति ध्येयम् । अत्रेति । व्यतिरेकयोः । साध्याभावहेत्वभावयोः । सहचारात् । उक्तेति । अन्वयव्याप्तिर्गृह्यतइत्यर्थः । लाघवेनानुमितिसामान्येऽन्वयव्याप्तिज्ञानस्यैव हेतुत्वादिति भावः । नचैवमितरव्यापकीभूताभावप्रतियोगिपृथिवीत्ववतो पृथिवीति परामर्शात् इतरभेदज्ञानशून्यकाले पृथिव्यामितरभेद इति इतरभेदविशेष्यकानुमितेरुच्छेदः । एवं सतीतरभेदज्ञानसत्त्वे तादृशपरामर्शात् पृथिवी इतरभेदवतीत्यनुमितेरप्युदयप्रसङ्ग इति वाच्यम् । अन्वयव्याप्तिज्ञानस्यैवानुमितिहेतुत्वादिनामाचार्याणां तदनुत्पादे इष्टापत्तेः । प्राञ्चइत्यनेनाऽस्वरसः सूचितः स च विशेषणज्ञानविधया सहचारज्ञानस्यान्वयव्याप्तिग्रहे हेतुतया साध्याभावहेत्वभावयोः सामानाधिकरण्यस्यान्वयव्याप्यघटकतया विशेषणत्वाभावेन तज्ज्ञानस्य कथं तादृशव्याप्तिग्रहे हेतुत्वमिति । नच व्यभिचारज्ञानविरोधिसहचारज्ञानत्वेनोभयसहचारज्ञानयोरपि हेतुत्वमिति वाच्यं । व्याप्याभावगाहितया व्यतिरेकसहचारज्ञानस्य व्यभिचारज्ञानविरोधित्वभा

वात् । अत्र केचित् प्राचीनमतेऽन्वयव्याप्तिज्ञाने विभिन्नधर्मैकत्वेऽपि व्यतिरेकसहचारज्ञानस्यान्वयव्यतिरेकाभ्यां यथा हेतुत्वं अन्वयव्याप्तिज्ञानमेव चानुमितिसामान्ये हेतुरिति उपेयते तथा अन्वयसहचारज्ञानं व्यतिरेकव्याप्तिज्ञाने हेतुः तज्ज्ञानमेव चानुमितिसामान्ये हेतुरित्युच्यतां विनिगमकाभावात् । नचैवमन्वयव्याप्त्यवगाहिन्यक्रिया व्यधूमवत्तापरामर्शादनुमितेरनुदयापत्तिरिति वाच्यं । भवतामितरभेदाभावव्यापकीभूता भावप्रतियोगिपृथिवीत्ववती पृथिवीति व्यतिरेकव्याप्त्यवगाहिपरामर्शादनुमितेरुदये इष्टापत्तिरिव ममापि तत्र तदनुत्पादस्येष्टत्वादिति । तत्र । अन्वयव्याप्तिज्ञानस्य हेतुत्वे लाघवस्यैव विनिगमकत्वात् । तथाहि व्यतिरेकयोर्व्याप्तिरभावनिष्ठा धूमे तद्वत्ता च स्वाश्रयव्यापकीभूताभावप्रतियोगित्वसम्बन्धेन स्वनिरूपकाभावप्रतियोगित्वसम्बन्धेन वा । तथा चेदृशगुरुतरसम्बन्धेन व्याप्तिविशिष्टधूमवत्ताऽवगाहिपरामर्शत्वेन हेतुत्वे गौरव । सामानाधिकरण्यादिरूपान्वयव्याप्तिज्ञानस्यानुमिति । हेतुत्वे स्वरूपसम्बन्धेन वह्निनिरूपितव्याप्तिविशिष्टहेतुमत्तानिश्चयस्यैव तत्त्वमिति लाघवं । किञ्चैवं साध्याभावाप्रसिद्धा व्यतिरेकव्याप्तिज्ञानासम्भवेन केवलान्वय्यनुमानमात्रोच्छेदप्रसङ्ग इति दिक् ॥

अन्वयव्याप्तिज्ञानमिव व्यतिरेकव्याप्तिज्ञानमप्यनुमितिहेतुः । नच केवलान्वय्यनुमित्यनुरोधेन आद्यस्यैव हेतुभावेनान्वयव्याप्तिज्ञानेनैवोपपत्तौ तस्य पृथक्कारणत्वकल्पने गौरवमिति वाच्यम् । इतरभेदज्ञानशून्यकाले इतरव्यापकीभूताभावप्रतियोगिपृथिवीत्ववती पृथिवीत्यादिपरामर्शादितरभेदविशेषणकानुमितेः स्वातन्त्र्येण इतरभेदज्ञानसत्वे तादृशपरामर्शात् इतरभेदविशेषणकानुमितेरापत्त्यापत्तिप्रसङ्गेन तद्धेतुत्वस्य न्याय्यत्वात् । प्रामाणिकगौरवस्यादोषत्वात् । नचैवं परस्परव्यतिरेकेऽपि परस्परेण कार्यैक्यादनात्, परस्परजन्यानुमितौ तयोर्व्यभिचार इति वाच्यं । भवन्मते ऽन्वयसहचारज्ञानव्यतिरेकसहचारज्ञानयोरन्वयव्याप्तिज्ञानहेतुत्वे तत्र व्यभिचारवारणायाव्यवहितोत्तरत्वनिवेश इव मन्मतेऽपि परस्परजन्यानुमितौ व्यभिचारवारणायाव्यवहितोत्तरत्वस्य निवेशनीयत्वादिति । अन्वयव्यतिरेकाभ्यामुभयविधव्याप्तिज्ञानस्यानुमितिहेतुत्वमिति मणिकारतमा-

मन्यानुमितिरतिप्रसङ्गादिति वाच्यं । साध्याभाववद्व्यापकाभाव-प्रतियोगित्वेन पक्षधर्मतानिश्चयः साध्यानुमापकत्वमभ्युपगमात् इत्यन्ये उभयान्योऽन्वयव्यतिरेकी यथाप्रसिद्धानुमानमिति संक्षेपः ॥ एवं हेताभिहिते तदाभासानिरूप्यंते । तच

दर्शयति । साध्याभावेत्यादिना । अनुमितिः । साध्यविधेयानुमितिः । ननु हेत्वाभावनिरूपितसाध्याभावनिष्ठव्याप्त्यज्ञानं हेत्वभावविधेयकानुमितिं जनयतु नतु साध्यविधेयकानुमितिम् । अनुमितौ व्यापकतावच्छेदकरूपेणैव व्यापकस्य भानाभावनियमात् । अन्यथा वह्निव्याप्तिज्ञानाद् घटानुमित्यापत्तिरित्याशङ्कते । नचेति । अन्यव्याप्तिग्रहात् । अन्यनिरूपितव्याप्तिज्ञानात् । हेत्वभावनिरूपितव्याप्तिज्ञानादिति यावत् । अन्यानुमितिः । साध्यविधेयकानुमितिः । नन्वन्यव्याप्तिज्ञानस्यान्यविधेयकानुमितिजनकत्वे बाधकाभाव इत्याह । अतिप्रसङ्गादिति । घटनिरूपितव्याप्तिज्ञानात् पटविधेयकानुमितिप्रसङ्गादिति भावः । पक्षधर्मतेति । स्वाश्रयव्यापकीभूताभावप्रतियोगित्वसम्बन्धेन साध्याभावनिष्ठव्याप्तिविशिष्टहेतुमत्ताव-गाहिनिश्चयइत्यर्थः । साध्यानुमापकइति । साध्यविधेयकानुमितिविशेषे हेतुरित्यर्थः । व्यतिरेकव्याप्त्यवगाहिपरामर्शाव्यवहितोत्तरानुमितिजनकइतियावत् । व्यापकतावच्छेदकरूपेण व्यापकस्य भानमितिनियमस्तु अन्वयव्याप्त्यवगाहिपरामर्शाव्यवहितोत्तरजन्यानुमितिस्थले एवेति द्रष्टव्यं । ननु घटादावितरभेदस्य निश्चितत्वेन पृथ्वी इतरेभ्यो भिद्यते पृथिवीत्वाद् घटवदित्यन्वयस्थलेवास्तु नतु व्यतिरेकीतिनिश्चितसाध्यत्वमेव दृष्टान्तत्वे प्रयोजकं नतु पक्षान्यत्वमिति चेन्न । अन्वयसहचाराऽग्रहदशायां व्यतिरेकसहचारेणैव व्याप्तिग्रहोदयात् । तदुक्तमाचार्यैः "अस्तु तावदयं सुहृदुपदेशः केवलव्यतिरेकिलक्षणं तावल्लिङ्गमिति" । अन्वयव्यतिरेकिणंलक्षयति । उभयान्यइति । केवलान्वयि केवलव्यतिरेक्यन्यइत्यर्थः । प्रसिद्धानुमानमिति । वह्निमान्धूमादित्यादावित्यर्थः । केचित्तु । अन्वयसहचारमात्रगृहीतव्याप्तिकत्वं केवलान्वयित्वं व्यतिरेकसहचारमात्रगृहीतव्याप्तिकत्वं केवलव्यतिरेकित्वम् । उभयसहचारगृहीतव्याप्तिकत्वम् अन्वयव्यतिरेकित्वं । दशाविशेषे धूमस्यापि केवलान्वयित्वव्यवहारेकव्यतिरेकि-

सव्यभिचारविरुद्धसत्प्रतिपक्षासिद्धबाधिताः पञ्च हेत्वाभासाः।

त्वे दृष्टे एव। नचैवं विभागव्याघातः उपधेयसंकरेपि उपाधेरसंकरादिति अतएवाह-संक्षेप इतीत्याहुः। नन्विदं न्यायमालिङ्ग्यानुमानत्ववादिनये उपपद्यते नतु लिङ्गज्ञानस्यानुमानत्ववादिनये अतएवानुपदमेव एवं हेतावभिहितेइति वक्ष्यतीति चेन्न। नचानुमानं त्रिविधमित्यस्य अनुमितिजनके लिङ्गज्ञानविषयीभूतं लिङ्गं त्रिविधमित्यर्थः। नचानुमितिकरणस्यैव विभागौचित्यात् लिङ्गस्य त्रिविधत्वोक्तिर्न समञ्जसमिति वाच्यं। केवलान्वयिसाध्यकानुमितिजनकत्वकेवलव्यतिरेकिसाध्यकानुमितिजनकत्वअन्वयव्यतिरेक्युभयसाध्यकानुमितिजनकत्वभेदेन लिङ्गज्ञानस्यापि त्रिविधत्वेन लिङ्गस्यापि त्रिविधत्वसम्भवात् वस्तुतो लिङ्गज्ञानस्यैव त्रिविधत्वं लिङ्गस्य तुतद्विषयत्वेन तत्वं। केवलान्वयिसाध्यकानुमानमित्यस्य केवलान्वयिसाध्यकानुमितिजनकज्ञानविषयइत्यर्थः। एवं पक्षातिरिक्तेऽनिश्चितसाध्यकत्वमित्यस्य पक्षातिरिक्ते अनिश्चितसाध्यविधेयकानुमितिजनकविषयइत्यर्थः। उभयान्यइत्यस्य च केवलान्वयिकेवलव्यतिरेकिसाध्याभिन्नसाध्यविधेयकानुमितिजनकज्ञानविषयइत्यर्थः। एवं हेतावभिहिते इत्यस्य तादृग्ज्ञानविषयीभूते हेतावभिहिते इत्यर्थः इति नाग्रङ्गापङ्ककलङ्कलेशोपीति। तत्त्वनिर्णयविजयरूपैककार्यकारित्वात् प्रसङ्गाच्च हेत्वाभासानिरूपयति। एवमिति। तदाभासाः। हेत्वाभासाः। हेतुवदाभासंते इति हेत्वाभासा इति योगादृष्टो धर्म्येव हेत्वाभासपदवाच्य इति धीयम्। अनुमितितत्कारणान्यतरप्रतिबन्धकयथार्थज्ञानविषयत्वं हेत्वाभासत्वं बाधतदभावव्याप्यत्वात्तज्ज्ञानादीनां साक्षादेवानुमितिप्रतिबन्धकत्वात् बाधसत्प्रतिपक्षयोर्लक्षणसमन्वयः व्यभिचारज्ञानादीनामनुमितिकरणव्याप्तिज्ञानादिप्रतिबन्धकत्वेन तद्विषयत्वेन व्यभिचारादेर्हेत्वाभासत्वोपपत्तेः। अतएव व्यभिचारादिसङ्ग्रहाय अनुमितिप्रतिबन्धकेति विहायानुमितितत्कारणान्यतरेत्युक्तं। नच तद्धेतोरेव तदस्तु तत्र हेतुत्वं किं तेनेति न्यायेन व्यभिचारज्ञानस्यानुमितिप्रतिबन्धकत्वमेवास्तामिति वाच्यं। धूमपरामर्शकाले आलोके वह्निव्यभिचारीति व्यभिचारज्ञानकाले अनुमित्यनुदयप्रसङ्गात्। नच तद्धर्मावच्छिन्नलिङ्गकानुमितौ तद्धर्मावच्छिन्नविशेष्यकव्यभिचारज्ञानस्यैव प्रतिबन्धकत्वमिति वाच्यं। गौरवात्। साक्षादविरोधिनो ज्ञानस्य तत् जनकज्ञानविघटकं वनैव विरोधित्वाच्च।

सव्यभिचारस्त्रिविधः । साधारणासाधारणानुपसंहारभेदात् तत्र साधारणत्वं साध्यवदन्यवृत्तित्वं । यथा धूमवान्वह्नेरित्यत्र धूमवदन्यस्मिन् तप्तायः पिण्डेवह्निसत्त्वात् । साध्यसमा-

---

नचैवं धूमो वह्निव्याप्य इति ज्ञानकाले ।भवेन्द्रियादिजन्यव्याभिचारज्ञानकालेप्यनुमित्युदयापत्तिरिति वाच्यम् इष्टत्वात् । तदुक्तं । "करणे पूर्णे किं असिद्धेरिति" । व्याभिचाराभ्रममादायातिप्रसङ्गभङ्गाय ग्रन्थार्थेति । विभजते । तत्रेति। तत्र त्रिविधव्याभिचारे निरूपणीये । साधारवदन्येति । साध्याभाववद्वृत्तित्वमिति लब्धे धूमाभाववदयोगोलकवृत्तित्वेन धूमवान् वह्नेरित्यादौ लक्षणसत्त्वेपि कपिसंयोगी एतद्वृक्षत्वादित्यत्र कपिसंयोगाभाववद्वृत्तित्वादेतद्वृक्षत्वस्यापि तत्वापत्तिः । प्रतियोगिवैयधिकरण्यादिनिवेशेचातिगौरवमिति तत्परित्यागः । अन्योन्याभावस्य च व्याप्यवृत्तित्वात्तद्दोषः । नच कपिसंयोगौघटोभयभेदवारणाय प्रतियोगिवैयधिकरण्यनिवेश आवश्यक इति वाच्यम् । साधारतावच्छेदकावच्छिन्नसाधारत्वावच्छिन्नप्रतियोगिताकभेदवत् वृत्तित्वस्य विवक्षणात् । नहि कपिसंयोगनिष्ठप्रत्यक्षतानिरूपितकपिसंयोगत्वावच्छिन्नकपिसंयोगवदन्यत्वस्यैतद्वृक्षेसत्त्वमिति । यदि चान्योन्याभावस्याप्याव्याप्यवृत्तित्वं विभाव्यते तथापि प्रतियोग्यवृत्तित्वस्यैव लाघवेन निवेशनीयत्वात् । प्रतियोगिवैयधिकरण्यापेक्षया लाघवस्य अति स्फुटत्वात् । नच द्रव्यं गुणकर्मान्यत्वविशिष्टसत्तानतिरिक्तत्वेन सत्तायाः द्रव्याभिन्नगुणादिवृत्तित्वादतिप्रसङ्ग इति वाच्यं । साध्यवदन्यनिष्ठाधिकरणतानिरूपकतावच्छेदकहेतुतावच्छेदकावच्छिन्नत्वस्य तदर्थत्वात् । लक्ष्ये लक्षणमोजयति । यद्येत्यादिना । यद्यन्योन्याभावोप्याव्याप्यवृत्तिः तदा कपिसंयोगी एतद्वृक्षत्वादित्यत्रातिव्याप्तिः प्रतियोग्यवृत्तित्वनिवेशेत्योचगरवमित आह । साध्यसमानाधिकरणसामानाधिकरण्येति । साध्याधिकरणावृत्तित्वमत्र साध्यासामानाधिकरण्यं नतु साध्यानधिकरणवृत्तित्वमन्यथा वह्न्यधिकरणवृत्तिद्रव्यत्वादिसामानाधिकरण्यस्य धूमेसत्त्वेन वह्निमान्धूमादित्या दौप्रतिप्रसंगापत्तेः । अत्र च साध्याधिकरणेवृत्तित्वं येनसंबंधेनतेन संबंधेन तदधिकरणत्वं, विशेषणतावच्छेदकविशेषणयावृत्तित्वं तदधिकरणत्वं वा बोध्यम् । एतेनयत्किंचित्संबंधेन वृत्तित्वोक्तौतु-

नाधिकरणसमानाधिकरणत्वं वा । भवति हि धूमासमानाधिकरणं यत्धूमवदन्यत्वं तत्समानाधिकरणोवह्निः । साध्यव्यापकीभूताभाव प्रतियोगित्वम् असाधारणत्वम् । इदमेव सपक्षव्यावृत्तत्वं गायंति । उदाहरणं तु शब्दो नित्यः शब्दत्वादिति शब्दत्वहिनित्यत्वव्यापकोयः शब्दत्वाभावः तत्प्रतियोगि । नचाऽनित्यः शब्दः शब्दत्वादित्यत्राव्याप्तिः । तस्य सपक्षेवृत्तेत्वात् एतत्तज्ज्ञानं चानुमिति

संयोगादिना वृत्तिपर्वतत्वसामानाधिकरण्यमादाय धूमादावतिव्याप्तिः । संबंधसामान्ये नावृत्तित्वोक्तौ धूमवदन्यत्वादेरपि कालिकसंबन्धेन धूमवृत्तितयातद्वृत्तिर्गगनादिरेव तत्सामानाधिकरण्यस्य च वक्ष्यमाणस्य संभवात् असंभवापत्तेरिति परास्तं तत्समानाधिकरण्यं चतदधिकरणे हेतुतावच्छेदकसंबंधेन संबंधित्वं नातः कालिकादिसंबंधमादाय धूमादावतिव्याप्तिः । यद्यप्यसाधारणादिसाधारणमेतत्तथापि उपधेयसंकरेप्युपाधेरसंकरात् इतिन्यायेन तत्साधारण्येपिवृत्तितिविरहः । असाधारणत्वाद्यज्ञानेपि एतज्ज्ञानेनानुमितिप्रतिबन्धादिति सपक्षवि यच्चपावृत्तत्वमसाधारणत्वं । निश्चितसाध्यवद्वृत्तित्वे सतिनिश्चितसाधाभाववद्व्यावृत्तत्वमिति यावत् यथाशब्दो नित्यः शब्दत्वादित्यादौ सर्वेभ्यो नित्येभ्योऽनित्येभ्यश्शब्दत्वस्यव्यावृत्तत्वलक्षणसमन्वयः । नचशब्दोऽ नित्यः शब्दत्वादिति सहेतौशब्देऽनित्यत्वानिश्चयदशायांनिश्चितसाध्यवद्व्यावृत्तत्वादसाधारण्यापत्तिः । इष्टत्वात् । असाधारणसत्प्रतिपक्षयोरनित्यदोषत्ववादिनां प्राचां मतेनैतल्लक्षणादिति तन्मतं दूषयितुं स्वयं लक्षणमाह । साधेति । ननु सपक्षव्यावृत्तत्वमसाधारणत्वमित्यस्य कागतिरित्यत आह । इदमेवेति । पूर्वनिरुक्तार्थकमेव नतु निश्चितसाधाववद्व्यावृत्तत्वं तत् येन शब्दोनित्य शब्दत्वादित्यस्य संग्रहः स्यादिति ।

अग्निरिति । अनित्ये शब्दे शब्दत्वस्यसत्वेनाऽनित्यत्ववद्व्यापकाभावप्रतियोगित्वस्य शब्दत्वेऽसत्त्वादिति भावः । सहेतुत्वादिति । ननु असाधारणसत्प्रतिपक्षयो रनित्यदोषत्वावादिप्राचीनमते सहेतावपि तत् सम्भव इति चेन्न । बाधभ्रमेणानुमितिप्रतिबन्धाद्बाधस्यापि अनित्यदोषतापत्तेः । यदि च

साध्याभावप्रतिबन्धकं । व्यतिरेकिसत्प्रतिपक्षरूपत्वात् । न-चैवं सत्प्रतिपक्षत्वमिति वाच्यम् । हेतुभेदएव तस्याङ्गी-कारात् । कथमस्य व्यतिरेकिसत्प्रतिपक्षरूपतेति चेदाकाङ्क्षा-य शब्दत्वं तु नान्वयहेतुः क्वचिदपिशब्दे नित्यत्वस्याऽदृ-ष्टेः किन्तु व्यतिरेकि । तथाचानित्यत्वाभावव्यापको यः शब्दत्वाभावस्तत्प्रतिगितया यथा साध्यं साधयेत् । तथा नित्यत्वव्यापकीभूताभावप्रतियोगितया साध्याभावमपि सा-धयेत् । नच द्वयोर्विरुद्धयोरेकत्र निर्णयः । किन्तु पर-स्परप्रतिबन्धकत्वात् द्वयोरनिर्णयइति ध्येयम् । अदृष्टिसा-

---

बाधबुधया प्रतिबन्धज्ञानमिति: तत्र हेतुस्तु न दुष्ट इति विभावयते तदा प्र-कृतेप्यसाधारणसत्प्रतिपक्षस्थले तदभाववद्व्याप्यवत्ताज्ञानेनानुमितिप्रतिब-न्धसंभवेन तु तत्र हेतुरपि दुष्ट इति तुल्यत्वादिति भावः । एतज्ज्ञानम् । असाधारणत्वज्ञानं । साक्षात् । व्याप्यभाववद्व्याप्यावगाहित्वात् । व्यतिरे-कीति । व्यतिरेकव्याप्तिमत्सत्प्रतिपक्षरूपत्वात् । तथाच तदभाववद्व्याप्यव-त्ताज्ञानमुद्दश्या अनुमिति विरोधित्वमिति भावः । ननु साधाबाध्याप्यव-त्ताज्ञानं साध्याभाववद्व्याप्यवत्ताज्ञानंचाच संवृत्तमिति कृतप्रतिपक्षभेदप्र-सङ्गइत्यत आह । नचैवमिति । एवं । सत्प्रतिपक्षरूपत्वे । सत्प्रतिपक्षत्व-मिति । तथाचैतस्य तदन्तर्गततत्वेन सव्यभिचारस्त्रिविधइतिविभागबाधा-दिति भावः । हेतिवति । साधाबाध्याप्यहेतुसाधाभाववद्व्याप्यहेत्वोर्भेद-एव सत्प्रतिपक्षत्वं । यथा ह्रदो वह्निमान्धूमात् ह्रदो वह्न्याभाववान् ह्रदत्वादित्यादौ प्रकृते चैकस्य शब्दत्वस्योभयसाधकत्वेन न तस्योभय लिङ्गकत्वघटि तसत्प्रतिपक्षत्वमिति भावः । अदृष्टेरिति । तथाच साधा-साधनयोः सहचाराऽग्रहेणान्वयव्याप्त्यग्रहान्वयित्वमितिभावः । त-थाचेति । नित्यत्वाभाववद्व्यापकीभूताभावप्रतियोगित्वरूपव्यतिरेकव्या-प्यवगाहित्वेनित्यत्वव्याप्यशब्दत्ववत्तापरामर्शात् साध्यमिवानित्यत्वाभाव: नि-त्यत्व तथाचानित्यत्ववद्व्यापकीभूताभावप्रतियोगित्वरूपव्यतिरेकव्याप्यवगा-ह्यनित्यत्वव्याप्यशब्दत्ववत्तापरामर्शात् साधाभावोपि साधनीय: नच यि कृद्वोभयसाधनं संभवतीति परस्परानुमितिप्रतिबन्धएव फल्लकित्याखण्ड-

व्यधिकरणत्वं अवृत्तिसाध्यकत्वं वा अनुपसंहारित्वं

कार्यः । विरुद्धयोः । साधनसाध्याभावयोः । अनिर्णयदृष्टि । अनुत्पत्तिरित्यर्थः । अनिर्णयदृष्टानेन सत्प्रतिपक्षस्थले संशयात्मकानुमितिवादी-कर्तृरत्नकोशकारमतमादर्शितं । तदभावव्याप्यवत्ताज्ञानस्य तत्प्रकारकविशिष्टबुद्धिसामान्ये विरोधितया सत्प्रतिपक्षस्थले न संशयाकारानुमितिः किंतु परस्परानुमितिप्रतिबन्धएवेति सिद्धान्तिमतं तन्न प्रत्यक्षस्थले तदभाववद्व्याप्यवत्ताज्ञानस्य प्रतिबन्धकत्वे व्यनुमितौ तत्प्रतिबन्धकत्वाकल्पनेन संशयानुमितौ बाधकाभावः संशयत्वस्यार्थसमाजयस्तत्वेपि साध्यतदभाववद्व्याप्यवत्तापरामर्शाभ्यां साध्यतदभावानुमितौ जायमानायां फलतः संशयानुमितेरुपपत्तेः प्रत्यक्षस्थले तदभाववद्व्याप्यवत्ताज्ञानस्य प्रतिबन्धकत्वे कल्पनीये प्रत्यक्षत्वमनिवेश्य तत्प्रकारकबुद्धित्वमेव तत्प्रतिबध्यतावच्छेदकं तच्चानुमितिसाधारणमिति कथमनुमित्यनुत्पत्तिरितितु नाशङ्कनीयम् । इच्छाया उत्तेजकत्वानुरोधेन विशिष्यैव अनाहार्यत्वत्वत्वं निवेश्य प्रतिबध्यप्रतिबन्धकभावस्यावश्यकत्वात् । नचैवं प्रत्यक्षस्थले इच्छाया अनुत्तेजकत्वात्तत्रैव प्रत्यक्षान्यज्ञानत्वं तत्प्रतिबध्यतावच्छेदकं तच्चानुमितिसाधारणमिति वाच्यं । प्रत्यक्षान्यत्वज्ञानत्वयोर्मिथो विशेषणविशेष्यभावे विनिगमनाविरहेण तदपेक्ष्य ग्राह्यत्वस्य तत्प्रतिबध्यतावच्छेदकत्वात् । परोक्षत्वजातेरनुभवत्वेन संकरात् न तस्यापि तत्वमित्यनुमितौ तत्प्रतिबन्धकत्वस्यावश्यकतया संशयानुमितौ नकिञ्चिद्बाधकमित्याहुः । तदभाववद्व्याप्यवत्ताज्ञानविशिष्टान्यज्ञानत्वावच्छिन्नं प्रति तदभाववद्व्याप्यवत्ताज्ञानस्य प्रतिबन्धकत्वम् इच्छाविशिष्टत्वावच्छिन्नं प्रति इच्छात्वेन हेतुत्वमित्याहार्यानुमितेरनङ्गीकारेण तदभाववद्व्याप्यवत्ताज्ञानस्यैवेच्छावलात् । नापि तदभाववद्व्याप्यवत्ताज्ञानाभावरूपकारणबलात् संशयानुमित्युत्पत्तिरितिदिक् ।

लाघवादाह । अवृत्तिसाध्यकत्वमिति । नचैवं धूमवानाकाशादित्यादेरसङ्गतिरितिवाच्यं । स्वरूपासिद्धावेव तन्निवेशात् । केचित्तु । केवलान्वयिधर्मावच्छिन्नपक्षकत्वमनुपसंहारित्वम् उदाहरणं च सर्वमनित्यं प्रमेयत्वादित्यादौ वृत्तिरेकव्याप्तिग्रहप्रतिबन्धश्च दूषकतावच्छेदकमित्याहुः । साध्येति । साध्यतावच्छेदकसंबन्धेन साध्याधिकरणे हेतुतावच्छेदकसंबन्धेनावृत्तित्वमित्यर्थः । तेन समवायेन वह्निः साध्यतायां संयोगेन धूमहेतौ संयोगे

यथा अवमाकाशवान् धूमादित्यादौ । साध्याऽसमानाधिकरणत्वं विरुद्धत्वं यथा गौरश्वत्वादिति । यद्यप्यसाधारणत्वमप्यस्ति साधारणत्वं च । तथाप्युपाधिभेदाद्भेदः । पक्षे साध्यधीप्रतिबन्धकपरामर्शः सत्प्रतिपक्षः यथा जलमुष्णं स्पर्शवत्वादित्यादौ नेदमुष्णमतेजस्त्वादित्यादि अ

नवच्छाधिकरणवृत्तित्वेपि गोत्वाधिकरणे अश्वत्वस्य कालिकादिसंबन्धेन वृत्तित्वेपि न क्षतिः । साध्यतावच्छेदकावच्छिन्नाधिकरणनिष्ठाधिकरणतानिरूपकतावच्छेदकावच्छिन्नत्वमिति निष्कर्षः । तेन. गुणकर्मान्यत्वविशिष्टसत्तावान् गुणत्वात् गुणे गुणकर्मान्यत्वविशिष्टसत्त्वादित्यादौ यथायथं नाव्याप्तिः । उपाधीति । असाधारणत्वविरुद्धत्वाद्युपाधीनांभेदादित्यर्थः । विरुद्धत्वज्ञाने ऽसाधारणत्वाद्यज्ञानेप्यनुमितिप्रतिबन्धादिति भावः । सत्प्रतिपक्षः साध्यज्ञानविरोधी परामर्शः तद्वांश्च हेतुः सत्प्रतिपक्षित इति योगार्थमभिप्रेत्याह । पक्षइति । अत्र साध्यधीप्रतिबन्धकं परामर्शः सत्प्रतिपक्ष इत्येतावतैव सामंजस्ये पक्ष इति संपातायातमिति कश्चित् । तन्न । पक्षविशेष्यकसाध्याभाववत्ताप्रकारकज्ञानस्यान्यविशेष्यकसाध्यवत्ताज्ञानविरोधितया पक्षविशेष्यकत्वलाभाय तत्पदस्यावश्यकत्वात् । इदं च सत्प्रतिपक्षस्यानित्यदोषत्वाङ्गीकर्तृप्राचीनमते लक्षणं बोध्यं । बाधभ्रमादनुमितिप्रतिबन्धाद्बाधस्याप्यनित्यदोषतापत्तेः सत्प्रतीनाभासत्वमिति सत्प्रतिपक्षस्य नानित्यदोषत्वमिति । स्वमते तु पक्षे साध्याभाववत्ताप्यहेतुत्वं सत्प्रतिपक्षत्वम् अतएव उभयमतसाधारण्याय सद्धेतुरेव यथा जलमित्यादिनोदाहृतवान् । नेदमुष्णमिति । उष्णत्वाभाववत्ताप्यत्तेजस्त्ववदिदमिति ज्ञानमुष्णत्वरूपसाध्यज्ञानप्रतिबन्धकमिति भावः । सत्प्रतिपक्षफलं तु परस्परप्रतिबन्धेन परस्परानुमितिप्रतिबन्ध एव । तथाहि पर्वतो वह्निमान् धूमात् पर्वतो वह्न्यभाववान् पाषाणमयत्वादित्यादौ वह्निव्याप्यवत्तापरामर्शत्वात्र वह्न्यभावानुमितिः वह्न्यभाववद्व्याप्यवत्तापरामर्शत्वाच्च वह्न्यनुमितेरनुत्पत्तिः । तद्विशिष्टबुद्धित्वावच्छिन्नं प्रति तदभाववद्व्याप्यवत्ताज्ञानस्य प्रतिबन्धकत्वादिति । निबन्धकृतस्तु प्रकृतसाध्यसाधकहेत्वोः किंतत्त्वमितिजिज्ञासैव सत्प्रतिपक्षफलम् । अतएव प्रकृतसाध्यसाधकहेत्वोः किं तत्त्वमिति जिज्ञासाजनिका व्याप्तिप्रका

सिद्धिस्तु व्यभिचाराद्यन्यपरामर्शप्रतिबन्धकतावच्छेदक-

रकपक्षधर्मत्वोपस्थितिः; प्रकरणसम इति तल्लक्षणमपीत्याहुः ॥ रत्नकोशकारस्तु । तत्प्रकारकप्रत्यक्षे तदभाववाप्यवत्ताज्ञानस्य प्रतिबन्धकत्वेऽपि प्रयोजनाभावेनानुमितौ तत्प्रतिबन्धकत्वस्याकल्पनात् । संशयत्वस्यार्थसमाजयस्त्वेऽपि साध्यतदभाववाप्यवत्तापरामर्शाभ्यां जायमानानुमितिः संशयरूपैव जायते उभयप्रकारकत्वे निश्चयत्वायोगात् संशयानुमितिरेव सत्प्रतिपक्षफलमिति । ननु तदभावव्याप्यवत्ताज्ञानकाले तत्प्रकारकोपनीतभानाद्यनुदयेन तत्र तत्प्रतिबन्धकत्वे कल्पनौचित्यात्प्रत्यक्षत्वमनिवेश्य तत्प्रकारकबुद्धित्वमेव तत्प्रतिबध्यतावच्छेदकं तच्चानुमितिसाधारणमिति कथमुभयपरामर्शकाले उभयविधैकानुमितिरिति चेन्न । इच्छाकाले आहार्यप्रत्यक्षोत्पत्त्या चाक्षुषत्वस्यार्थत्वादिप्रकारकेच्छानामुत्तेजकत्वानुरोधेन विशिष्य प्रतिबन्धकतायाः आवश्यकत्वात् । घटस्यार्थत्वसामग्रीसत्त्वे घटचाक्षुषेच्छायां सत्यामसत्यां च घटचाक्षुषसामग्र्यां घटस्यार्थत्वापत्तेः तासामेकत्र निवेशायोगात् । तत्तत्सामग्रीविशिष्टतत्तदिच्छाकूटस्योत्तेजकत्वेचातिगौरवमिति । नच शाब्दस्थले इच्छाया अनुत्तेजकत्वात् तत्रैव प्रत्यक्षान्यज्ञानत्वं तत्प्रतिबध्यतावच्छेदकं तच्चानुमितिसाधारणमिति वाच्यं । प्रत्यक्षान्यत्वज्ञानत्वयोर्मिथो विशेषणविशेष्यभावे निर्निगमनाविरहेण तदपेक्ष्य शाब्दत्वस्यैव तत्प्रतिबध्यतावच्छेदकत्वात् परोक्षत्वजातेरनुभवत्वेन सङ्करात् तस्या अपि तत्त्वमिति तत्प्रतिबन्धकत्वस्याकृप्तत्वया न संशयानुमितौ किञ्चिद्बाधकमिति । अत्रकेचित् । इच्छाया उत्तेजकत्वानुपगमेन तदभावव्याप्यवत्ताज्ञानविशिष्टान्यज्ञानत्वाच्छिन्नं प्रति तदभावव्याप्यवत्ताज्ञानत्वेनैकमेव प्रतिबन्धकत्वं इच्छाविशिष्टत्वावच्छिन्नं प्रति इच्छात्वेन हेतुतया एककार्यकारणभावेनैव निर्वाहे तस्यानुमितिसाधारणतया न संशयानुमितिरुत्पत्तुमर्हतीति दभावव्याप्यवत्ताज्ञानस्य विरोधिनः सत्त्वात् । अहार्यानुमितेरङ्गीकारेण इच्छाकालेपि तदुत्पत्त्यसम्भवादिति निगर्वः । असिद्धिर्निरूपयति । असिद्धिरिति । परामर्शेति । व्याप्तिप्रकारकपक्षे धर्मिताज्ञानं परामर्शः । तत्प्रतिबन्धकत्वं च व्याप्यत्वासिद्ध्यर्थं व्याप्तिज्ञानविघटकत्वेन स्वरूपासिद्ध्याश्रयासिद्ध्योस्तु पक्षधर्मताज्ञानविघटकत्वेन व्यभिचारज्ञानस्यापि व्याप्तिज्ञानविघटकत्वेन तद्विषये व्यभिचारादावतिप्रसङ्गात् व्यभिचाराद्यन्यत्वं प्रतिबन्धकतावच्छेद

धर्मवत्त्वं सा च त्रिधा । स्वरूपासिद्धिराश्रयासिद्धिर्व्याप्यत्वासिद्धिश्च । पक्षे हेत्वभावः स्वरूपासिद्धिः यथा घटः पृथिवी पटत्वादित्यत्र घटरूपपक्षे हेत्वभावः पक्षे पक्षतावच्छेदकावच्छिन्नाभावः । गगनकमलं सुरभि कमलत्वादित्यत्र पक्षे कमले गगनीयत्वाभाव एतदुभयाभिन्नासिद्धिर्व्याप्यत्वासिद्धिः । यथा धूलीपटले धूमनिष्ठव्याप्यत्वाभावः । सा-

---

कधर्मविशेषणं । परामर्शप्रतिबन्धकज्ञानविषयत्वमित्युक्तौ घटपटादेरपि समूहालम्बनात्मकज्ञानविषयत्वाद्तिव्याप्तिरतः प्रतिबन्धकतावच्छेदकपर्याप्तानुधावनम् । अवच्छेदकत्वं च विषयितया तत्प्रतिबन्धकतावच्छेदकतापर्याप्त्यधिकरणत्वं । तेनासिध्यादिघटैकदेशे नातिव्याप्तिरिति । स्वरूपासिध्याद्यन्यतमत्वमेव तत्त्वमित्यपि केचित् । सा । असिद्धिः । यथा क्रमं लक्षणान्याह । पक्षद्वयादिना । पक्षतावच्छेदकविशिष्टे हेतुतावच्छेदकावच्छिन्नहेतोरभावः स्वरूपासिद्धिरित्यर्थः । तेनोत्पत्तिकालीनो घटः पृथिवी गन्धप्रागभावादित्यादौ नातिप्रसङ्गः । नवा गुणोद्रव्यसत्त्वादित्यादौ विशिष्टस्यानतिरिक्तत्वाद्विशिष्टसत्ताभावप्रतियोगिनि सत्त्वेऽव्याप्तिः तत्राप्युत्पत्तिकालीनत्वरूपपक्षतावच्छेदककविशिष्टे गन्धप्रागभावस्य विद्यमानत्वेन हेत्वभावासंभवात् सत्तावावच्छिन्नाभावस्य गुणेऽसत्त्वाच्चयथोक्ते न क्षतिः । पक्षद्वयेति । पक्षे पक्षतावच्छेदकस्याभाव इत्यर्थः । गगनीयत्वेति । गगनीयकमलाप्रसिद्धेरिति भावः । एतदुभयेति । स्वरूपासिध्याश्रयासिद्धिभिन्नत्वविशिष्टासिद्धित्वं व्याप्यत्वासिद्धित्वमित्यर्थः । एतदुभयवारणायोभयभिन्नेति । घटादिवारणाय विशेषणदलं । धूलीपटलमिति । पर्वतो वह्निमान् धूलीपटलादित्यादौ धूलीपटले वह्निव्याप्यसत्त्वेन धूमादिनिष्ठवह्निव्याप्त्यभावकूटस्य सत्त्वादिति भावः । यथाश्रुते तु धूमनिष्ठवह्निव्याप्त्यभावस्यालोकेपि सत्त्वात्तस्यापि व्याप्यत्वासिद्धिप्रसङ्गः साध्यसाधनभेदेन व्याप्तेर्भिन्नत्वादिति । ननु पर्वतः काञ्चनमयवह्निमान्धूमात् एवं पर्वतो वह्निमान् काञ्चनमयधूमात् इत्यादौ साध्ये साध्यतावच्छेदकस्याभावः साध्याप्रसिद्धिः । एवं हेतौ हेतुतावच्छेदकस्याभावो हेत्वप्रसिद्धिरित्येवं रूपयोः साध्याप्रसिद्धिहेत्वप्रसिद्धोरपि आश्रयासिद्धिवदतिरिक्तत्वसम्भवेनासिद्धित्रिविधत्वमनुपपन्नमत आह । साध्याप्रसिद्धि-

व्याप्यसिद्धिर्हेत्वसिद्धिर्वा पक्षे साध्यशून्यत्वं बाधः । यथा

रिति । वा शब्दो अप्यर्थकः तथाच साध्याप्रसिद्धिर्हेत्वप्रसिद्धिरपि व्याप्यत्वासिद्धिरित्यर्थः । हेतुतावच्छेदकावच्छिन्ने साध्यतावच्छेदकावच्छिन्ननिरूपितनियतसामानाधिकरण्यमेव व्याप्तिः । साध्यतावच्छेदकहेतुतावच्छेदकयोरप्रसिद्धौ तादृशव्याप्तेरसंभावितत्वेन तयोरपि व्याप्यत्वासिध्यत्वर्गतत्वमेव आश्रयासिद्धेरपि तथात्वसंभवात् अतिरिक्तत्वमेवेति नासिद्धेस्त्रैविध्यानुपपत्तिरिति भावः । अत्रपर्वतोवह्निमान्धूमादित्यादौ नीलरूपविशेषणस्य सङ्कोचाविशेषणत्वेन नीलधूमत्वेन व्याप्यतावच्छेदकं व्यभिचारावारकत्वात् व्याप्तिग्रहानौपयिकत्वाच्च किंतु धूमत्वमेव तथा स्वसमानाधिकरणव्याप्यतावच्छेदकधर्मान्तराऽघटितधर्मस्यैव व्याप्यतावच्छेदकत्वनियमात् । धूमप्रागभावत्वसङ्ग्रहाय स्वसमानाधिकरणेति स्वस्यापि स्वघटितत्वादन्तरेति । तदघटितत्वं च तद्विषयकप्रतीतिविषयत्वमेव । तथाच नीलधूमत्वावच्छिन्ने व्याप्तभावाद् व्याप्यत्वासिद्धेऽवान्तर्भावः अतएव तदुद्भावने वादिनिग्रहोपि । ननु व्यापके व्यर्थविशेषणं न दोषाय व्याप्ये तु दोष इति नियमे किंविनिगमकमिति चेत्तदर्वेहि हेतुतावच्छेदकावच्छिन्नहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वत्वावच्छिन्नप्रतियोगिताकाऽभावविशिष्टसाध्यतावच्छेदकावच्छिन्नसाध्यसामानाधिकरण्यमेव व्याप्तिः । एवं च समनियतलघुधर्मेऽवच्छेदके संभवति गुरौ तदभावादिति न्यायेन स्वरूपसंबन्धरूपावच्छेदकत्वस्य गुरुधर्मेऽनङ्गीकारात् नीलधूमत्वावच्छिन्नसमानाधिकरणाभाव प्रतियोगितावच्छेदकत्वत्वस्य धूमसमानाधिकरणाभाव प्रतियोगितावच्छेदकत्वत्वापेक्षया गुरुत्वेन प्रतियोगितावच्छेदकतया तादृशाभावाप्रसिध्या न तेन रूपेण व्याप्तिरिति । वैचित्र्यवस्तुस्थितेरादिमात्रास्तीति प्रतीतेरविशेषात् गुरुधर्मोपि प्रतियोगितावच्छेदकः । एवं स्वसमानाधिकरणतादृशधर्मान्तराघटितधर्मस्यैव व्याप्यतावच्छेदकत्वमिति नियमस्याप्रयोजकत्वात् नीलधूमत्वमपि व्याप्यतावच्छेदकमेव अतएव नीलधूमत्वादेर्वारणीयत्वेत्यपि दीधितिकारोप्याह । न चैवं तदुद्भावने वादिनिग्रहानुपपत्तिः । मन्मते तेन रूपेण व्याप्यत्वासिध्येव तन्निग्रहोपपत्तिरितिवाच्यम् । धूमादिति वक्तव्ये नीलधूमादित्युक्तिरनुचितेति अधिकोक्त्या वादिनिग्रहादित्याहुरिति क्षतं पल्लवितेन ॥

अत्राहिपक्षेबन्ध्याभावः। नचाय धूमस्य हेतोरसिद्धिरेवास्तु-सत्प्रतिपक्षोवोक्तिरुक्तंबाधेनेतिवाच्यम्। असिद्धिर्हि परामर्श प्रतिबन्धकतया दोषः। तथाच यत्र भ्रमात्मकः परामर्शो जातः तत्र बाधे सति अनुमितिरुत्पत्तेर्बाधस्यानुमितिप्रतिबन्धकतया दोषत्वात्। आद्यकालावच्छिन्नो घटो रूप-

---

बाधं लक्षयति। पक्षेइति। पक्षतावच्छेदकविशिष्टेपक्षे साध्यतावच्छेदकावच्छिन्न प्रतियोगिताकसाध्याभाववत्त्वमित्यर्थः। तेन रूपकालावच्छिन्नघटो गन्धवान् पृथिवीत्वादित्यादौ आद्यक्षणावच्छेदेन घटे गन्धाभावसत्वेपि नातिव्याप्तिः। एवं महानसीयवह्न्यभावस्य पर्वते सत्वेपि न पर्वतो वह्निमान् धूमादित्यादेर्बाधितत्वापत्तिरिति। बाधे अप्रयोजकत्वहेतुरनैकान्तिके चेतिनियमाद्बाधस्य प्रतिबन्धकत्वे मानाभाव इत्याशङ्कते। नचेति। अत्रेति। ह्रदो वह्निमान् धूमादित्यादावित्यर्थः। असिद्धिरेव। स्वरूपासिद्धिरेव। उक्तं। अर्थं। बाधेनेति। बाधस्य प्रतिबन्धकत्वेनेत्यर्थः। परामर्शोजातः। वह्निव्याप्यधूमवान् ह्रद इति परामर्शो जातः। बाधेसतीति। वह्न्यभाववान् ह्रद इति बाधे सतीत्यर्थः। तथाच तत्र परामर्शोहेत्वसिध्यादेर्दूषकतया बाधस्यैव दोषत्वमिति भावः। ननु वह्निव्याप्यवत्ताज्ञानकाले कथं वह्न्यभाववत्ताज्ञानं तदभावव्याप्यवत्ताज्ञानस्य प्रतिबन्धकस्य सत्त्वादिति चेन्न। अलौकिकतद्वत्ताज्ञानं प्रत्येव तदभावव्याप्यवत्ताज्ञानस्य विरोधितया आनुमानिकभिन्नेन्द्रियजन्यवह्निव्याप्यवत्ताज्ञानकाले प्रत्यक्षिकवह्न्यभाववत्ताज्ञानोदये बाधकाभावादिति भावः। असङ्कीर्णबाधस्थलमप्याह। आद्यकालावच्छिन्नेति। दोषान्तरेति। असिद्ध्यादिरूपदोषान्तरेत्यर्थः। दोषान्तराभावमेवोपपादयति। नहीति। आद्यसत्वे व्यभिचारित्वमेव पक्षावृत्तित्वे च स्वरूपासिद्धिरेवदोष इत्यतोऽसिद्धिपक्षवृत्तित्वयोरुभयोरभावयोर्निराकरणं। यद्यपिधर्मितावच्छेदकसामानाधिकरण्येन तदभाववत्ताज्ञानस्य धर्मितावच्छेदकसामानाधिकरण्येन तत्प्रकारकबुद्धौ न प्रतिबन्धकत्वं। तथाप्यवच्छेदकावच्छेदेन तदभाववत्ताज्ञानस्य अवच्छेदकावच्छेदेन तदज्ञानविरोधितयैव तद्बोध्यं। ननु गन्धव्याप्यपृथिवीत्ववत्तापरामर्शात् जायमानघटो गन्धवानित्यनुमितिः पक्षतावच्छेदकसामानाधिकरण्यावगाहि-

वान् पृथिवीत्वादित्यत्राद्यकालावच्छेदेन घटे रूपाभावरूपबाधस्थले दोषान्तराभावात् । नहि पृथिवीत्वेन रूपव्याप्तिः । पक्षात्तृत्तितावेति दिक् । ननु उपाधिरपि हेत्वाभासान्तरमस्तीति कथमेतदेवेति चेत् । व्यभिचाराद्यन्यतमत्वं हेत्वाभासत्वं । नचोपाधिस्तदन्यतमइति तस्यानैवंभूतत्वात् । अतएव सिद्धसाधनमपि न हेत्वाभासान्तरम् ॥ ननु कोयमुपाधिः । अत्राचार्याः ॥ साध्यव्यापकत्वेसति साधनाव्यापकउपाधिः । तद् व्यापकत्वं च तत्समानाधिकरणा या

त्वात् । अमैव । ननु पक्षतावच्छेदकावच्छेदेन तदनुमितिः । पक्षतावच्छेदकव्यापकत्वविशिष्टसम्बन्धघटितव्यापकतायाः गन्धे अग्रहात् व्यापकताघटकसम्बन्धेनैव व्यापकस्यानुमितिः तथाच महतोरस्य कथंबाधितत्वमत आह । दिगिति । अवच्छेदकावच्छेदेनानुमितौ पक्षतावच्छेदकव्यापकत्वविशिष्टसम्बन्धेन व्यापकत्वावगाहिपरामर्शशुद्धसाध्यतावच्छेदकसम्बन्धघटितव्यापकत्वावगाह्यवच्छेदकावच्छेदेन हेतुमत्तावगाहिपरामर्शयोरन्यतरस्य जनकत्वेन प्रकृते गन्धप्रागभावावच्छिन्नत्वविशिष्टसमवायघटितगन्धनिष्ठव्यापकत्वावगाहिपरामर्शस्यैव गन्धप्रागभावकालावच्छिन्नत्वविशिष्टसमवायसम्बन्धेन पृथिवीत्वरूपहेतुमत्तावगाहिपरामर्शत्वाद्गन्धप्रागभावकालावच्छेदेन घटे जायमाना गन्धानुमितिर्भ्रमएवेति तस्याभासत्वमुचितमेवेति भावः । ननु व्यभिचारज्ञानस्यानुमितिकरणव्याप्तिज्ञानविघटकतया परंपरयाऽनुमितिप्रतिबन्धज्ञानविषयतया यथा व्यभिचारादेर्हेत्वाभासत्वं तथोपाधेरपि स्यात् । उपाधिज्ञानस्यापि व्यभिचारज्ञानद्वारावयाप्तिज्ञानविघटकत्वेनानुमितिप्रतिबन्धकज्ञानविषयत्वात् । तथाच पञ्चैव हेत्वाभासा इत्यनुपपन्नमित्यभिप्रेत्याशङ्कते । नन्विति । एते एवेति । पञ्चेत्यर्थः । तदन्यतमइति । सव्यभिचाराद्यन्यतमान्तर्गतइत्यर्थः । तस्य । उपाधेः । अनैवंभूतत्वात् । अहेत्वाभासत्वात् । अतएव । सव्यभिचाराद्यन्यतमान्तर्गतत्वाभावादेव । वस्तुतस्तु सत्यप्युपाधिज्ञाने उपाधिना व्यभिचाराद्यनुमाने व्याप्तिज्ञानप्रतिबन्धकत्वाभावादनुमित्युत्पत्या अनुमितिकरणव्याप्तिज्ञानविघटकत्वाभावेन

परमुखनिरीक्षकतया न हेत्वाभासत्वम् । एवं सिद्धसाधनस्यापि पक्षतावच्छेदकतया न तत्त्वमिति । वादिविजयरूपैककार्यकारित्वसङ्कल्पया हेत्वाभासनिरूपणानन्तरमुपाधिनिरूपणमारभते । अन्विति । आचार्यैस्तु उपाधिपदं पङ्कजादिपदवद्योगरूढम् उपसमीपधर्तीति स्वीयं धर्ममादधातीत्युपाधिरिति योगात्स्वनिष्ठव्याप्तिरूपधर्मसङ्गामकत्वलक्षण्या साध्यव्याप्यत्वं न केवलसाध्यव्याप्यतामात्रेण दूषकत्वमिति साध्यव्यापकत्वे सतीत्यपि । तथाच साध्यसमव्याप्तत्वघटितमेवोपाधिलक्षणं । तन्नासम्यक् समव्याप्तस्यैवोपाधित्वे विपक्षव्यापित्वेऽपि व्यभिचारोद्धायकत्वसत्प्रतिपक्षोद्धायकत्वादिरूपदूषकताबीजस्य सत्त्वेन तस्याप्युपाधित्वापत्तेरिति साध्यव्याप्यत्वांशमपहाय रूढ्यर्थसाध्यव्यापकत्वमात्रघटितलक्षणमाह । साधनव्यापकत्वेसतीति । ननु साध्यव्यापकत्वं तद्वृत्तिनिष्ठात्यन्ताभावाप्रतियोगित्वं तत्प्रतियोगित्वं वा व्यापकत्वं । एवं च साध्यसमानाधिकरणात्यन्ताभावाप्रतियोगित्वे सति साधनसमानाधिकरणात्यन्ताभावप्रतियोगित्वमिति स्यात् । तच्च द्रव्यं सत्त्वादित्यादौ संयोगाद्युपाधावव्याप्यं अतिव्याप्तं च द्रव्यं पृथिवीत्वादित्यादौ संयोगादौ उभयत्र प्रतियोगिवैयधिकरण्यनिवेशे चातिगौरवं । साध्यत्वसाधनत्वयोर्व्यापकत्वव्याप्यत्वरूपत्वेन व्यभिचारिणि तदसम्भवेन साध्यत्वप्रकारकज्ञानविषयतासाधनत्वप्रकारकज्ञानविषयत्वादिमतयोर्निवेशे भ्रमात्मकज्ञानमादाय प्रसिद्धिसम्भवेपि यत्र नसादृश्यो भ्रमः तत्रानुपपत्तिर्जागरूकैरेवेत्यत आह । तद्व्यापकत्वं चेति । लाघवाद्भावागर्भव्यापकत्वमाह । तदितीति कश्चित् । तत्समानाधिकरणाद्यत्र तत्धर्मावच्छिन्नसमानाधिकरणायावन्तो यद्धर्मावच्छिन्नसमानाधिकरणास्तत्धर्मवत्वं तत्तद्धर्मावच्छिन्ने तत्तद्धर्मावच्छिन्नव्यापकत्वम् । अत्र यावत्पदोपादाने च वह्नित्वानुधूमादित्यादौ साधनाव्यापकस्य रासभादेः वह्निसमानाधिकरणमहानसत्वादिरूपयत्किञ्चित् धर्मनिष्ठसामानाधिकरण्यनिरूपकत्वेपि न रासभादावतिव्याप्तिः । यावत्त्वस्य व्यापकत्वादन्यस्य च दुर्वचत्वात्तत्समानाधिकरणतत्तद्व्यापकसामानाधिकरण्यनिरूपकत्वमर्थः पर्यवस्यति । तद्व्यापकत्वं च तत्समानाधिकरणतत्तत्समानाधिकरणभावाप्रतियोगि सामानाधिकरण्यनिरूपकत्वं । सर्वस्यापि हित्वादिना तादृग्भावप्रतियोगित्वात् असम्भवः तद्वृत्तिभावप्रतियोगित्वा नवच्छेदकधर्मवत्वं तदर्थो वाच्यः । तथाच तादृग्प्रतियोगितानवच्छेदकप्रमेयत्वमादाया-

तिप्रसङ्गवारणाय यद्धर्मावच्छिन्नसमानाधिकरणत्वावं तद्धर्मावच्छिन्नसमानाधिकरणतत्ववन्निष्ठाभावप्रतियोगितानवच्छेदकं तत्त्वमेव तद्धर्मावच्छिन्नेतद्धर्मावच्छिन्नव्याप्यकत्वं एवमव्यापकत्वंतत्समानाधिकरणत्ववन्निष्ठाभावप्रतियोगितावच्छेदकसामानाधिकरण्यतदभावयोरयं तद्धर्मावच्छिन्नसमानाधिकरणधर्मनिष्ठाभावप्रतियोगितानवच्छेदकसामानाधिकरण्यावावच्छिन्नसामानाधिकरण्यनिरूपकतावच्छेदकत्वेसति यद्धर्मावच्छिन्नसमानाधिकरणधर्मनिष्ठाभावप्रतियोगितावच्छेदकसामानाधिकरण्यत्वावच्छिन्नसामानाधिकरण्यनिरूपकतावच्छेदकं यद्रूपं तद्धर्मावच्छिन्न साध्यसमानाधिकरणतद्धर्मावच्छिन्नहेतावुपाधिः। गुणकर्मान्यत्वविशिष्टसत्तावान्जातेरित्यत्र विशिष्टसत्तायाः सत्तानतिरेकितयासत्ताव्यापकतया साध्य वयापकत्वप्रसङ्गेन द्रव्यं गुणकर्मान्यत्वविशिष्टसत्वादित्यादौ सत्वावव्यापकतयासाधनाव्यापकत्वप्रसङ्गेन च संयोगादावव्याप्तिव्याप्त्योर्वारणाय लक्षणे तद्धर्मावच्छिन्नत्वतद्धर्मावच्छिन्नत्वयोर्निवेशः। तत्रे लक्षणं सङ्गमयति। यथेति। सत्। आर्द्रेन्धनं तत्समानाधिकरणत्वात्। आर्द्रेन्धनसमानाधिकरणत्वात्। धूमसमानाधिकरणमहानसत्वादिनिष्ठाभावप्रतियोगिसामानाधिकरण्यनिरूपकत्वेन धूमव्यापकत्वमहानसमितिभावः। अयः पिण्डइति। वह्निसमानाधिकरणायः पिण्डत्वनिष्ठाभावप्रतियोगिसामानाधिकरण्यनिरूपकत्वेन वह्न्यव्यापकत्वादितिभावः। सद्धेतौ तु। वह्निमान्धूमादित्यादौ तु। नैवं। वह्निव्यापकोधूमाव्यापकः क्वचिदितिवर्थः। ननु पक्षारितिरिक्ते साध्यव्यापकतावदुपाधेर्दूषकत्वं। तच्च महानसादौ तन्तर्भावेण वह्निव्यापकस्य पर्वते च धूमाव्यापकस्यपक्षेतरत्वस्यैवोपाधेः सम्भवात्कथं नतत्रोपाधिरित्यत आह। तच्चहेतोरिति। हेतो। धूमस्य। साध्यव्याप्यत्वात्। वह्निव्याप्यत्वात्। ननु ततः किमित्यत आह। साध्याव्याप्यावव्यापकत्वेति। तथाच पक्षेतरत्वं वन्ह्यव्यापकं वह्निव्याप्यधूमाव्यापकत्वादित्यनेन साध्याव्यापकत्वाच्च पक्षे तरत्वमुपाधिः। नच धूमो वन्ह्यव्याप्यवह्निव्यापकपक्षेतरत्वाव्यात्वादित्यनुमानेन धूमे एव वन्ह्यव्याप्यत्वंसिध्यतां व्यभिचाराद्दक्षोभ्रूचापि सत्वादिति वाच्यम् धूमत्वावच्छिन्नं प्रति वह्नित्वेन हेतुतया कार्यकारणभावरूपानुकूलतर्कसत्वादेव धूमे वह्निव्याप्यत्वसिध्या तदव्यापकत्वेन पक्षेतरत्वे वन्ह्यव्यापकत्वनिश्चयादिति भावः। दृढ-

वन्तोवत्समानाधिकरणा स्तत्वं । यथा धूमवान्यत्किंचिदा
र्द्रेन्धनं हिभवति तत्साध्यव्यापकं । धूमसमानाधिकरण-
त्वय यावतत्तत्समानाधिकरणत्वात् भवति च साधना-
व्यापकं । वह्निमत्वयः पिण्डेतदसत्वात् । सहेतौतु नेदं ।
तच हेतोः साध्यव्याप्यत्वात् । साध्यव्याप्यावयापकत्वस्य च सा-
ध्यव्यापकत्वात् ॥ अथवदन्ति । इदंसाधनावच्छिन्नसाध्य-
व्यापकेऽव्याप्तं । यथाकाकः श्यामो मित्रातनयत्वादित्यत्र
ग्राकपाकजत्व मुपाधिः नहि तत्काकत्वव्यापक श्यामत्व-
वति बके अपत्वात् किंतु मित्रातनयत्वावच्छिन्नश्याम-
त्वव्यापकं यत्रयत्र मित्रातनयत्वावच्छिन्नश्यामत्वं तत्र त-
त्र ग्राकपाकजत्वस्य सत्वात् । अथ साधनावच्छिन्नसाध्य-
व्यापकत्वे सति साधनाव्यापकत्वमुपाधिरिति चेन्न । वायुः
प्रत्यक्षः प्रमेयत्वादित्यादौ पक्षधर्मवह्निर्द्रव्यत्वावच्छिन्न-

---

सुन्नोपाधित्वच्चं । यथा काक इति । मित्रातनयत्व पक्षत्वे साध-
नावच्छिन्नसाध्यव्यापकपक्षधर्मावच्छिन्नसाध्याव्यापकयोरेवाप्रसङ्गेन वक्ष्यमा
णदोषाऽसङ्गतेरत स्तयोरसङ्गत्यप्रदर्शनाय ग्राकपर्यन्तानुधावनं । तत् ।
ग्राकपाकजत्वम् । श्यामत्वेति । गुडश्यामत्वव्यापकमित्यर्थः । किंत्वि
ति । साधनीभूतमित्रातनयत्वावच्छिन्नश्यामत्वव्यापकमित्यर्थः । विव
क्षितमिति । मित्रातनयत्वरूपसाधनावच्छिन्नश्यामत्वव्यापकत्वादृगो
रमित्रातनये अवृत्तित्वेनच मित्रातनयत्वरूपसाधनाव्यापकत्वाच्च ग्रा-
कपाकजत्वे लक्षणसमन्वयः । गुडसाध्यव्यापके चाङ्गेयादौ गुडसाध्य-
व्यापकत्वादेव सुतरां साधनावच्छिन्नसाध्यव्यापकत्वमिति भावः । वा-
युरिति । वायुः प्रत्यक्षः प्रत्यक्षजगोचरत्वादिति ह्यते प्रत्यक्षजगोचरत्व-
रूपसाधनावच्छिन्नप्रत्यक्षत्वव्यापकतयाऽव्याप्तासङ्गतिरत्र; प्रमेयत्वपर्यन्ता-
नुधावनं । तत् । रूपवत्वं । ननु गुडसाध्यव्यापकसाधनावच्छिन्नसाध्यव्यापको
भयवह्निर्भवतस्य नोपाधित्वमेवेत्यत आह । किंत्विति । तथाच साधनाव-

साध्यव्यापके द्रव्यत्वरूपवत्त्वादौ उपाधावव्याप्तेः । नहि प्रमेयत्वरूपसाधनावच्छिन्नसाध्यव्यापकं तदात्मादावसत्वात् । किन्तु बहिर्द्रव्यत्वावच्छिन्नप्रत्यक्षत्वस्य व्यापकं । यावति तद्वति वटादौ रूपसत्वात् । अथ पक्षधर्मावच्छिन्नसाध्यव्यापकत्वे सति साधनाव्यापकत्वमुपाधित्वं विवक्षितमिति चेन्न । यथोक्तस्थले शाकपाकजन्यत्वे अव्याप्तेः । नहि तत्पक्षधर्मावच्छिन्नश्यामत्वव्यापकं तत् तथाविधश्यामत्ववति पक्षे असत्वात् । अथ यत्किञ्चिद्धर्मावच्छिन्ने साध्यव्यापकत्वं विवक्षितं । सचधर्मः क्वचित्साधनं क्वचित्पक्षधर्मइति चेन्न पर्वतो वह्निमान् धूमादित्यत्र महानसत्वाभावस्योपाधितापत्तेः । भवति हि महानसान्यरूपयत्किञ्चिद्धर्मावच्छिन्नवह्निव्यापको महानसत्वाभावः यावत्तादृग्वह्निमति सत्वात् । नच धूमव्यापको धू-

---

च्छिन्नस्य व्यव्यापकस्यैव पक्षधर्मावच्छिन्नसाध्यव्यापकस्यापि व्यभिचारोद्भावकत्वादिरूपदूषकतावीजसाम्येनोपाधितया तत्राव्याप्तिरितिभावः । तद्धतीति । बहिर्द्रव्यत्वावच्छिन्नप्रत्यक्षत्ववतीत्यर्थः । बहिष्ठं चात्मान्यत्वंमानसविषयान्यत्वं वा तदवच्छिन्नप्रत्यक्षत्वं रूपादावपि तत्र च नि; रूपसत्वमिति द्रव्यत्वनिवेशः । द्रव्यत्वावच्छिन्नप्रत्यक्षत्वमात्मादावपीतिबहिष्ठनिवेशः । यथोक्तस्थले । काकः श्यामो मित्रातनयत्वादित्यादौ । तथा विधेति । पक्षधर्मबहिर्द्रव्यत्वावच्छिन्नेत्यर्थः । पक्षे । काकादौ । असत्वादिति । तदसत्वलक्षणं प्रागभावो विनाशी प्रमेयत्वादित्यादौ जन्यत्वावच्छि नाधित्वव्यापके भस्मत्वोपाधौ तदसत्वस्य पक्षधर्मावच्छिन्नसाध्यव्यापके अव्याप्तिरित्यपि द्रष्टव्या । ननु साधनपक्षधर्मयोर्न तत्त्वेन निवेशः किंतु यत्किञ्चिद्धर्मतयेति नोक्तावव्याप्तिरित्याशङ्क्य । अथेति । क्वचित् काकःश्यामो मित्रातनयत्वादित्यादौ । क्वचित् वायुः प्रत्यक्षः प्रमेयत्वादित्यादौ । धूमवत्वक्वेरित्यत्र शुद्धसाध्यव्यापके आर्द्रेन्धनादौच पक्षधर्मद्रव्यत्वादिकमाद

भवति महानसेऽसत्त्वात् । अथोच्यते । स्वानधिकरणसाधनाधिकरणवृत्तिधर्मावच्छिन्नसाध्यव्यापकत्वमुपाधित्वं । यद्वा स्वावच्छिन्नानधिकरणसाधनाधिकरणवृत्तिधर्मावच्छिन्नसाध्यव्यापकतावच्छेदकधर्मवत्वं तत्तच्च स्वावच्छिन्ना-

---

य सति । उपाधितापत्तेरिति । तथाच सदनुमानस्वोच्छेदप्रसङ्गेति भावः । तादृश्यवच्छिन्नमिति । महानसान्यत्वावच्छिन्नवृत्तीति पर्वतादौ । असत्वादिति । महानसत्वाभावस्येत्यादिः । स्वानधिकरणेति । स्वमुपाधित्वेनाभिमतं धूमवान्वह्नेरित्यादौ च समवेत्यनतदनधिकरणं तद्वृत्तिरत्वमयोगोलकसंयोगवृत्तिद्रव्यत्वरूपधर्मावच्छिन्नधूमत्वव्यापकत्वादादृश्यनेलक्षणसमन्वयः एवं सश्यामोमित्रातनयत्वादित्यादौ श्यामकपाकजत्वं च तदनधिकरणं यन्मित्रातनयत्वाधिकरणं गोरमित्रातनयः तद्वृत्तिमित्रातनयत्वरूपधर्मावच्छिन्नश्यामत्वव्यापकत्वात् श्यामकपाकजत्वमुपाधिः । वायुः प्रत्यक्षः प्रत्यक्षसमवायाश्रयत्वादित्यादौ चोद्भूतरूपवत्वं तदनधिकरणं यन्नत्वक्षसमवायाश्रयत्वाधिकरणं वायुः तद्वृत्तिविद्रव्यत्वरूपधर्मावच्छिन्नप्रत्यक्षत्वाव्यापकत्वादुद्भूतरूपवत्वे लक्षणसमन्वयः । वह्नेमान्धूमादित्यादौ तु महानसत्वाभावो नोपाधिः तत्र हि खं महानसत्वाभावः तदनधिकरणं धूमाधिकरणं महानसमेव तद्वृत्तिद्रव्यत्वरूपधर्मावच्छिन्नवह्निमति महानसएव तस्यासत्वान्नातिव्याप्तिरिति ध्येयम् । ननु द्रव्यं सत्वादित्यादौ गुणकर्मान्यत्वविशिष्टसत्त्वेऽव्याप्तिः विशिष्टसत्तायाः सत्तानतिरिक्ततया सत्त्वानधिकरणसाधनाधिकरणाप्रसिद्धेः । एवं धूमवान्वह्नेरित्यादौ आर्द्रेन्धनादौनां द्रव्यत्वेनोपाधितापत्तेरित्यत आह । यद्वेति । स्वपदमुपाधिनावच्छेदकत्वेनाभिमतपरं । इत्थं च विशिष्टसत्तानतिरिक्तत्वेपि विशिष्टनिरूपिताधिकरणताया अतिरिक्तत्वात् गुणकर्मान्यत्वविशिष्टसत्तावावच्छिन्नानधिकरणं सत्वाधिकरणं गुणाद्येव प्रसिद्धं । तद्वृत्तिसत्वादिरूपधर्मावच्छिन्नद्रव्यत्वादिव्यापकत्वाद् गुणकर्मान्यत्वविशिष्टसत्वे लक्षणसमन्वयः धूमवान्वह्नेरित्यादौ स्वपदेन द्रव्यत्वं नोपादातुं शक्यते तत्र द्रव्यत्वावच्छिन्नाधिकरणवन्ह्यधिकरणाप्रसिद्धेः किं त्वार्द्रेन्धनत्वादेव तथात्वादार्द्रेन्धन

नधिकरणहेतुमन्निष्ठयत्किञ्चिद्धर्मावच्छिन्नसध्यसमानाधि-
धिकरणवृत्तित्यावद्धर्मावच्छिन्नसमानाधिकरणाल्लहुत्वं । भ-
वति हि आर्द्रेन्धनत्वावच्छिन्नानधिकरणवह्निमदयःपि-
ण्डनिष्ठद्रव्यत्वावच्छिन्नधूमाधिकरणावृत्तित्यावद्धर्मीआर्द्रेन्ध
नत्वावच्छिन्नसमानाधिकरणाअतस्तद्दाद्रेन्धनसुपाधिः ।
एवं रूपत्वावच्छिन्नानधिकरणप्रत्यक्षस्वगोचरत्वनिष्ठव-
र्द्रव्यत्वावच्छिन्नप्रत्यक्षत्वाधिकरणं यत्तन्निष्ठा यावन्तो ध-
र्माः रूपत्वावच्छिन्नसमानाधिकरणाअतो रूपसुपाधिः ।
एवं प्राक्पाकजत्वत्वावच्छिन्नानधिकरणं यन्मिषातनय-
त्वनिष्ठमिषातनयत्वावच्छिन्नश्यामत्वाधिकरणं यत्तन्नि-
ष्ठा यावन्तो धर्माः प्राक्पाकजत्वत्वावच्छिन्नसमानाधि-
करणा अतस्तद्दप्राक्पाकजत्वसुपाधिः । नचैवं सद्धेतोः
सम्भवति नहि महानसत्वाभावानधिकरणं वह्नेत्वधिक-

स्वेनैवोपाधित्वं नतु द्रव्यत्वेनेति नोक्तदोष इति भावः । व्यापकत्वस्या भावादिघटितत्वेन गुरुत्वात् लघुतदाह । तच्चेति । तादृशसाध्यव्यापकत्वं चेत्यर्थः । धूमवान्वह्नेः वायुः प्रत्यक्षः प्रत्यक्षस्वगोचरत्वात् संख्यावो मिषातनयत्वादित्यादौ आर्द्रेन्धनोद्भूतरूपप्राक्पाकजत्वादिषु यद्यावत्सं तच्च यं सङ्कथति । भवतिहीत्यादिना । वह्निमान्धूमादित्यत्र महानसत्वाभावेऽतिव्याप्तिं वारयति । नचैवमिति । सद्धेतोः एवं नच संभवतीत्वन्वयः । सद्धेतोः । धूमादेः । एवमुक्तधर्माक्रान्तः क्वचिदप्युपाधिर्न संभवतीत्यर्थः । तदेवाह । नहीति । वह्निमान्धूमादित्यादौ पर्वतेतरत्वानधिकरणधूमवत्पर्व-तादिनिष्ठद्रव्यत्वादिरूपधर्मावच्छिन्नवह्निसमानाधिकरणाः पर्वतत्वादयोऽपि तेन पर्वतेतरत्वावच्छिन्नसमानाधिकरणा इति न पर्वतेतरत्वे अतिव्याप्तिरित्याह । अतएवेति । तादृशधर्मावच्छिन्नसाध्यव्यापकत्वाभावादेवेत्यर्थः । तदेवाह । यद्धेति । धर्मे । पर्वतत्वादौ । तत्सामानाधिकरण्या-

रणं सङ्कानसत्सन्निष्ठयत्सिद्धिसङ्कीवच्छिन्नसाध्यसमानाधिकरणाः वह्न्याधिकरण्यावन्तो धर्मा सङ्कानसत्वाभावत्वाच्छिन्नसमानाधिकरणाः सङ्कानसत्वएवाभावात् अतएव सद्धेतौ पक्षेतरत्वं नोपाधिः पक्षमात्रवृत्तिधर्मे तत्सामानाधिकरण्याभावात् इति सङ्क्षेपः ॥

तच्चानुमानं परार्थं न्यायपूर्वकं। न्यायश्च कृत्रिमप्रतिज्ञादिपञ्चकसमुदायः। यथा पर्वतो वह्निमान् धूमात् योयो धू-

---

भावात्। पर्वतेतरत्वसामानाधिकरण्याभावात्। वह्नेरनुष्णः कृतकत्वादित्यादौ पक्षे बाधेन साध्याव्यापकतया अग्नित्वे वह्नितरत्वादौ बाधोद्धारत्वात् सद्धेतुत्वमेवेति हृदयम्। उपाधिर्दूषकतावीजं व्यभिचारोद्धायकत्वं सत्प्रतिपक्षोद्धायकत्वं वा। तत्राद्ये धूमवान्वह्नेरित्यत्र वह्निर्धूमव्यभिचारी धूमवद्व्यापकाद्र्द्रेन्धनव्यभिचारित्वात् व्यापकव्यभिचारित्वे व्याप्यव्यभिचारित्वस्यावश्यकत्वात्। एवं वह्निमदयोगोलकं धूमाभाववत् आर्द्रेन्धनाभावात् व्यापकाभावे व्याप्याभावस्यावश्यं भावादिति। व्यभिचारोद्धायकत्वेन सत्प्रतिपक्षोद्धायकत्वेन वा आर्द्रेन्धनस्योपाधित्वात्। नच यथा हेतोः साध्यव्यापकत्वोपाधिर्व्यभिचारेण साध्यव्यभिचारः साधनीयः तथा साध्यवद्व्याप्य हेत्ववद्व्यापकतयोपाधेः साध्याभावव्यापकत्वमपि वेत्यादि विनिगमनाविरहाद् व्याप्तिपक्षधर्मतोभयथापि सत्वादिति वाच्यम्। अनुकूलतर्कादिनोपाधेः साध्यव्यापकतया निश्चय एवोपाधि दूषकतावीजचिन्तनमित्यभिसन्धायाह। संक्षेपइति। स्वार्थपरार्थभेदेनानुमानं द्वेधा। तत्र स्वयं धूमादग्निमनुमाय वह्न्यर्थंप्रवर्तते तत् स्वार्थानुमानं यत्तुस्वयंवह्निमनुमाय वह्न्यर्थिपरमतिपत्त्यर्थं वाक्यं प्रयुङ्क्ते तत्परार्थानुमानं। तत्र स्वार्थानुमानं सुगमत्वादुपेक्ष्य परार्थानुमानप्रकारमेवाह। तच्चानुमानमिति। ननु पक्षधर्मत्वं सपक्षे सत्वं विपक्षाद्व्यावृत्तिः अबाधितविषयत्वं असत्प्रतिपक्षत्वं चेत्यादिपञ्चरूपोपपन्नलिङ्गप्रतिपाद्कवाक्यं न न्याय्यं पञ्चरूपोपपन्नो धूम इति वाक्येऽतिव्याप्तमतो न्याय्यत्वं निर्वक्ति। न्याय्येति। धूमात्पर्वतो वह्निमानित्यादिन्यूनमीलप्रतिज्ञादिसमुदायेऽतिव्याप्तिवारणाय। कृत्रि-

मवान् समोऽग्निमान् । वह्निव्याप्यधूमवानयं । तस्माद्वह्निमानिति । तत्र एतत्पर्वतघटकपर्वतो वह्निमानिति शब्दस्य अवयवविभाजको प्रतिज्ञात्वं प्रतिज्ञात्वं । एतद्धूमादिति शब्दस्य तादृशोपाधिमत्त्वं हेतुत्वं । एतद्योगो धूमवान्समोऽग्निमानिति शब्दस्य तादृशोपाधिमत्त्वस्योदाहरणत्वम् । एतद्वह्निव्याप्यधूमवानयमिति शब्दस्य तादृशोपाधि

केति । क्रमसंप्रदायाविरुद्धेत्यर्थः । न्यायत्वं पञ्चसु पर्याप्तमिति सूचनाय समुदाय इति । तेन पञ्चावयवेनैव समुदायलक्षणा लक्षं समुदाय इत्यनेनेति दूषणमनवकाशं । तथाचायं तस्मात्तथेत्युपनयनिगमने प्राचां नव्या मते मतमाह । वह्निव्याप्येत्यादि । प्रतिज्ञात्वयज्ञाने तद्घटितन्यायस्यज्ञानात् परार्थानुमानासंभव इति प्रतिज्ञात्वादिलक्षयति । तत्रेति । तेषु प्रतिज्ञादिषुमध्ये इत्यर्थः । तत्र सत्वेतावित्यर्थ इति कश्चित् । पर्वतो वह्निमानित्युदासीनवाक्ये अतिव्याप्तिवारणाय न्यायघटकेति । पर्वतो वह्निमानालोकादिति न्यायान्तर्घटकप्रतिज्ञायाः पर्वतो वह्निमान्धूमादिति न्यायघटकप्रतिज्ञात्वापत्तिवारणायैतन्न्यायेति । अवयवेति । अवयवविभाजकाः पक्षोपाधयः प्रतिज्ञात्वहेतुत्वोदाहरणत्वोपनयत्वनिगमनत्वहेतात् तत्र यथायोगं लक्षणान्यवसेयानि । "पक्षे साध्यनिर्देशः प्रतिज्ञेति सूत्रं" पक्षविशेष्यकसाध्यप्रकारकज्ञानजनकवाक्यं प्रतिज्ञेत्यर्थः । तत्र पर्वतो वह्निमानित्युदासीनवाक्ये अतिप्रसक्तमिति तन्निरूपितम् । एतद्धूमादिति । अयोदासीनवाक्ये अतिव्याप्तिवारणाय न्यायघटकेति । पर्वतो द्रव्यंधूमादिति हेत्ववयवे पर्वतो वह्निमान्धूमादिति हेत्ववयवत्ववारणाय एतन्न्यायघटकेति वक्तव्यं तन्नाभाषोक्तमेतदिति । एतन्न्यायघटकोयो धूमादिति शब्दः तद्धेतुरित्यर्थः । एवमग्रेपि । तादृशेति । अवयवविभाजकेत्यर्थः । प्रतिज्ञादिलक्षणघटकीभूतावयवत्वं निर्वक्ति । अवयवत्वं चेति । अथैव प्राचीनमतसंवादमाह । उक्तं चेति । ननु प्रतिज्ञाद्यन्यतमत्वं प्रतिज्ञाभिन्नत्वे सति हेत्वादिभिन्नं यत्तद्भिन्नत्वं तच्च प्रतिज्ञात्वं पर्वतोवह्निमानिति भागयोः प्रत्येकं पर्याप्तं व्यासज्यवृत्ति वा । अथे प्रतिज्ञात्वावच्छिन्नप्रतियोगिताकभेदस्यतदटके असत्वेन तत्प्रतिज्ञैकदेशे अतिव्याप्तिः हितो-

मवं लक्षनयत्वम् । एतत्तत्साध्यिमानिति शब्दशक्तिताद्रूप्यो-पाधित्वं निगमनत्वम् अवयवत्वं च प्रतिज्ञाद्यन्यतमत्वं । उक्तं च अवयवाः पञ्च प्रतिज्ञादिभेदादिति ॥

ये प्रतिज्ञात्वावच्छिन्नप्रतियोगिताकभेदस्य प्रत्येकं पर्वतो वह्निमानिति भागयोः सत्त्वेन प्रतिज्ञादिभिन्नतादृग्भागद्वयभेदस्य च प्रतिज्ञायामसंभवइति चेन्न । प्रतिज्ञात्वाद्यवच्छिन्नप्रतियोगिताकभेदाधिकरणतावच्छेदकं यत्तदवच्छिन्नप्रतियोगिताकभेदाधिकरणतावच्छेदकं यत्तदवच्छिन्नत्वस्य विवक्षितत्वात् । प्रतिज्ञात्वस्य व्यासज्यवृत्तित्वोपगमेन प्रतिज्ञैकदेशे प्रतिज्ञात्वावच्छिन्नप्रतियोगिताकभेदसत्वात् प्रतिज्ञात्वावच्छिन्नप्रतियोगिताकभेदाधिकरणतावच्छेदकं पर्वत इति भागत्वं तदवच्छिन्नप्रतियोगिताकभेदाधिकरणतावच्छेदकं च प्रतिज्ञात्वं प्रतिज्ञान प्रतिज्ञैकदेश इति प्रतीतेः । व्यासज्यवृत्त्यधिकरणताकभेदाभ्युपगमात् । प्रतिज्ञाहेतुसमुदायो न प्रतिज्ञेति प्रतीतेः प्रतिज्ञाहेतुसमुदाये प्रतिज्ञाभेदसत्वात् न प्रतिज्ञाहेतुसमुदायेप्यतिव्याप्तिः । व्यासज्यवृत्त्यधिकरणताकभेदानङ्गीकारे तु प्रतिज्ञात्वाद्यवच्छिन्नभेदपञ्चकाधिकरणतानवच्छेदकत्वे सति प्रतिज्ञात्वाद्यवच्छिन्नाधिकरणताकभेदप्रतियोगितावच्छेदकं यत्तदवच्छिन्नभेदाधिकरणतावच्छेदकं यत्तदवच्छिन्नत्वमर्थाऽवसेयः प्रतिज्ञैकदेशेऽतिव्याप्तिवारणाय सत्यन्तनिवेशः । पर्वतो वह्निमानिति भागयोः प्रत्येकं प्रतिज्ञाभेदसत्वेन तादृग्भागत्वस्य प्रतिज्ञात्वाद्यवच्छिन्नप्रतियोगितादाधिकरणतावच्छेदकत्वाद् व्यासज्यवृत्त्यधिकरणताकभेदानभ्युपगमः प्रतिज्ञा हेतुसमुदाये प्रतिज्ञादिभेदासत्वेन प्रतिज्ञाहेतुसमुदायेऽतिव्याप्तिवारणाय विशेष्यदलनिवेशः । तच्च । प्रतिज्ञायां प्रतिज्ञाहेतुसमुदायभेदसत्वेन तादृग्प्रतियोगितावच्छेदकं तादृग्समुदायत्वं तदवच्छिन्नभेदस्य च तादृग्समुदाये असत्वेनाऽतिव्याप्तिविरहादिति । प्रतिज्ञादीनां न्यायघटकत्वघटितत्वाच्च नोदासीनवाक्येऽतिव्याप्तिरिति ध्येयम् । अत्र च प्रतिज्ञादिवाक्यैः खण्डवाक्यार्थबोधः ततो वाक्यैकवाक्यतया न्यायरूपमहावाक्यार्थबोधः अवान्तरवाक्यार्थज्ञानस्य महावाक्यार्थबोधे हेतुत्वात् । तद्यथा वह्निसंबन्ध्यभिन्नः पर्वतः धूमीयज्ञानज्ञाप्यत्वं वीप्सायास्तात्पर्यग्राहकतया वह्निपदस्य धूमव्यापकवह्नौ लक्षणया धूमसमव्याप्यभिन्न धूमव्यापकवह्निसंबन्ध्याभिन्न इति उदाहरणार्थबोधः

इति श्रीभट्टाचार्यचूडामणिविरचितायां न्यायसिद्धान्तमञ्जर्यामनुमानपरिच्छेदः॥

वह्निव्याप्यधूमसम्बन्यभिन्नः पर्वतो वह्निव्याप्यपक्षवृत्तिधूमज्ञानज्ञाप्यवह्निसंबन्ध्यभिन्न इति प्रत्येकं बोधः ततश्च धूमज्ञानज्ञाप्यवह्निसंबन्ध्यभिन्नपर्वताभिन्नधूमव्याप्यवह्निसंबन्ध्यभिन्नधूमसंबन्ध्यभिन्नवह्निव्याप्यधूमसंबंध्यभिन्नः पर्वतो वह्निव्याप्यपक्षवृत्तिधूमज्ञानज्ञाप्यवह्निसंबन्धाभिन्न इति वाक्यैकवाक्यतया न्यायार्थबोधः ततो न्यायार्थज्ञानमहकृतेन मनसा धूमवान्वह्निमानिति धूमविशिष्टे वह्निवैशिष्ट्यमिति न्यायेन मानसं ज्ञानं जन्यते तेन च परामर्शः उत्पाद्यते ततः परस्यानुमितिः। नच न्यायार्थज्ञानेनाहत्यैव परामर्श उत्पाद्यतां कृतमन्तराधिगिष्टवैशिष्ट्यज्ञानजननेनेति वाच्यं। तस्य वादिवाक्यजन्यत्वेनाऽनाप्तोक्तत्वादप्रामाण्यशङ्काकलङ्कितत्वेनानुमित्युपधायकपरामर्शानुत्पादकत्वात् अन्यथा आप्तवाक्यादिवन्न्यायजन्यज्ञानादेवानुमितिस्वीकारापत्तेः तथाच न्यायजन्यज्ञानेन तत्तत्पदार्थोपस्थापने सति धूमविशिष्टे वह्निवैशिष्ट्यमिति मनसा परिच्छेदानन्तरं परामर्शोत्पाद इत्यङ्गीकरणीयम्। अतएव "चिन्तामणिकारेणानुमितिचरमकारणलिङ्गपरामर्शप्रयोजकशब्दज्ञानजनकवाक्यत्वं न्यायत्वं। तादृशशब्दज्ञानजनकवाक्यत्वमवयवत्वमिति" तु लक्षणमुपन्यस्तं। यद्यपि विप्रतिपत्तेः पक्षपरिग्रहे हेत्वभिधानस्याकाङ्क्षितत्वेन प्रथमं हेत्वभिधानमेवोचितमिति प्रतिज्ञा न न्यायाङ्गं। तथापि समयबन्धादिना विप्रतिपत्तेरन्तरितत्वेन हेतुवाक्यस्य निगप्रतियोगिकान्वयबोधासमर्थत्वात् प्रतिज्ञान्यायाङ्गं। पर्वतो वह्निमान्कुत इत्याकाङ्क्षायां प्र ानन्तरं हेतूपन्यासः अत्र च पर्वतो वह्निमानिति प्रतिज्ञाया ज्ञान ाङ्गौ लक्षणा धूमादित्यत्र हेतुत्वं पञ्चम्यर्थः तस्य च निरूपकतया प्रतिज्ञैकदेशार्थे ज्ञाने अन्वयः। ज्ञायमानलिङ्गस्यानुमानत्वनये धूमपदं यथाश्रुतमेव लिङ्गज्ञानस्यानुमानत्वनये तु धूमपदस्य धूमज्ञानमर्थः एवं च धूमज्ञानजन्यंज्ञानविषयवह्निमानिति वाक्यैकवाक्यतया प्रतिज्ञाहेतुभ्यामन्वयबोध इत्यपि कश्चित्। केचित्तु प्रतिज्ञायां ज्ञाने न लक्षणा प्रथममनाकाङ्क्षितत्वात् किंतु धूमपदस्य धूमज्ञाने पञ्चम्यास्य ज्ञाप्यत्वे लक्षणा। सुब्विभक्तावपि लक्षणास्वीकारादित्याहुः। एतन्मते। सर्वलाक्षणिकस्थले अन्वयबोधानङ्गीकारेण सिद्धान्तविरोधः। वस्तुतस्तु पञ्चम्याः ज्ञानज्ञाप्यत्वमर्थः धूमस्य च ज्ञाने अन्वयः संसर्गिकस्थले एकदेशेप्यन्वयस्वीकारादित्यत्रमप्रकृतविचारेण कथमस्य

गमकत्वं व्याप्या पक्षधर्मतया चेति तत्र व्याप्तिप्रदर्शनायोदाहरणप्रयोगः। तत्र प्रथमयत्पदेन यद्बोध्यते द्वितीययत्पदेन तदन्यद्बोध्यते एवंच धूमवन्महानसं वह्निमत् धूमवन्महानसान्यत्वं धूमवह्निमदिति बोधे यावत्साधनाश्रयाश्रितसाध्यसंबन्धरूपाव्याप्तिः उदाहरणेन प्रदर्श्यते। तत्रा च यत्पद एव वीप्सा न तुतत्पदेपि विरूपोमस्किृतयोरपि एकेन तत्पदेन परामर्शसंभवात् सर्वनाम्नां बुद्धिस्थवाचकत्वादिति। अतएव "यं यं पार्थं प्रतिजहि जगन्नाथ नम्रस्य तन्मे" इत्युक्तं। ननु "सञ्चारिणी दीपशिखेव रात्रौ यं यं व्यतीयायपतिंवरा सा। नरेन्द्रमार्गाट्ट इवप्रपेदे विवर्णभावं ससभूमिपालः" इत्यत्र सासाङ्ख्यानम्रमुखो बभूवेत्यादौच" कथं तत्पदे वीप्सेति चेत् यत्रप्रत्येकं यत्पदोपस्थापितं प्रत्येकरूपेणैव तत्तत्पदं परामृशति तत्र तत्पदेपि वीप्सा यथा ससभूमिपाल इत्यादौ यत्र तुसामान्यरूपेणैव तत्र नतत्पदेपि वीप्सा। यथा यद्यत्पापं प्रति जहिजगन्नाथेत्यादाविति कश्चिन्न दोषः। वस्तुतस्तु व्यापकसामानाधिकरण्यरूपव्याप्तिबोधकत्वमुदाहरणस्य पदार्थविधया वाक्यार्थविधया वा न संभवतीति वह्निपदस्य धूमव्यापकवह्नौ लक्षणा वीप्सा च तात्पर्यग्राहिका। यत्र यत्पदसमभिव्याहृतपदार्थतावच्छेदकव्यापकत्वं विधेये भासते तत्र तत्पदे न वीप्सा। यथा यायो धूमवान्,सोऽग्निमानित्यत्र यत्पदसमभिव्याहृतधूमवत्पदार्थतावच्छेदकीभूतधूमव्यापकत्वं विधेये वह्नौभासते। यत्र तु यत्पदसमभिव्याहृतपदार्थतावच्छेदकधर्मसामानाधिकरण्यं विधेये भासते तत्र तत्पदे वीप्सा यथा "ससभूमिपालः,, यां यां प्रियः प्रैक्षत कातरं रात्रौ सा सा क्रिया नम्रमुखी बभूवेत्यादौ,, च तत्रयत्पदसमभिव्याहृतपदार्थतावच्छेदकीभूतभूमिपालत्वकातरात्रित्वव्यापकत्वस्य विवर्णभावनम्रमुखित्वरूपविधेययोर्बाधादन्वयासंभवेन भूमिपालत्वादिसामानाधिकरण्येनैव विधेयभानमावश्यकमिति तत्र तत्पदेपि वीप्सेति रहस्यम्। उदाहरणानन्तरं पक्षधर्मतापदर्शनायोपनयप्रयोगविशिष्टपरामर्शस्यानुमितिहेतुत्वव्यवस्थापनेनोदाहरणान्तएव न्यायप्रयोग इति मीमांसकमतंनिरस्तं बोध्यम्। उदाहरणोपनयरूपमवयवद्वयमिति बौद्धमतमप्यसमञ्जसं कथायामाकाङ्क्षाक्रमेणैवाभिधानात् प्रतिज्ञादेरुपन्यासस्यावश्यकत्वात्। धूमादित्येव प्रयोगो न तुधूमवत्त्वादिति मतुपो व्यर्थत्वादिति

ये मन्यंते तेषां मते अत्र वह्निव्याप्यधूम इत्येवोपन्यासः स्यात् । ननु वह्निव्याप्यधूमवानयमिति मतुपो व्यर्थत्वादित्यवधेयम् । अबाधितत्वासत्प्रतिपक्षितत्वबोधनाय निगमनप्रयोगः । नच बाधाभावस्य तदभावव्याप्यवत्ताज्ञानाभावस्य वा हेतुत्वं न तु तज्ज्ञानस्येति किं तद्बोधनेनेति वाच्यं । यदवगमे सति यन्न भवति तत्तदभावज्ञानसाध्यमिति नियमेन तज्ज्ञानस्य हेतुत्वात् । नच घटाभावज्ञाने घटप्रत्यक्षानुदयेन तत्रापि घटाभावाभावज्ञानस्य कारणत्वापत्तिरिति वाच्यं । परोक्षज्ञाने तादृशनियमाभ्युपगमात् । अत्र केचित् । पक्षे साध्याभावो बाधः तदभावस्य साध्यमेवेति पक्षे साध्यवत्ताज्ञानमनुमितिहेतुरित्यायातं तथाच सिद्धसाधनं यदि च पक्षे साध्याभावप्रमा बाधः तथापि तदभावज्ञानस्य विना पक्षे साध्यनिश्चयसंभवितया सिद्धसाधनतादवस्थ्यादिति । यदवगमें सति यन्न भवति तत्तदभावज्ञाने सति भवत्येवेति बाधाभावज्ञाने सति बाधज्ञानानुदयेन बाधज्ञानप्रतिबन्धाभिप्रायेण बाधितत्वादिबोधनं ननु तज् ज्ञानस्य हेतुत्वाभिप्रायेणेति वदन्ति । केचित्तु अनुमितिप्रमायां गुणानुरोधेन योग्यतावत् संशयनिश्चयसाधारणंमबाधितत्वादिज्ञानमपि हेतुरित्याहुः । नच तथापि निगमनेन कथमबाधितत्वादिबोधनम् अपदार्थत्वादवाक्यार्थत्वादिति वाच्यं । तस्माद्वह्निमानित्यस्यानुवादकत्वेन प्रयोजनजिज्ञासायांमबाधितत्वादिज्ञानमेव प्रयोजनतयाऽवसीयते तद्बोधस्य लक्षणया । यदि च मानसबोधादिनापि तात्पर्यनिर्वाहे लक्षणाकल्पनमन्याय्यं । यथा धूमोस्तीति वाक्यस्य वह्निपरस्यापि आनुमानिकादिवह्निबोधमादाय तात्पर्यनिर्वाहः तथा प्रकृतेपीति विभाव्यते तदा मानस एव तद्बोध इति रहस्यमत्रानुसन्धेयम् ॥ किञ्चिज्जल्पितमत्र तद्बहुतरं कृत्वा निदिध्यायतां दोषैरावृतमस्ति युक्तिनिवहं वाक्यं च दीयं बुधाः । चन्द्रः किं न कलङ्कितोपि भवति श्लाघ्यो जगत्यः सतां वालत्वं यदि तत्र हेतुरधुना बालीयसे तद्वचः ॥ इति श्रीमद्विद्वन्मुकुटमाणिक्यराजितीराजननीराजितपदद्वन्द्वन्यायवागीश श्रीदीक्षितश्रीकण्ठशर्मविरचितायां न्यायसिद्धान्तमञ्जरीदीपिकायामनुमानपरिच्छेदः समाप्तः ॥

अथोपमानं निरूप्यते तचोपमितिकरणमुपमानम् । उपमितित्वं चोपमिनोमीत्यनुभवसिद्धो जातिविशेषः । शब्दविषयकत्वाव्यभिचारिजातिमत्परोक्षत्वं वा । अनुमित्यादिवारणायजातिमदन्तम् । अनुमितित्वादीनां वक्ष्यमानित्यादिज्ञाने शब्दविषयकव्यभिचारित्वात् आवणवारणाय परोक्षपदं प्रत्यक्षान्यपरं । ननूपमितित्वमेव कथं श-

---

जीं श्रीगणेशायनमः । अनुमाननिरूपणेनानुमानजिज्ञासानिवृत्तौ अदृश्यत्वलक्षणत्व मुपमानेऽस्तीति अवसर मङ्गत्वाउपमानं निरूप्यते । अथेति अनुमाननिरूपणानन्तरमित्यर्थः । निरूप्यते । लक्षण स्वरूपप्रामाण्यादिभिर्निरूप्यते निरूपणप्रतिज्ञा च शिष्यावधानार्थैव तत्र उपमाने निरूपणीये अचोपमितिकरणत्वं लक्षणं लक्ष्यतावच्छेदक चोयमभिधद्वाच्यत्वं यद्वारा कर्त्रर्थाधिरूपेणान्यत्र च स्वरूपेणोपमितित्वस्य निवेशान्न भेदः अतरावोपमितित्वस्य द्वैविध्येनोल्लेखोक्तिः । ननुउपमितित्वस्यैवोपमितित्वलक्षणत्वे लक्षणलक्ष्यतावच्छेदकयोरभेदापत्तिरत उपाधिरूपेणापितदाह । शब्देति । अनुमित्यादिपदात् शाब्दादिपरिग्रहः वक्ष्यमानित्यादीति विशिष्योल्लेखननागगनशब्दादित्यादौ शब्दविषयकत्वसामानाधिकरण्यं सूचितम् अतएवशब्दविषयकत्वसमानाधिकरणजातिमदित्युक्तौ अनुमितित्वशाब्दत्वादेरपि तथात्वात्तद्वारणाया व्यभिचारीति व्याप्यत्वार्थकं गगनशब्दवदित्यनुमिति वृत्तितद्वात्तित्वस्य शब्दविषयकत्वव्याप्यत्वात् तदादायातिव्याप्त्यापत्त्या धर्मपदं विहाय जातीति । आवणेति । आवणप्रत्यक्षस्य शब्दविषयकत्वावश्यंभावेन आवणत्वस्य तादृशजातित्वादितिभावः ननु परोक्षत्वं इन्द्रियजन्यभिन्नत्वं तथाचासंभवः ज्ञानमात्रस्यमनोरूपेन्द्रियजन्यतयाउपमितेरपि परोक्षत्वाभावादित्यत आह । प्रत्यक्षान्यपरमिति । तथाचनमहीरूं परोक्षत्वं येनासंभवः स्यादितिभावः ननुकीदृशीषधीज्वरं हन्तीतिपृष्टे मुद्गपर्णसदृशीषधीज्वरंहन्तीत्युत्तरिते ज्वरहरणतादृशौषध्योः कार्यकारणभावउपमानेनावधार्यते एवंचेदृशस्थलेउपमितेः शब्दविषयकत्वाभावान्नोपमितित्वंशब्दविषयकत्वाव्यभिचारिणीजातिस्तथाचा संभवइत्याशङ्कते नन्विति । उपमितिरीति यत्तिपूरिच्छितिरेवाह उपमानफलंज्वरहरणौषध्योः कार्यकारणभावस्तु अनुमानेनैवावधार्यतेतिशब्दविषयकत्व २ प्य २नुपमि

ब्दविषयकत्वाव्यभिचारीति चेत् । उच्यते । उपमितिर्हि-पदवाच्यत्वविषयिका । नच पदमविषयीकृत्य तद्वाच्यं त्वं विषयीकर्तुमर्हीति । पदं च शब्दात्मकमित्युपमितेः शब्द विषयकत्वनियमः कुत इयमुत्पद्यत इतिचेत् । सादृश्यादिज्ञानादिति गृहाण । तथाहि । सामान्यतो गवयपदवाच्यत्वेकिञ्चिदस्तीति जानानो विशिष्यापरिचिन्वानः कीदृशो गवयपदवाच्य इति कंचित् पृच्छति तेन गोसदृशो गवयपदवाच्य इत्युक्तः सन् विपिनमनुसरन् यदा गोसदृश पिण्डं पश्यति तदा पूर्वानुभूतसादृश्यातिदेशवाक्यार्थं स्मरन् परिच्छिनत्ति सोयं गवयपदवाच्य इति सेयमुपमितिर्नाम । नचैतत्प्रत्यक्षं चक्षुरादिव्यापारविरामेपि जायमानत्वात् । नच मानसं ततो विलक्षणतया अनुभूयमानत्वात् । अन्यथाऽनुमितेरपि मानसत्वापत्तेः । नाप्यनुमितिः ।

तित्वस्याचतमितिनासंभवइतिभावः अतिदेशवाक्यार्थज्ञानं कारणं सादृश्यज्ञानं सहकारि अतिदेशवाक्यार्थस्मृतिर्व्यापारः उपमितिः फलमिति मं प्रदायमतं वक्ष्यति आवश्यकत्वात्सादृश्यज्ञानं करणमतिदेशवाक्यार्थस्मृतिर्व्यापारः उपमितिः फलमिति नवीनमतेनाह । सादृश्यज्ञानादिति । तथाच सादृश्यज्ञानं करणमिति भावः प्रत्यक्षादन्तर्भावासंभवात् परिशेषेण तस्या अतिरिक्तत्वं व्यवस्थापयितुं प्रणालीमारभते । नह्येतदिति । प्रत्यक्षमिति । यद्यपि प्रत्यक्षसामान्यमध्ये मानसमपि निविष्टमेव इत्यं च न मानसमिति पृथगुल्लेखासोऽयुक्तः तथापि तद्व्यापारविरामेपि जायमानत्वादिति हेत्वनुपपत्त्या पृथक् मानसं निराकृतं गोवलीवर्दन्यायेन चात्र प्रत्यक्षपदं मानसान्यप्रत्यक्षपरमिति ध्येयम् । ततः । मानसात् । अनुभूयमानत्वात् । उपमित्यनन्तरं उपमिनोमीत्यनुव्यवसायोदयात् मानसानन्तरं तादृगप्रतीत्यनुदयान्मानसत्वं तस्याइत्यर्थः अनुभवानादरेत्याह । अन्यथेति । अनुभवानादरे इत्यर्थः । अनुमिनोमीत्यनुव्यवसायस्य मानसानन्त-

व्याप्तिज्ञानाद्यभावाद्युत्पत्तेः । नापि शाब्दं गवयत्वविशिष्टोपस्थापकपदाभावात् । उपमितौ अयं गवयपदवाच्य इत्याकारिकायां गवयत्वावच्छेदेन गवयपदवाच्यत्वावगाहनात् न तु गोसादृश्यावच्छेदेन तस्य गौरवेणानवच्छेदकत्वात् । अन्यथा प्रतीतिमूलव्यवहारप्रसङ्गः । नवा स्मृ-

---

वानुदयेनानुमितेरतिरिक्तवर्त्मसिद्धेः अनुभवापलापे तु तस्या अप्यतिरिक्तत्व विलायेतेति भावः व्याप्तिज्ञानादीत्यादिपदात्पक्षधर्मताज्ञानपरिग्रहः । पदाभावादिति । शाब्दबोधसामान्ये पदजन्यपदार्थोपस्थितेर्हेतुतया तच्छून्यकाले चोपमित्युत्पत्त्या नोपमितेस्तद्रूपत्वमिति भावः ननु गोसादृश्या गवयपदवाच्य इत्याकारकं गोसादृश्यांशे गवयपदवाच्यत्वावगाहि ज्ञानमुपमानं तत्र गोसादृश्यावच्छिन्ने गवयपदवाच्यत्वावगाहिनी उपमितिरुत्पद्यते तत्र च गवयत्वविशिष्टोपस्थापकपदाभावेपि गोसादृश्यविशिष्टोपस्थापकपदसत्त्वात् शाब्दत्वे बाधकाभावइत्यत उपमित्याकारं परिच्छिनत्ति । उपमितावितिं । अयमिति । गवय इत्यर्थः । तथाचोक्तेरुपमितेरित्यावच्छेदेन गवयपदवाच्यत्वावगाहनादित्युक्तिविरोधात् अन्यथा अप्रतीतमूलकव्यवहारापत्तेरिति दोषानुद्धारात्च नतिवति । ननु गोसादृश्यावच्छेदेनगवयपदवाच्यत्वावगाहनमिति विभक्तिविपरिणामेनान्वयः । तस्य । गोसादृश्यस्य । गौरवेण । गवयत्वापेक्षया गौरवेण । तदनवच्छेदकत्वात् । गवयपदवाच्यत्वानवच्छेदकत्वात् ननु गवयत्वस्यावच्छेदकत्वं तदवच्छेदेन गवयपदवाच्यत्वस्याप्रतीत्या तदुपपत्तये प्रमित्यन्तरस्वीकरणीयमिति महद्गौरवमिति तदपेक्षया गोसादृश्यस्य गवयत्वापेक्षया गुरुत्वेपि अवच्छेदकत्वकल्पनं ज्यायः धर्मिकल्पनातो धर्मकल्पनायालघीयस्त्वमिति न्यायादित्यत आह । अन्यथेति । गोसादृश्यस्य अवच्छेदकत्वं स्वीक्रियतेप्रमान्तराकल्पने इत्यर्थः । व्यवहारः । शाब्दबोधः । शब्दप्रयोगो वा । न प्रतीतमूलं शक्तिर्यस्येत्यर्थः शक्तिज्ञानामूलकं एवं स्यादिति यावत् अत्र गोसादृश्यावच्छेदेनैव गवयपदवाच्यत्वावगाहनात् अतिदेश्यवाक्यार्थज्ञानोत्तरोत्पन्नज्ञानात् गवयइति पदाच्छाब्दबोधोऽनुभवसिद्धो विलीयेत तत्प्रकारकशाब्दबोधे तत्प्रकारकशक्तिग्रहस्यैव हेतुतया गवयत्वप्रकारकशक्तिग्रहाभावात् एवं व्यवहारं प्रति व्यवहर्तव्यज्ञानस्य हे-

तिरियं । पूर्वमननुभवात् । अतो अतिरिक्तैवेयं । तस्याः करणं सादृश्यविशिष्टे तत्पदवाच्यरूपवाक्यार्थानुभवः । तत्तस्यातिहारं गवयत्वादिरूपावच्छेदकविशिष्टे सादृश्यज्ञानं च तत्प्रकारीति संप्रदायः । तच्चोपलक्षणं । वैधर्म्यज्ञानादुपमितेत्युत्तत्तेः । यथा कीदृशी पृथ्वीति शिष्येण पृष्टे ज-

---

तुतया तत्र शब्दबाधाभावात्तदुत्तरतादृशव्यवहारानुपपत्तेरिति गवयत्वावच्छेदेनैव गवयपदवाच्यत्वावगाहिज्ञानमुपेयं गवयत्वविशिष्टोपस्थापकपदाभावान्नगादात्मकमिति । एतेनशब्दत्वानराकरणप्रस्तावे गवयपदवाच्यतावच्छेदकत्वं गवयत्वस्य गोसादृश्यस्य वेति विचारस्य प्रकृतानुपयोगित्व अग्रे च उपमितेत्याकारप्रदर्शनस्यानौचित्यादि यपास्तम् उक्तमदुक्तवय व्ययैव सर्वसामञ्जस्यादिति ध्येयम् नापि स्मृतिरित्याह । नवेति । अनुभवागोचरस्य स्मृत्यगोचरत्वादिति भावः तस्मात्प्रत्यक्षादिषु अन्तर्भावासंभवादतिरिक्तैव । अनुमित्यादिभ्यो अतिरिक्तैव । इयम् । अयं गवयपदवाच्य इति प्रतीतिः प्रत्यक्षादिप्रतीतिभ्यो भिद्यते तद्विरुद्धधर्मवत्वादित्यनुमानं बोध्यम् । संप्रदायमतमाह । तस्याः करणमिति । सादृश्येति । सादृश्यविशिष्टे । सादृश्याश्रये गोसदृशो गवयपदवाच्य इति वाक्यार्थानुभव इत्यर्थः । ततस्मृतिः । तादृशवाक्यार्थस्मृतिः । हारं । व्यापारः । गवयत्वेति । अयं । गोसदृशइत्याकारकसादृश्यनिश्चयः । अतिदेशवाक्यार्थानुभवरूपो उपमानसहकारीत्यर्थः । ननु सादृश्यकरणकज्ञानवत् वैधर्म्यकरणकज्ञानस्याप्यतिरिक्तत्वापत्तिरित्यत आह । एतच्चेति । एतत्सादृश्यज्ञानं वैधर्म्यज्ञानजन्योपमिति व्युत्पादयति । यथेति तच्छब्दार्थेति । जलादिविधर्मगुणवती पृथ्वीति गुरुवाक्यार्थस्मरणादित्यर्थः एवं गन्धवतीति पूर्वं जलादिविधर्मगुणत्वेन इदानीं तु गन्धत्वेनेतिभेदः । इत्युक्तमिति इति । गुरुणो[illegible] इत्यर्थः । ननु वैधर्म्यज्ञानजन्यज्ञानस्योपमितित्वस्वीकारे सादृश्यवैधर्म्यज्ञानयोः परस्परजन्योपमितौ व्यभिचारेण कथं करणत्वसंभव इत्यत आह । तस्मादिति । सादृश्यज्ञानजन्योपमितेरिव वैधर्म्यज्ञानजन्योपमितेरप्यनुभवसिद्धतया उपलापानर्हत्वादित्यर्थः । यत्किञ्चिदिति । सादृश्यवैधर्म्याद्यन्यतरविशिष्टे इत्यर्थः । विशिष्य । विशेषधर्मपुरस्कारेण । अपरिचितेति । अनिर्णीतशक्तिकपदवाच्यत्वरूपेत्यर्थः ग

लादिविधर्मगुणवता गुरुणा उच्चरितः सन् यदा जलादि-
र्विधर्मगुणवतीत्यनुभवति तदातच्छब्दार्थस्मरणादस्य उ-
पमितिः संपद्यते इयं पृथिवी पदवाच्येति। एवं गन्धवता
पृथिवीति उच्चरितेपि ज्ञेयं। तस्माद्यत्किञ्चिद्धर्मविशिष्टे
विशिष्टा विदितसङ्गतिकपदवाच्यतारूपवाक्यानुभवः क-
रणं किञ्चिद्विशिष्टतद्धीः सहकारिणी। यदा सत्य-

वयपदवाच्यं किञ्चिदस्तीति सामान्यतः शक्तिनिर्णयात् विशिष्येत्युक्तम् अ-
तएव सामान्यधर्मप्रकारकज्ञानस्यावान्तरधर्मप्रकारकजिज्ञासां प्रति हेतुत-
या विशेषधर्मप्रकारकजिज्ञासाबोधकः कौटस्यो गवय इति प्रश्नेप्युपपद्यते
इति बोध्यम्। करणमिति। उपमितिसामान्ये सादृश्यवैधर्म्यान्यतरधर्मि-
तावच्छेदककविशिष्यानिर्णीतशक्यतावच्छेदककपदवाच्यत्वरूपवाक्यार्था-
नुभवः करणमित्यर्थः। विसदृशेष्युपमिति प्रसङ्गइत्यत आह। किञ्चिद्धर्म-
विशिष्टे इति। गवयत्वादिरूपधर्मविशिष्टे इत्यर्थः। तद्दत्ताधीरिति। यद्विशि-
ष्टे पदवाच्यत्वानुभवस्तद्दत्ताधीरित्यर्थः। गवयत्वादिविशिष्टे सादृश्यधीरिति
यावत्। ननु एकधर्मविशिष्टे सादृश्यज्ञाने धर्मान्तरविशिष्टे पदवाच्यत्वा-
वगात्यपमित्यनुदयात् यद्धर्मावच्छेदेन सादृश्यज्ञानं तद्धर्मावच्छेदेनैव
पदवाच्यत्वावगाहिनी उपमितिरित्युपेयम् एव च गवयत्वादिरूपलघुधर्मा-
नुपस्थितौ यदा गुरुधर्मविशिष्टे एव सादृश्यज्ञान तदा तदवच्छेदेनैव प-
दवाच्यत्वावगाहित्युपमितिः स्यादित्यत्रेष्टापत्तिमाह। यदाचेति। लघुध-
र्मे। गवयत्वादिरूपजातौ। तदस्फुरणे। गवयत्वास्फुरणे। गुरुधर्मेति। विलक्ष
णसंस्थानवत्वरूपधर्मविशिष्टे इत्यर्थः। सादृश्यादीत्यादिपदात् वैधर्म्यपरि
ग्रहः। तदवच्छेदेनैव। विलक्षणसंस्थानवत्वरूपगुरुधर्मावच्छेदेनैव। वाच्यता
ग्रहः। गवयपदवाच्यतायग्रहसगुरुधर्मविशिष्टे पदवाच्यताग्रहः। बाधा-
दिति। लघुधर्मोपस्थितौ लघुधर्मे शक्यतावच्छेदके संभवति गुरुधर्मे त-
त्स्वीकारस्यान्यायतया लघुधर्मविशिष्टएव पदवाच्यत्वावगाहिज्ञानमुत्प-
द्यते गुरुधर्मविशिष्टविषयकज्ञानेत्वप्रामाण्यज्ञानं तदनन्तरजायतइति
भावः। केचित्तु लघुधर्मानुपस्थितौ गोसादृश्यावच्छेदेनापि पदवाच्यत्वा
वगाहनात् सादृश्यं गौरवेणानवच्छेदकमित्युक्तमयुक्तमित्यत आह। यदा-
चेति। गुरुधर्मविशिष्टे। सादृश्यादिधर्मविशिष्टे। तदवच्छेदेनैव। सादृ-

पि लघुधर्मेतदस्फुरणे गुरुधर्मविशिष्ट एव सादृश्यादि-ज्ञानं जायते। तदा तदवच्छेदेनैव वाच्यताग्रहो जायते। स भ्रमो गौरवेण बाधादिति संक्षेपः॥ इत्युपमानम्॥

श्यावच्छेदेनेवेत्यर्थः। इति चाचक्षते तदसत् गुरुधर्मविशिष्ट एव सादृश्य ज्ञानं जायते इत्यस्यासङ्गत्वापत्तेः गोसदृशो गोसदृश इति सादृश्यज्ञानस्या-संभवित्वादिति दिक्।

ननु संभवत्येवं यद्यनुमानस्य प्रमाण्यं अनुमानाधीनशक्तिग्रहमूलकत्वाद्वाक्यार्थानुभवरूपोपमानस्य तदेव तु न प्रमाणाभावात् एवं च नोपमानशब्दयोरपीति व्याहत चत्वारि प्रमाणानीति तथाहि वन्ह्यादि-गोचरप्रवृत्तेर्वह्निव्याप्यवत्तापरामर्शरूपविशेषदर्शनमूलकप्रत्यक्षादेवोपपत्ते र्नानुमानस्य प्रमाणत्वं नचान्वयव्याप्तिज्ञानकाले साध्यज्ञानस्यावश्य-कत्वात् वन्ह्यादिविषयकोपनीतभानोपपत्तावपि इतरभेदज्ञानमूलकाली-नइतरव्यापकीभूताभावप्रतियोगिपृथिवीत्ववती पृथिवीत्यादिव्यतिरेकव्या प्तिज्ञानकाले इतरभेदज्ञानाभावात्तदुपनीतभानासंभवेन तत्र प्रमित्य-न्तरस्वीकार आवश्यक इति वाच्यम् अभावत्वादिसामान्यलक्षणसन्निक-र्षत्वादेवेतरभेदगोचरप्रत्यक्षोपपत्तेः एवं घटमानयेति वाक्यश्रवणान-न्तरं घटकर्मत्वानयनकृत्यादीनां परस्परसंसर्गविषयकविलक्षणप्रमितिर-सिद्धा शाब्दबोधपूर्वं पदार्थोपस्थिते रावश्यकतया तादृशोपनीतभानेनैव-निर्वाहात् नच संसर्गोपस्थितेरनैयत्यात् कथं संसर्गबोध इति वाच्यम् बाधाभावादिबलात् तस्यापि संसर्गतया भाने बाधकाभावात् नच त-दुपनीतभानं प्रति तदुपनायकज्ञानत्वेन कार्यकारणभावे व्यभिचार इति वाच्यम् सांसर्गिकविषयताभिन्नाऽलौकिकविषयतायास्तज्जन्यताव-च्छेदकत्वेन व्यभिचाराभावात् प्रमित्यन्तरस्वीकारे तन्नियामकबहुतर-कार्यकारणभावकल्पनापेक्षया सांसर्गिकविषयताभेदनिवेशे लाघवस्या-तिस्फुटत्वात् योग्यताज्ञानस्य शाब्दसामान्यहेतुतया संसर्गविषयकयो-ग्यताज्ञानस्य सत्त्वात्सांसर्गिकविषयताभेदानिवेशेपि क्षत्यभावाच्च एवं ग-वयत्वविशिष्टे सादृश्यज्ञानसहकृतगोसदृशो गवयपदवाच्य इति ज्ञानोत्तरो-त्पन्नमयं गवयपदवाच्य इति ज्ञानमप्युपनीतभानमेवेति कथमेतदिति चेदत्राहुः लिङ्गपरामर्शोत्तरोत्पन्नप्रमित्युत्तरमनुमिनोमीत्यनुव्यवसाय-

स्तावदनुभवसिद्धः तद्विषयीभूतानुमितित्वाख्यजातिविशेषावच्छिन्नकरणतयानुमानस्य प्रमाणान्तरत्वम् अथ वह्निमान् पर्वतो घटवान् इत्यनुमित्यनन्तरं पर्वते वह्निमनुमिनोमीत्यनुव्यवसायापत्त्या वह्निनिष्ठविधेयत्वाख्यो विलक्षणविषयताविशेष उपगन्तव्यः यदभावादनन्तरं न तादृशानुव्यवसायः एवं चानुमिनोमीत्यनुव्यवसायस्य तादृशविषयताविशेषविषयकत्वेनोपपत्तेरतथानुमितित्वजातिस्वीकारेणेति कुतस्तदवच्छिन्नकरणतया प्रमाणान्तरत्वमिति चेन्न। लिङ्गपरामर्शविरहे तादृशविषयताकज्ञानानुत्पत्त्यातदवच्छिन्नकरणतयैव। तस्य प्रमाणान्तरत्वमिति वस्तु तस्तु अनुमिनोमीत्यनुव्यवसायस्य तादृशविषयतामात्रविषयकत्वे आपत्तिशाब्दबोधोत्तरमपि तादृशानुव्यवसायापत्तेः अनुमित्यापत्ति शाब्दबोधादिषु तादृशविषयताऐक्यात् अनुमितित्वजात्यङ्गीकारेतु आपत्त्यादिषु तादृशजात्यसत्त्वात्नतादृशानुव्यवसायापत्तिरिति तदवच्छिन्नकरणतया अनुमानस्य प्रमाणान्तरत्वमावश्यकमेव एवं शब्दश्रवणानन्तरंजायमानज्ञानानन्तरं शाब्दयामीत्यनुव्यवसायोत्पत्त्या तद्विषयतया सिद्धशाब्दत्वाख्यजातिविशेषावच्छिन्नकरणतया शाब्दप्रमाणसिद्धिः एवमुपमिनोम्यनुव्यवसायबलादुपमानस्यापि प्रमाणान्तरत्वमिति नव्यायास्तु अनुमितित्वादि तथापि तत्प्रत्यक्षत्वव्याप्यमेवास्तां तदवच्छिन्नकरणस्य च न प्रमाणान्तरत्वं अथानुमित्यादेर्मानसत्वे तदुत्तरं साक्षात्कारोमीत्यनुव्यवसायापत्तिः अनुमित्यादेः साक्षात्कारत्वादिति चेन्न। लौकिकविषयताशालिसाक्षात्कारस्यैव तादृशप्रतीतिविषयत्वात् अत एव सुरभि चन्दनमित्यादुपनीतभानानन्तरं चन्दनं पश्यामि न सौरभमिति सार्वजनीनः प्रत्ययः सङ्गच्छते तथ च लौकिकविषयतायाः साक्षात्कारत्वव्यञ्जकतया नानुमित्याद्युत्तरं साक्षात्करोमीति प्रत्ययः अथैवं तत्र प्रत्यक्षत्वसत्वे प्रमाणाभावः साक्षात्करोमीति प्रत्ययाभावेन प्रत्यक्षस्याप्रयोजकत्वाच्च अनुमानस्यापि मानत्वेन वक्तुमशक्यत्वात् अत्र कश्चित् अनुमितित्वादेः प्रत्यक्षत्वव्याप्यत्वे लाघवमेव तथाहि अनुमितिसामग्रीकाले प्रत्यक्षसामग्रीकाले प्रत्यक्षवारणायानुमितिसामग्रीः प्रत्यक्षं प्रति प्रतिबन्धकत्वं कल्प्यनीयं प्रत्यक्षत्वव्याप्यत्वे त्वनुमित्यात्मकप्रत्यक्षस्यैवोत्पत्तात तदकल्पनमयुक्तं लाघवमत्तुषमेवेति तदसत् अनुमितित्वस्य चाक्षुषत्वव्याप्यत्वेत्वाचपरामर्शोत्तरोत्पन्नज्ञानेऽनुमितित्वानापत्तेः चाक्षुषत्वस्य तद्व्याप्यत्वमतचासभवि परस्परव्यभिचारिणोस्तयोरेकत्र समावेशो सांकर्यापतेरिति चा

क्षुषत्वादिविरुद्धं तदुपगन्तव्यम् एवं चानुमितिसामग्रीकाले चाक्षुषादि वारणाय चाक्षुषादिकं प्रति अनुमितिसामग्राः प्रतिबन्धकत्वं कल्पनीयं एवं च सामान्यतः प्रत्यक्षं प्रत्यनुमितिसामग्राः प्रतिबन्धकत्वं मयापि न कल्प्यते इति क्लिलाघवं ननु अनुमितित्वादेर्मानसत्वव्याप्यत्वमेवास्तां अनुमितिसामग्रीकाले मानसवारणाय मानसं प्रत्यनुमितिसामग्री-प्रतिबन्धकत्वकल्पने गौरवं मन्यते तु अनुमित्यात्मक मानसस्यैवोत्पादेन तत्रेष्टापत्तेः नच वह्न्यनुमितिसामग्रीकाले घटादिमानसवारणाय घटादिमानसे प्रतिबन्धकत्वस्यावश्यकतया घटादिकमनिवेश्य मानसत्वमेव तत्प्रतिबध्यतावच्छेदकमिति वाच्यम् घटादिमानसं जायतामितीच्छा-मात्रस्य तज्जनकत्वानुरोधेन विषयं निवेश्यैव प्रतिबन्धकत्वकल्पनस्यावश्यकत्वात् एवं शाब्दादिस्थलेपीति मैवं घटादिचाक्षुषसामग्रीकाले वह्निमान-सानुदयेन चाक्षुषसामग्राः मानसं प्रति प्रतिबन्धकतायां घटादिचाक्षु-षसामग्रीकाले वह्न्यनुमित्युत्पत्तेरनुमित्यन्यमानसत्वमेव चाक्षुषसामग्री प्रतिबध्यतावच्छेदकं भवतावाच्यमित्यनुमित्यन्यत्वनिवेशे गौरवात् एव-मनुमितिसामग्रीकाले अनुमित्यन्यमानसवारणायानुमित्यन्यमानसत्वमनु मितिसामग्रीप्रतिबध्यतावच्छेदकमुपेयमित्यनुमितिसामग्राः प्रतिबन्धक त्वकल्पनमावश्यकमित्यन्यत्वनिवेशे गौरव पुनरधिकम् एवं शाब्दोपमिति स्थले शाब्दान्यत्वोपमित्यन्यत्वनिवेशे गौरवमिति तेषां न मानसान्तर्भाव इति सङ्क्षेपः चत्वारि प्रमाणानीति दिक् ॥

इति श्रीदीक्षितश्रीकण्ठधर्मविरचितायां न्यायसिद्धान्तमञ्जरीदीपि कायामुपमानपरिच्छेदस्समाप्तः ॥ ३ ॥

अथ शब्दो निरूप्यते तच्च शाब्दप्रमितिकरणं शब्दः

श्रीगणेशायनमः ॥ जटाजूटलसद्गाङ्गजलमस्तकभूषितः ॥ पुनातु गिरिजाप्रेमपात्रमेकमनेकधा ॥ १ ॥ उपजीव्योपजीवकभावसङ्गत्या उपमाननिरूपणानन्तरं शब्दं निरूपयन् गिष्यावधानाय प्रतिजानीते । अथेति । अत्र ज्ञायमानपदस्य शब्दप्रमाणतया पदे उपमानोपजीवकत्वाभावात्फलयोः स्वरूपफलयोश्च सङ्गतिर्बोध्या । तस्याश्च फलनिष्ठत्वेपि स्वाश्रयकरणत्वात्मकपरंपरासम्बन्धेन करणनिष्ठत्वात्करणयोरानन्तर्यमवसेयं तथाहि शक्तिपरिच्छित्तिरेवोपमितिः तस्याश्च सर्वस्याएव शाब्दबोधजनकत्वेन फलयोरुपजीव्योपजीवकत्वसंभवः । एवं स्वरूपफलयोरप्यतिदेशवाक्यार्थज्ञानरूपोपमानप्रमाणस्योपमितिद्वारा शाब्दबोधोपजीव्यत्वादिति । केचित्तु । ज्ञायमानं पदं करणमित्यस्य शक्तत्वेन ज्ञायमानमित्यर्थात् सविशेषणेहि विधिनिषेधौविशेषणमुपसंक्रामतः सतिविशेषे बाधे इति न्यायेन स्वर्गौंध्वस्तइतिवद्विशेषणीभूतशक्तिज्ञानमादायोपमानोपजीवकत्वसम्भवेन स्वरूपतउपजीवकत्वमपिसङ्गतिरित्याहुः ॥ पदज्ञानस्य शब्दप्रमाणत्वाङ्गीकर्तृनवीनमतेतूपमितेः शक्तिमत्पदविषयकत्वेनातिदेशवाक्यार्थज्ञानात्मकोपमानप्रमाणस्यापमित्यात्मकशब्दप्रमाणे उपजीव्यत्वेनस्वरूपतउपजीवकत्वमक्षुण्णमेवेति द्रष्टव्यं । नन्वतिदेशवाक्यरूपशब्दप्रमाणस्यापि अतिदेशवाक्यार्थज्ञानरूपोपमानोपजीव्यत्वादुपमानमेवादौ निरूपितं नतु शब्दइत्यत्र किं विनिगमकमिति चेन्न । प्रमाणतावच्छेदकधर्मावच्छिन्नोपजीव्यतानिरूपितोपजीवकताया एवात्र सङ्गतित्वात् । प्रमाणतावच्छेदकधर्मश्चेन्द्रियत्वादिः । अवच्छिन्नत्वं च व्यापकत्वम् । एवंचोपमानस्य सङ्केतमात्रग्राहकतया सर्वस्यैवोपमानस्य शब्दप्रमाणोपजीव्यत्वं शब्दप्रमाणस्य नतु सर्वस्यातिदेशवाक्यार्थज्ञानात्मकोपमानोपजीव्यत्वं घटमानयेति शब्दे तदभावात् । न च पदज्ञानत्वेन शाब्दत्वावच्छिन्नं प्रतिहेतुतया घटमानयेति शब्दनिरूपितशाब्दत्वावच्छिन्नकार्यतायाः उपमाने सत्त्वादुक्तदोषतादवस्थ्यमिति वाच्यं प्रमाणविभाजकोपाधिनियतधर्मावच्छिन्नाया उपजीवकतायाविवक्षितत्वात् । प्रमाणविभाजकोपाधिश्च साक्षात्कारकरणत्वादिः । अवच्छिन्नत्वं चात्र स्वरूपसम्बन्धविशेषः । इत्थं च शाब्दत्वादेरुपमितिकरणत्वनिश्चितत्वादतिदेशवाक्यार्थज्ञानत्वादेव तथात्वेन तस्य च प्रमाणत्वावच्छेदकशब्दप्रमाणत्वस्य व्यापकोपजीव्यतानिरूपितोपजीवकतायाः अनवच्छेदकत्वादुक्तदोषाभावात् ॥ केचित्तु । यच्चकोट्टगवयइति प्रश्नानन्तरं चित्रलेखादिना तादृशपिण्डप्रदर्शनं तच्चातिदेशकत्वं विनापि मानसरूपातिदेशवाक्यार्थज्ञानात्मकोपमानोदयेन व्यभिचाराच्छब्दोनोपजीव्यइति उप-

शाब्दत्वं शब्दात्प्रत्येमीत्यनुभवसिद्धो जातिविशेषः जन्य-

माने शब्दोपजीवकत्वाभावान्नविनिगमइति वदन्ति । तदसत् । शाब्दीच्छाकांक्षा शब्देनैवप्रपूर्यतइति न्यायात्तत्रापिईदृग्गवयइत्यभिप्रायिकशब्दकल्पनाया आवश्यकत्वाच्छाब्दी आकङ्क्षा शाब्दबोधगोचरेच्छा शब्देनैव विषयसन्निधारा निवर्त्यतइतितदर्थात् यदि च प्रष्टुर्यदाज्ञानमात्रेइच्छा नतुशाब्दबोधितत्रशब्दकल्पनानावकाशः तत्रशाब्दगोचरेच्छाया अभावेनतादृशन्यायस्यानवतारात् । नचातिदेशवाक्यार्थज्ञानस्याशाब्दत्वेनैवोपमितिकरणतया शब्दकल्पनमावश्यकं पदजन्यपदार्थोपस्थितेरेव शाब्दबोधे हेतुत्वात् । शाब्दी । शाब्दबोधोपयोगिनी । आकांक्षा । अन्वयप्रतियोग्युपस्थितिरूपा । शब्देनैव प्रपूर्यते । संपाद्यते इत्यर्थात् तादृशन्यायस्याप्यवतारादितिवाच्यम् । अतिदेशवाक्यार्थज्ञानस्य शाब्दत्वेनोपमितिकरणत्वे मानाभावात् । परित्यज्यनिश्चिताव्यभिचारकं रूपं गृह्यमाणव्यभिचारकेण कारणत्वकल्पनानुदयात् । न च निश्चयत्वमपेक्ष्य शाब्दत्वस्य लघुतया तत्रैवेशएव सम्यगिति वाच्यम् । सादृश्यज्ञानस्योपमानत्ववादिमतइवाति देशवाक्यार्थस्मृतिरूपव्यापाराभावेनैवानतिप्रसङ्गेन निश्चयत्वानिवेशे प्रयोजनाभावादिति विभाव्यते तथापि व्यवहारादिनापि शक्तिग्रहाच्छाब्दबोधोदयेन व्यभिचाराच्छब्दप्रमाणेपि उपमानोपजीवकत्वव्याघातः । क्वाचित्कोपजीवकत्वस्य च शब्दप्रमाणइवोपमानप्रमाणेपि सत्वादविनिगमतादवस्थ्यादिति न किंचिदेतत् । नन्वास्तु स्वतन्त्रेच्छस्य नियोगपर्यनुयोगानर्हत्वादितिन्याय एवविनिगमकः नतुसङ्गतिरिति तस्यासुलभत्वेपि नक्तंरिव्याहुरितिदिक् । निरूप्यतइति । लक्षणस्वरूपप्रामाण्यादिप्रकारकवर्त्तमाननिरूपणविषयः शब्दइत्यर्थः । तत्र । शब्देनिरूपणीये । शाब्देति । अत्र शब्दप्रमितिकरणत्वं लक्षणं प्रमाणपदवाच्यत्वं लक्ष्यतावच्छेदकं प्रमितिकरणत्वमात्रं प्रत्यक्षादावतिव्याप्तमतः शाब्देति । ननु शाब्दत्वं शब्दजन्यत्वं तथाच शब्दजन्यप्रमाकरणत्वं लक्षणं पर्यवस्यति तच्च विषयविधया शब्दजन्यप्रत्यक्षप्रमितिकरणेश्रोत्रेन्द्रियेऽतिव्याप्तमित्यत आह । शाब्दत्वं चेति । तथाच शाब्दत्वरूपजात्यवच्छिन्नप्रमितिकरणत्वं नतत्रेतिनातिव्याप्तिरितिभावः ॥ केचित्तु अतीतानागतशब्देऽनुसन्धानादपि शाब्दबोधोदयाच्छब्दो नकरणं किंतुशब्दज्ञानं इत्यं च शब्दजन्यप्रमाकरणत्वस्यलक्षणत्वेऽसम्भवः शब्दज्ञानजन्य प्रमाकरणत्वस्य लक्षणत्वे तु विषयविधया शब्दज्ञानजन्यप्रत्यक्षप्रमाकरणे मनस्यतिव्याप्तिरत आह । शाब्दत्वं चेतीत्याहुः । शाब्दत्वस्यप्रत्यक्षाद्यन्यत्वरूपत्वे गौरवादाह । शाब्दत्वं चेतीत्यपिकश्चित् । ननुलक्षणलक्ष्यतावच्छेदकयोरभेदइत्यत आह । जन्येति । केचित्तु ननु शब्दात् घटंप्रत्येमीत्येवानुभ-

पदधीजन्यत्वव्यभिचारी अनुभवत्वाऽव्यापकजातिशून्यत्वे सति पदविषयकत्वाऽव्यभिचारी जातिशून्यधीत्वं वा सत्यन्तं प्रत्यक्षानुमितिस्मृतीनां वारणाय तत्तादृशीनां प्रत्यक्षादिजातीनां सत्वात् । जातिशून्यत्वं अनुभवत्वाऽव्या-

---

वो नतुशब्दात् प्रत्येमीत्यात्मविशेषगुणानां विषयाविनर्मोकेणभानानुपगमात् तथाच शब्दजन्यघटादिविधेयकज्ञानत्वमेव तद्विषयोनत्वातिरिक्तशाब्दत्व जातिरित्यत आह । जन्यपदधीत्याहुः । तदसत् । शब्दलिङ्गकघटानुमितेरपि शब्दजन्यघटविधेयकज्ञानत्वेन तदुत्तरमपि शाब्द्यामीति प्रतीत्यापत्तेः शाब्दत्वजातिस्वीकारस्यावश्यकत्वात् तदस्वीकरमादायद्वितीय लक्षणप्रणयनेतदव्यापकशाब्दत्वस्येत्यग्रिमग्रन्थासङ्गतेश्चेत्यवधेयम् । जन्य पदधीजन्यत्वव्यभिचरिणी अनुभवत्वाव्यापिका च या जातिः प्रत्यक्षत्वादिस्तच्छून्यत्वे सति पदविषयकत्वाव्यभिचारिणीयाजातिरुपमितित्वं तच्छून्यधीत्वमिति लक्षणार्थः । अतिव्याप्तिं वारयति । तत्रेति । प्रत्यक्षानुमितिस्मृतिष्वित्यर्थः । तादृशीनां । जन्यपदधीजन्यत्वव्यभिचार्यनुभवत्वव्यापिकानां । सत्वादिति । तथाच तच्छून्यत्वाभावान्नातिव्याप्तिरितिभावः । स्मृतित्वस्य जातित्वमनुभवसामग्रीप्रतिबध्यतावच्छेदकत्वेन । ननुप्रत्यक्षादावतिव्याप्तिवारणा य जातिशून्यत्वे सतीत्यास्तां यदिच शाब्देपिज्ञानत्वादिजातिसत्वादसंभवदुक्तिः विभाव्यते तदानुभवत्वाव्यापकजातिशून्यत्वे सतीत्येवास्त्वत आह । जातिशून्य मिति । जातिशून्यत्वमात्रमित्यर्थः । अनुभवत्वेति । अनुभवत्वाव्यापकजातिशून्यत्वमात्रमित्यर्थः । अनुभवत्वादीनामिति । आदिना ज्ञानत्वगुणत्वसत्वादिपरिग्रहः । तथाचेदृशजातीनां सत्वाज्जातिशून्यत्वं न वक्तव्यमित्यर्थः । अत्र यद्यपि ज्ञानत्वादीनामित्येववक्तुमुचितं तथापि तद्व्यापकेत्यत्र तच्छब्देनानुभवत्वपरामर्शायानुभवत्वादीनामित्युक्तं । तद्व्यापकेति । अनुभवत्वाव्यापकेत्यर्थः । अनुभवत्वाव्यापकेत्यस्य व्यावृत्तिमाह । जन्येति । तथा । असंभवि । तादृगिति । जन्यपदधीजन्यत्वव्यभिचारीत्यर्थः । नन्वनुभवत्ववारणायानुभवत्वान्यत्वमेवोपादीयतामित्यत आह । आदीनामिति । आदिना ज्ञानत्वपरिग्रहः । अनुभवत्वाव्यापकत्वं चानुभवनिष्ठभेदप्रतियोगितावच्छेदकत्वं तेनानुभवत्वादि व्युदासः । नन्वनुभवत्वव्याप्यत्वमेव किं नोपादीयते कृतमव्यापकत्वघटितत्वेनेति चेन्न । व्यापकसामानाधिकरण्यरूपव्याप्यत्वनिवेशे गौरवात् । एवमनुभवत्वस्यापिस्वव्याप्यत्वात्तद्वारणाय

पक्षजातिशून्यत्वं चाऽसंभवि। अनुभवत्वादीनां तदव्यापकशाब्दस्य च सत्वात्। जन्यपदधीजन्यत्वव्यभिचारिजातिशून्यत्वमपि तथा। तादृगनुभवत्वादीनां सत्वात्। पदधीजन्यत्वव्यभिचारिअनुभवत्वापरजातिशून्यत्वं चानुमितावपि।

भेदघटितव्याप्यत्वस्यावश्यं वाच्यतयातिगौरवाच्च। मन्मतेऽनुभवनिष्ठभेदप्रतियोगितावच्छेदकत्वस्यानुभवत्वे असत्त्वेनानुपपत्त्यभावात्। स्मृतित्वादिव्याप्यारोपणाय चरमधीपदस्यानुभवपरत्वं विनानिर्वाहाच्चेति पदजन्यत्वव्यभिचार्यनुभवत्वाद्व्यापकजातिशून्यत्वमिति कृतेऽसंभवः। ज्ञायमानपदस्य करणत्वासंभवेन शाब्दत्वस्यापि पदजन्यत्वव्यभिचारित्वादतःपदधीति। इत्थंचजन्यपदस्यावृत्तिमाह। पदधीति। नन्वनुमितित्वस्यापि तादृशस्य सत्वात्कथमतिव्याप्तिरतआह। अनुमितित्वस्येति। भगवादिति। अनुमितित्वस्येश्वरीयपदधीजन्यत्वव्याप्यत्वेनात्मत्वादिजातिरेव तच्छून्यत्वं चानुमितावपीत्यतिव्याप्तिः। जन्यपदोपादाने चानुमितित्वस्यापि तथात्वेन तच्छून्यत्वाभावान्न क्षतिरिति भावः। अतः। अतिव्याप्त्यादितः। समुदितमिति। जन्यपदधीजन्यत्वव्यभिचार्यनुभवत्वाद्व्यापकजातिशून्यत्वान्तमित्यर्थः। अत्र जन्यत्वव्यभिचारीति जन्यधीत्वव्यभिचारीति धीत्वव्यभिचारीति धिजन्यत्वव्यभिचारीति जन्यजन्यत्वव्यभिचारीति च नोक्तं अनुमितित्वस्य जन्यत्वजन्यज्ञानत्व ज्ञानत्वधीजन्यत्वव्याप्तिज्ञानजन्यत्वव्याप्यत्वात्तद्व्यभिचारिजातिशून्यत्वस्यानुमितावपि सत्त्वादतिव्याप्तिः। जन्यपदधीत्वव्यभिचारिजातिशून्यत्वमात्रोक्तौ शाब्दत्वस्यापि तथात्वेनासंभवापत्तिरिति विशिष्टमुपादेयमेव। ननु जन्यपदधीजन्यत्वव्यभिचार्यनुभवत्वव्यापकजातिशून्यत्वमेव लक्षणमस्तु कृतं विशेषदलेनेत्यत आह। उपमितावितिः। उपमितेः पदविषयकातिदेशवाक्यार्थज्ञानजन्यत्वनियमेन जन्यपदधीजन्यत्वव्यभिचारिप्रत्यक्षत्वादिजातिशून्यत्वादितिभावः। शून्यान्तं पदविषयकत्वाव्यभिचारिजातिशून्यत्वमित्यर्थः। पदविषयकशाब्दबोधे पदस्यापि भानात् पदविषयकत्वसमानाधिकरणशाब्दत्वन्यत्वाभावादसंभव इति समानाधिकरणेति विहायाव्यभिचारीति। ननुसर्वत्र शाब्दबोधेपदस्य भानेबाधकाभावात् शाब्दत्वस्यापि पदविषयकत्वव्यभिचारित्वमेवेति चेन्न। इत्या पदजन्यपदार्थोपस्थितितात्पर्यज्ञानादेरेव शाब्दबोधहेतुतया शब्दस्यसर्वत्र भाने मानाभावात् यत्र भिन्नविषयकानुमितिसामग्रीकालेघटमानयेति शाब्देच्छाबलात् शाब्दबोधः तत्र शब्दविषयकशाब्दं जायतामितीच्छाविरहविशिष्टानुमितिसामग्राः प्रतिबन्धकत्वेन शब्दशाब्दानुपपत्तेश्च घटशाब्दे-

अनुमितित्वस्य भगवत्पदधीजन्यत्वाव्यभिचारित्वात् अतः समुदितमुपात्तम् । उपमितावति व्याप्तिवारणाय शून्यान्तं ॥

च्छाया अपि तत्रोत्तेजकत्वे तत्तदिच्छाभावकूटनिवेशेनातिगौरवात् मिथो विशेषणविशेष्यभावेविनिगमनाविरहेणानन्ततत्कार्यकारणभावकल्पनापत्तेरिति शब्दाविषयक शाब्दस्यैवोत्पत्त्या शाब्दत्वस्य पदविषयकत्वाव्यभिचारित्वाभावेनासंभवाभावादिति नकिञ्चदेतत् । जातावित्ति । जात्यादावित्यर्थः । तत्रजात्यभावादितिभावः । मणिकृतस्तु प्रयोगहेतुभूतार्थतत्त्वज्ञानजन्यः शब्दः प्रमाणमिति शब्दलक्षणं । प्रयोगो वाक्यं तद्धेतुभूतं यदर्थतत्त्वज्ञानं तज्जन्यशब्दत्वप्रमाणशब्दत्वमित्यर्थः । वाक्यार्थभ्रममादाय वह्निना सिञ्चतीत्यादौ अयोग्येऽतिव्याप्तिवारणाय तत्त्वपदं तथापि पदार्थतत्त्वज्ञानमादायायोग्येऽतिव्याप्तेः प्रयोगहेतुभूतेति । इत्थं चार्थपदस्य वाक्यार्थपरत्वपर्यवसानान्न पदार्थतत्त्वज्ञानमादायातिव्याप्तिः । तथाहि हेतुपदसमभिव्याहृतभूतपदस्य भूप्राप्ताविति धात्वनुसारादितरनैरपेक्ष्यव्युत्पन्नतया सजातीयनैरपेक्ष्यस्य विवक्षिततया यत्प्रयोगप्रतिपाद्यज्ञानं प्रयोगीकर्त्तव्यं प्रयोगप्रतिपाद्यज्ञानान्तरं नापेक्षते तादृशार्थतत्त्वज्ञानजन्यत्वं लब्धं नहि वाक्यार्थज्ञानवत्पदार्थज्ञानमपि अर्थज्ञानानपेक्षप्रयोगहेतुवाक्यार्थज्ञानात्मकार्थतत्त्वज्ञानस्यैवापेक्षणीयत्वादिति अत्रच प्रयोगो वाक्यं तथाच तत्कालीनतत्पुरुषीयस्वजन्यज्ञानविषयविषयकप्रमात्मकज्ञानं प्रकृतवाक्येजननीये प्रयोगप्रतिपाद्यज्ञानान्तरं तत्कालीनतत्पुरुषीयस्वजन्यज्ञानविषयविषयकज्ञानान्तरंनापेक्षते तादृशार्थतत्त्वज्ञानजन्य वमर्थः । वाक्यार्थज्ञानेन वाक्ये जननीये स्वपूर्ववर्त्तिपदार्थतत्त्वज्ञानस्यापेक्षणादसंभवः अन्यथा तस्याहेतुत्वापत्तेरिति स्वोत्तरोत्पन्नत्वमपि स्वजन्यज्ञानविषयकज्ञानान्तरे विशेषणीयम् । तथाचतत्कालीनतत्पुरुषीयस्वजन्यज्ञानविषयविषयकं यत्प्रकृतवाक्यार्थस्यप्रमात्मकज्ञानं स्वस्मिन्जननीये तत्कालीनत पुरुषीयस्वजन्यज्ञानविषयकस्वोत्तरोत्पन्नज्ञानान्तरं नापेक्षते तादृशज्ञानजन्यशब्दत्वं तत्कालीनतत्पुरुषीयप्रमाणशब्दत्वमितिफलितम् । अत्र स्वोत्तरोत्पन्नेत्यत्र स्वपदमर्थतत्त्वज्ञानपरं स्वपदान्तराणि प्रकृतवाक्यपराणि । पदार्थतत्त्वज्ञानेनवाक्ये जननीये स्वोत्तरोत्पन्नप्रकृतवाक्यजन्यज्ञानविषयविषयकस्य वाक्यार्थज्ञानस्यापेक्षणान्न पदार्थतत्त्वज्ञानजन्यत्वमादायायोग्येऽतिव्याप्तिरिति । संस्कारादावतिव्याप्तिवारणाय लक्षणे शब्दपदं । प्रमाणमात्रस्य लक्ष्यत्वे प्रत्यक्षादावव्याप्तेर्लक्ष्येपि शब्दपदमनुषज्यनीयमिति । ननु तत्कालीनतत्पुरुषीयस्वजन्यज्ञानविषयविषयकं प्र

मात्मकं ज्ञानं स्वस्मिन् जनयीये तत्कालीनतत्पुरुषीयस्वजन्यज्ञानविषयकप्र
मान्तरंनापेक्षते ताट्टग्प्रमाजन्यशब्दत्वंतत्कालीनततत्पुरुषीयप्रमाणशब्दत्व
मितिफलितं प्रमात्वं च यावद्भ्रमाभिन्नत्वं नात आंशिकप्रमामादायाति-
प्रसङ्गः इत्थं च वन्हिना सिञ्चतित्यादौ पदार्थतत्वज्ञानस्य स्वसमानजा
तीयवाक्यार्थज्ञानान्तरापेक्षतया तदादायातिव्याप्त्यभावेपि कण्ठाभिघा
तं वाक्यरूपेष्टसाधनताप्रमामादायातिप्रसङ्गः । वन्हिकरणसेकानुकूलकृ
तिमानिति प्रकृतवाक्यजन्यज्ञानविषयकरणताघटकाभावादिघटकत्वे नेष्ट
साधनताज्ञानस्यापि प्रकृतवाक्यजन्यज्ञानविषयकविषयकार्थतत्वज्ञानत्वात्
तेन च वाक्ये जनयितव्ये सजातीयज्ञानान्तरानपेक्षणादिति । एवं श
ब्दो द्रव्यमिति वाक्यस्यापि ताट्टग्वाक्यजन्यज्ञानविषयतया ताट्टग्वा
क्यजन्यज्ञानविषयवाक्यविषयकवाक्यरूपेष्टसाधनताप्रमानादाय शब्दो द्र
व्यमित्ययोग्यवाक्ये ऽतिव्याप्तिः । अपि च पयः करणकसेकानुकूलकृतिमा
न् गुणश्च द्रव्यमित्यांशिकभ्रमात्मकसमूहालम्बनजन्ये पयसासिञ्चतीत्या
दिवाक्येऽव्याप्तिः । ताट्टग्वाक्यार्थज्ञानस्य भ्रमभिन्नत्वाभावात् ईश्वरीय
वाक्यार्थज्ञानस्य च स्वसमानजातीयास्मदीयवाक्यार्थज्ञानसापेक्षतया त
दादाय लक्षणागमनात् । अन्यथा तदीयपदार्थतत्वज्ञानमादाया योग्ये
ऽतिप्रसक्तेर्दुर्वारत्वात् इति कथमेतदिति चेन्न । यादृशार्थतत्वज्ञानंस्वसमा
नजातीयज्ञानान्तरानपेक्षं सत्प्रयोगहेतुस्तज्जन्यत्वमिति न लक्षणार्थः
किंतु प्रयोगहेतुभूतं पदार्थतत्वज्ञानं प्रकृतवाक्यार्थजन्यज्ञानविषयवि
षयकं तज्जन्यत्वं लक्षणं तत्कालीनतत्पुरुषीयस्वजन्यज्ञानं यद्यत्संसर्गकं
यद्यत्प्रकारकत्वावच्छिन्नयद्यद्विशेष्यताकं तत्संसर्गकतत्प्रकारकतत्तद्विशेष्यत
काभ्रमभिन्नज्ञानजन्यशब्दत्वं तत्कालीनतत्पुरुषीयप्रमाणशब्दत्वमिति पर्य
वसितोर्थः । वन्हिनासिञ्चतीत्यादौ वन्हिकरणकसेकानुकूलकृतिमानिति
बोधोदयेन तद्विषयविषयकज्ञानस्य भ्रमत्वान्न तत्रातिव्याप्तिः । एवं श
ब्दो द्रव्यमित्यादावपि भ्रमात्मकसमूहालम्बनजन्ये पयसासिञ्चतीत्यादौ
तु ईश्वरीयप्रमामादायसङ्गतिः । एवमन्यत्र शुकोदीरितवाक्ये मौनिश्लोका
दावपीति । अथ यत्र वन्हिना सिञ्चति पयसा सञ्चतीत्यादिवाक्याभ्यां
वन्हिकरणकसेकानुकूलकृतिमान् पयः करणकसेकानुकूलकृतिमानिति स
मूहालम्बनशाब्दबोधः तत्र पयसा सिञ्चतीत्यादिवाक्येऽव्याप्तिः । तदाका
जन्यज्ञानं यद्यद्विशेष्यताकं तद्विशेष्यताकभ्रमभिन्नज्ञानाप्रसिद्धिरिति चे
न्नैवं यद्यद्विशेष्यताकत्वांशे स्वजन्यता तद्विशेष्यताकत्वांशे भ्रमभिन्नज्ञा
नत्वस्याविवक्षितत्वादित्याहुः । इदं च बुबोधयिषा पूर्वकवाक्यत्वावच्छिन्न
प्रति वाक्यार्थज्ञानहेतुरिति सम्प्रदायमतेन । वस्तुतस्तु बुबोधयिषया श

ज्ञात्वादावतिव्याप्तिवारणाय धीपदं । सोयं शाब्दः सकलज-
नानुभवसिद्धो दुरपन्हवः । तज्जनकत्वमपि तथा । आगोपा-
ङ्गना माच प्रतिपद्यं चैत्रवाक्यादसमर्थं प्रत्येमीति प्रतीते: केवलमनुमानविधया ऽन्यथावेति विप्रतिपद्यन्ते । तत्रा-
नुमानविधयेति वैशेषिकाशय: ॥ नैयायिकास्तु पृथगेव

न्यथासिद्धतया तस्य कारणत्वासम्भवेन तदुपेक्ष्य शाब्दप्रमितिकरणं श
ब्द इति फलघटितमेव लक्षणमत्र कृतमिति ध्येयं । प्रत्यक्षातिरिक्तप्र
माणसत्त्वे मानाभाव इति शब्दस्याप्रमाणतया व्यर्थं तन्निर्वचनमिति चा
र्वाकमतं कटाक्षयन् शब्दप्रमाणत्वं साधयति । सोयं शब्दइति । शाब्द
प्रमितिकरणं शब्दइत्यर्थः । सकलेति । शब्दं शृणोमीत्यनुभवविषय इ
त्यर्थः । दुरपन्हव इति । तादृशप्रतीतस्यान्यविषयकत्व बाधाच्छाब्दविष
यकत्व एव पर्यवसाने शब्दसिद्धिः प्रतीतिस्तदसाधकत्वे पदार्थमात्रो
च्छेद इतार्थः । ननु न वयं शब्द एव नास्तीति ब्रूमोऽपितु तस्यातिरिक्तशा
ब्दप्रमितिकरणत्वमेव नास्तीत्यत आह । तज्जनकत्वमपीति । तस्य शब्दस्य
जनकत्वमपि । शाब्दप्रमितिजनकत्वमपीत्यर्थः । वस्तुतस्तु सोयं शाब्द इति
पाठः शाब्दयामीति प्रतीतिसिद्धः शाब्दबोधइत्यर्थः । तज्जनकत्वमपि । शब्दे
तादृशशब्दप्रमितिकरणत्वमपीत्यर्थः । तथा । दुरपन्हवः । तत्र हेतुमाह । आ
गोपेति । प्रतीतेरिति । वाक्यादसमर्थं प्रत्येमीति ज्ञानस्य प्रत्यक्षविषय
त्वासम्भवेन प्रत्यक्षातिरिक्तप्रमितिस्वीकारः शब्दस्य तत्करणस्वीकारस्यावश्यक इति भावः । नन्वस्तु शब्दस्य प्रमाणत्वं आस्तां च तज्जन्यज्ञानस्य प्र
त्यक्षातिरिक्तत्वं तथाप्यनुमितिरात्मकत्वमेव तज्जन्यज्ञानस्यास्त्वतोवश्यं
पृथक्करूपणमित्यत आह । केवलमिति । अनुमानविधया । अनुमान-
त्वेन । अन्यथावेति । शब्दविधयावेत्यर्थः । नतुतस्य प्रत्यक्षातिरिक्तप्रमि-
तिजनकत्वमेवनास्तीति विवादइतिभावः । विप्रतिपद्यन्ते । विप्रतिपत्तिश्च
शब्दः अनुमितित्वासमानाधिकरणप्रमितिविभाजकोपाध्यवच्छिन्नजन्यतानि-
रूपितप्रमाणविभाजकोपाधिनियतधर्मावच्छिन्नजनकताश्रयोनवेत्याकारा ।
अत्र विधिकोटिर्नैयायिकानां निषेधकोटिर्वैशेषिकाणां । विधिकोटिप्र-
सिद्धिः प्रत्यक्षप्रमाणे । इन्द्रियस्यैव प्रमाणतया प्रत्यक्षं प्रति इन्द्रियत्वेन
हेतुत्वेन तादृशजनकताश्रयत्वात् । निषेधप्रसिद्धिश्च घटादावेव सुलभा ।
अत्र सिद्धसाधनवारणायानुमितित्वासमानाधिकरणत्वनिवेशः । प्रत्यक्षे
विषयस्य हेतुतया शब्दस्यापि साक्षात्कारत्वावच्छिन्नजन्यतानिरूपितजनक-

शब्दो मानं नत्वनुमानं । शब्दस्य अर्थाऽव्याप्यत्वात् । नहि-यच शब्दस्तच घटानयनादिरूपोऽर्थः शब्दस्याकाशवृत्तित्वात् । घटादेश्च तदवृत्तित्वात् । दृश्यते च व्याप्तिबुद्धिवि-

---

तात्पर्यात्यात्रमाणविभाजकोपाधिनियतधर्मावच्छिन्नतत्त्वस्य निवेशः । अनुमितिभिन्नशब्दाविषयकप्रमितिकरणं नवेति प्रत्यक्षानुमित्यन्यतरत्वव्याप्यानुभवनिष्ठजन्यतासामान्यको नवेत्यकारावा । पृथगिति । अनुमितिभिन्नशब्दाविषयकप्रमितिकरणमित्यर्थः । अतो न सिद्धसिद्धिव्याघातः । न त्वनुमानं । नतु प्रत्यक्षानुमित्यन्यतरत्वव्याप्यानुभवनिष्ठजन्यतासामान्यकम् अतो न शब्दलिङ्गकानुमानमादाय बाधः । नन्विदं घटानयनादिरूपार्थवत् शब्दत्वादित्यनुमानंस्यादत आह । शब्दस्येति । अर्थाव्याप्यत्वात् । स्वजन्य प्रतिपत्तिविषयार्थनिरूपितव्याप्यत्वाभाववत्त्वादित्यर्थः । अव्याप्यत्वमेव दर्शयति । नहीति । तदवृत्तित्वात् । आकाशावृत्तित्वात् । तथाच व्यभिचरितसामानाधिकरण्यरूपाव्याप्तिः शब्दे न संभवति साध्यहेत्वोर्वैयधिकरण्यादिति भावः । ननुघटमानयेति पदानि तात्पर्यविषयस्मारितपदार्थसंसर्गज्ञानपूर्वकाणि आकाङ्क्षादिमत्पदकदंबत्वात् इत्यत्र नवैयधिकरण्यं । नच रजतज्ञानवानयमिति ज्ञानात् भ्रान्तिज्ञप्रवृत्त्यापत्तिवारणाय पुरोवर्त्तिविशेष्यकेष्टतावच्छेदकप्रकारकज्ञानस्यैव प्रवर्त्तकतया तत्सिद्धिरिति वाच्यं लाघवात्प्रवृत्तिविषययदृष्टतावच्छेदकैकशिष्टावगाहिज्ञानत्वेनैवप्रवर्त्तकतया साध्यस्यज्ञानपदस्य प्रमापरत्वेन प्रमात्वघटकतया प्रकृते तस्याप्यक्षत्वात् नचानुमितेर्व्यापकतावच्छेदकप्रकारकत्वनियमेन स्मारितपदार्थत्वेनैवरजतादिसिध्येत् न तु रजतत्वादिना प्रमेयत्वादिना तादृशज्ञानस्य प्रवर्त्तकत्ववारणाय रजतत्वादिप्रकारकज्ञानस्यैव प्रवर्त्तकत्वादिति वाच्यं । पूर्वंरजतत्वादिनारजतत्वादेरुपस्थितत्वादितरबाधबलात्तेनरूपेणानुमितौभानसंभवात् । अतएवसकर्तृकत्वानुमाने लाघवोपनीतमेकत्वादिकमपि भासते लाघवज्ञानेतरबाधातिरिक्तस्थल एवच व्यापकतानवच्छेदकरूपेण ज्ञानानभ्युपगमादिति । यद्वा एते पदार्थास्तात्पर्यविषयमिथः संसर्गवन्तः आकाङ्क्षादिमत्पदस्मारितत्वादित्यनुमानेन विशिष्य रजतत्वादेः पक्षतावच्छेदकतया तत्सिद्धिः । नच नदीजलसंसर्गपरतयोच्चारिते अहो विमलजलं नद्याः कच्छे माहिषश्चरतीति वाक्ये प्रत्यायके नदीकच्छपदार्थयोर्व्यभिचारः तात्पर्यगर्भसाध्यासत्वादिति वाच्यं । तात्पर्यगर्भपरस्परनिरूपिताका-

ङ्गादिमत्वाभावे नैवाव्यभिचारात् । ननु तथापि हेतुतावच्छेदकावच्छिन्नहेतुमत्तानिश्चयस्यैवानुमितिहेतुतया यत्र योग्यतासंशयः तत्र योग्यतागर्भहेतुमत्तानिश्चयाभावादन्वयाऽबोधप्रसङ्गः । नच य ग्यतासंशयस्य बाधसंशयपर्यवसन्नतया साध्यसदेहस्य चानुगुणतया पक्षतावटकसंशयातिरिक्तसंशयान्यत्वमेव हेतुमत्तानिश्चयत्वमिति वाच्यं । गौरवात् साध्यव्याप्यसाधनवान्नवेत्याकारकसंशयादनुमित्यापत्तिश्चेति चेन्न । अयमालोको धूमो वा उभयथापि वन्हिव्याप्य इत्यत्र हेतुतावच्छेदकसंदेहेपि नैयायिकैरनुमितेरभ्युपगमात् व्याप्यवत्तानिश्चयत्वे नैवानुमितिहेतुत्वं । तस्य च योग्यतारूपहेतुविशेषणसन्देहेपि संभवात् न काप्यनुपपत्तिरत आह । दृश्यतेचेति । ननु यथाग्निमत्तादेवानुमितिरस्तु नच भ्रमात्मकपरामर्शजन्यत्वादनुमितेर्भ्रमत्वापत्तिरिति वाच्यं । विषयबाधस्यैव भ्रमत्वनियामकत्वेन दोषाभावादित्यत आह । दृश्यतेचेत्यपि कश्चित् । व्याप्तीति । पदनिष्ठव्याप्तिज्ञानशून्यानामित्यर्थः । नचेति । नहीत्यर्थः । अयं व्याप्तिज्ञानशून्यकालीनः शब्दप्रयोज्योऽनुभवः। तस्या । अनुमितेः। ननु इयं व्याप्तिज्ञानजन्या विलक्षणैवानुमितिः । नच तत्रानुमितित्वसत्वे मानाभावः समाने विषये शाब्दसामग्र्या बलवत्त्वात् अनुमितिं प्रति शाब्दसामग्र्याः प्रतिबन्धकत्वकल्पने गौरवं । मन्मते तत्र शाब्दात्मिकानुमितिस्वीकारेण तत्र तदप्रतिबन्धकत्वात् एवं भिन्ने विषये ऽनुमितिसामग्र्याः शाब्दसामग्र्याश्च प्रतिबन्धकताद्वयकल्पने गौरवं मन्मते ऽनुमितिसामग्र्याप्रतिबन्धकतयैवोपपत्तेरि यत आह ॥ प्रतियंतिचेति ॥ अनुमितमिति। नच व्याप्तिज्ञानादिघटितसामग्रीजन्यानुमितित्वाभावात्, तद्विषय इति वाच्यम् ॥ व्याप्त्याद्यप्रतिसन्धानेपि तस्यानुभवसिद्धत्वात् । असाच्चात्कृतमिति ॥ यद्यपि नोपमितमितिवक्तुमुचितं तथाप्युपमितेः शक्तिमात्रविषयकतया घटादियषयकज्ञानस्य ततोऽसंभवेन तन्निराकरणस्याऽनिष्प्रयोजनकत्वान्नोपमितिशेष इत्यपि कश्चित्। तथाच शब्दजन्यज्ञाने ऽनुमितित्वाद्यभावेन विलक्षणप्रमित्यङ्गीकरणस्यावश्यकतया तत्करणस्य प्रमाणान्तरत्वमाश्रयकमिति भावः ॥ श्रुतमिति ॥ नैयायिकशब्दजन्यशाब्दबोधविषयइत्यर्थः ॥ श्रुधातोर्नानार्थत्वेन शाब्दत्वविशिष्टशक्तत्वात् "अतएवात्मावारे द्रष्टव्यः श्रोतव्य" इत्यादिश्रुतिरप्युपपद्यते । इदं । घटकर्मकानयनादि ॥ नैयायिकेभ्य इति ॥ वैशेषिकस्य शब्दोच्चारपिछत्वे लिङ्गविधयैव तद्बोधकत्वान्नैयायिकेभ्य इत्युक्तं ॥ नैयायिकानां शाब्देच्छयैव पदोच्चारणात् शाब्दतात्पर्यज्ञानसंभवात् शाब्दबोध एव श्रोतुरितिभावः ॥ जरन्मीमांसकास्तु ॥ लौकिकवाक्यस्थले शाब्दबोधात्पूर्वं प्रकृतवाक्यार्थगोचरयथार्थज्ञानवदुक्तत्वरूपाप्तोक्तत्वानुमिति

सामग्रीसत्त्वेनाप्तोक्तत्वानुमितिसंभवात् तत वाक्यार्थज्ञानस्य वश्यकत्वात् तदुत्तरं चवेदस्थले कृत्स्नशाब्दसामग्रीतः शाब्दोत्पत्तेः लौकिकशब्दोऽनुवादकः अनुवादकत्वस्य गृहीतग्राह्यनुभवमात्रजनकत्वरूपत्वात् । स्वसमानाधिकरणस्वाव्यवहितपूर्ववर्त्तिस्वसमानाकारनिश्चयविषयविषयकतादृशेष्यकं तत्प्रकारकानुभवमात्रजनकत्वरूपत्वादिति यावत्। स्वपदमनुभवपरं वेदत्वस्य पौरुषेयत्वे नाप्तोक्तत्वानुमानासंभवात् अननुवादकत्वादप्रामाण्यम्। अनधिगतार्थानुभवकरणत्वस्यैव प्रामाण्यरूपत्वात् । तच्च गृहीतग्राहीतरानुभवकरणत्वं । स्वसमानाधिकरणस्वाव्यवहितपूर्ववर्त्तिस्वसमानाकारनिश्चयविषयविषयकेतरतादृशेष्यकतत्प्रकारकानुभवकरणत्वमिति यावत्। स्वसमानाकारत्वं च स्वस्मिन्याद्दशो तादृशेष्यताकत्वावच्छिन्नतत्प्रकारतानाद्दशतादृशेष्यकत्वावच्छिन्नतत्प्रकारितानिरूपितत्वमित्यूचुः ॥ तदसत् ॥ व्याप्तिस्मृतिविलंबेनाप्तोक्तत्वानुमितिसामग्र्यभावेन प्रथमत एव शाब्दबोधादननुवादकत्वेन प्रमाणत्वात् । ननु लौकिकवाक्ये इदमाप्तोक्तं नवेति संशये शाब्दबोधानुदयात् यत्संशयव्यतिरेकनिश्चयो यत्र प्रतिबन्धकस्तन्निश्चयस्तत्र हेतुरनुमितौ व्याप्तेरिवेति नियमेनाप्तोक्तत्वनिश्चयस्य हेतुत्वात् शाब्दबोधात्पूर्वं तस्यावश्यकतेतिचेन्न । तत्कार्यतावच्छेदकं हि शाब्दत्वं वा लौकिकवाक्यजन्यशाब्दत्वं वालौकिकत्वे नज्ञातवाक्यजन्यशाब्दत्वं वा । नाद्यः । वेदेतदभावात् ॥ न द्वितीयः॥आप्तोक्तत्वाऽनिश्चयेपि वेदानुकारेण पठ्यमानमन्वादिवाक्ये ऽपौरुषेयत्वाभिमानिनो गौडमीमांसकस्य शाब्दबोधोदयेन व्यभिचारात् । नापि तृतीयःलौकिकत्वेनाज्ञातलौकिकवाक्यस्थले कृत्स्नशाब्दसामान्यसामग्रीता एव लौकिकत्वेन ज्ञातवाक्यादपि शाब्दोत्पत्तिसंभवेन तस्याकारणत्वात् ॥ नच यत्संशयेत्यादिनियमेन तद्धेतुत्वनियम इति वाच्यम् । तत्संशयोपि वाक्यार्थबोधोत्पत्त्या तत्संशयस्याप्रतिबन्धकत्वात् ॥ अव्यभिचारसंशयव्यतिरेकनिश्चयप्रतिबध्ये व्याप्तिज्ञाने व्यभिचारेणाप्रयोजकत्वेन च तादृशनियमाभावाच्च । एतेन शाब्दसामान्ये अनाप्तोक्तत्वशङ्काविरहो हेतुः सचलोके आप्तोक्तत्वानुमानात् वेदे त्वपौरुषेयत्वानुमानात् । नचापौरुषेयत्वनिश्चयदशायामेव वेदस्यानुभावकत्वे दोषवत्पुरुषाप्रणीतपदस्मारितत्वरूपहेतुज्ञानसत्त्वेन पदार्थसंसर्गसिद्धिसंभवादेदस्याप्यनुवादकतापत्तिरिति वाच्यं। व्याप्तिस्मृतिविलंबेन तद्विलंबादिति परास्तम् । अनाप्तोक्तत्वसंशयस्याप्रतिबन्धकत्वात् योग्यतासंशयत्वादिति दिक्॥प्रभाकरास्तु । क्वचित् शाब्दभ्रमः क्वचिच्चप्रमेति नियमनिर्वाहाय शाब्दप्रमात्वावच्छिन्नं प्रति किञ्चित्कारणमुपेयं ॥ तच्च न योग्यता । अन्वयप्रयोजकरूपवत्त्वरूपयोग्यतायाः कारकाभिप्रायप्रयुक्तपयसासिञ्चतीत्ययोग्यवाक्येपि सत्वात् । अथ दोषाभाव एव तथास्तु

दोषाश्च भ्रमप्रमादविप्रलिप्साकरणापाटवरूपाः वक्तृनिष्ठाः भ्रमश्च उच्चारणीयवाक्यार्थगोचरो भ्रमः । प्रमादोऽनवधानता । सा च वाक्यार्थज्ञानस्वरूपयोग्यस्य वक्तुरुच्चारणीयवाक्यार्थनिश्चयव्यतिरेकः शुकीयवाक्यार्थनिश्चयव्यतिरेकवारणाय षष्ठ्यन्तनिवेशः अन्यथाप्रतीतस्यार्थस्य अन्यथाप्रतिपिपादयिषा प्रतारणा । सैव च विप्रलिप्सा । इच्छाविषयीभूतपूर्ववर्णानुकूलकण्ठतालव्याभिघातानुत्पादकालीना परवर्णानुकूलकण्ठतालव्याद्यभिघातः करणापाटवं करणकण्ठतालव्याद्यभिघातः तस्यापाटवस्य सामर्थ्यं इच्छाविषयीभूतवर्णानानुकूलत्वमिति यावदिति चेन्न । भ्रान्तप्रतारकवाक्यैः संवादेन प्रमाणे प्रतारणारूपदोषसत्त्वेन व्यभिचारात् । अन्यथाप्रतीतस्याविद्यमानार्थस्यान्यथाप्रतिपिपादयिषात्र प्रतारणात्वेनोक्तदोषान्तरेऽपि सर्वसाधारणदोषत्वस्यैकाभावेन तत्तदभावस्य प्रत्येकं कारणत्वे भ्रमस्यापि अन्यदोषाभावसत्त्वात्प्रमापत्तिः अभावकूटस्य च कारणत्वकल्पने गौरवात् विसंवादिशुकवाक्यादपि प्रमापत्तेश्च । तस्माद्यथार्थतात्पर्यकत्वमेव लोकवेदसाधारणं शाब्दप्रमाप्रयोजकं ॥ यथार्थतात्पर्यकत्वं च यथार्थवाक्यार्थप्रतीतीच्छयोच्चारितत्वं । एकपदार्थवदपरपदार्थप्रतीतीच्छयोच्चारितत्वमिति यावत् ॥ उच्चारितत्वं चानुसन्धीयमानत्वं तेन तन्मते वर्णानां नित्यैकत्वरूपत्वेपि नासंभवः न वा मौनिश्लोकादावव्याप्तिः । वेदे तु पूर्वपूर्वाध्यापकेच्छामादाय सङ्गतिः मूर्खपठ्यमानवेदस्तु पण्डितपठ्यमानवेदादभिन्न एव वेदस्य नित्यत्वात् नित्यानुमेये वेदे तु तदर्थज्ञापकत्वेन ज्ञानमन्यैव सामग्रीति न व्यभिचारः । शुकवाक्येपि शिक्षकवाक्यादायोपपत्तिः ॥ वर्णानां तन्मते नित्यैकत्वरूपत्वात् । नच दैववशसंपन्नशुकबालादिवाक्ये गत्यभाव इति वाच्यं । तस्याप्रमाणत्वात्। व्यवहारस्तु प्रत्यक्षादसंसर्गाग्रहादेति । केचित्तु शुकबालादिभिन्नलौकिकवाक्ये यथार्थवाक्यार्थप्रतीतीच्छयोच्चरितत्वं वेदे वेदत्वादिशुकादिवाक्ये ऽबाधितार्थकत्वं नानैव शाब्दप्रमाप्रयोजकं एकशक्तिमत्त्वेन तेषां कारणत्वमितिनाननुगमः ॥ नचमर्वत्राबाधितार्थकत्वमेव प्रयोजकमस्त्विति वाच्यं । यत्रान्यघटाभिप्रायेण गेहे घटोस्तीत्युक्ते घटान्तरं दृष्ट्वा तमानयति तत्रान्यपरत्वेनाप्रमाणेपि प्रामाण्यापत्तेः तदुक्तं ॥ "यत्परः शब्दः स शब्दार्थो" यतइतीत्याहुरिति दिक् ॥ तच्च ज्ञातमुपयुज्यते ज्ञायमानकरणे ज्ञानोपयोगिव्यभिचारिवैलक्षण्यात् व्यभिचरच्छब्दशक्तिवचेति तज्ज्ञानंहेतुः । ज्ञातमुपयुज्यते । शाब्दबोधनिरूपितज्ञाननिष्ठकारणतायां विषयतासम्बन्धवच्छेदकं शाब्दबोधनिरूपितज्ञानावच्छिन्नकरणताश्रयस्य शब्दस्य शाब्दबोधे जननीये उपयोगितवे सति सहकारित्वे सति व्यभिचारिवैलक्षण्यत्वादिति तदर्थः ॥ सामान्यमुखेन

व्याप्तिः। यद्यज्ज्ञाननिरूपितज्ञानावच्छिन्नकरणतात्रयस्य यज्ज्ञाने जननीये सहकारित्वे सति व्यभिचारवैलक्षण्यं भवति तत्तज्ज्ञाननिरूपितज्ञाननिष्ठकरणतायां विषयतासंबन्धेनावच्छेदकं भवति यथा व्याप्तिः शब्दशक्तिरिति । अत्र भूयोवयवेन्द्रियसन्निकर्षे व्यभिचारवारणाय ज्ञायमानकरण इति । शाब्दबोधं प्रति ज्ञायमानकरणस्य शब्दस्य स्वप्रत्यक्षे जननीये उपयोगिनि शब्दनिष्ठश्रोत्रसमवाये व्यभिचार इति ज्ञानोपयोगीति । तथाच यज्ज्ञानं प्रति ज्ञायमानं करणं तज्ज्ञाने जननीये सहकारीत्यर्थो न दोषः ॥ नच सल्लिङ्गपरामर्शे व्यभिचारः ज्ञायमान इत्यस्य ज्ञानविशिष्टेत्यर्थात् सल्लिङ्गपरामर्शस्य ज्ञानविशिष्टज्ञायमानकरणासहकारित्वात् । यस्मिन्सति यदभावात्कार्याभावस्तस्यैव तत्सहकारित्वात् । स्वविशिष्टे स्वासहकारित्वात् तथाच तज्ज्ञाननिरूपितकरणतावच्छेदकज्ञानविशिष्टकरणस्य ज्ञायमानत्वघटितधर्मावच्छिन्नकरणताकज्ञाने जननीये सहकारित्वमर्थः पर्यवस्यति परामृश्यमाणलिङ्गत्वेनैवानुमितिकरणतया परामर्शविशिष्टसत्वे परामर्शाभावासंभवान्न व्यभिचारः हृदोवह्निमान्हृदत्वादित्यादौ परामृश्यमाणलिङ्गसत्वेपि व्याप्त्यभावेन प्रमानुमित्यभावात् व्याप्तिवदिति दृष्टान्तसङ्गतिः व्याप्तिपक्षधर्मतावल्लिङ्गत्वेन प्रमानुमितिकरणत्वात् ज्ञायमानशब्दे वे शब्दसमवायाभावसंभवेनैवंताटृशसहकारित्वस्य शब्दसमवायेऽभावेपि आद्यक्षणे धूमत्वसामान्यलक्षणाजन्यपरामर्शविशिष्टः धूमसत्वेपि धूमनिष्ठरूपाभावेन धूमचाक्षुषानुदयात् परामृश्यमाणधूमस्य प्रत्यक्षे जननीये सहकारिभूते धूमनिष्ठरूपादौ व्यभिचारवारणाय ज्ञानोपयोगिनीत्यत्र ज्ञायमानत्वघटितधर्मावच्छिन्नकरणताकज्ञानपदस्य निवेशः ॥ अत्रेदं चिन्त्यम् ॥ परामृश्यमाणलिङ्गसत्वेपि सल्लिङ्गपरामर्शाभावात्कथं सल्लिङ्गपरामर्शे व्यभिचारनिरासः । नच यज्ज्ञानं प्रत्युपयोगिता तज्ज्ञानकरणतावच्छेदकज्ञानविशिष्टकरणैतत्सहकारित्वं विवक्षितं सत्परामृश्यमानलिङ्गत्वेन प्रमानुमितिहेतुत्वेन सल्लिङ्गपरामर्शस्य प्रमानुमितिं प्रत्येवोपयोगितया प्रमानुमितिकरणतावच्छेदकसत्परामर्शविशिष्टलिङ्गसत्वे सत्परामर्शाभावासंभव इति वाच्यं ॥ तथासति व्याप्तिवदिति दृष्टान्तासङ्गतेः ॥ व्याप्तिपक्षधर्मतावल्लिङ्गत्वेन प्रमानुमितिं प्रत्येवोपयोगितया सत्परामर्शविशिष्टलिङ्गसत्वे व्याप्त्यभावासंभवेन तादृशसहकारित्वस्य व्याप्त्यभावादिति । आत्ममनो योगबाधाभावादिवारणाय व्यभिचारिवैलक्षण्यादिति । तच्च प्रमित्यजनकत्वात्वं प्रमित्यजनकज्ञानजनकसामग्यप्रविष्टत्वमिति यावत् । नच सर्वांशे भ्रमाभावेन प्रमित्यजनिका ज्ञानजनिका सामग्येवाप्रसिद्धा प्रमितिपदेन भ्रमभिन्नत्वविवक्षणे च तन्मते

भ्रमाप्रसिद्ध्या ऽप्रसिद्धिरिति वाच्यं। स्वव्यधिकरणधर्मप्रकारकत्वानवच्छिन्नविशेष्यताशाल्यनुभवत्वस्य प्रमितिपदेन विवक्षणात्। तादृशो स्मृतिसामग्येव प्रसिद्धा। अथानुभवस्य स्मृतिकरणतया लिङ्गपरामर्शस्याप्यनेनैव ज्ञानविशिष्टमहकारिवैलक्षण्यं ज्ञानविशिष्टेत्यस्य वैयर्थ्यमिति चेन्न। करणतातिरिक्तज्ञानजनकतात्रयकारणकलापस्येव ज्ञानजनकसामग्रीपदेन विवक्षितत्वात्। अन्यथा स्वात्मककूटलिङ्गकानुमितिस्थानाभिषिक्तसाध्यस्मृतिमादाय स्मृतिसामग्याप्रविष्टस्य व्यभिचारित्वेन दृष्टान्तासिद्ध्या पत्तेः॥ अखण्डाभावसंपादकत्वाच्चासिद्धिवारकत्वेऽपि करणतातिरिक्तत्वस्य न वैयर्थ्यं वस्तुनाचस्यैव स्वात्मककूटलिङ्गकानुमितिस्थानाभिषिक्तसाध्यस्मृतिजनकतया प्रसिद्धिवारकत्वा च्च। जनकताकरणतोभयसाधारणस्य जनकतात्वस्यैकस्य भावादविशिष्टयैव निवेशे करणत्वात्मकजनकतात्रयक्लृप्तेः प्रवेशः। ननु करणतातिरिक्तजनकतात्वेन प्रवेश इति व्यर्थत्वशङ्काया अनवकाशाच्च उद्बोधकव्यावृत्ता च स्मृतिजनकता निवेशनीया नातः उद्बोधकतया जनकतामादायासिद्धिः प्रागभावस्य तत्तद्व्यक्तित्वेनाहेतुत्वाच्च नप्रमानुमितिं प्रागभावे व्यभिचार इति दिक्॥ केचित्तु। दृष्टप्रवृत्तिविषयवैशिष्ट्यावगाहिज्ञानमेव प्रकृते प्रमितिशब्दार्थइत्याहुः। अथवा ज्ञायमानकरणत्वाधियत्वं सम्यग्यर्थः। तथाच यज्ज्ञानीयज्ञायमानकरणनिष्ठत्वेसति यद्ज्ञानोपयोगित्वे सति व्यभिचारिवैलक्षण्यं भवति तज्ज्ञाननिरूपिततज्ज्ञाननिष्ठकरणताया विषयतासंबन्धेनावच्छेदकं भवतीति यावत्। सन्निकर्षपरामर्शस्तु न ज्ञायमानकरणधूमादिनिष्ठः। अथात्मलिङ्गकानुमितिज्ञायमानकरणे आत्मनि तस्य वृत्तेस्तद्वारणमिति चेन्न। तत्तज्ज्ञानानधिकरणत्वस्य ज्ञायमानकरणे निवेशात्। अतएव प्रागभावस्य तत्तद्व्यक्तित्वेन हेतुत्वेपि न प्रमानुमितिप्रागभावे व्यभिचारः धूमनिष्ठानोपाधिकत्वादिवारणाय ज्ञानोपयोगित्वे सतीति। बाधाभावादिवारणाय व्यभिचारिवैलक्षण्यत्वादिति। तदर्थस्त्वाभासव्यावृत्तत्वं। भ्रमजनकभिन्नत्वमिति यावत्। वस्तुनाचस्यैव लिङ्गविधया भ्रमजनकतया ज्ञायमानलिङ्गत्वातिरिक्तरूपेण भ्रमजनकभिन्नत्वं विवक्षणीयं। नच तन्मते तदप्रसिद्धिः विसंवादिप्रवृत्त्यादिजनकज्ञानमात्रस्यैव तन्मते तथात्वात्। नचाबाधितत्वादि तथाबाधस्याविपरीतनिश्चयस्य तदभावेन ज्ञानमात्राभावेन तदभावस्य ज्ञानमात्रप्रयोजकत्वात् इति। ननु तन्मते ऽगृहीतसंसर्गकग्रहणस्मरणात्मकज्ञानद्वयस्यैव भ्रमतया विसंवादिप्रवृत्तिजनकत्वेन तस्य च निर्धर्मितावच्छेदकतया बाधाभावस्य न तत्र हेतुत्वमितिकथमेतत्॥ अत्र केचित्। विसंवादिप्रवृत्तिजनकत्वेन न ज्ञानस्य प्रवेशः अपितु स्म-

तित्वेन । तथाच स्मृतिजनकतावच्छेदकावच्छिन्नान्यत्वादिति तदर्थः ॥ जनकतावच्छेदकबोधकत्वाद्वृत्ता । तेन नासिद्धिरिति । असंसर्गाग्रहविशिष्टज्ञानद्वयेऽन्वयव्यतिरेकाभ्यां बाधस्य विरोधित्वमिष्यत एवेत्यपि कश्चिदिति दिक् ॥ तच्च तात्पर्यं सामान्यतः तत्तत्पदार्थत्वेन रूपेण तत्पदार्थघटितं विशिष्य तत्तत्पदार्थघटितं च । तच्च च वेदस्थले घटपदार्थविशिष्टाम् पदार्थविशेष्यकघटपदार्थप्रतीतौच्छ्रयोच्चारितत्वरूपतात्पर्यज्ञानं हेतुः ननु विशिष्य । लोके तु घटविशिष्टकर्मतापदार्थविशेष्यकघटप्रकारकप्रतीतौच्छ्रयोच्चारितत्वरूपतात्पर्यज्ञानमेव हेतुः । अत्र सामान्यतः घटपदार्थत्वादिना तात्पर्यग्रहेपि पटादेरपि लक्षणादिना घटपदार्थसंभवेन घटविशिष्टकर्मतापदार्थविशेष्यकप्रतीतौच्छ्रयोच्चारितं नवेति विशिष्य सन्देहेपि शाब्दबोधापत्तेः। वेदे तु लक्षणादिनाऽन्यार्थासंभवेन एकपदार्थत्वज्ञानेपि विशिष्य सन्देहाभावात् । यथाकपिञ्जलानालभेतेत्यादौ प्रथमोपस्थितत्वरूपलाघवतर्कनिर्णीतत्वविशिष्टकपिञ्जलपदार्थपरं बहुवचनांतकपिञ्जलपदमिति सामान्यतः कपिञ्जलपदार्थत्वेन रूपेण तात्पर्यनिर्णयेपि विशिष्यकपिञ्जलत्वादिरूपेण तात्पर्यसंशयाऽसंभवात् । लोके तु गुरुभूतेप्यर्थे तात्पर्यसंभवेन लाघवतर्कानवतारात् विशिष्य सन्देहसंभवेन घटविशिष्टकर्मत्वविशेष्यकघटप्रकारकप्रतीतौच्छ्रयोच्चारितमिदमिति तात्पर्यनिर्णयस्य शाब्दबोधात्पूर्वमवश्यापेक्षिततया लौकिकवाक्यमनुवादकं । तस्माल्लौकिकंवाक्यं सर्वमेवानुवादकत्वादप्रमाणं । वेदे तु तदभावात्प्रामाण्यमित्याहुः ॥तदसत्॥ एकपदार्थविशिष्टापरपदार्थविशेष्यकएकपदार्थप्रकारकप्रतीतौच्छ्रयोच्चारितत्वरूपयथार्थतात्पर्यनिश्चयत्वेन हेतुत्वे याथार्थ्यनिवेश गौरवात् । किंतु नानार्थानुरोधेन शाब्दसामान्ये एकपदार्थप्रकारकापरपदार्थविशेष्यकप्रतीतौच्छ्रयोच्चारितत्वरूपतात्पर्यज्ञानस्यैव । नचैवं वह्निना सिञ्चतीत्यादावपि प्रमापत्तिरिति वाच्यम् । एकपदार्थेऽपरपदार्थवत्त्वरूपयोग्यताप्रमाया एव संशयनिश्चयप्रतिबन्धरूपेण कारणत्वात् । अपि च इदं वाक्यं भ्रमादिविशिष्टज्ञानयोरन्यतरजन्यं वाक्यार्थज्ञानजन्यवाक्यत्वात् । ततश्च भ्रमादेर्बोधेऽयं वक्ता स्वप्रयुक्तवाक्यार्थगोचरयथार्थज्ञानवान् भ्रमाद्यवाक्यार्थज्ञानजन्य जन्यवाक्यप्रयोक्तृत्वात् अहमिवेति वक्तृयथार्थवाक्यार्थज्ञानानुमानपूर्वक एव यथार्थवाक्यार्थप्रतीतिपरत्वनिश्चयोहेतुर्वाच्यः तच्च न संभवति । भ्रान्तेः पुरुषधर्मत्वेन भ्रमाद्यजन्यनिर्णयासंभवात् । संवादिप्रवृत्तिजनकत्वादेश्च तद्ग्राहकलिङ्गस्य शाब्दबोधोत्तरकालीनत्वादित्यास्तांविस्तरः ॥ ननु शब्दस्यानुमानानन्तर्गतत्वेन घटमानयेति शब्दादघटादिपदे शक्तिमविदुषोपि शाब्दबोधापत्तिः मम तु तत्र व्याप्तिज्ञानाभावादेव

धुराणामपि शब्दादन्वयानुभवः । नचायमनुमितिरूपः । तस्याव्याप्तिधीजन्यत्वात् । प्रतियन्ति च लौकिकाः ॥ अनुमितमसाच्छात्कृतं कृतमिदं नैयायिकैरन्यत्र दूरयलं विस्तरेण ॥ ननु यदि स्वातन्त्र्येणैव शब्दो मानं तदा घटमानयेत्यतः शब्दात्पामराणामपि अर्थप्रत्ययः स्यादिति चेन्न ॥ शक्तिग्रहस्यापि सहकारित्वात् पामराणां च घटादिशब्दे शक्तेरग्रहात् । अथ कोयं शक्तिः । अभिधानाम पदार्थान्तरं सङ्केतग्राह्यमिति मीमांसकाः ॥ नैयायिकास्तु यिकास्तुआवश्यकत्वात्सङ्केतएवाऽभिधा नतु पदार्थान्तरं मानाभावात् । सच सङ्केतो अस्मात्पदादयमर्थो बोद्धव्य इत्याकारिकेच्छा । हन्तैवं पामरादिसङ्केतिता अपि शब्दा अभिधायकास्युरिति चेन्न । नहि सङ्केतमात्रमभिधा.किन्त्वीश्वर-

---

तदसंभव इत्याशयेनाशङ्कते । नन्विति । स्वातन्त्र्येण । शब्दत्वेन । पामराणां घटादिपदे गृहीतशक्तिकानां । सहकारित्वादिति । इतरकारणचक्रसमवहितकारणस्यैव फलोपधायकत्वेन केवलशब्दसत्वेपि शक्तिज्ञानरूपसहकारिविरहाच्च तत्र फलोपधानमिति भावः । उपोद्घातसङ्गत्या शक्तिं निरूपयितुमाशङ्कते । अथेति । इयं । शब्दसहकारिग्रहविषयः । पदार्थान्तरमिति । तत्तत्पदार्थतावच्छेदकाभावकूटवदित्यर्थः । तेन नासिद्धासिद्धिव्याघातः । संकेतग्राह्यमिति । वक्ष्यमाणसङ्केतजन्यग्रहविषयइत्यर्थः । आवश्यकत्वात् अभिधाज्ञाने भवतामवश्यमपेक्षणीयत्वात् । संकेतं निरूपयति । सचेति अस्मादिति । एतत्पदजन्यत्वप्रकारतानिरूपितएतदर्थबोध्यविशेष्यताशालीत्यर्थः । हन्तैवमिति । एवम् । इच्छामात्रस्यैवाभिधारूपत्वे । पामरादीति । गगरीत्यादिशब्दा इत्यर्थः । आभिधायकाःस्युरिति । तथाच "नापभ्रंशितवै" इत्यादिस्मृतिविरोधः शक्त्याप्रतिपादकत्वस्यापभ्रंशानपभ्रंशसाधारण्यात् । अतिरिक्तशक्तिस्वीकारे तु तत्रसङ्केतसत्वेपि अतिरिक्ताभिधायास्तत्रानङ्गीकारात् न तादृशस्मृतिविरोध इति भावः । संकेतमात्रं ।

सङ्केतः । न चापभाषिते सोऽस्ति मानाभावात् । कथं तर्हि ततोऽन्वयबोध इतिचेत् । शक्तिभ्रमादिति गृहाण । कथं तर्हि पामरादीनामीश्वरमविदुषां मीमांसकानां चार्थप्रत्ययः शब्दादिति चेन्न । उच्यते । न तावदीश्वरसङ्केतत्वेन तद्ग्रहः कारणं किं तु सङ्केतत्वेन । अस्ति च तेषामपि तथात्वेन ज्ञानं । आधुनिकसङ्केतानां चैचादिशब्दानां कागतिरिति चेत् । द्वादशेऽहनि पिता नाम कुर्यादिति

तादृशेच्छाभावं । अपभाषिते । गगर्यादिशब्दे । सोऽस्ति । ईश्वरसंकेतोऽस्ति ॥ मानाभावादिति । शास्त्रनिष्णातबुद्धीनां गगर्यादिशब्दाच्छाब्दरूपफलाभावेनापभ्रंशेन तादृशेश्वरसंकेतइत्यर्थः । "नापभ्रंशितवै" इति श्रुतिविरोधश्च बाधकोऽवसेयः । ननुशाब्दसामान्येशक्तिज्ञानस्य हेतुतयाऽपभाषिते शक्त्यभावे कथं शाब्दबोध इति तटस्थः शङ्कते कथं । तर्हीति । शक्तिभ्रमादिति । भ्रमप्रमासाधारणशक्तिज्ञानस्य हेतुत्वादिति भावः । ननुप्रमेयत्वादिनाशक्तिज्ञानेपि शाब्दबोधानुदयात् शक्तित्वेन तज्ज्ञानं हेतुः । शक्तित्वं च तादृशेश्वरसंकेतत्वं पामराणामीश्वराज्ञानात् संकेतस्येश्वरसंकेतत्वेनाज्ञानात् कथं शाब्दबोध इत्याशङ्कते । कथं तर्हीति । ईश्वरमविदुषामिति ॥ पामराणांमीमांसकानांचेत्युभयत्रान्वेति । तथेति । संकेतत्वेनेत्यर्थः । तेषामपि सङ्केतत्वप्रकारकज्ञानसत्वादित्यर्थः । चैचशब्दादयमर्थोबोद्धव्य इत्य स्माकीनेच्छाविषयाणांचैचादिशब्दानामशक्तत्वापत्तिः । तत्रेश्वरसङ्केताभावादित्याशङ्कते । आधुनिकेति । कागतिरिति । तत्रेश्वरेच्छारूपसङ्केतज्ञानाभावादिति भावः । तस्यापि । आधुनिकसङ्केतितचैचादिशब्दस्यापि । ईश्वरेति । द्वादशाहकालीनपिचुचारितनामत्वादिना नामपदवाच्यः शिशुरित्याकारकेच्छया ईश्वरेण तादृशश्रुतिप्रणयनात्तत्रापीश्वरसङ्केतोऽस्तीति भावः ॥ ईश्वरीयज्ञानस्येच्छायाः कृतेर्वाशक्तिरूपत्वमिति विनिगमनाविरहादिति रिक्तैव शक्तिरिति नव्याः ॥ सङ्केतग्राहकप्रमाणाभावेन सङ्केतग्रहासम्भवात् कथं शक्तिज्ञानं हेतुरित्याशङ्कते । स्यादेतदिति ॥ कथं ग्राह्यः केनप्रमाणेन ग्राह्यः शङ्कते । उपमानादितीति । तस्य । अतिदेशवाक्यार्थज्ञानरूपोपमानस्य । वाक्यार्थज्ञानेति ॥ गोसदृशो गवयपद-

सामान्यतस्तस्यापि ईश्वरसंकेततत्वमिति गृहाण । स्यादेतत् । सोयं सङ्केतः कथं ग्राह्यः उपमानादिति चेन्न । तस्य वाक्यार्थज्ञानमूलकत्वात् । तस्य शक्तिग्रहमूलकत्वात् उच्यते । प्रथम शक्तिग्रहो व्यवहारात् । तथाहि घटमानयेति केनचिदुक्तः कञ्चन तदर्थं प्रतीत्य घटमानयति । तच्चोपलभमानो बालः तया क्रियया तस्य प्रयत्नमनुमिनोति । तेन च घटानयनगोचरप्रयत्नेन तस्य ज्ञानमनुमि-

---

वाच्यइत्यतिदेशवाक्यार्थज्ञानं तावत् शाब्दं । तच्च गोसदृश इति खण्डवाक्यार्थज्ञानेसति स्यादित्यर्थः । तस्य । गोसदृशो गवयपदवाच्यइति वाक्यार्थज्ञानस्य । शक्तिग्रहमूलकत्वात् । गोपदं गविशक्तमितिशक्तिज्ञानमूलकत्वादित्यर्थः तथा च तच्छक्तेरुपमानान्तरग्रहे ऽनवस्थापत्तिरिति भावः । व्यवहारादिति ॥ प्रयोज्यप्रयोज्यकवयवहारादित्यर्थः ॥ व्यवहारस्य घटानयनक्रियारूपः । केनचित्प्रयोजकवृद्धेन । कञ्चन । प्रयोज्यवृद्धं । तदर्थं । प्रयोजकवृद्धवाक्यार्थं घटमानयति घटानयनानुकूलचेष्टावान्भवति । तया क्रियया । घटानयनक्रियया ॥ तस्य । प्रयोज्यवृद्धस्य । प्रयत्नमिति ॥ इयं क्रियाप्रयत्नपूर्विका विलक्षणक्रियात्वात् । मत्क्रियावत् इत्यनुमिनोतीत्यर्थः । ज्ञानं । घटानयनगोचरं ज्ञानं ॥ अयं घटानयनगोचरप्रयत्नः घटानयनज्ञानजन्यः घटानयनगोचरप्रयत्नत्वात् स्वीयस्तनपानगोचरप्रयत्नवत् । या यद्गोचरप्रयत्नः सतज्ज्ञानजन्यइति सामान्यमुखव्याप्तिः ॥ अतो न दृष्टान्तासङ्गतिः । दृष्टान्तमेवाह । स्वप्रयत्नेति । स्वीयस्तनपानगोचरप्रयत्न इत्यर्थः । तेन । बालेन । तथानिश्चयात् । ज्ञानजन्यत्वनिश्चयात् ॥ तद्वेलाकांक्षायां । घटानयनगोचरज्ञानहेलाकांक्षायां ॥ शब्दमेव । घटमानयेति शब्दमेव ॥ आवापोद्वापाभ्यामिति ॥ आवापः संग्रहः उद्वापस्त्यागः यथा घटमानय पटं नयेत्यादि ॥ क्लृप्ते च तस्मिन्निति ॥ घटपदे घटधौजनकत्वे क्लृप्तेचेत्यर्थः ॥ अतिप्रसङ्गभङ्गाय । घटपदं घटधौजनकमिव पटधौजनकमपि स्यादित्यतिप्रसङ्गभङ्गायेत्यर्थः । वस्तुतस्तु अतिप्रसङ्गाय अगृहीतशक्तिकानामपि घटशब्दबोधापत्तिरित्यतिप्रसङ्गभङ्गायेत्यर्थः ॥ तज्जननानुकूलं ॥ घटधौजननाकूलं ॥ किमनुपन्नमिति ॥ तदर्थविषयकशब्द-

नोति । स्वप्रयत्नेन तथानिश्चयात् । ततस्तद्वेत्वाकांक्षायामुपस्थितत्वाच्छब्दमेव कल्पयति तदनन्तरं च घटादिपदानां प्रत्येकमावापोद्वापाभ्यां घटपदं घटधीजनकमिति कल्पयते लुप्ते च तस्मिन्नतिप्रसङ्गभङ्गाय तज्जननानुकूलं सङ्केतरूपं सम्बन्धं कल्पयति इति किमनुपपन्नं । तदनन्तरं च क्वचिद्व्यवहारात्क्वचिदुपमानाक्वचिच्छब्दात्क्वचिद्व्याकरणकोशादेरिति संक्षेपः । स्यादेतत् । तयोर्व्यवहारं

ब्दत्वावच्छिन्नं प्रति ज्ञायमानतच्छक्तपदत्वेन कारणत्वान्नातिप्रसङ्ग इति भावः । नकैवं व्यवहारएव शक्तिग्राहक इ.यायातं । इत्थं च शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद्व्यवहारतश्च । वाक्यस्य शेषाद्विवृत्तेर्वदन्तिसान्निध्यतः सिद्धपदस्य वृद्धा इति प्राचीनगाथाविरोधश्च यतआह । तदनन्तरमिति । आद्यशक्तिग्रहानन्तरमित्यर्थः ॥ व्यवहारात् । गवानयनगोचरप्रयोज्यप्रयोजकवृद्धव्यवहारात् । पूर्वं तु घटानयनगोचरव्यवहारउक्त इति नाभेदः । अनवस्थाभिया पूर्वं व्यवहारएव शक्तिग्राहकः ततश्च व्यवहारेणोपमानेन वा शक्तिग्रहो जायते इत्यत्रनास्माकमाग्रहइति न प्राचीनगाथाविरोध इति भावः ॥ उपमानादिति ॥ गोसदृशो गवयपदवाच्य इत्युपमानात् गवयो गवयपदवाच्यइति शक्तिग्रहोदयादित्यर्थः ॥ शब्दादिति ॥ आप्तवाक्यादित्यर्थः ॥ कोकिलः पिकपदवाच्य इत्याप्तवाक्यात् पिकपदस्य कोकिले शक्तिग्रहादिति भावः । व्याकरणादिति । प्रकृतिप्रत्ययादीनां शक्तिग्रहो व्याकरणादित्यर्थः ॥ कोशादेरिति । अथैकदन्तहेरम्बलम्बोदरगजानना इत्यत्र गणेशत्वविशिष्टे शक्तिग्रहादित्यर्थः ॥ नन्वत्र गणेशत्वविशिष्टस्य पदार्थतया पदार्थस्य पदार्थतावच्छेदकस्य च भेदाभावात्कथं द्वन्द्व इति चेन्न । कोशस्य शक्तिग्राहकतया इदं पदमत्र शक्तमिति शक्तिग्रहस्यैव तस्मादुदयेन तत्र पदानामेव पदार्थतया तद्भेदसत्वात् । आदिपदाद्वाक्यशेषविवरणप्रसिद्धपदसामानाधिकरण्यपरिग्रहः । वाक्यशेषाद्यथा । यवमयश्चरुर्भवतीत्यत्र यवशब्दः म्लेच्छप्रसिद्धिवशात्क गोर्वाचकः ॥ आर्यव्यवहारदर्शनात् दीर्घशूकविशिष्टस्य व्यवहारस्योभयत्राविशेषादिति सन्देहे "वसन्ते सर्वसस्यानां जायते पत्रशातनं ॥ मोदमानाश्चतिष्ठंतियवाः कणिशशालिन" इति

वाक्यशेषाद्दीर्घशूकविशिष्टे शक्तिनिर्णयः ॥ नच वेदे नदीघशूकविशिष्टे शक्तिबोधेऽपि कंग्वादौ शक्तिमत्वे बाधकाभावः नानार्थत्वेनापि वेदापपत्तेरिति वाच्यम् ॥ अन्याय्यत्वानेकार्थत्वमिति न्यायेन वेदस्य बलवत्त्वात्तत्रैव शक्तिपरिच्छेदात् ॥ एवं यत्र दुःखेन संभिन्नं नच ग्रस्तमनन्तरं अभिलाषोपनीतं च तत्सुखं स्वः पदास्यदमित्यत्र वेदादेव स्वःपदशक्तिग्रहः ॥ ननु दुःखासंभिन्नत्वं न दुःखसमानाधिकरणत्वं आद्यावन्ते च दुःखसत्वेनासंभवात् । नापि दुःखासमानकालिकत्वं । अस्मदादिसुखे तथात्वात् । नचानन्तरमित्यस्याविरललग्नप्रवाहौत्यर्थकतया विरललग्नप्रवाहस्य दुःखासंभिन्नत्वप्रामाण्यानातिव्याप्तिरिति वाच्यम् । अस्मदादिसुखस्यापि कतिपयकालावच्छेदेन तथात्वसंभवात् । चक्रवर्त्तिसुखे तथात्वसंभवेनाभिलाषोपनीतमित्यनेनापि तन्निरासासंभवात् । अन्यथा विशेषणान्तरवैयर्थ्यापातादिति चेत् ॥ अत्रकेचित् । एकजन्मावच्छेदेन दुःखासंभिन्नत्वं नानैव शक्यतावच्छेदकमित्याहुः । तन्न । नानार्थत्वकल्पने गौरवात् तथातात्पर्यग्राहकस्याभावाच्च कैश्चित्तु यावति नवैयर्थ्यं तदेव शक्यतावच्छेदकमित्याहुः । अपरेतुदुःखासंभिन्नत्वादिकम् न शक्यतावच्छेदकं किंत्वधर्माजन्यशरीरजन्यसुखत्वोपलक्षकमिदं योगिना तु नाधर्माजन्यशरीरं तत्र दुःखोत्पत्तेरधर्मजन्यत्वात् सुखमात्रावच्छेदकेतच्छरीरे मानाभावात् । अथ मरणस्य दुःखनियतत्वात्स्वर्गशरीरेपि मरणजन्यदुःखसंभवादसंभवः नच ते नराः सुखमृत्यवइत्यनेन विरोधः । तस्य दुःखाल्पत्वपरत्वादिति चेन्न ॥ अनुकूलतर्काभावेन मरणस्य दुःखनियतत्वे मानाभावात् । भावे वा मरणजन्यदुःखजनकाधर्मान्याधर्माजन्यशरीरजन्यसुखत्वस्य प्रवृत्तिनिमित्तत्वात् । एतेन स्वर्गेपि पातभीतस्येति श्रवणात् स्वर्गयोनिपुण्यक्षयशङ्कया स्वर्गेदुःखोत्पत्तेरसंभव इति निरस्तं । तदन्यत्वेनाप्य धर्मस्य विशेषणीयत्वात् । स्वर्गशरीरस्य सुखमात्रावच्छेदकत्वेन तत्र दुःखधीर्भ्रान्तैव । अतएव तद्धर्ममात्रजन्यमेवेति तद्विशेषणेपि क्षतिविरहाच्चेत्याहुः ॥ अविरललग्नप्रवाहाच्चिरस्थायीच्छामात्रयोनिदुःखासंभिन्नसुखत्वं शक्यतावच्छेदकं तत्प्रकारकबोधस्यानुभवसिद्धत्वादित्याहुः । नच अस्तमिति अयस्तत्वं चिरस्थायित्वं प्रवाहस्येति बोध्यम् । विवरणाद्यथा । पचतिपाकं करोति यत्नार्थककरोतिनासर्वाख्यातविवरणात् आख्यातस्य यत्नत्वविशिष्टे शक्तिः यद्यपि पूर्वोच्चरितवाक्यस्य स्वसमानार्थकोच्चरितवाक्येनार्थकथनरूपविवरणस्य शक्तिग्राहकता नशब्दविधया । इदं पदमत्र शक्तमिति शक्तिबोधपदाभावात् तथाप्य ख्यातपदं यत्नत्वविशिष्टे शक्तं यत्नत्वविशिष्टशक्तकरोतिधातुप्रतिपादितार्थकत्वात् पाकत्वविशिष्टशक्तपाकपदप्रतिपादितार्थकपचधातुवत् । यद्यद्धर्मविशिष्टश-

पश्यता सङ्केतो ग्राह्यः । कथं तयोरेव सङ्केतग्रहः । अन्यथोर्व्यवहारादिति चेन्न । अनवस्थापत्तेः । अनादित्वादियमिष्टैवेति चेन्न । सर्गादौ तदसत्वात् । प्रलये माना-

---

क्तपतिपादितार्थकम् भवति तत्तद्धर्मविशिष्टे शक्तं भवतीति सामान्यमुखो व्यभिचाराभिमता । इह सहकारतरौ मधुरं पिकोरौतीत्यत्र सहकारतरु रूपप्रसिद्धपदसमभिव्याहारेण पिकपदं कोकिले शक्तमितिप्रसिद्धपदसमभिव्याहारेण शक्तिग्रह इति ध्येयं । ननु कोशस्य शक्तिग्राहकत्वे "गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वतौ"त्यनेन शुक्लादिपदानां गुणिगुणविशिष्टे च शक्तिप्रतिपादनाद्गुणविशिष्टेपि शक्तिः स्यादितिचेन्न । अनन्यलभ्यस्यैव शब्दार्थतया शुक्लादिपदानां गुणविशिष्टे लक्षणयैवोपपत्तौ न तत्र शक्तिः कल्प्यते । अमति बाधके एव कोशस्य शक्तिग्राहकत्वात् । अतएव व्याकरणेनाख्यातस्य कर्त्तरि शक्तिप्रतिपादनेपि लाघवात्कृतावेव शक्तिरिति वक्ष्यत इति दिक्तयोः । प्रयोज्यप्रयोजकवृद्धयोः पश्यता । बालेन । अन्ययोः स्वपूर्वकालिकप्रयोज्यप्रयोजकवृद्धयोः । अनवस्थेति । तयोर्व्यवहारोप्यन्यव्यवहारपूर्वक एवेत्यनवस्थापत्तेरित्यर्थः । इयं । अनवस्था । बीजांकुरवत् अनाद्यनवस्था न दोषाय प्रामाणिकत्वादिति भावः । तदसम्भवादिति । तत्राद्योत्पन्नबालस्य स्वपूर्वकालिकप्रयोज्यप्रयोजकवृद्धव्यवहारदर्शनाच्छक्तिग्रहासम्भवादित्यर्थः । नन्वसंसारस्यानादित्वात्खण्डप्रलयाद्यभावेन सर्गाद्यकालाभावात्कथं तदभाव इत्याशङ्क्याह । प्रलयइति । खण्डप्रलयइत्यर्थः । कार्यद्रव्येति । सृष्टिकालवारणाय कार्यद्रव्यानधिकरणेति । कालिकसम्बन्धेन चाधिकरणत्वम् बोध्यं । कार्यानधिकरणेत्युक्तावसम्भवः । खण्डप्रलयेपि परमाण्वादौ रूपसत्वादतः कार्यद्रव्येति । द्रव्यानधिकरणेत्युक्तावपि तथापरमाण्वादेः सत्त्वादतः कार्येति । कार्यद्रव्यानधिकरणेत्युक्तौ महाप्रलयेऽतिव्याप्तिः । अतः कार्याधिकरणेति । कार्यत्वं चात्र ध्वंसप्रतियोगित्वम् । तेन महाप्रलये ध्वंसरूपकार्याधिकरणत्वेपि नातिव्याप्तिः । अभावातिरिक्तकार्यपरं कार्यपदं सामान्यपदस्य विशेषपरत्वादित्यपि कश्चित् । महाप्रलयस्य चरमदुःखध्वंसादिरूपतया प्रतियोगितासम्बन्धेन कार्याधिकरणत्वात् कालेति कालिकसम्बन्धेनाधिकरणत्वाभिप्रायकं । भिन्नकालीनयोर्नाधाराधेयभाव इति भावः । वस्तुतस्तु शब्दादिरूपकार्याधिकरणत्वाद्गगनेऽतिव्याप्तिरतः कालेति । आगमेति । "धातायथापूर्वमकल्पयदिति"वेदसिद्धत्वादित्यर्थः । तथाच संसारस्य प्रवाहो

भवात्सर्गादिरेवासिद्धेरिति चेन्न। कार्यद्रव्यानधिकरणका-र्याधिकरणकालस्य खण्डप्रलयतया प्रसिद्धस्यागमसिद्धत्वात् ततस्तद्व्यवहरतिउच्यते सर्गादौ भगवानीश्वरः शरीरद्वयं परिगृह्य तथा व्यवहारदर्शनात् बालः पूर्ववत् संकेतं गृह्णातीति किमनुपपन्नम्। ईश्वरे एव किं मानमिति चेत्। सर्गादौ व्यवहारान्यथानुपपत्तिरेव। ननु पूर्वसर्गसिद्धसर्वज्ञत्वान्मन्वादय एव व्यवहारप्रवृत्तिहेतवः सन्त्विति चेन्न। तेषां सर्वज्ञत्वे मानाभावात्। व्यवहारान्यथानुपपत्तिरेव मानमितिचेन्न।पूर्वसर्गव्यवहारस्यैव मध्यनुपपत्तेः। तचाप्यन्य एव कल्प्यतामिति चेन्न।

अनादित्वं नत्वनादिमेवेति भावः॥ कालकपालान्यावृत्तिघटप्रागभाव : कार्यद्रव्यानधिकरणकार्याधिकरणवृत्तिरभावत्वात् गगनवृत्तिघटात्यन्ताभाववत् पक्ष धर्मताबलाच्च घटप्रागभावे ईदृशकालवृत्तित्वं सिद्धयत् खण्डप्रलयवृत्तित्वमादाय पर्यवस्यतीत्यनुमानमपि तत्साधकं बोध्यं॥ शरीरद्वयं। प्रयोज्यप्रयोजकवृद्धशरीरद्वयं। तथा। पूर्ववत्संकेतं। घटपटादिपदसंकेतं। नन्वेवं संभवतीश्वरे मानसत्त्वे तदेव तु नेत्याशंकते॥ ईश्वरएवेति। व्यवहारदर्शनादिति। शक्तिग्राहकाभावाच्छक्तिग्रहे घटादिगोचरप्रवृत्त्यनुपपत्तिरेवेश्वरे मानमित्यर्थः॥ यद्यप्यर्थापत्तेर्नास्मन्मतेप्रमाणान्तरत्वं तथापि सर्गाद्यकालीनशक्तिग्रहः प्रयोज्यप्रयोजकवृद्धव्यवहारप्रयोज्यः प्रयोज्यप्रयोजकवृद्धव्यवहारान्याप्रयोज्यत्वेसति प्रयोज्यत्वात् यत्रैवं तत्रैवं यथा गगनादीतिव्यतिरेक्यनुमानमेव तदानीमन्यवृद्धासंभवादीश्वरसाधकमिति हृदयं॥ मन्वादयइति॥ तथाच नेश्वरसिद्धिरिति भावः॥ यद्यप्येतावतापिन संकेतग्रहानुपपत्तिस्तथापीश्वरोपि प्रसङ्गात्साध्यत इतिभावः। तेषामिति॥ कपिलमन्वादीनां सर्वज्ञत्वे भवतु व्यवहारहेतुत्वं परंतु तेषां तत्त्व एवविवाद इति भावः॥ ननु व्यवहारान्यथानुपपत्तिर्भवन्मते ईश्वरइव मन्मतेपि तेषु सर्वज्ञत्वे मानं स्यात् धर्मिकल्पनातो धर्मकल्पनाया लघीयस्त्वं चेत्याह। व्यवहारेति॥ एवमपि। पूर्वसर्गसिद्धसर्वज्ञमन्वादिस्वीकारेपि। अनुपपत्ते-

प्रतिसर्गभूयस्त्वं तथाकल्पनाया गौरवात् । अस्त्वेक एव मूलमिति चेत्सएवास्माकमीश्वर इति दिक् । स्यादेतत् यदि शक्तिग्रहः सहकारी तदा घटशब्दात्पटप्रत्ययः किं न स्यात् अस्ति च तस्य शक्तिग्रहो घटे । अथ यः शब्दो यच्च गृहीतशक्तिकः स तदर्थं प्रत्याययतीति चेत्तर्हि काश्यां गौरस्तीति वाक्याद्देशान्तरीयस्य गोः प्रत्ययो न स्यात् नहि तस्य काश्यां स्थितायां गवि शक्तिग्रहोऽस्ति तस्यापेक्षाप्रतीतेः । अत्र मौ

रिति । पूर्वसर्गात् पूर्वसर्गसिद्धसर्वज्ञत्वकः कश्चिद्यदि स्यात्तदा ततो व्यवहारप्रवर्त्तना तत्स्यात् स एव तुनास्तीतिभावः ॥ तत्रापि । पूर्वसर्गेपि । अन्यएवेति । स्वपूर्वसर्गसिद्धसर्वज्ञत्वक अन्यएवेत्यर्थः ॥ तथाभावेति । व्यवहारप्रवर्त्तकत्वंननु सर्वदा सर्वज्ञादि शाली एकोमनुरेव सर्वत्रमूलमित्याशङ्कते । अस्त्वकएवेति ॥ सार्वज्ञादिशालीमनुत्वेन भवदभिमत इत्यर्थः ॥ तथाच नाभ्रेव भेदो न तु नामवतीति भावः । दिगिति ॥ स्वोपादानगोचरजन्यापरोक्षज्ञानचिकीर्षाकृत्यजन्यानि सकर्तृकाणि कार्यत्वात् घटवदित्यनुमानमपीश्वरसाधकमवसेयं ॥ ननु शाब्दबोधे शक्तिज्ञानस्य हेतुत्वे पि घटपदं घटे शक्तमिति शक्तिज्ञानकाले पटशाब्दबोधापत्तिः । नच तदा घटशाब्दबोधोत्पत्त्या शाब्दत्वावच्छिन्नं जायतएव पटशाब्दत्वावच्छिन्नस्य चापादकाभाव एवेति वाच्यं ॥ योग्यताज्ञानादेरेव तदवच्छिन्नापादकत्वादित्याशंकते ॥ स्यादेतदिति । ननु तदर्थविषयकशाब्दत्वावच्छिन्नं प्रति तच्छक्तपदज्ञानत्वेन हेतुत्वकल्पनान्नोक्तापत्तिरित्याशङ्कते । अथेति ॥ तस्य । देशांतरस्थपुंसः ॥ तस्या एव । काश्मीस्थगौरेव ॥ अप्रतीतेरिति । असन्निकृष्टत्वादितिभावः ।. गौः काश्मीहस्तिरिति वाक्यजन्यशाब्दबोधे काश्मीस्थगौरेव विशेष्या एवं च देशांतरीयपुंसः तादृशगौरसन्निकृष्टत्वेन तत्र शक्तग्रहात् शाब्दबोधानुपपत्तिरिति । तर्हिशेषकशाब्दत्वावच्छिन्नं प्रति तद्विशेष्यकशक्तिग्रहत्वेन कारणता दुर्वचेति शाब्दत्वशक्तिज्ञानत्वाभ्यामेव कार्यकारणभावो वाच्यः योग्यताबलाच्चाप्तोक्तशक्तिकव्यक्तेरपि भानसुपेयम् एवं च घटपदात्पटशाब्दबोधापत्तिर्जागरूकै-

मौक्तिकाः गवादिपदानां गोत्वे एव शक्तिः कथं तर्हि व्यक्तिलाभ इति चेत् । तदाक्षेपादित्याहुः । ननु कोयमाक्षेपः तत्स्यार्थापत्तिरेवाक्षेपः गोत्वं हि स्वाश्रयं विनाऽनुपपन्नं तमाक्षिपतीति भट्टाः । तच्च अनुपपत्तिज्ञानमंतरेणापि गौर-

---

वेत्यनुपपत्त्या शाब्दप्रमितिरनुमित्यन्तर्गतैव एवं च घटपदात्पटप्रत्ययबोधापत्तिः ॥ तन्निरूपितव्याप्तिज्ञानादेरभावादित्याखण्ड लभावार्थोऽवसेयः ॥ अत्र । शाब्दत्वशक्तिज्ञानत्वाभ्यां कार्यकारणभावविचारे । गोत्वएवेति । गोत्वविशिष्टे शक्तिस्वीकारे आवश्यकत्वान्नागृहीतविशेषणन्यायेन गोत्वे एव शक्तिः विशिष्टे शक्तिस्वीकारमपेक्ष्य विशेषणे शक्तिस्वीकारे लाघवात् ॥ तदिदमुक्तं "विशेष्यं नाभिधागच्छेत्स्वीयशक्तिर्विशेषणे" इति । कथंतर्हीति ॥ व्यक्तेरशक्यत्व इत्यर्थः । लाभो । बोधविषयता । अशक्यस्यापि शाब्दबोधविषयत्वोपगमे पटादेरपि बोधापत्तेरिति भावः नचाक्षेपोऽनुमानं तच्च न संभवति पक्षसाध्यहेतुप्रयोगासंभवात् तथाहि इयंगौर्गोत्वादिति तावदनुमानंन संभवति शाब्दात्पक्षज्ञानात् नापि गोत्वं गवाश्रितं गोत्वादिति पक्षतावच्छेदकहेत्वोरैक्येन सिद्धसाधनात् । अथ गोत्वं व्यक्त्याश्रितं जातित्वादित्यनुमानेन पक्षधर्मताबलाद् गोत्वाश्रयव्यक्तिसिद्धिरिति चेन्न ॥ जातित्वादेर्लिङ्गस्य पदादनुपस्थितेः । व्यक्त्यादिप्रतिसंधानमंतरापि व्यक्तिबोधस्यानुभवसिद्धत्वाच्चेति कथमाक्षेपाद् व्यक्तिलाभ इत्याशंकते । ननु कोयमिति ॥ समाधत्ते । तस्येति । गवादिधर्मिणइत्यर्थः ॥ अर्थापत्तिमेवाह ॥ गोत्वंहीति । अनुपपन्नमिति ॥ आनयनाद्यन्वये ऽनुपपन्नमित्यर्थः ॥ तं । स्वाश्रयम् । आक्षिपतीति ॥ अनुपपत्तिज्ञानजन्यार्थापत्त्यात्मकत्वा ने व्यक्त्यादिज्ञानस्यानपेक्षित्वात् अतएव शतवर्षजीविनो गृहेऽभावः बहिः सत्त्वं विनाऽनुपपन्न इत्यनुपपत्तिज्ञानाद्यधिकरणेनापि शतवर्षजीविनो गृहाभावेन बहिः सत्त्वसिद्धिरिति भावः ॥ तथाच गोशब्दाद्गोत्वस्य शाब्दबोधः व्यक्तेस्त्वनुमितिविषयत्वमर्थापत्तिविषयत्वं वा नतु शाब्दबोधे तस्याः प्रवेशः भट्टमते पदोपस्थिता एव शाब्दबोधे भासंते यथा गामानयेत्यादौ पदानुपस्थिता एव वा ॥ पश्यतः ब्रुवतरुपंक्षेपाशब्दं च शृण्वतः

स्तीति वाक्याङ्गोत्वविशिष्टव्यक्तिप्रतीतेः । तस्मात्प्रमाणविप्रतिषेधेन त्वमाक्षेप इति गुरवः । यावती हि जातिधीर्व्यक्तिं विषयीकरी

खुरविषाणपशब्दं च खेतोऽखोधावतीति धीरित्यत्र पदानुपस्थितानामेव शाब्दबोधविषयता तत्र शाब्दयामीत्यनुभवात् नतु केचित्पदोपस्थिताः पदानुपस्थिता इति अर्द्धजरतीयन्यायस्य भट्टैरनङ्गीकारात् । नच गौरितिपदात् युगपदेव जातिव्यक्त्योः प्रतीतिर्व्याहन्येत एवं गोपदाद् गोत्वधीस्तोऽनुपपत्तिज्ञानं ततश्च व्यक्तिधीरिति ज्ञानधाराकल्पनंचेति गौरवमिति वाच्यं ॥ गोपदस्य जातिमात्रवाचकत्वे सिद्धे युगपत्प्रतीतेरप्रसिद्धेः ज्ञानधाराकल्पनस्य च फलमुखगौरवत्वेनादोषत्वात् यथा पचतीत्यत्र कृतिमात्रशक्त्याख्यातेन कृतिमात्रप्रतीतिः कर्त्तुर्लाभस्त्वाक्षेपादितः अन्यथा सकर्त्तृकक्रियाया एवावगतस्तत्रापि कर्त्तरि शक्तिः प्रसज्येत । अन्यलभ्यत्वात्तत्र न शक्तिरिति चेत् । अत्रापि तुल्यत्वादिति ध्येयम् ॥ अनुपपत्तीति ॥ गामानयेत्यादौ गोत्वस्यानयनेऽन्वयानुपपत्त्या व्यक्तेराक्षेपसम्भवेपि गौरस्तीत्यत्र गोत्वस्यास्तित्वेऽन्वयसम्भवेनानुपपत्तिज्ञानस्यैवासम्भावितया न तेन व्यक्तेर्लाभसम्भव इत्यर्थः न त्वनुपपत्तिज्ञानं विनापि व्यक्तिभानस्यानुभविकतया तदनुपपत्तेरित्यर्थः ॥ तथासति पचतीत्यत्रापि आख्यातस्य कर्त्तरि शक्त्यापत्तेः अनुभवस्य तुल्यत्वात् अतएव गामानयेति विहाय गौरस्तीत्येवोक्तमिति ॥ चिन्तामणिकृतस्तु व्यक्तेरपदार्थत्वे सुवर्थसंख्यादीनां तत्रान्वयासम्भवः सुब्विभक्तीनां प्रकृत्यर्थान्वितस्वार्थबोधकत्वनियतत्वात् तिङर्थसंख्यादीनां कर्त्तर्येवान्वयात्सुप्त्वनिवेशः ॥ जातावि शक्तिस्वीकारेपि पशुत्वादिपदे उपाधिविशिष्टव्यक्तौ तैरपि शक्तिस्वीकारेण तत्रैव तन्नियमावधारणात् । नच प्रकृतिपदतात्पर्यविषयएव तदन्वय इति नियमः ॥ लक्षणोच्छेदापत्तेः । गौरवाच्च ॥ ननु पचतीत्यत्र यथाक्षेपलभ्येन कर्त्रासंख्यान्वयः तथाक्षेपलभ्यव्यक्त्यापि तदन्वयः स्यात् तादृशनियमस्य च तत्रैवात्रापि सङ्कोचादिति चेन्न । तत्रापि चैत्र इति पदमध्याहृत्यैवान्वयबोधस्वीकारात् तदिदमुक्तम् ॥ अयमेव ह्याक्षेपो यत्प्रथमान्तपदोपस्थाप्यत्वं नामेति ॥ असंकोचेनोपपत्तौ व्युत्पत्तिसंकोचे मानाभावाच्च ॥ नह्येकत्र संकोच इत्यन्यत्रापि सः व्युत्पत्तिमात्रोच्छेदापत्तेरिति ॥ यत्तु गोपदस्य गोत्वे शक्तिर्व्यक्तौ लक्षणेति मण्डनमिश्राः ॥ त-

तीति व्यक्तेर्लाभः। इदमेवकथमिति चेत् जातिभानसामग्री एव तद्बोधकत्वमिति गृहाण। यद्वा जातिशक्तिरेव व्यक्तिं बो-

---

दुक्तं "जातावस्तित्वनास्तित्वे नहि कश्चिद्विवक्ष्यति। नित्यत्वाल्लक्ष्यमाणाया व्यक्तेस्तेहि विशेषणे" इति॥ अस्तित्वनास्तित्वे उत्पत्तिविनाशौ गौरुत्पन्ना गौर्नष्टा इत्यादौ मोक्षस्य नित्यत्वेनोत्पादविनाशयोरसम्भवाद् व्यक्तौ लक्षणा तात्पर्यज्ञानसत्त्वे गङ्गायां घोषमत्स्यौ स्त इत्यत्रेव युगपद्वृत्तिद्वयविरोधे मानाभावादिति॥ तत्र॥ शक्यादन्येन रूपेण ज्ञाते भवति लक्षणेति यथा गङ्गायां घोषइत्यत्र तीरत्वेन ज्ञाते तीरे। नह्यत्र व्यक्तिर्गोत्वातिरिक्तेन सास्नादिमत्त्वेन वा ज्ञाने च तेनैव शाब्दबोधापत्तिः लक्ष्यतावच्छेदकरूपेणैव लक्षस्य भाननियमात्॥ किंच। जातिमात्रे शक्तिर्व्यक्तौ लक्षणेति तदा स्याद्यदि जातिमात्रे मुख्यप्रयोगः। नचैवं किंच। गां पश्य गौरस्तीत्यादौ मुख्यार्थान्वयानुपपत्त्यभावेन लक्षणायां मानाभावाद् व्यक्तिबोधानुपपत्तिश्चेत्यध्येयं। तस्मादिति॥ अन्यविधात्वेपस्य दुर्वचत्वादित्यर्थः॥ समानेति॥ एकज्ञानविषयत्वमेवेत्यर्थः। इदमेव विशदयति॥ यावतीहीति। व्यक्तिप्रत्यक्षं विना जातिप्रत्यक्षस्याभावेन तत्रैव तन्नियमावधारणादित्यर्थः। ननु प्रत्यक्षस्थले संयुक्तसमवायादिरूपजातिप्रत्यक्षसामग्रीसत्त्वे संयोगादिरूपव्यक्तिभासकस्य सत्त्वादस्तु तथा शाब्दे तु कथमेवमित्याशङ्कते॥ इदमेवेति। समानविषयत्वमेवेत्यर्थः॥ जातिभानेति॥ जातिविषयकशाब्दबोधे जातिशक्तिज्ञानस्य हेतुतया तद्बलाज्जातिशाब्दबोधे जायमाने व्यक्तिरपि भासते तत्पदशक्यविषयकशाब्दबोधे तत्पदनिरूपितजातिशक्तिज्ञानस्य हेतुत्वादित्यर्थः। इदंतु गुरुमते कुब्जशक्तिस्वीकारे बोध्यं। तथाहि तन्मते जातौ व्यक्तौ च शक्तिः परंतु जातिविषयकशक्तिज्ञानमेव जातिविशिष्टव्यक्तिविषयकशाब्दबोधे कारणं व्यक्तिशक्तिस्तु स्वरूपत्युपयुज्यते॥ नच जातिविशिष्टव्यक्तिशाब्दबोधे व्यक्तिशक्तिज्ञानमेव। कारणं जातिशक्तिस्तु स्वरूपसत्युपयुज्यते इत्येव किं न स्यादिति वाच्यं॥ तथासति देशान्तरस्थगोविशेषकशक्तिज्ञानाभावेन तद्बोधानापत्तेः एवं च घटादिबोधापत्तिरपि न तत्पदशक्यविषयकशाब्दबोधं प्रति तत्पदनिरूपितजातिशक्तिज्ञानत्वेन कारणत्वादिति कुब्जशक्तिवादिमतनिष्कर्षः। ननु कुब्जशक्तिवादिमते व्यक्तिशक्तिज्ञानस्याहेतुतया तत्स्वीकारे

यति । नचान्यशब्दशक्त्या अन्यबोधनेऽतिप्रसङ्गः गोत्वशक्तं पदं गोत्वविशिष्टं बोधयतीत्यनतिप्रसङ्गात् अन्यथानुपपत्त्या

प्रयोजनाभावः । नच तथासतिजातिविषयकशाब्दत्वमेव जातिशक्तिज्ञानस्य कार्यतावच्छेदकं योग्यताबलाच्च व्यक्तिरपि भासतइत्येवोपेयं तथाच घटादेरपि भानापत्तिः अशक्यत्वाविशेषात् मन्मते च तत्पदशक्यविषयकशाब्दत्वस्यैव कार्यतावच्छेदकत्वेऽनुपपत्त्यभावादिति वाच्यं ॥ जातिप्रकारकव्यक्तिविशेष्यकशाब्दबोधं प्रति जातिविषयकज्ञानत्वेन कारणत्वे क्षतिविरहादित्यलं कुलशक्तिवादिमतेनेत्यत आह ॥ वहेति ॥ तथाचेष्टापत्तिः कुलशक्ति वादस्यैकदेशिमतेनेति न तदस्वीकारे तेषां सिद्धान्तविरोध इति भावः ॥ जातिशक्तिरेवेत्येवकारेण व्यक्तौ कुलशक्तेः स्वरूपसदुपयोगित्वव्यवच्छेदः ॥ अन्यशक्त्या । जातिशक्त्या । अन्यबोधने । तत्पदाशक्यव्यक्तिबोधने । अतिप्रसंगः । घटादिबोधन प्रसङ्गः । तत्पदाशक्यत्वाविशेषात् । मन्मते च व्यक्तेरपि तत्पदशक्यतया न व्यक्तिबोधने कापि क्षतिरिति भावः । उत्तरयति ॥ गोत्वशक्तमिति ॥ गोत्वप्रकारकगोविशेष्यकशाब्दबोधं प्रति गोत्वशक्तिज्ञानत्वेन कारणतया न घटादिबोधापत्तिरित्यर्थः । ननु गोत्वप्रकारकगोविशेष्यकशाब्दबोधं प्रत्येव गोत्वशक्तिज्ञानस्य कारणत्वमुपेयते नतु घटत्वविशिष्टशाब्दबोधं प्रतीत्यत्र विनिगमकाभावः अशक्यत्वाविशेषादित्यत आह । अन्यथानुपपत्त्येति ॥ गोपदाद्गोत्वविशिष्टस्यैव बोधो नतु घटत्वादिविशिष्टस्येति फलानुपपत्त्येत्यर्थः ॥ तथैव । गोत्वविशिष्टशाब्दबोधं प्रत्येव । कल्पनात् । गोत्वशक्तिज्ञानस्य हेतुत्वकल्पनात् । एवकारेण घटादिशब्दबोधं प्रति तु न तथा हेतुत्वकल्पनं फलाभावादिति सूचितम् ॥ अथवा पूर्वोक्तकुलशक्तिवादिमतेऽस्वरसं प्रकाशयति ॥ अन्यथेति । अन्यथा । कुलशक्तिं स्वीकृत्य व्यक्तिबोधोपपादने ॥ अनुपपत्त्या । उपपत्त्यभावेन ॥ व्यक्तौ कुलशक्तिस्वीकारे प्रयोजनविरहेण तन्मते प्रमाणाभावेनेति यावत् । तथैव । गोत्वविशिष्टबोधं प्रत्येव । कल्पनात् । गोत्वशक्तिज्ञानस्य हेतुत्वकल्पनादित्यर्थ इति ॥ वस्तुतस्तु जातिभासकसामग्री एव व्यक्तिभासकत्वादिति अग्रे च जातिशक्तिरेव व्यक्तिबोधिकेति ग्रन्थपर्यालोचनया कुलशक्तिवादमादाय यद्वा पूर्वग्रन्थसंगमने गोत्वपदस्य व्यक्तौ शक्त्यभावेन तथा सतीत्यग्रिमदूषणदानस्य यद्वा पूर्वंकल्पेऽसम्भवितया नैवं व्याख्येयं । नच

तथैव कल्पनादिति तदपरे न क्षमन्ते। तथासति गोत्वमस्तीत्य-

यद्वेति निष्कृष्टमते एव तथासतीति दूषणदानमिति वाच्यं। संदर्भशुद्धेरपरिहारात्। 'किंत्वन्यथैव। तथाहि॥ जातिभानेति॥ जातिशब्दत्वमेव जातिशक्तिज्ञानकार्यतावच्छेदकं जातिभाने च जायमाने व्यक्तयविषयकस्य तस्याभावाद्व्यक्तिरपि भासते यद्येन विना न भासते तद्बोधकस्य तद्बोधकत्वनियमात् जातिभासकसामग्रया एव व्यक्तिबोधोपधायकत्वादित्यर्थः। ननु जातिविषयतां विनापि व्यक्तिप्रत्यक्षोदयाज्जातिभासकसामग्रतिरिक्ता व्यक्तिभासकसामग्रवश्यमुपेया। नच शाब्दस्थले तथानियमः तथापि जातिभासकसामग्राव्यक्तिबोधोपधायकत्वे ततो घटादेरपि कुतो न बोधः। नच व्यक्तिबोधे समानविचित्तिवेद्यत्वमेव नियामकमिति वाच्यं। नहि व्यक्तिबोधे समानविचित्तिवेद्यत्वेन कारणता तथाच व्यक्तिविषयतायाः कारणनियम्यत्वावश्यकत्वे व्यक्तिशक्तिज्ञानमेव कारणं स्यादित्यखरसादाह॥ यद्वेति॥ जातिशक्तिरेवेत्येवकारेण व्यक्तिशक्तिव्यवच्छेदः॥ तथाच व्यक्तिविषयतायाः जातिशक्तिज्ञानकार्यतावच्छेदककोटौ निवेशान्न तस्याः कारणानियम्यत्वमिति भावः॥ गोत्वशक्तिज्ञानस्य घटबोधं प्रत्येव हेतुत्वमास्तामित्यत आह॥ अन्यथेति॥ गोपदाद्गोरेव बोधो नतु घटादेरतो गोशाब्दं प्रत्येव हेतुत्वकल्पनादित्यर्थः॥ ननु व्यक्तिशक्तिरेव जातिविशिष्टबोधिकेत्येव किं न स्यात् भवन्मते तत्पदाशक्त्याया व्यक्तेरिव मन्मतेपि जातेर्भाने बाधकाभावादित्यत आह॥ अन्यथेति। अथवा ननु तत्पदाशक्त्यबोधनेऽति प्रसङ्गाज्जातिविशिष्टशक्तिरेव व्यक्तिबोधिकेत्येवास्तामित्यत आह॥ अन्यथेति॥ व्यक्तिशक्तिज्ञानस्य कारणत्वे देशान्तरस्थगोबोधानुपपत्त्या जातिशक्तिज्ञानत्वेनैव हेतुत्वकल्पनादिति ध्येयं॥ तथासतीति। जातावेव शक्तिस्वीकारेण गोत्वविशिष्टविषयकशाब्दं प्रति गोत्वविषयकशक्तिज्ञानत्वेन हेतुत्वस्वीकारेत्यर्थः॥ गोत्वमस्तीति। गोत्वपदस्यापि गोत्वशक्तत्वेन गोपदगोत्वपदयोरविशेषात् गोत्वविशिष्टशाब्दबोधापत्तेरित्यर्थः॥ नच गोत्वं गोपदशक्यमिति निर्धर्मितावच्छेदकं गोपदशक्तिज्ञानं गोत्वविशिष्टशाब्दबोधे हेतुः। गोत्वत्वधर्मितावच्छेदकक गोत्वपदशक्तिज्ञानं गोत्वत्वरूपेण गोत्वशाब्दबोधे हेतुरिति नातिप्रसङ्ग इति वाच्यं॥ गोत्वं न गोपदशक्यमिति बाधका-

खेपि निर्धर्मितावच्छेदकशक्तिज्ञानसम्भवेन गोत्वविशिष्टशाब्दबोधापत्तिरिति गोत्वत्वधर्मितावच्छेदकशक्तिज्ञानहेतुतायां आवश्यकत्वात् ॥ एवं च गोत्वत्वस्य शक्यतावच्छेदकत्वावश्यकतया तदपेक्ष्य गोत्वजातेरेव तथात्वमुचितमित्यपि लाघवमवसेयम् ॥ अथ गोत्वे निरवच्छिन्नैव शक्तिः गोपदं गौरित्याकारकं शक्तिसम्बन्धेन स्वरूपतः गोत्वप्रकारकगोपदत्वावच्छिन्नविशेष्यकशक्तिज्ञानं गोत्वविशिष्टशाब्दबोधहेतुरिति न बाधकाले शाब्दबोधापत्तिः गोत्वपदं गोत्ववदिति गोत्वप्रकारकगोपदत्वावच्छिन्नाविशेष्यत्वेन रूपेण गोत्वप्रकारकशक्तिज्ञानं च गोत्वशाब्दबोधे हेतुरिति न गोत्वमस्तीत्यतो गोत्वविशिष्टबोधापत्तिरिति चेन्न । तथापि गोपदात्कदाचित्त्वसमवायेन गोत्वविशिष्टबोधः कदाचित्कालिकादिसम्बन्धेन तद्विशिष्टबोध इति नियमानुपपत्तिः । गोत्वविषयकशक्तिज्ञानस्याविशिष्टत्वात् अस्मन्मते समवायेन गोत्वविशिष्टशाब्दबोधं प्रति समवायेन गोत्वविशिष्टशक्तिज्ञानस्य हेतुत्वेनानुपपत्त्यभावात् । नच तात्पर्यज्ञाननियमात्तथानियमः । तथासति जातावपि शक्तिस्वीकारे प्रयोजनविरहात् । एवं गोत्वं गोपदशक्यमित्याकारकस्यैव शक्तिज्ञानस्य तैर्हेतुत्वोपगमेन तल्लिङ्गान्तभङ्गाच्चेति । एवमुपाधिप्रवृत्तिनिमित्तस्थले तैरप्युपाधिविशिष्टे शक्तिस्वीकारात् यथा पशुपदस्य लोमवल्लांगूलविशिष्टे शक्तिस्तथा जातिविशिष्टेपि अनुभवस्य तुल्यत्वात् । नच जातेर्व्यक्तिवित्तिवेद्यत्वनियमाद्यक्तौ लाभः उपाधौ तु तादृशनियमाभावादशक्तिबोधार्थमुपाधिविशिष्टे शक्तिरिति वाच्यम् ॥ नहि नियमबलादेव व्यक्तौ लाभः उपाधौ तु तादृशकारणनियम्यत्वात्कार्यस्य तथाच जातिविशिष्टबोधे जातिशक्तिज्ञानस्य कारणत्ववदुपाधिविशिष्टबोधे उपाधिशक्तिज्ञानस्यापि कारणत्वस्य सुवचत्वात् इति दिक् । कुञ्जशक्तिवादिनस्तु जातौ च व्यक्तौ च शक्तिः परन्तु जातिविषयकत्वेनैव ज्ञाता शक्तिर्व्यक्तिविषयकशाब्दबोधे कारणं व्यक्तिशक्तिस्तु स्वरूपसत्युपयुज्यते नचैवं व्यक्तिशक्तिस्वीकारवैयर्थ्यमिति वाच्यं तत्पदाशक्यस्यापि भाने घटादेरपि भानप्रसङ्गेन व्यक्तिशक्तिस्वीकारस्यावश्यकत्वात् । तथाच गोत्वप्रकारकगोविशेष्यकशाब्दबोधं प्रतिगोत्वविषयकगोपदशक्तिमती गौरित्याकारकं शक्तिज्ञानं हेतुः न तु गोत्वविशिष्टविषयकगोपदशक्तिमती गौरित्याकारकं गोत्वमस्तीत्यादौ तु तादृशगोत्वप्रका-

व्यतोपि गोत्वविशिष्टप्रत्ययापत्तेः तस्माद्गोत्वविशिष्ट एव शक्तिः नचोक्तदोषः गोत्वसामान्यलक्षणया सकलस्य गोरुपस्थितौ

एकशक्तिज्ञानाभावाच्च गोत्वविशिष्टबोधापत्तिरित्याहुः ॥ तदसत् ॥ गोत्वविषयकगोपदशक्तिमती गौरित्याकारकस्य गोत्वविषयकशक्तिज्ञानस्य हेतुत्वे गोत्वविषयकत्वस्य कारणतावच्छेदककोटौ निवेशे गौरवात्। अथ मास्तु गोत्वविषयकत्वनिवेशः तथापि गोपदशक्तिमती गोरिति गोत्वप्रकारकशक्तिज्ञानत्वेनैव गोत्वविशिष्टशाब्दबोधं प्रति हेतुता। नचैवमविवादइति वाच्यं। व्यक्तिविषयतायाः कारणतावच्छेदककोटौ न निवेशइत्येव तन्मत निष्कर्षात् देशान्तरस्थगोबोधानुपपत्त्या समानविशेष्यकत्वेन कार्यकारणभावासंभवेन लाघवेन च समानप्रकारकत्वेन कार्यकारणभावोयमादितिचेन्न। व्यक्तिविषयतायाः कारणतावच्छेदककोटावनिवेशे व्यक्तौ शक्तिस्वीकारवैयर्थ्यात् ॥ नच तदस्वीकारे गोत्वप्रकारकशक्तिज्ञानत्वेन हेतुत्वासंभवः व्यक्तौ शक्त्यभावेन शक्तिज्ञानस्य भ्रमत्वापत्तेरिति वाच्यं ॥ शक्तिर्नस्वरूपसती शाब्दहेतुः अपभ्रंशादपि शाब्दबोधोदयात् किंतु ज्ञाता तथाच यद्धर्मशक्तिज्ञानहेतुस्तदेव शक्यमिति जातिवद्व्यक्तिवैशिष्ट्यं च शक्यमेव अन्यथा व्यक्तावेव शक्तिःशक्तिज्ञाने च जातिरपि प्रकारत्वात् समानप्रकारकत्वेनैव कार्यकारणभाव इति जातावपि शक्तिरस्त्येव त। नच यद्विषयकत्वेन शक्तिज्ञानं हेतुस्तदेवावश्यं शक्यमिति नियमाज्जातावपि शक्तिरितिवाच्यं। तर्हि यद्विषयकत्वेन शक्तिज्ञानस्य हेतुता तदेव शक्यमिति नियमेन व्यक्तिविषयकत्वेनशक्तिज्ञानस्य हेतुत्वादेव व्यक्तिशक्तिस्वीकारस्यौचित्यादितिदिक् ॥ नैयायिकमतं दर्शयति ॥ तस्मादिति ॥ गोत्वविशिष्ट इति ॥ जातौ व्यक्तौ वैशिष्ट्ये च शक्तिरित्यर्थः ॥ तृतीयोपसङ्ख्यानकरणत्वैकत्वयोरिव जातौ व्यक्तौ च विशकलिततया शक्तौ गोत्वं व्यक्तिष्वेति बोधप्रसङ्गात्तु गौरिति तथाच वैशिष्ट्येपि शक्तिः एवमवयवसंयोगविशेषरूपाकृतौ तद्वैशिष्ट्ये च गोपदशक्तिः गोपदाज्जात्याकृतिविशिष्टस्यैव प्रतीतेः तथाच तदुक्तं ॥ "जात्याकृतिव्यक्तयः पदार्थ इति,, ॥ एकशक्तिसूचनाय पदार्थ इत्येकवचनं ॥ ननुतत्प्रकारकतद्विशेष्यकशाब्दबोधं प्रति तत्प्रकारकतद्विशेष्यकशक्तिज्ञानत्वेनहेतुत्वमित्यायातं तच्च काशीस्थायां गवि शक्त्यग्रहाद् बोधानापत्तिरूपया

सर्वत्रैव गवि शक्तिग्रहसम्भवात् अस्तु वा एकत्रैव गवि शक्ति ग्रहः । नचान्यगोबोधानापत्तिः अन्यशक्तिग्रहादन्यत्रशक्तिबोधनेऽतिप्रसङ्ग इतिवाच्यं । गोत्वविशिष्टशक्तिग्रहो गोत्वविशिष्टप्रत्यायक इत्येवमनतिप्रसङ्गादिति संप्रदायविदः । नन्वस्तु गव्येव शक्तिर्नतु गोत्वेपि गौरवात् । नचैवं गोत्वप्रत्ययानापत्तिः गोत्वावच्छिन्नशक्तिग्रहस्य गोत्वविशिष्टप्रत्यायकत्वादिति

धकग्रस्तमित्याशंकते ॥ नचेति ॥ उक्तदोषः । शक्तिग्रहाविषयभूतव्यक्तिबोधानापत्तिरूपदोषः ॥ समाधत्ते ॥ गोत्वेति ॥ तथाच सर्वत्रापि शक्तिग्राह्यशक्तिग्रहाविषयकव्यक्तेरलीकतया न तद्बोधानुपपत्तिरिति भावः ॥ सामान्यलक्षणानङ्गीकारेप्याह ॥ अस्तुवेति ॥ एकत्रैव । लौकिकसाक्षात्कारविषय एव । अन्यगवीति ॥ शक्तिग्रहाविषयगवीत्यर्थः ॥ ननु योग्यतावच्छक्तिग्रहाविषयकव्यक्तेरपि भाने बाधकाभाव इत्यत आह । अन्येति ॥ अतिप्रसङ्गः ॥ गोपदाद्घटादेरपि बोधापत्तिः ॥ शक्तिग्रहाविषयत्वस्याविशेषादिति भावः ॥ प्रत्यायक इति । गोत्वप्रकारकगोविशेष्यकशक्तिज्ञानत्वेन हेतुतया न घटादिबोधापत्तिः ॥ पूर्वं तु तत्तद्व्यक्तित्वेनापि गोर्निवेशः । इह तु गोत्वेनैव निवेश इति द्रष्टव्यं ॥ ननु एकस्य प्रवाहसंबन्धस्य तीरतीरस्थयोरभावाच्छक्यसंबन्धरूपाया लक्षणाया एकस्यालक्ष्यतावच्छेदकलक्ष्यतासंभवितया लक्ष्यतावच्छेदकविशिष्टे लक्षणाया अनङ्गीकारेण गङ्गायां घोष इत्यादौ स्वतत्स्वतुपस्थापितस्यापि तीरत्वस्य शाब्दबोधे भानवत् शक्यतावच्छेदके शक्तत्वभावेपि तादृशशक्यार्थकारणभावबलादेव गोत्वभाननिर्वाहेऽयं तत्र शक्तिकल्पनेनेति संप्रदायमतेऽसरसं प्रकाशयन्नन्यमतमाह ॥ गव्येवेति ॥ गौरवात् । केवलव्यक्तौ शक्तिस्वीकारेणैवोपपत्तौ जातिविशिष्टव्यक्तौ शक्तिकल्पने गौरवादित्यर्थः । नचैवमिति । एवं । गोत्वे शक्त्यस्वीकारे घटादेरपि बोधापत्त्या अयमस्य शाब्दविषयतया गोत्वबोधानापत्तिरित्यर्थः । गोत्वेति ॥ गोत्वविशिष्टशाब्दबोधं प्रति गोत्वधर्मितावच्छेदकशक्तिग्रहस्य हेतुत्वेनातिप्रसङ्गादित्यर्थः ॥ गोत्वे एव शक्तिस्वीकारे च गोत्वत्वधर्मितावच्छेदकशक्तिग्रहस्य हेतुतया गौरवाद्व्यक्तावेव शक्तिरिति ज्ञेयं ॥

तस्य। स्यादेतत् यदि गोत्वविशिष्टे शक्तिस्तदा गौः शुक्ल इत्यतो गोशुक्लयोरभेदप्रत्ययो न स्यात् तस्यान्वयरूपस्याशक्यत्वात्। नच शब्दादशक्यमपि भासतेति प्रसङ्गात्। उच्यते गोशुक्लं पदमेव गवान्वयं बोधयति। नचाशक्यबोधने घटमपि बोधयेदिति वाच्यं। गोशुक्लं पदं गवान्वयबोधजनकं नच घटो गवान्वयो येनाति प्रसङ्गः स्यात्। भट्टास्तु अन्वयविशिष्टे शक्तिग्रहादन्वयेपि शक्तिरेवेत्याहुस्तन्न अन्वयस्याप्यलभ्यत्वात् अनन्यलभ्यस्य च शब्दार्थत्वात् अन्यथा ल-

---

ननु जातिविशिष्टे शक्तिस्वीकारेण शाब्दे व्यक्तिभानोपपत्तावपि वाक्यार्थरूपान्वयस्यापि शाब्दविषयतया तत्रापि शक्तिरास्तां ॥ नचेष्टापत्तिः ॥ "जात्याकृतिव्यक्तयः पदार्थ,, इति अक्षपादीयसूत्रविरोधादिति संप्रदायविद मते शंकते ॥ स्यादेतदिति ॥ नन्वभेदोपि शक्य एवेत्यत आह ॥ तस्येति ॥ जातिविशिष्टएव शक्तिस्वीकारादिति भावः ॥ ननु योग्यतादिबलादपि भासत इत्याह। नचेति ॥ अतिप्रसङ्गात् ॥ घटादेरपि बोधप्रसङ्गात्। गोशुक्लं इति। इतरपदसमभिव्याहृतं गोपदमित्यर्थः ॥ गवान्वयेति ॥ नच गौः शुक्लश्चेत्यभेदः गामानयेत्यान्वयविधः संसर्गोभासते इत्यत्र किंनियामकमिति वाच्यम् ॥ भेदान्वयबोधे समानविभक्तिकतत्तत्पदसमभिव्याहाररूपानुपूर्वीज्ञानस्य अन्यत्रच तत्तदानुपूर्वीज्ञानस्य हेतुत्वादिति भावः ॥ पदानां जातावभिधारूपाशक्तिरास्तेपेणच व्यक्तेर्लाभः अन्वयस्य चास्तेपेण लाभासंभवादशक्यबोधने चातिप्रसङ्गादन्वयेपिशक्तिः इत्थं च जातौ अन्वये चाभिधारूपा शक्तिरिति भट्टमतं दर्शयति ॥ भट्टास्त्विति ॥ अन्वयविशिष्टे शक्तिग्रहात्। अभिधारूपशक्तिग्रहात् ॥ अन्वयेपि। वाक्यार्थरूपेऽन्वयेपि ॥ शक्तिरेव। अभिधारूपा शक्तिरेव। अन्वयस्येति। गौः शुक्ल इत्यत्र वाक्यार्थरूपान्वयस्येत्यर्थः अन्यलभ्यत्वात्। अन्वयविषयकशाब्दबोधे तत्तदानुपूर्वीज्ञानत्वेन हेतुतया तत्तदादेवान्वयभानोपपत्तिरित्यर्थः ॥ अन्वयविशेषभानार्थं तत्तदानुपूर्वीज्ञानहेतुतायास्तवाप्यावश्यकत्वादिति भावः। नन्वन्यलभ्यत्वेपि शक्तौ बाधकाभाव इत्यत आह। अनन्येति ॥ शब्दार्थत्वात्। शब्दशक्यत्वादित्यर्थः।

लक्षणोच्छेदापत्तिः । प्राभाकरास्तु कार्यान्विते शक्तिः पदानां-तथाहि प्रयोजकवाक्य श्रवणानन्तरं प्रयोज्यस्य प्रवृत्तिमुपलभमानो बालस्तत्प्रयोजकतया कार्यतावच्छिष्टज्ञानमनुमिनोति स्वप्रवृत्तौ तेन कार्यत्वविशिष्टज्ञानस्य हेतुत्वावधारणा

ननु शक्यस्यैव शाब्दविषयत्वमिति नियमादन्यलभ्यत्वेपि तत्र शक्तिरावश्यकीत्यत आह ॥ अन्यथेति । अन्यथा । शक्यस्यैव शाब्दविषयत्वमिति नियमाभावे च शक्तिकल्पने। लक्षणेति।लक्षणया तीरबोधोपपत्तिरित्यन्यलभ्यत्वात्तत्र नशक्तिः शक्यस्यैवशाब्दविषयत्वनियमेतु तीरेपि गङ्गापदशक्यत्व प्रसङ्गे न लक्षणोच्छेदापत्ते रित्यर्थः।इदमुपलक्षणम् अन्विते शक्ति स्वीकारेऽन्वितत्वेन पदार्थोपस्थितिः अन्वयप्रकारकशाब्दबोधश्च स्यात् नत्वेतदनुभवसिद्धं। ननु अन्विते शक्तिःस्वरूपसत्युपयुज्यतेननुज्ञाता जातीतुज्ञातैवोपयुज्यतइति तत्सततनिष्कर्षइतिचेन्न। यद्विषयकत्वेनैव ज्ञाताशक्ति रनुभवहेतुस्तत्रैव शक्तिरित्यन्वये शक्तिस्वीकारवैयर्थ्यात् शक्यस्यैवशाब्दविषयत्व मितिनियमस्यचलक्ष्ये व्यभिचारादिति रहस्यमनुसन्धेयं । केचित्तु भट्टमते जातावेवाभिधारूपा शक्तिः अन्वितविषयकशाब्दत्वाच्छक्यं प्रति घटपदशक्तिज्ञानत्वेन कारणतेति घटपदादावन्विते आनुभाविका शक्तिः नैयायिकमते आनुपूर्वीज्ञानस्यैवान्वितशाब्दत्वं कार्यतावच्छेदकं भट्टमते घटपद शक्तिज्ञानस्येति मतभेदः । अन्वयविशिष्टे शक्तिग्रहात् । बालेनघटपदादेरानुभाविकशक्तिग्रहात्।शक्तिरेव । आनुभाविकशक्तिरेव। अन्वितविषयकशाब्दत्वं घटपदशक्तिज्ञानकार्यतावच्छेदकमित्यर्थः। अन्यलभ्यत्वात्।अन्वितशाब्दत्वस्यानुपूर्वीज्ञानकार्यतावच्छेदकतया तत्कोटिप्रविष्टत्वादित्यर्थः।अनन्यलभ्यस्यच।आनुपूर्वीज्ञानादिरूपप्रकरांतरालभ्यस्य च।शब्दार्थत्वात्। घटपदशक्तिज्ञानकार्यतावच्छेदककोटिप्रविष्टत्वादित्यर्थः । तथाचान्वय विशेषे शाब्दत्वस्यानुपूर्वीज्ञानकार्यतावच्छेदकत्वावश्यकत्वे अन्वयविषयकशाब्दत्वस्य घटपदशक्तिज्ञानकार्यतावच्छेदकत्वे मानाभाव इति भावः । ननु शक्तिज्ञानकार्यतावच्छेदककोटिप्रविष्टस्यैव शाब्दविषयत्वमिति नियमाश्रयेत्यत आह। अन्यथेति। तादृशनियममभ्युपेत्य तथा कल्पने। लक्षणेति। तादृशनियमाभ्युपगमे तीरविषयताया अपि गङ्गापदशक्तिज्ञानकार्यतावच्छेदककोटिनिवेशे

त् अतस्तत्रेत्याकाङ्क्षायामुपस्थितत्वाच्छब्दमेव तथावधारण
ति अतस्तन्निर्वाहिकां शक्तिं कार्यान्विते शब्दत्वावच्छेदेन
कल्पयति तदनु चावापोद्वापाभ्यां घटादिपदे शक्तिं गृह्ण
ति प्रथमकल्पनानुरोधात् कार्यतान्विते घटादौ शक्तिं क

तत एव तीरभानोपपत्तेस्तत्र लक्षणास्वीकारो व्यर्थः इतिचेन्न स्वरूपसत्त्व
पयुज्यते किंतु ज्ञातेयेति व्याचक्षुः। तत्संदर्भविरोधादुपेक्षणीयं। प्राभाकरास्त्वि
ति। कार्यान्विते इति। कृतिसाध्यानयनाद्यन्वित इत्यर्थः। तत्प्रयोजकतया। प्रव-
त्तिप्रयोजकतया। कार्यतावच्छिन्नज्ञानमिति। कार्यताकृतिसाध्यतावच्छिन्नविषय-
कं ज्ञानमित्यर्थः। अनुमिनोति। प्रयोज्यस्येति शेषः। अयं घटानयनगोचर-
कार्यतावच्छिन्नज्ञानवान् घटानयनगोचरप्रवृत्तिमत्त्वादित्यनुमानाकारबोध्यः।
अप्रयोजकत्वमाशङ्क्याह। स्वप्रवृत्ताविति। स्वप्रवृत्तौ। स्वीयस्तनपानगोचरप्रवृत्तौ।
तेनाबालेनाकार्यतावच्छिन्नज्ञानस्य कृतिसाध्यत्वविशिष्टज्ञानस्य हेतुत्वावधारणा
दिति। तथाच कार्यकारणभाव एवानुकूलस्तर्क इति भावः। तत्रेत्याकाङ्क्षायां।
कार्यतावच्छिन्नज्ञानकारणजिज्ञासायां। शब्दमेव। घटमानयेति शब्दमेव। तथा-
कार्यत्वविशिष्टज्ञानहेतुत्वे। तन्निर्वाहिकां। शब्दे कार्यत्वविशिष्टविषयकज्ञा-
नोपधायकत्वनिर्वाहिकां। कार्यान्विते इति। यद्यपि घटानयनगोचरप्रवृत्तौ
घटानयनगोचरकार्यतावच्छिन्नज्ञानत्वेन हेतुत्वं नतु कार्यान्वितज्ञानत्वेने-
ति कार्यान्विते शक्तौ बीजाभाव स्तथापि न केवलं कार्यमिति ज्ञानात्प्रवृत्तिः
किंतु घटानयनं कार्यमिति ज्ञानात् तच्च कार्यतावच्छिन्नज्ञानं कार्यान्वितज्ञा
नमेवेति तत्र शक्तिः एवमनाकलितपदविभागस्य घटमानयेति वाक्यस्य का
र्यतावच्छिन्नज्ञानजनकत्वं कार्यान्वितशक्त्यैव निर्वहति अन्यथैकपदस्यैव का
र्यतावच्छिन्ने शक्तौ इतरपदस्य वैयर्थ्यात् कार्यान्विते शक्तौ सर्वेषामपि का-
र्यतावच्छिन्नज्ञानजनकत्वं संभवति कार्यतावच्छिन्नज्ञानस्य प्रयोजकत्वे च
कार्यान्वितज्ञानस्यापि प्रवृत्तिप्रयोजकत्वानपायात् कार्यान्वित एव शक्तिः।
नच कार्यतावाचकलिङादीनां कार्यान्वितशक्तत्वासंभव इति वाच्यं। सर्वपदा-
नां कार्यान्वयशालिगोचरज्ञानजनकत्वात् तच्च कार्यान्वितस्वार्थप्रतिपाद-
कतया इतरान्वितकार्यरूपस्वार्थप्रतिपादकतयाचेति तथाच कार्यान्वयशा-

ख्यवति ननु केवलघटादौ आद्यव्युत्पत्तिविरोधात् इत्यत्र तव कार्यतावाचकपदसमभिव्याहारो नास्ति तद्वाक्यं अर्थवादरूपं मूकमेव व्यवहारस्वसंसर्गाग्रहात् । ननुसर्वेषां पदानां कार्यान्वितवाचकत्वात्तद्वाचकपदसमभिव्याहारो नास्तीत्यसङ्गतम् । असङ्गतं चार्थवादस्याप्रामाण्यमिति चेत् ।

लित्वं कार्ये तद्विशे चाविशिष्टमिति सर्वत्र कार्यान्वितएव शक्तिरित्याखण्डलार्थः । आवापोद्वापाभ्यां संग्रहत्यागाभ्यां । प्रेयमिति । शब्दसामान्ये कार्यान्वितशक्तिकल्पनानुरोधादित्यर्थः । ननु लाघवात्तथास्त्वित्यत आह । आद्यति । शब्दसामान्ये कार्यान्वितशक्तिकल्पनायाः विरोधापत्तेरित्यर्थः । शब्दसामान्यस्य कार्यान्वितएव शक्तत्वे ऽवष्टब्धे विधेरेव प्रामाण्यं नत्वर्थवादस्येति दर्शयति। इत्थं चेति।शब्दसामान्यस्य कार्यान्वितशक्तत्वे चेत्यर्थः।यत्र । भूतले घटोनास्तीत्यादौ। कार्यतावाचकेति । कार्यतावाचकालिङ्लोटतव्यप्रत्ययः पंचमलकारः छत्यस्वेति विधिप्रत्ययास्तत्समभिव्याहारो नास्तीत्यर्थः । विधिसमभिव्याहृतं वैदिकवाक्यमर्थवादः । मूकमेव।शाब्दबोधानुपधायकमेव । ननु तर्हि प्रवर्तकज्ञानाभावाच्छब्दाच्छाब्दानुपपत्तिरत आह । व्यवहारस्वेति । प्रवृत्तिस्वित्यर्थः। असंसर्गेति असंसर्गग्रहाभावात्।बाधाभावादितियावत् । तस्मात् सर्वत्र प्रवृत्तिं प्रति विशिष्टज्ञानस्य हेतुत्वानभ्युपगमादिति भावः।ननु शब्दसामान्यस्यैव कार्यान्वितशक्तत्वात्कार्यान्वितशक्तिज्ञानस्यैव शाब्दबोधहेतुतया विधेरिव शब्दसामान्यस्यैव कार्यतावाचकपदत्वात्कथं सिद्धार्थकार्थवादानामप्रामाण्यमित्याशंकते । ननिति । कार्यान्वितेति।कार्यताविशिष्टान्विते त्यर्थः।तद्वाचकेति। कार्यतावाचकपदेत्यर्थः । विधेरिव पदसामान्यस्यैव।कार्यतावाचकपदत्वादितिभावः।असङ्गतंचेति।सर्वस्यापि कार्यतावाचकपदत्वात् कार्यतावाचकपदासमभिव्याहारप्रयुक्तमप्रामाण्यं कथमर्थवादस्येत्यर्थः । अत्र यद्यपि पदानां कार्यान्विते ऽभिधारूपैव शक्तिः; घटादिपदात्कार्यान्वितघटत्वादिनैव पदार्थोपस्थितिः घटादिपदेन कार्यान्वितविषयकशाब्दबोधे जननीये इतरावैशिष्ट्यतया कार्यत्वोपस्थापकलिङादिपदस्य सहकारित्वाच्च नसिद्धार्थकार्थवादस्य प्रामाण्यमि-

अथोच्यते द्विविधाहि पदशक्तिः आनुभाविका स्मारिका च तत्रानुभाविका कार्यान्विते स्मारिकाच जातौ तथाच घटादि-पदं घटादिपदात् कार्यत्वस्यानुपस्थितौ कथं तदन्वयबोधं ज-नयेत् कार्यत्वान्वय बोधे तदुपस्थितेरपि हेतुत्वादिति नार्थ-वादस्य प्रामाण्य मित्याहुः । तन्न आवापोद्वापाभ्यां लाघवात् घटादिमात्र एव शक्तिग्रहः ननु कार्यतान्वयेपि अन्यलभ्यत्वात्

ति कार्यान्विते ऽभिधारूपशक्तिमादायार्थवादस्याप्रामाण्यमुपपादयितुं शक्य-मे तथापि कार्यत्वोपस्थित्यर्थं हि घटादिपदानां कार्यान्विते शक्तिः सा चाव-श्यापेक्षणीयलिङादिपदादेव । जातेति । व्यर्थं घटादिपदानां कार्यान्विते ऽभि-धारूपशक्तिकल्पनेन एवं कार्यान्वितत्वेन शाब्दबोधे ऽनुभवबाधस्य रमत अभि-धारूपशक्तिमुपेक्षानुभाविकशक्तिमादाय समाधत्ते । अथोच्यत इति । आनु-भाविका । शाब्दानुभवजनिका । स्मारिका । पदार्थस्मृतिजनिका । तत्रेति । कार्यान्वितविषयकशाब्दत्वावच्छिन्नं प्रति घटपदज्ञानत्वेन हेतुत्वे इत्यर्थः । स्मारि काचेति । जातिशक्तिज्ञानात्केवलघटत्वजातिस्मृतिः शक्तिज्ञानस्योद्बो-धकविधया पदार्थस्मृतिहेतुत्वादिति भावः । ननु कार्यान्वितबोधे घटादिपद-ज्ञानस्य हेतुत्वादिति भावः । ननु कार्यान्वितबोधे घटादिपदज्ञानस्य हेतुतया तत्त्वे कथं नानुभवजनकत्वमत आह । कार्यत्वान्वबोध इति । घटादिपदेन कार्यत्वान्वयविषयकशाब्दबोधजननीये कार्यतावाचकलिङादिपदजन्योप-स्थितेः सहकारित्वादित्यर्थः । नार्थवादस्येति । विशेषसामग्रीसहकृतायां एव सामान्यसामग्र्याः फलोपधाने तत्त्वतया कार्यत्वोपस्थापकलिङादिपदाभावेन तज्जन्यकार्यत्वोपस्थितेः सहकारिणां अभावात् शाब्दानुभवजनकत्वरूपं प्रा-माण्यं नार्थवादस्येत्यर्थः । लाघवात् । कार्यान्वितघटविषयकशाब्दत्वापेक्षया लाघवात् । घटादिमात्रेति । घटविषयकशाब्दत्वावच्छिन्नं प्रत्येव । घटपद-ज्ञानत्वेन हेतुत्वमस्तु इति भावः । नन्विति । ननु घटपदादेः कार्यान्वितघट-विषयकशाब्दं कार्यतावच्छेदकमित्यर्थः । अन्यलभ्यत्वादिति । कार्यतावा-चकपदजन्यबोधविषयत्वादित्यर्थः । घटविषयकशाब्दत्वावच्छिन्नं प्रति घटप-दज्ञानत्वेन कार्यत्वविषयकशाब्दत्वावच्छिन्नं प्रति लिङादिपदज्ञानत्वेन हेतु-

प्रथमसमन्वयलभ्यत्वं बालस्य नोपस्थितमिति चेत् । प्रकृते तर्हि कार्यतात्पर्यग्रहोस्तु यदा च तदुपस्थितं तदा घटमात्रे शक्तिग्रहो स्तु सा बाध्यतां गौरवात् । अथैवं चरम प्रवृत्तौ-घटमात्रशक्तिकल्पना कथं प्रथमप्रवृत्तां बलवतीं कार्यान्विते शक्तिकल्पनां बाधयतु मीष्टे इति चेन्न । प्रथमकल्पनाया बलवत्त्वासिद्धेः नहि प्रथमप्रवृत्तमेव बलवत् चंद्रतारादिस्वल्पतायां

ता यत्र च लिङादिपदसमभिव्याहारस्तत्र तादृशसमभिव्याहारादेव कार्यत्वबोधः यत्र तु न तत् समभिव्याहारस्तत्र केवलघटादेर्बोध इत्यर्थवादस्यापि प्रामाण्यमिति भावः । नन्वन्यलभ्यत्वं न स्वरूपसत्प्रतिबंधकं किंतु ज्ञातं यदि शक्यं स्यात्तर्ह्यन्यलभ्यं न स्यादिति तर्कस्य तेनोत्पादनात् तथाच यत्र तत्रोपस्थितं तत्र कार्यान्विते शक्तिग्रहे बाधकाभाव इत्याशंकते । प्रथममिति । प्रथमं लिङादिपदस्य कार्ये शक्तिग्रहात्पूर्वं । कार्यान्विते शक्तिग्रहोस्तु । घटपदज्ञानस्य कार्यान्वितविषयकशाब्दत्वं कार्यतावच्छेदकमस्वित्यर्थः । तत् । अन्यलभ्यत्वं । घटमात्रइति घटविषयकशाब्दत्वं कार्यतावच्छेदकमित्यर्थः सा।कार्यान्विते शक्तिकल्पना।बाध्यताम्।अप्रामाण्यग्रहविषयीक्रियतां।गौरवात्। घटमात्रशक्तिकल्पनापेक्षया । गौरवात् ननु समान्यतः प्रथमप्रवृत्तकल्पनाया बलवत्त्वेन कथं तद्बाध इत्याह । अथैवमिति । ननु प्रथमप्रवृत्तत्वस्य बलवत्त्वप्रयोजकतया कथं न बलवत्त्वमत आह । नहीति । शास्त्रादिति । शतयोजनमूर्द्ध इत्यादिवस्तुपरिमाणबोधकज्योतिश्शास्त्रादित्यर्थः । तथाच चक्षुरादिना ज्ञातस्वल्पतायां अप्रामाण्यज्ञानवदत्रापि घटपदादेः कार्यान्वितघटादौ शक्तिज्ञाने प्रामाण्यं कल्प्यतइति भावः । ननु चन्द्रादौ शास्त्रजन्यमहत्परिमाणज्ञानेन बाधात् तत्र स्वल्पपरिमाणज्ञाने ऽप्रामाण्यं कल्प्यते प्रकृते तु प्रथमं कार्यान्वितघटादिपदशक्तिकल्पने बाधकाभावान्न तद्बाधः अस्ति बाधके प्रथमप्रवृत्तत्वस्यैव बलवत्त्वे तत्त्वादित्यत आह । चरमकल्पनायाइति । बाधयेति । पूर्वान्वितघटादौ शक्ते बाधेपि कार्यान्वितत्वविशिष्टघटत्वस्य घटत्वापेक्ष

प्रथमप्रतीतायाः शाब्दात् तन्महत्त्वप्रतीत्या बाधानापत्तेः चरमकल्पना लाघवसाहायतया बलवत्त्वाच्च किंचैवं काव्यादिभ्योऽनुभवसिद्धो त्वया नुभवो न स्यात्। नचासंसर्गो ग्रहमात्रं नतु संसर्गानुभवइति वाच्यं। घटमानयेत्यत्रापि तदापत्तेः तथाच गतं शब्दप्रामाण्यप्रत्यया शयापि किंचैवमर्थवादरूपाणां श्रुतिस्मृतीतिहासपुराणादीनामप्रमाण्यं स्यात् तथा च वृद्धोपहसितं मिश्रैः। प्रसिद्ध एव लोकेऽस्मिन्बुद्धबन्धुः प्रभाकरइति तस्मादेवं वदन् प्रतारकः कश्चिद्वर्णव्यत्यासात्किमपि साहश्याभ्यां प्रभाकार इति अनुग्रहीतोलोकैरिति युक्तमत्यश्या-

---

या गुरुतया शक्यतावच्छेदकत्वासम्भवेन कार्यान्वितघटत्वावच्छेदेन शक्यभावेन तेन रूपेण तत्र शक्तिकल्पने बाधः स्यादेव तद्धर्मावच्छिन्नाभाववति तद्धर्मावच्छिन्नप्रकारकज्ञानत्वमेव हि भ्रमत्वमिति भावः। ननु कम्बुग्रीवादिमत्त्वं घटत्वापेक्षया गुरुर्विति गौरवज्ञानमत्त्वेपि कम्बुग्रीवादिमान्नास्तीति प्रतीत्युदयाद्यथा गुरुधर्मस्य प्रतियोगितावच्छेदकत्वमुपेयते तथा गौरवेपि प्रथमप्रवृत्तत्वात्कार्यान्वितघटे शक्तिः स्यादेवेत्यतस्तुष्यतु दुर्जननन्यायेनाह। किंचैवमिति। एवं। कार्यान्वितघटादौ शक्तिकल्पने। शक्तिज्ञानेन च शाब्दसामान्ये जननीये कार्यतावाचकपदजन्योपस्थितेः सहकारित्वेचेत्यर्थः। अनुभवसिद्ध इत्यनेन दुरपह्नवत्वं सूचितं। न स्यादिति। लिङादिपदरूपकारणाभावादिति भावः। नचेति। पदार्थोपस्थितिबाधाभावमात्रादेव व्यवहारादिति भावः। तदापत्तेः। असंसर्गाग्रहापत्तेः। काव्यादावनुभवसिद्धस्यापि संसर्गानुभवस्यापलापे लिङसमभिव्याहारेप्यपलाप एव स्यादिति भावः। नन्विष्टापत्तिरत्राह। तथाचेति। ननु प्रथमं कार्यान्वित एव शक्त्यवधारणात् तत्सहकारिकार्यतावाचकपदरूपकारणाभावाद्विध्यसमभिव्याहारस्थलेऽसंसर्गाग्रह एवोपेयते कारणाभावे कार्याभावस्यावश्यकत्वात् विधिसमभिव्याहारस्थले तु बाधकाभावेन शाब्दानुभव एवोपेयते अतएव शब्दप्रामाण्यमपीत्यत आह। किंचैवमिति। एवं। कार्यतावाचकपद-

मः। ननु यदि शक्तिग्रहः सहकारि तदा गङ्गापदात्तीरप्रत्ययो नस्यादिति चेन्न। शक्तिर्हि न तत्त्वेनप्रयोजिका किंतु वृत्तित्वेन

समभिव्याहारस्थले शाब्दानुभवस्वीकारे । स्यादिति । तादृशपदसमभिव्याहाराभावादिति भावः। ननु केषां चिदप्रामाण्येपि लिङसमभिव्याहृततत् पदमादायैव शब्दप्रामाण्यं स्यादेवेति तेषामप्रामाण्ये इष्टापत्तिरित्यत आह। तथाचेति। पुराणादीनामप्रामाण्याङ्गीकारे चेत्यर्थः । मिश्रैः।वाचस्पतिमिश्रैः । बुद्धवन्धुरिति। बुद्धैर्न कस्यापि शब्दस्य प्रामाण्यमुपेयते प्राभाकरैस्तु कस्यचिच्छब्दस्य प्रमाणत्वाङ्गीकारान्न तदन्तर्भूतत्वमित्यत उक्तं बन्धुरिति । यथा तैरनुभवसिद्धोप्यनुभवोपलप्यत इति वेदस्याप्रामाण्यमुच्यते तथा पुराणादेरप्रामाण्यं तवेति साम्यं बोध्यम् । एवं वदन्। अनुभवसिद्धेप्यसंसर्गाग्रहमाचं वदन्। वर्णव्यात्यासः रक इत्यच कर इति लिपिसादृश्यं तकारभकारयोर्गौडलिप्या सादृश्येन ताभाऽनयोः सादृश्यं बोध्यं। युक्तमुत्पश्याम इति। अनुभवानुरोधेनैव सर्वकल्पना । तथाच लिङाद्यसमभिव्याहारस्थलेप्यनुभवस्यापलापानर्हत्वेन लाघवेन च घटत्वविशिष्ट एवशक्तिस्वीकरणमुचितमिति भावः। वस्तुतस्त्विति । प्रसक्तधर्ममादायान्वयव्यतिरेकग्रहासम्भवात्प्रत्यक्षस्थले कार्यत्वकारणत्वावच्छेदकधर्मग्रहमन्तरा कारणत्वग्रहासम्भवेपि शब्दे अतिप्रसक्त धर्मसामानाधिकरण्येनापि तद्ग्रहः यथा "स्वर्गकामो यजेतेत्यादौ" गङ्गास्नानादितोपि स्वर्गोदयात्स्वर्गत्वावच्छेदेन यागजन्यत्वासम्भवेन वैजात्यस्य च प्रथममनुपस्थितेः स्वर्गत्वयागत्वसामानाधिकरण्येन कार्यकारणभावग्रहः तथा प्रकृतेपि शब्दे कार्यान्वितज्ञानजनकत्वं गृहीतं नतु कार्यान्वितज्ञानत्वावच्छिन्नं प्रति तच्चेतरपदसमभिव्याहारादेवोपपन्नमिति न कार्यान्विते शक्तिरिति। पदं तावच्चतुर्विधं रूढं यौगिकं यौगिकरूढं योगरूढं च यत्रावयवशक्तिनिरपेक्षेण समुदायशक्तिमाचेण बोधस्तद्रूढं यथा गोपदं यत्रावयवार्थे एव बुध्यते तद्यौगिकं यथा पाचकादिपदं यत्र यौगिकरूढयर्थयोः खातनत्र्येण बोधस्तद्यौगिकरूढं यथोद्भिदादिपदं यौगिकं खनित्रे रूढं यागविशेषे योगरूढं पंकजादिपदं तत्र पंकजपदसमुदायः पद्मत्वविशिष्टे रूढो नवेति योग-

रूढौ विप्रतिपत्तिः पंकजपदात्पद्मत्वविशिष्टप्रतीतये पद्मत्वविशिष्टे पंकजसमुदायस्य रूढिरावश्यकी पदान्वयतोपस्थितेर्वृत्तिसाध्यत्वात् पंकजपदाद्योगेन कुमुदस्यापि बोध प्रसङ्गाच्च मन्यते कदाचित् कुमुदबोधस्तु लक्षणयैव। ननु रूढिस्वीकारेप्युङ्गित्पदेन खनित्रमिव पंकजपदात्कुमुदमपि बोध्येत योगसत्त्वात् अत्र प्राचः यत्र योगरूढिभ्यामेकार्थबोधस्तत्र केवलयौगिकार्थबोधे रूढेः प्रतिबंधकत्वात्र कुमुदबोध इति तत्र मणिकृतः रूढ्या नियमतः स्मृतं पद्ममेव कर्तृरूपव्यक्तिवाचकङ प्रत्ययेन पंकजनिकर्तृतयाऽनुभाव्यते "बाधकं विना व्यक्तिवचनानां सन्निहितविशेषपरत्वनियमात्" व्यक्तिवचनानां किञ्चिद्व्यक्तितात्पर्यकारणं। सन्निहितः। प्रथममुपस्थित इत्यर्थः। तथाच पद्मे तात्पर्यसत्त्वेन पंकजनिकर्तृतया तदेव योगेनापि प्रतीयते नतु कुमुदमिति रूढेर्न प्रतिबन्धकत्वं ग्राह्याभावानवगाहित्वात् जनकज्ञानाविरोधित्वाच्च सिद्धेरनुमितिप्रतिबन्धकत्वस्थानापत्त्या स्वीकारेप्यत्र ज्ञानस्य मणिमन्त्रादि न्यायेन प्रतिबन्धकत्वे मानाभावात् इत्थं च पद्मानुभवसामग्री सत्त्वात् पद्मस्यैव बोधो नतु कुमुदस्य सामग्र्यांसत्त्वे हि फलाभावेन प्रतिबन्धकत्वकल्पनादिति वदंति। अत्रेदं चिंत्यते। पंकजं कुमुदमानयेत्यादौ यत्र पंकजपदस्य पद्मे तात्पर्याभावः कुमुदे च तात्पर्यग्रहः तत्र लक्षणां विनैव कुमुदबोधापत्तेः पद्मानुभवसामग्रीविरहात् पद्मे तात्पर्याभावनिश्चयस्यैव तत्र बाधकत्वेन बाधकं विना व्यक्तिवचनानां संनिहितविशेषपरत्वादिति न्यायस्य तत्रानवतारात् घटेन जलमाहरेत्यत्र सच्छिद्रघटस्य प्रथमोपस्थितत्वादन्वयवारणाय बाधकं विनेत्यस्यावश्यकत्वात् तथाच गृहीतपद्मप्रयोगस्य पद्मान्वयानुपपत्ति पुरः सरैव कुमुदधीरिति न स्यात् कुमुदं पंकजमित्यत्र कुमुदस्यैव प्रथमसंनिहितत्वसम्भवाच्च कुमुदस्य भिन्नपदोपस्थाप्यत्वेपि प्रथमोपस्थितिमात्रस्यैवापेक्षणीयत्वात् अवयवापेक्षया समुदायस्य भिन्नत्वेन पद्मस्यापि भिन्नपदोपस्थाप्यत्वाच्च। अथ कुमुदबोधस्तत्र शक्त्यैवास्तां पंकजपदस्य कुमुदलक्षणेति प्रवादस्तु क्वाचित्काभिप्रायेण यत्र योगरूढिभ्यां पद्मानुभवस्तदनंतरं कुमुदे तात्पर्यज्ञानं तत्र स्वतन्त्रोपस्थितये कुमुदे लक्षणोदयात् परं विशेषो यत्तं प्रदायमते सर्वत्र लक्षणा मणिकृन्मते क्वाचित्कीति चेन्न। तत्रापि पंकजनिकर्तृत्वस्य कुमुदे तात्पर्यग्रहकाले पुनः स्मृतपंकजपदेन शक्त्यैव कुमुदोपस्थापनसम्भवात् पद्मे ता-

त्पर्याभावनिश्चयेन कुमुदे तात्पर्यनिश्चयसत्त्वेन च पद्मेऽन्वयासम्भवात् अन्यथा लक्षणानापत्तेरिति । यत्तु शक्त्या कुमुदे नानापदतदर्थानुसन्धानपक्षे वाक्यार्थविधया गुरूपस्थितिकत्वं लक्षणया पंकजनिकर्तृत्वस्य पदार्थतया लघूपस्थितिकत्वमिति तन्न । पंकजन्मकर्तारमानयेत्यादौ वाक्यमात्रे एव लक्षणापत्तेः प्रत्येकशक्त्यैव योग्यतादिबलाद्विशिष्टबोधान्न लक्षणेति चेत् । प्रकृतेऽपि समानं तस्माद्रूढिज्ञानप्रतिबन्धकत्वकल्प एव लक्षणासम्भवः विरोध्यविषयकत्वेऽपि सिद्धेरनुमितावि रूढिज्ञानस्य प्रतिबन्धकत्वमिति स्मृतपद्मान्वयानुपपत्त्यनन्तरं कुमुदधीरिति लक्षणाव्यवहारो वस्तुतो मुख्यतयैवेति तु मणिक्लृप्तमते गतिरिति । ननु पंकजपदस्य पद्मे लक्षणैवास्तां वाक्ये शक्त्यभावेऽपि तद्घटके तत्सम्भवात् । नच शक्यलक्ष्यसाधारणैकरूपाभावेनाजहत्स्वार्थायास्तस्या अभावात् युगपद्द्वयविरोधापत्तिरिति वाच्यं । सति तात्पर्ये गङ्गायां घोषमत्स्यौ स्त इत्यत्रेव मणिक्लृप्तमते तस्यादोषत्वादिति चेन्न । शक्ये बाधके सत्येव लक्षणेति मुख्ये बाधकाभावेन लक्षणोपनीतानपेक्षणे कुमुदसाधारणबोधापत्तेः तात्पर्यानुपपत्त्या यष्टीः प्रवेशयेत्यत्रेव लक्षणोपपादनेऽपि पद्मकुमुदयोस्तुल्यत्वापत्तेः लक्ष्यत्वाविशेषात् तथाच पद्मान्वयानुपपत्तिप्रतिसन्धानानन्तरं कुमुदधीरिति सिद्धान्तव्याकोपः एवं धेनुपदमपि योगरूढमेव । ननु पद्मत्वमेव प्रयोगोपाधिरस्त्विति चेन्न पद्मत्वज्ञानं न प्रतिबन्धकं अगृहीतनियतपद्मप्रयोगस्य कुमुदसाधारणबोधदर्शनात् रूढिज्ञानमेव स्वाभाववत्त्वसम्बन्धेन प्रतिबन्धकमिति । नन्वयोग्यतया पद्मत्वमपहाय केवलावयवशक्त्या कुमुदबोधोऽस्तु किं लक्षणया रूढेर्योगप्रतिबन्धकत्वमते तथा सम्भवेऽपि मणिक्लृप्तमते रूढेरप्रतिबन्धकत्वादिति चेन्न । पद्मान्वितत्वेनोपस्थितस्य पंकजनिकर्तृत्वस्याश्रयनिराकाङ्क्षतया स्वतन्त्रोपस्थितये लक्षणाङ्गीकारात् एवं पंकजपदात्स्थलपद्मबोधो लक्षणयैव स्थलपद्मं हि विजातीयमेवेति पद्माकृतिसदृशाकृतीस्थलपद्मत्वविशिष्टे वा पंकजपदस्य लक्षणा । यदि चानुगतप्रतीत्या तत्रापि पद्मत्वजातिस्तथापि स्वतन्त्रोपस्थितये लक्षणा । अथायोग्यतया योगार्थानन्वयेऽपि योग्यतया रूढ्यर्थः पद्ममेव बुद्धत इति चेन्न । योगार्थगतपद्मत्वेन पद्मस्यैवोपस्थित्या निराकाङ्क्षत्वात् स्वतन्त्रोपस्थितये तदावश्यकत्वात् यद्यपि "शक्यादन्येन रूपेणज्ञाते भवति लक्षणेति" न्यायात्समुदायस्य पद्मत्वे लक्षणा नयु-

क्ता तथापि कर्तृवाचकपद एव सा बोध्या। अचेदं चित्यं स्थले पंकजमित्यत्र पंकजनिकर्तृत्वस्य पद्मे तात्पर्याभावग्रहे तदनन्वितपद्मत्वस्य साकांक्षत्वमेव यत्र वा प्रथममन्वयस्तत्रापि स्थलपद्मे तात्पर्यग्रहानन्तरं पुनः स्मृत पंकजपदात्स्वतन्त्रोपस्थितिर्लक्षणयैवोपेया एवं न्वशक्त्यै षतदा तदुपस्थितिरास्ताम्। अयोग्यत्वेन योगार्थस्यानन्वयादिति। अपिच "श्येनेनाभिचरन्यजेतेत्यत्र च" बलवदनिष्टाननुबन्धीष्टसाधनत्वरूपविध्यर्थे विशेषणांशमपहाय यथाविशेष्यान्वयः तथाऽयोग्यतया विशेषणानन्वयेपि विशेष्यान्वयबोधे बाधकाभावः योगार्थस्यैव विशेष्यत्वे च पंकजं कुमुदमित्यत्र तस्य साकांक्षतया लक्षणानुपपत्तेरितिदिक्। इदं तु बोध्यम् आकाशपदे निरवच्छिन्नैव शक्तिः व्यक्तीनामानन्त्याभावेनानुगमकधर्मानपेक्षणात्। नच ह्रत्युपस्थापितस्यैव शाब्दबोधविषयत्वाच्छब्दाश्रयत्वं ततः कथं भासेतेति। वाच्यं नियमतो यद्धर्मविशिष्टत्वेनोपस्थिते यत्र शक्तिग्रहस्तत्स्मरणजनकसंस्कारस्य तद्धर्मविषयतानियमेन तदुद्बोधकादेव तदंशेप्युद्बोधनियमेनाकाशपदादशक्यस्यापि तस्य भानात् तथाहि शक्तिर्हि एकसम्बन्धिज्ञानमपरसम्बन्धिस्मारकमितिरीत्या पदार्थस्मारिका येन रूपेण चोपस्थितयोः पदार्थयोः सम्बन्धज्ञानं तद्रूपावच्छिन्नज्ञानात्सम्बन्धांशे उद्बुद्धसंस्कारसहकृता तद्रूपावच्छिन्नस्मरणं तत्र च सम्बन्धितावच्छेदकस्यापि जन्यताजनकतावच्छेदककोटिनिवेश आवश्यकः अन्यथा हस्तिपके चैत्रत्वेनोपस्थिते भद्रत्वेन चोपस्थिते हस्तिनि सम्बन्धग्रहे मनुष्यत्वेन हस्तिपकज्ञानाद्गजत्वेन हस्तिस्मरणापत्तेः तथाच यद्धर्मविशिष्टे शक्तिग्रहस्तद्धर्मविशिष्टमेव तत्स्मारयतीत्याकाशमात्रे शक्तावपि शब्दाश्रयत्वस्य स्मृतिसम्भवः ह्रत्युपस्थाप्यत्वस्यैव शाब्दविषयत्वे तन्त्रत्वं नतु स्वह्रत्युपस्थाप्यत्वस्येति लक्ष्यतावच्छेदकवच्छाब्दबोधविषयत्वमपि। अथैवं गोत्वमपि शक्यं न स्यात् यदि च विशेष्यह्रत्यैव संस्कारवशाद्विशेषणस्मरणे लक्ष्यतावच्छेदकवन्नियतस्मृतेरनुपपत्तिः रूपान्तरेण शक्तिग्रहे संस्कारविषयत्वाभावात्। किं चान्यसम्बन्धेनाप्यन्यच्च संस्कारोद्बोधे पदाश्रयमुष्टतत्ताक स्मरणानुपपत्तिः अनुभवविषयतत्तायाः अपि नियमेन भानसम्भवात् घटशक्तेरेव तदंशेप्युद्बोधकत्वसम्भवात् उद्बोधकान्तरानुसारेण च लक्ष्यतावच्छेदकवन्नियतस्मरणानापत्तेः तस्मात्पदान्नियतोपस्थितिः स्वसम्बन्धः परिशेषा-

वृत्तिरेव पर्यवस्यतीति पदान्नियतोपस्थितिवृत्तिसाध्येति नियमाङ्गीकृत्यं शक्यमिति विभाव्यते तदा शब्दाश्रयत्वेपि तुल्यमिति चेदास्तां तदपि शक्यं यदि नियमेन तदुपस्थितिः आकाशः शब्दाश्रय इत्यस्य चाकाशपदवाच्य इत्यर्थेनैवोपपन्नत्वान्न पर्यायत्वेपि सह प्रयोगानुपपत्तिः । वस्तुतस्तु कदाचिच्छब्दाश्रयत्वेन कदाचिच्चाष्टद्रव्यातिरिक्तद्रव्यत्वेनाप्युपस्थितेर्न नियता तदुपस्थितिरिति न तच्छक्यधर्म्यंशीद्बोधकादेव तदंशेप्युद्बोधसम्भवात्तत्स्मृतेः शाब्दबोधस्य चोपपन्नत्वात् यदिच संस्कारस्य कदाचित्तदंशेनोद्बोधस्तदाऽस्तु वा पदादपि निर्विकल्पकं आकाशपदान्निष्प्रकारकमेव स्मरणं शाब्दबोधश्च पदार्थान्तरमादाय सविकल्पक एव आकाशोद्रव्यमित्यत्र भिन्नविभक्त्युपनीतसंख्यामादाय भिन्नप्रकारकोपस्थितिसत्त्वादभेदान्वयो नानुपपन्नइति द्रष्टव्यम् अन्यादृशः नियतानुपस्थितावपि विनिगमकाभावान्न तदशक्यं अन्यादिपदवन्नानार्थत्वेनाप्युपपत्तेः एकत्र धर्मिण्यपि प्रवृत्तिनिमित्तद्वये बाधकाभावात् वस्तुतस्तु शब्दाश्रयत्वमेव शक्यतावच्छेदकं लाघवात् घटत्ववद्रूपान्तरेण बोधस्तु शक्तिभ्रमात्कम्बुग्रीवादिमत्त्वेनेव घटस्य अतएवानियतोपस्थितिरपि शक्तिभ्रमात्कम्बुग्रीवादिमत्त्वोपस्थितिवदुपपन्नैवेति न नानार्थत्वमपीति। केचित्तु व्यक्तेरेवानुगतानतिप्रसक्ततया प्रयोजनाभावेन धर्मे न शक्तिकल्पनमित्याहुः । निर्विकल्पकोपस्थिताकाशे आकांक्षादिज्ञानासम्भवेन शाब्दबोधानुपपत्तिः एकस्यैवैकत्वस्योभयपदार्थत्वात्तदविवक्षाया विभक्त्यर्थसंख्यामादाय भिन्नप्रकारकोपस्थित्यभावेनाकाशो द्रव्यमित्यत्राभेदान्वयानुपपत्तिश्चेति । पदान्निर्विकल्पकस्मृति स्वीकारोऽनुचित इत्यन्ये इति दिक् । नन्वियताप्रबन्धेन पदज्ञानेन शाब्दसामान्ये जननीये शक्तिग्रहः सहकारी पामराणां च तदभावान्न शाब्दबोध इति विवेचितं । नचेदं सम्भवति गङ्गायां घोष इत्यादौ गंङ्गापदस्य तीरे शक्त्यभावेपि शाब्दबोधोदयादित्याशंकते ॥ नन्विति । तीरेति। तीरे गंगापदस्य शक्त्यभावादिति भावः ।तत्वेन। शक्तित्वेन । प्रयोजिकाज्ञाता-सती शाब्दबोधोपयोगिनी । किंतु वृत्तित्वेनेति । प्रयोजिकेति । पूर्वेणान्वितं वृत्तित्वं च शक्तिलक्षणान्यतरत्वं । लक्षणैवेति । शाब्दसामान्ये वृत्तिज्ञानत्वेन हेतुतया गङ्गापदस्य तीरे लक्षणारूपवृत्ति ज्ञानसत्त्वात्तीरे शाब्दबोधो नानुपपन्न इति भावः । ननु गङ्गायां घोषः प्रतिवसतीति व्यवहारदर्शनाद्गङ्गापदस्य तीरे

कथं न शक्तिरिति चेन्न। लक्षणीयपदार्थानामनन्ततया सर्वत्र शक्तिकल्पने गौरवात् शक्यसम्बन्धरूपा लक्षणा तु लक्ष्मैव एवमेकसम्बन्धिज्ञानस्यापरसम्बन्धिस्मारकतया गङ्गापदजन्योपस्थितेः शक्यसम्बन्धरूपलक्षणाजन्यत्वमपि लक्ष्मैव लक्षणाजन्योपस्थितेः शाब्दबोधानुकूलत्वमात्रं कल्प्यते शक्तिस्वीकारे त्वतिरिक्तधर्मिकल्पनामिति धर्मिकल्पनातो धर्मकल्पना लघीयसीति न्यायेन तीरे लक्षणैव। अथ शक्तिर्नातिरिक्ता किंत्वीश्वरेच्छारूपा सा तु लक्ष्मतया तज्जन्योपस्थितेः शाब्दबोधानुकूलत्वमात्रं मयापि कल्प्यते इति न धर्मिकल्पनाया इति न्यायावतारः। नचास्माच्छब्दादयमर्थो बोद्धव्य इत्याकारिकेश्वरेच्छाऽलक्ष्मैवेति वाच्यं। गङ्गापदात्तीरबोधोदयेनेश्वरेच्छायास्तादृशाकारत्वावश्यकत्वात्तस्याः सर्वविषकत्वात्। नच लाक्षणिकं पदं नानुभावकमिति गङ्गापदात्तीरबोधानुदयात्तादृशाकारत्वमलक्ष्मैवेति वाच्यं। तथासति गङ्गापदस्य ननु भावकत्वे तादृशाकारक शक्त्यभावः शक्त्यभावेचाननुभावकत्वमित्यन्योन्याश्रयादिति। अथ तादृशेच्छयेश्वरोच्चरितत्वं शक्तिः सा च न तीर इति तत्र लक्षणैव अतएवापभ्रंशेपि शक्तिभ्रम इति चेन्न। ईश्वरोच्चरितत्वं न तज्जन्यत्वं अपभ्रंशादिसाधारण्यात् न तत्कण्ठताल्वाद्युच्चरितत्वं आधुनिकचैत्रादिपदे ऽभावात्। द्वादशे ह्नि पितानामकुर्यादित्यादिना सामान्यतो नामत्वेन तदुच्चारणोपपादने "नापभ्रंशितवै" इत्यादिनाऽपभ्रंशत्वेन तदुच्चारणस्यापभ्रंशेपि सत्त्वात् वैदिकपदस्यापि लाक्षणिकतया तादृशेच्छयेश्वरोच्चरितत्वसत्त्वाल्लक्ष्येपि शक्तत्वापत्तेश्चेति चेत्। अत्राहुः, अपभ्रंशादपि शाब्दबोधोदयेनास्माच्छब्दादयमर्थोबोद्धव्य इत्याकारिकेश्वरेच्छायास्तत्रापि सत्त्वान्न तादृशाकारिकेच्छामात्रं शक्तिः किंतु पदपदार्थसम्बन्धत्वविशेषिता तथाच तस्या नानातीरादिसम्बन्धत्वकल्पने गौरवादिच्छायाः सम्बन्धत्वग्राहकस्य भूरिप्रयोगस्याभावाच्च न गङ्गापदतीरयोः सम्बन्धत्वं किन्तु प्रवाहसामीप्यस्यैवेति तीरे शक्तिरलक्ष्मैवेति। किंच पिधेहीत्यत्र द्वारोपस्थापकपदानामनन्ततया विशिष्यानुपस्थितेर्यथेतरपदमेवानुभावकं नत्वध्याहृतं पदं तथा घोषपदादेव तीरान्वयबोधोपपत्तेर्न गङ्गापदं तीरानुभावकमिति तथाच गङ्गापदात्तीरबोधो जायतामित्याकारकत्वमप्यसिद्धमेवेति दिक्। लक्षणां निरूपयितुं पृच्छति। अथ केयमिति। शक्यात्। गङ्गापदशक्यात्प्रवाहात्। अ-

अस्तिच तीरे गङ्गापदस्यापि वृत्तिर्लक्षणैव। अथ केयंलक्षणा-शक्याद्यशक्योपस्थितिर्लक्षणेत्येके तन्न उपस्थितिहेतुर्हि वृत्तिः नतुसैव। अशक्ये तात्पर्यं लक्षणेत्यन्ये तन्न अन्वये तात्पर्यस्य लक्षणात्वापत्तेः किंचतात्पर्यनिर्वोढिकाहि वृत्तिर्न-तु तदात्मिकैव शक्तेरपि तत्त्वापत्तेः। उच्यते स्वशक्यसंबंधो

शक्यस्य। गङ्गापदाशक्यस्य। तीरस्योपस्थितिर्लक्षणेत्यर्थः। गङ्गापदेन शक्त्या-प्रवाहोपस्थितौ तत्र चान्वयानुपपत्तिप्रतिसंधानानन्तरं गङ्गापदात्पुनः स्मृ-तेन प्रवाहैर्णैकसम्बन्धिज्ञानस्यापरसम्बन्धिस्मारकतया स्वतीरमुपस्थाप्यते त-थाच सैवोपस्थितिर्लक्षणेति भावः। उपस्थितीति। पदज्ञानस्य पदार्थस्मा-रकता एकसम्बन्धिस्मारकमिति रीत्या सच सम्बन्धो वृत्तिरेव नतु तस्या उपस्थितिरूपत्वमित्यर्थः। सैवेति। उपस्थितगङ्गापदतात्पर्यतीरेवेत्यर्थः। अश-क्ये इति। गङ्गायां घोष इत्यत्र गङ्गापदाशक्येतीरे। तात्पर्यं। गङ्गापदात्तीरबो-धो जायतामितीच्छाविषयत्वं चतीरे तदेव लक्षणेत्यर्थः। शक्ततात्पर्यस्य लक्षणात्ववारणायाशक्तइति। अन्वये इति। घटमानयेत्यादौ घटकर्मत्वयो राधाराधेयत्वरूपसंसर्गे तात्पर्यसत्त्वात्तत्तात्पर्यस्य लक्षणात्वं स्यादित्यर्थः। नचेष्टापत्तिः अन्वयेन शक्तिर्नवा लक्षणेति सिद्धान्तव्याघातात्। नच शक्य स-म्बन्धस्य लक्षणात्व स्वीकारेप्येषदोष इति वाच्यम्। अन्वये शक्यसम्बन्धस्य स-त्त्वेपि तस्य तच्छाब्दबोधानुकूललक्षणयास्तत्राभावात् अन्यथा गङ्गापदस्य मुख्यपरत्वेपि शक्यसम्बन्धस्य तीरे सत्त्वाल्लक्षणिकत्वापत्तेरिति लक्षणाया-स्तत्र मूलत्वमेवोपेयमिति तात्पर्यस्य लक्षणात्वे चान्वये तात्पर्यस्य शाब्द-बोधानुकूलत्वे न तत्र तच्छाब्दबोधोपयोगिलक्षणाया दुर्वारत्वादिति ध्येयं नन्वशक्ये पदार्थे तात्पर्ये लक्षणा पदार्थत्वं च पदजन्यप्रतीतिविषयत्वं विष-यता च प्रकारताविशेष्यतान्यतररूपा इत्यं च संसर्गस्य पदार्थत्वाभावादेव न दोष इत्यत आह। किञ्चेति। तात्पर्येति। वृत्त्या पदार्थोपस्थितौ सत्यां शाब्द बोधे जाते तत्प्रतीतीच्छयोच्चारितत्वरूपतात्पर्य निर्वाहो भवतीति तात्पर्या-तिरिक्तावृत्तिरवश्य मुपेया नहि स्वयमेव स्वनिर्वाहकमिति भावः। ननु वृत्तेः

लक्षणा अस्ति हि गङ्गापदशक्यः प्रवाहविशेषः तत्सम्बन्धस्तीरे इति साच लक्षणा द्विविधा गौणी शुद्धा च सादृश्यात्मकः शक्यसम्बन्धो गौणी यथा गौर्वाहीक इति तदन्या शुद्धा यथा

बोधेजातेतत्प्रतीतोच्छेदोचारितत्व रूपतात्पर्यानिर्वाहोभवतीति तात्पर्यातिरिक्तावृत्तिरवश्यमुपेया । नहिस्वयमेवस्व निर्वाहकमितिभावः । ननुवृत्तेः शाब्दबोधनिर्वाहकत्वमेवोपेयते नतु तात्पर्यनिर्वाहकत्वमत आह । शक्तेरपीति । तथात्वापत्तेः । तात्पर्यात्मकत्वापत्तेरित्यर्थः । तथासति शक्ति लक्षणयोरभेदापत्तिः यदि च तात्पर्याद्विवृतिरिति प्रवादात्तच्च पञ्चम्यर्थान्वयानुपपत्त्या तन्निर्याहकतया शक्तिस्तदतिरिक्ता तदा लक्षणायामपि तुल्यमिति भावः । अच यदापीश्वरेच्छारूप शक्तेस्तात्पर्यात्मकत्वे इष्टापत्तिरेव । तथापि वक्तृसामान्यतात्पर्यात्मकत्वापत्तिरिति बोध्यम् । स्वशक्येति । स्वं लाक्षणिकं पदं तस्य यच्छक्यं तत्सम्बन्धो लक्षणेत्यर्थः । इदमेवोपपादयति । अस्तिहीति । गङ्गायां घोषइत्यादौ स्वं गङ्गापदं तच्छक्यप्रवाहस्तत्सम्बन्धः संयोगादिरूपस्तीरोस्तीति गङ्गापदस्य तीरे लक्षणेत्यर्थः । गौण्या इत्यन्तरत्वादिमतव्यवच्छेदाय लक्षणायामेव तदन्तर्भावं दर्शयितुं लक्षणां विभजते । साचेति । शक्यसम्बन्धरूपा लक्षणाचेत्यर्थः । तच्च गौणीं लक्षयति । सादृश्येति । तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वं सादृश्यं तदात्मकः शक्यसम्बन्धो गौणीत्यर्थः । गौणीमुदाहरति । यथेति । वाहीको वाहीको वाहीकदेशोद्भवः गौर्बलीवर्दइत्यर्थः । अत्र वाहीके गवाभेदस्य बाधाद्गोपदेन गोसदृशो लक्ष्यते गोसादृश्यं च गोगतजाड्यमान्द्यादिकमेव तथा च जडोमन्दश्च वाहीक इतिशाब्दबोधः । एवं सिंहो माणवक इत्यत्रापि गौण्या सिंहसदृशोपस्थितौ सिंहसदृशाभिन्नो माणवकइत्यन्वयबोधोऽवसेयः । एवं शुद्धां लक्षयति । तदन्येति । तदन्या सादृश्यान्य शक्यसम्बन्धरूपेत्यर्थः । शुद्धामुदाहरति । यथा आयुरिति । आयुः पदस्यायुर्जनके लक्षणा तत्रायुः पदशक्यसम्बन्धो जनकत्वरूपो ग्राह्यः तथा चायुर्जनकाभिन्नं घृतमित्यन्वयबोधः । ननु शक्यादशक्योपस्थितिर्लक्षणेति प्राचीनमते लाक्षणिकं पदं ननु भावकमिति प्रवादः सङ्गच्छते । स्वजन्योपस्थितिसम्बन्धेन पदस्यानुभावकतया - गङ्गापदजन्यतीरोपस्थितेरभावाद्गङ्गापदस्य तीरानुभावकत्वात् किन्तु घोषपदस्यैव तच्छाब्दं प्रति तदन्वयप्रतियोग्युपस्थापकपदत्वेन कारणत्वात् । नच तच्छाब्दं प्रति इत्या तत्पदा-

र्थोपस्थिते हेतुत्वात्कथमेतदिति वाच्यं । तदर्थवाचकतत्पदनिरूपितशक्तिज्ञानजन्यतच्छाब्दबोधं प्रति तत्पदनिरूपितशक्तिज्ञानत्वेन हेतुत्वं लक्षणाजन्यशाब्दबोधं प्रति तादृशस्वरूपसत्पदार्थोपस्थितित्वेनैव हेतुत्वं नतूक्तरूपेण हेतुहेतुमद्भावः शक्यसम्बन्धस्य लक्षणात्वे तु तीरोपस्थितेर्गङ्गापदजन्यत्वादन्वयप्रतियोग्युपस्थापकतयानुभावकत्वं सम्भवत्येवेति तादृशप्रवादविरोधः । अथ मन्मते गङ्गापदात्स्वशक्यसम्बन्धेन प्रथममेव तीरोपस्थितिस्तव मते तु पुनः शक्यस्मरणात्तत्स्मृतौ गौरवमिति चेन्न । पदस्य स्वशक्यसम्बन्धेनान्वयप्रतियोगिस्मारकत्वस्याकृप्तत्वेन तत्कल्पने गौरवात्स्मृतेन प्रवाहेण स्वसम्बन्धितीरस्मृतेरेवौचित्यादिति चेन्नैवम् । गङ्गापदात्तीरानुपस्थितौ प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थोपस्थाप्येऽपि विभक्त्यर्थान्वयेऽतिप्रसङ्गादननुभवाच्च । प्रकृतितात्पर्यविषयेण स्वार्थान्वयबोधकत्वेऽपि तथा धूमोऽस्तीति वाक्यतात्पर्यविषयेण वह्निना धूमपदोत्तरविभक्त्यर्थान्वयापत्तेः । तस्माद्गङ्गापदस्यापि तीरस्मारकत्वमभ्युपेयम् । एवं च कृप्तशक्यसम्बन्ध एव तीरस्मारकत्वेन कल्पते नतु शक्तिः तां विनाप्युपपत्तेः तथा चान्वयप्रतियोग्युपस्थापकत्वाल्लाक्षणिकस्याप्यनुभावकत्वापत्तिरवशिष्टेति मापि पदस्यानुभावकमिति वारणीयेति । वस्तुतस्तु उद्देश्यविधेयभावेन लाक्षणिकं नानुभावकमित्येव तदर्थः । उद्देश्यविधेयभावेनान्वये शक्तिमत्त्वस्यैव प्रयोजकत्वादतएव लक्ष्यार्थस्य विधेयतया भानाद्विध्यर्थस्य च विधेयतयैव भानान्न "विधीपरः शब्दार्थ" इति सङ्गच्छते । किञ्च तन्तुसंयोगस्य पटसंयोगहेतुत्वतात्पर्यकेतन्तुः पटं करोतीति सर्वलाक्षणिकस्थलेऽन्वयानुभवापलापापत्तेर्लाक्षणिकमप्यनुभावकमिति तादृशप्रवादोऽकिञ्चित्करः । यत्तु शक्यादशक्योपस्थितिर्लक्षणेति मते लक्ष्यतावच्छेदके लक्षणा नास्तीति प्रवादव्याघातः । शक्यसम्बन्धस्य लक्षणात्वमते तु शक्यसम्बन्धस्य लक्ष्यतावच्छेदकोभयसाधारणस्यैकस्याभावात्तदुपपत्तेरिति । तन्न । भवन्मतेपि यत्र लक्ष्यतावच्छेदकलक्ष्योभयसाधारणः शक्यसम्बन्धस्तत्रागतेः तत्रलक्ष्यमात्रवृत्तितानियामकसम्बन्धेन तस्य लक्षणात्वोपगमे ममापि लक्ष्यमात्रवृत्तिविषयतासम्बन्धेन तथोपस्थितेर्लक्षणात्वोपगमादिति । एतेन लक्ष्यतावच्छेदके लक्षणा नास्तीत्यस्य लक्ष्यतावच्छेदकग्रहे शक्यसम्बन्धरूपलक्षणो ग्रहो नापेक्षित इत्यर्थः । यत्र चोभयसाधारणः शक्यसम्बन्धस्तत्र लक्ष्यवृत्तित्वेनैव तत्सम्बन्धग्रहापेक्षा न-

तु लक्ष्यतावच्छेदकवृत्तित्वेनापि शक्यतावच्छेदकविशिष्टे शक्तिग्रहाच्छक्यतावच्छेदकेपि विशेषणविधया शक्तिज्ञानमपेक्षितमिति परास्तं। लक्ष्यमात्रवृत्तिविषयतासम्बन्धेनोपस्थिते विशिष्टबोधप्रयोजकत्वस्य ममापिसुवचत्वादिति। इदं चात्रबोध्यं। क्रियालक्षणाज्ञानयोरेक एव कार्यकारणभावः। तथाहि शक्तित्वावच्छिन्नसांसर्गिकविषयतानिरूपितपदनिष्ठप्रकारतानिरूपितार्थनिष्ठविशेष्यताकज्ञानत्वेन शाब्दबुद्धिं प्रति कारणत्वं शक्तिसम्बन्धेन शक्यसम्बन्धेन वा पदप्रकारकज्ञाने शक्तेः संसर्गत्वाच्छक्तित्वनिष्ठावच्छेदकतायां पर्याप्तिः परं न निवेश्यते तेन शक्यसम्बन्धेन पदप्रकारतानिरूपिता शक्तिनिष्ठा सांसर्गिकविषयता नार्थविशेष्यतानिरूपिता तेन शक्ति सम्बन्धेन पदाभावप्रकारकबाधबुद्धिप्रतिबध्यत्वं न लक्षणाज्ञानस्येति बोध्यं। शक्यसम्बन्धस्याविनाभावइति प्राञ्चः। तन्न मञ्चाः क्रोशंतीत्यत्राभावात्। तत्रापि यत्समभिव्याहारयाविनाभावोपपादनेपि किमनेन शक्यसम्बन्धमात्रस्यैव लक्षणात्वौचित्यात्। विनाभूतबोधस्य तात्पर्यज्ञानाभावेनैव वारणीयः। अनेकाविनाभूतसत्त्वेप्येकतरभानं तात्पर्यज्ञानबलादेवेति भवतोपि वाच्यत्वात्। मण्डपं भोजयेत्यादौ रूढि पूर्विका लक्षणेति मीमांसकाः मण्डपपदस्य गृहविशेषे रूढिर्मण्डपानकर्त्तरिच योगरूढिः समुदाय शक्तियोगोऽवयवशक्तिस्तत्र रूढेर्योगापहारितेति प्रवादादवयवशक्त्या मण्डपानकर्तृबोधासम्भवेन मण्डपपदस्य मण्डपानकर्त्तरि लक्षणा। इत्थंच रूढ्यर्थगृहसम्बन्धितावच्छेदकतया गृहीतत्वेत्वेन कर्त्तृबोधो नतु मण्डपानकर्तृत्वेनेति। पङ्कजमित्यादौ तु पद्मस्य रूढ्यर्थस्य पङ्कजनिकर्त्तृत्व योगार्थस्याविरोधादवयवशक्त्यैव पङ्कजनिकर्त्तृबोधः। ननु शक्यार्थपरत्वे सम्भवति लक्षणाकल्पनमन्याय्यं। नच रूढेर्योगोपहारान्न तथेति वाच्यं। कोयमपहारः न तावद्यौगिकार्थास्मृतिः रूढ्यर्थइव यौगिकेपि स्मारकसम्बन्धस्य शक्तेस्तुल्यत्वात्। नच योगार्थस्य प्रथममस्मृतिः सइति वाच्यं। मण्डपसमुदायेन यदा स्वार्थस्मरणं तदावयवार्थस्मरणे बाधकाभावात्। लक्षणापक्षेपि रूढ्यर्थेन यदा स्वसम्बन्धिस्मरणं तदा पदार्थस्मरणसम्भवेन यौगिकार्थान्वयबोधसम्भवाच्च। नच स्मृतस्याप्यवयवार्थस्यान्वयबोधबहिर्भूतत्वमेव स इति वाच्यम्। अयोग्यतया रूढ्यर्थस्यान्वयबोधाभावेपि यौगिकार्थबोधे बाधकाभावात्। अथ मण्डपपदस्य सत्यवियोगे प्रयोगप्राचुर्याभावादव-

यवशक्तेः कुण्ठनं कल्प्यते अन्यथाऽनेकार्थाच्चादिपदादिव मण्डपान कर्तुरवगमोपि कदाचित्स्यादिति चेन्न । "तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षावाजिभ्यो वाजिन" मित्यत्र वाजमन्नमामिक्षारूपं येषामिति योगाद्वाजिपदेन विश्वेदेवा उच्यन्ते न तु रूढ्या अश्वाइति सिद्धान्तस्तव नस्यात् नह्यत्र विश्वेदेवेषु वाजिपदप्रयोगप्राचुर्यमस्ति मण्डपानकर्त्तरि कदाचिदपि मण्डपपदस्य योगेन प्रयोगो नास्तीति तु तवैवाभिमान इतिचेत् । मैवं । मण्डपपदाद्यदा गृहविशेषस्मृतिस्तदैव मण्डाद्यर्थोपस्थितिस्तदुत्तरं पिबत्यर्थस्य तदनन्तरं प्रत्ययार्थस्य ततो मण्डपानकर्तृत्वेन ज्ञानस्येति यौगिकार्थस्मृतिविलयात् तदेव रूढ्ययौगिकयोर्बलाबलं शीघ्रं वितथीकृतमेव तथाच रूढ्यर्थस्य शीघ्रमुपस्थितत्वाद्बलवत्त्वस्यौत्सर्गिकत्वं यच्च तु यौगिकार्थस्य प्रकरणवशात्प्रथममुपस्थितिस्तत्र रूढेर्योग एव बलीयान् यथाच रूढ्यर्थस्य शीघ्रमुपस्थितत्वाद्बलवत्त्वस्यौ- "त्सर्गिकत्वमुभिः सोमोरुद्रैरिन्द्रो मरुद्भिर्वरुणआदित्यैर्नः हस्पतिर्विश्वेदेवै" रित्यत्र प्रकरणवशाद्वसुरुद्रमरुदादित्यरूपसर्वदेवानामेव विश्वेदेवपदेन स्मृतिः ननु रूढ्या पुरूरवो माद्रवः प्रभृतिगणानामुपस्थितिः एवं "तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षावाजिभ्यो वाजिन" मित्यत्र वाजमन्नमामिक्षारूपं येषां ते वाजिन इति योगाद्वाजिनेपि विश्वेदेवदेवताकत्वं प्रकरणेनोपस्थितत्वात् । ननु वाजिपदाद्रूढ्याश्वानामुपस्थितिरिति नामिक्षाधिकरणसिद्धान्तविरोधः । नच रूढेर्योगाद्बलीयस्त्वेन रूढ्यर्थधीरेव स्यादिति वाच्यं । रूढ्यर्थयोगार्थयोरुपस्थितावनुपस्थितौ वा रूढेर्बलीयस्त्वं प्रकृतेतु प्रकरणवशेन योगार्थस्यैव स्मरणान्नतु रूढार्थप्रकरणेनोद्बुद्ध संस्कारस्यैव शब्दादुद्बोध इति शब्देन प्रकरणसंवलितेन योगार्थस्मृतिरेव जन्यते नतु रूढ्यर्थस्मृतिरिति । नचैवं- मण्डपादावपि योगार्थस्यैव प्रथमं स्मृतिसम्भवेन न लक्षणेति वाच्यम् । अत्र प्रकरणादेरभावाद्रूढ्यर्थस्यैव प्रथमं स्मृतिरिति रूढिपूर्विका लक्षणा यच्च च योगार्थे प्रकारणाद्यवतारः तत्र योगार्थस्यैव बलवत्त्वान्न लक्षणा । यद्यपि पदज्ञानमेवो द्बोधकं न प्रकरणादिकं तथाप्येकतरप्रकरणमपरस्मृतिप्रतिबन्धकमवसेयमितिवदंति । तत्र रूढ्यर्थान्वयबोधो वा तत्स्मृतिर्वा यौगिकार्थान्वयबोधे प्रतिबन्धिका । नतावदाद्यः रूढ्यर्थस्य प्रथममुपस्थितत्वेपि तस्यायोग्यतया यौगिकार्थान्वये बाधकाभावात् नद्वितीयः प्रकरणादेव यच्च यौगिका-

र्थान्वयबोधस्तत्र रूढ्यर्थस्मृतेरभावात् तस्याः प्रतिबन्धकत्वोपपत्तावपि तस्या यौगिकार्थस्मृतौ तदन्वयबोधे वा प्रतिबन्धकत्वे मानाभावात् साक्षादविरोधिनो ज्ञानस्य जनकज्ञानविघटकत्वेनैव प्रतिबन्धकत्वात् अनुमितौ तु सिद्धेरगत्या फलबलेन तथात्वकल्पनात् तस्माद्यत्र मण्डपपदस्य गृहपरत्वं तत्र मण्डपानकर्तृत्वरूपयोगार्थस्यायोग्यतया नान्वयबोधो नतु रूढ्यर्थस्मृतिस्तत्र प्रतिबन्धिका योग्यत्वरूपकृत्यकारणविरहेण च तदबोधोपपत्तेः यत्र तु रूढ्यर्थस्या योग्यता तत्र योग्यतया योगेन यौगिकार्थबोधो भवत्येव रूढेर्योगापहारप्रवादस्तु योग्यत्वात् रूढ्यर्थस्यान्वयबोधो नतु यौगिकार्थस्य अयोग्यत्वादित्येतत्परो नतु योग्यतादिमतोपि यौगिकार्थस्य नान्वयबोध इत्येतत्परः यत्र च रूढ्यर्थगृहे सम्बन्धिचैत्रे चैत्रत्वादिना तात्पर्यं प्रमाणान्तरादवधार्यते तत्र रूढिपूर्विका लक्षणा नतु सर्वचैत्रवधेयं। लक्षित लक्षणापि वृत्त्यन्तरमिति प्राञ्चः। द्विरेफपदेन द्वौरेफौ यत्रेति व्युत्पत्त्या भ्रमरपदं लक्ष्यते भ्रमरपदेन स्वशक्य सम्बन्धीभ्रमररूपोर्थो लक्ष्यते इति द्विरेफपदस्य भ्रमरे लक्षितलक्षणा। नच द्विरेफपदलक्ष्यभ्रमरपदस्य शक्त्यैव निर्वाहे अलं भ्रमरे लक्षणयेति वाच्यं। प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वनियमेन भ्रमरस्य द्विरेफपदार्थत्वाभावेन तत्र विभक्त्यर्थानन्वयापत्तेः। मन्यते च लक्षित लक्षणा द्विरेफपदस्यैव वृत्तित्वेन भ्रमरस्य द्विरेफपदार्थत्वादिति। नच शक्यादन्येन रूपेण ज्ञाते भवति लक्षणेति भ्रमरपदस्य शक्यतावच्छेदकभ्रमरत्वस्य कथं लक्ष्यतावच्छेदकत्वं शक्त्यैव तद्बोध सम्भवादिति वाच्यं। शक्येन रूपेण लक्षणानङ्गीकारे शक्त्यैव तद्बोधसम्भवेन लक्षणाकल्पनमफल मित्यस्यैव तद्बीजतया प्रकृते च शक्त्या भ्रमरत्वविशिष्टस्य बोधस्वीकारेण भ्रमरस्य द्विरेफपदार्थत्वाभावेन विभक्त्यर्थान्वयानुपपत्त्या शक्यस्यापि लक्षणयैव भानमुपेयते एतन्मते लक्षितस्य पदस्य लक्षणा लक्षितलक्षणा सा च द्विरेफपदस्य वृत्तिरिति तत्र शक्यसम्बन्धो हि लक्षणा नतु शक्यस्य साक्षात्सम्बन्धः गौरवात् एवं च परंपरासम्बन्धेन लक्षणैव लक्षितलक्षणा स्वलक्ष्यपदघटितलक्षणा सेति तु यावत् तथाच परंपरासम्बन्धेन लक्षणाया एव तथात्वेन द्विरेफपदस्य स्वलक्ष्य भ्रमरपदघटितपरंपरासम्बन्धेन भ्रमररूपार्थोपस्थापकत्वसम्भवात् द्विरेफपदलक्षणयैवोपपत्तेर्नातिरिक्तवृत्तिकल्पनेति दिक्। सा च लक्षणा क्वचिज्जहत्स्वार्था क्वचिद जहत्स्वार्था च आद्या गङ्गायां घोषइत्यादौ स्वार्थस्य प्रवाहस्य त्यागात्तीरे-

घोषइत्येवबोधात् यदि च गङ्गासम्बन्धितीरत्वेन बोधः तदा त्वजहत्स्वार्थैव अन्यथा च काकेभ्यो दधिरक्षतां क्वचिणो यांतीत्यादौ दध्युपघातकत्वेन काककुक्कुटादीनामेकसार्थवाहित्वेन क्वचिक्वचीतराणां बोधात् एवंमञ्चाः क्रोशंति यष्टीः प्रवेशयेत्यादौ मञ्चपदस्य मञ्चस्थपुरुषे यष्टि पदस्य यष्टिधरे लक्षणा जहत्स्वार्थैव स्वार्थपरित्यागेन परार्थलक्षणा जहत्स्वार्थास्वार्थाऽपरित्यागेन परार्थ लक्षणा जहत्स्वार्थेति तल्लक्षणात्। ननु क्वचिणो यान्तीत्यादौ क्वचिशब्दस्य वाक्यत्वात्तत्र न लक्षणा नापि क्वचपदे क्वचपदार्थत्यागेनाजहत्स्वार्थत्वायोगात् किञ्च च लक्ष्यतावच्छेदकं नैकसार्थवाहित्वं यान्तीत्यस्यानन्वयापत्तेः गन्तृत्वे नोपस्थितस्य गमनाकाङ्क्षाविरहादिति। अत्राहुः। क्वचपदएव एकसार्थे लक्षणा मतुवर्थश्च सम्बन्धी तथाचैकसार्थवन्तो यान्तीति वाक्यार्थबोधः। क्वचिवाक्यार्थबोधः क्वचिवाक्यलक्षणाभिप्रायेणाजहत्स्वार्थकः। अर्थपदस्य प्रतिपाद्यपरत्वाभिप्रायेणवा। केचित्तु एकसार्थवाहित्वेन क्वचस्याप्यन्वयात्तथात्वम्। अतएव शब्दलक्ष्यसाधारण्यमप्युपपद्यत इत्याहुः। अपरेतु प्रकृतावेव एकसार्थवति लक्षणा प्रत्ययश्च तात्पर्यग्राहकः। अथवा सम्बन्धिसामान्ये शक्तमतुप्रत्ययेएकसार्थसम्बन्धित्वेन लक्षणा क्वचपदं तात्पर्यग्राहकमित्याहुः। अत्र लक्ष्यसम्बन्धस्यैव लक्ष्यतावच्छेदकत्वं यथा दध्युपघातकत्वैकसार्थवाहित्वादीति बोध्यम्। एवं पदानां स्वपरत्वे लक्षणैव न शक्तिः अन्यलभ्यत्वात्। केचित्तु पदानामौत्सर्गिकमर्थपरत्वं तदभावे स्वपरत्वं तथाच प्रत्यक्षेण पदजन्योपस्थितिमत्त्वाच्छाब्दे तद् भानमित्याहुः। तच्च प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वनियमेन तत्र विभक्त्यर्थान्वयानुपपत्तेः वृत्तिस्वीकारस्यावश्यकत्वात् अत एव पदस्य स्वबोधकत्वं वृत्तिं विनैव न भावात् अन्येन हि अन्य बोधने ऽतिप्रसङ्गात् वृत्तिः कल्पा स्वस्य स्वबोधकत्वे तु नैवमित्यादिपदस्य स्वर्थान्वयानुपपत्तेः सहकारित्वाच्च न सर्वत्र स्वबोधप्रसङ्गः एवं स्वबोधिते स्वस्मिन्विभक्त्यर्थान्वयोपोति निरस्तं। प्रत्ययानामिति व्युत्पत्तिभङ्ग प्रसङ्गात्। नचैवं निरर्थकजबगडदशमाहेत्यादौ स्वशक्त्यभावात् लक्षणानुपपत्तिरिति वाच्यं। प्रत्येकवर्णेषु इन्द्वोत्तरश्रूयमाणक्रियापदार्थान्वयात्समुदायस्योच्चारणासम्भवेन तत्र तदनन्वयात्। तेषां च शक्तत्वेन तत्रैव लक्षणोपगमादिति। "गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तुतद्वती"त्यादौ कोशस्योभयत्र शक्तिबोधकत्वेपि नीलादिपदानां धर्मे शक्तिः धर्मिणि लक्षणा तत्परशब्दे तु मात्सर्ये धर्मे

आयुर्घृतमिति। ननु यद्यपि एव वृत्तौ कथं तर्हि राजपुरुष इत्यादौ षष्ठ्यर्थलाभः नहि राजपदं सम्बन्धे शक्तम्। अथसम्बन्धोऽन्वयविधया भासते नीलो घट इत्यत्राभेदवदिति चेन्न। राजपुरु

धर्मिणि च शक्तिरिति सम्प्रदायः नीलादिपदवत् मात्सर्ये धर्मे शक्तिः धर्मिणि लक्षणा। नच तत्परशब्दस्य धर्मे धर्मिणि तुल्ये चत्र प्रयोगात् उभयत्र शक्तिरिति वाच्यं। नीलादिपदस्यापि गुणिनि प्रयोगप्राचुर्याद्धर्मिणि लक्षणयैवोपपत्तौ न तत्र शक्तिरिति तु मत्सरशब्देपि धर्मे शक्तिः धर्मिणि लक्षणैवेत्यन्ये। अत्र सुब्विभक्तौ न लक्षणा सर्वनाम्नि न लक्षणा वादिवाक्ये न लक्षणा विधौन लक्षणा विधेयार्थे न लक्षणा विधेयता शालिशब्दबोधत्वं शक्तिज्ञानकार्यतावच्छेदकं लक्षणया शाब्दबोधस्तु न विधेयता शालीति न व्यभिचार इति विधेयतया लक्ष्यार्थबोधो नास्तीति प्रवादबीजं लाक्षणिकं पदंनानुभावकमिति प्रवादस्योद्देश्यविधेयभावेनान्वयोनास्तीत्यर्थः एवंविशिष्टवाचकानां पदानां विशेष्यमात्रपरत्वे न लक्षणा शक्यादन्येन रूपेण ज्ञाते भवति लक्षणा लक्ष्यतावच्छेदके न लक्षणेति प्रवादानुसन्धेयाः। केचित्तु लक्ष्यतावच्छेदके लक्षणायाकल्पने गोत्वेपि शक्तिविलोपप्रसङ्गः इत्युपस्थापितस्यैव शाब्दबोधविषयत्वात् गोत्वे शक्तिकल्पने लक्ष्यतावच्छेदकेपि तथा। अथ तीरत्वत्वे नोपस्थितिं विना तीरत्वं गङ्गापदमम्बन्धीति सम्बन्धग्रहाभावात्तत्र न लक्षणेति चेन्न। घटोनेत्यादौ यथा प्रतियोगितावच्छेदकत्वं संसर्गमर्यादया भासते तथा गङ्गायास्तीरमित्यत्र तीरत्वे सामीप्यावच्छेदकत्वं सम्बन्धो भासते सम्बन्धग्रहेच यादृशं यस्य भानं तथा घटत्वे तस्यैव स्मरणं तथा च लक्ष्यतावच्छेदकेपि परंपरासम्बन्धात्मिकालक्षणैवेति प्राहुः। राजपुरुष इत्यादौ शक्त्यालक्षणया वा राजसम्बन्धिपुरुषबोधानुपपत्तेरित्यतिरिक्ता वृत्तिरवश्याभ्युपेया तथा च कथं शक्तिलक्षणे एव वृत्तीत्युक्तमित्यभिप्रायवान् शंकते। नन्विति। एते एव। शक्तिलक्षणेएव। एवकारेण वृत्त्यन्तरव्यवच्छेदः। षष्ठ्यर्थेति। तत्र षष्ठ्याः लुप्तत्वेन राजपदादेश्चसम्बन्धे शक्त्याद्यसंभवात् कथं सम्बन्धलाभइत्यर्थः। तदेवाह। नहीति। ननु प्रकारतया विशेष्यतया वा बोधे वृत्तेरपेक्षा न तु संसर्गमर्यादया भाने तथा च घटमानयेत्यादौ घटक-

ष इत्यत्रापि तदापत्तेः । अथ नामार्थयोरभेदेनैवान्वयो न त्व-
न्यथा तथैव व्युत्पत्तेः । राज्ञः पुरुष इत्यत्र न नामार्थयोरन्व-
यः किन्तु विभक्त्यर्थनामार्थयोरिति चेत् । तर्हि राजपुरुष इ-

र्मत्वयोराधेयत्वरूपं संसर्गवद्राजपुरुषइत्यत्रापिस्वस्वामिभावरूपं सम्बन्धभा-
नं वृत्तिं विनैव स्यादित्याशंकते । अथेति । नीलइति । नीलपदस्य निरूढल-
क्षणया नीलविशिष्टमर्थः तस्यचाभेद संसर्गेण घटे ऽन्वयइत्यर्थः तथा च य-
थानीलघटयोरभेदः संसर्गमर्यादया भासते तथा षष्ठीतत्पुरुषेपि सेव्यसेवक
भावलक्षणः सम्बन्धः संबधविधयैव भासते इति भावः । तहीषेति । ष-
ष्ठ्यर्थ सम्बन्धि भानापत्तेरित्यर्थः । राजपुरुष इत्यत्रेवाचापि सम्बन्ध विधया
भानाय राजसम्बन्धी पुरुषइत्यन्वयबोधापत्तेरितिभावः । ननु घटः कर्मत्व-
मानयनं कृतिरित्यत्र घटमानयेत्यत्रे वाधेयतासंबंधेन कर्मत्वे घटान्वयबोधा-
पत्त्या घटकर्मकानयनानुकूलकृतिमानित्यन्वयबोधापत्तेः नामार्थयोरभेदाति-
रिक्त संबंधेनान्वयो न स्वीक्रियत इति व्युत्पत्तिर वश्यमुपेया एवं च रा-
जापुरुष इत्यत्र कथमभेदातिरिक्त सम्बन्धे नान्वयबोधमापादयतीत्याशंक-
ते । अथेति । अभेदेनैवेत्येवकारेणाभेदातिरिक्त सम्बन्धव्यवच्छेदः । एव कारा-
र्थं स्पष्टयति । नत्वन्यथेति । नत्वन्यथा । नत्वभेदातिरिक्त सम्बन्धइष्येत्यवच्छे-
दः एवकारार्थं स्पष्टयति । नत्वन्यथेति । नेत्यर्थः । नन्वे वं नियमे मानाभाव
इत्यतआह । तथैवेति । अन्यथा घटः कर्मत्वमानयनं कृतिरित्यत्राप्याधेयता
सम्बन्धे न घटोयाकर्मतेत्यन्वयबोधापत्तेरिति भावः । ननु राज्ञः पुरुष इ-
त्यत्र राजपुरुषयोरभेदातिरिक्तसम्बन्धे नैवान्वयबोधोदयात्ताट्शनियम इत्य-
तआह । राज्ञइति । नामार्थयोरेव नतथा न्वयः राज्ञपुरुष इत्यत्रषष्ठ्यर्थस्य
नामार्थत्वाभावेनाभेदातिरिक्तसम्बन्धे नाप्यन्वयबोधोऽनुपपन्नइत्यर्थः । विभ-
क्त्यर्थेति । षष्ठ्यर्थ सम्बन्धनामार्थपुरुष योरित्यर्थः षष्ठ्यास्तु न नामत्वं स्वाद्य
न्तमिह नामेष्टमित्यभियुक्त विरुद्धत्वादिति भावः । ननु राज्ञः पुरुष इत्यत्र सेव्यसे
वकभावलक्षणसम्बन्धप्रकारकइव सेव्यसेवकभावलक्षणसम्बन्धे न राजप्रका-
कपुरुषविशेष्यकोप्यन्वयबोधो भवति यथा घटमानयेत्यत्र कर्मतासम्बन्धे
नानयनोपरि घटोप्यन्वेतीति सिद्धान्तात् तथाचैतन्नियमभङ्ग इति चेन्न । त

त्यत्र कथं तयोस्तथान्वय इति स्वयमेव विभावय। अथ सम्बन्धे लक्षणेति चेन्न। तथापि राजसम्बन्धः पुरुष इति तदन्वयः स्यादिति तद्दोषतादवस्थ्यात्। अथ राजपुरुषात्मकसमुदाय एव राजसम्बन्धिपुरुषरूपलक्षणेति चेन्न। शक्तिविरहे लक्षणायोगात्। शक्यसम्बन्धो हि लक्षणेत्युक्तम्। उच्यते राजपदं राजसम्बन्धि लक्षकं तथाचाभेदेनैव पदार्थद्वयान्वयः। नन्वेवं कर्मधारयापत्तिः समासपूर्वदशायां पदयोस्तु-

---

स्यैकदेशिमतत्त्वात् तन्मते तु नामार्थयोरभेदातिरिक्तसम्बन्धेन साक्षादन्वयबोधो न स्वीक्रियत इति नियमात् विभक्त्यर्थमद्वारीकृत्याभेदातिरिक्त सम्बन्धेन नान्वय इति यावत् प्रकृते च सम्बन्धस्य विभक्त्यर्थत्वात् तद्द्वारा अन्वबोधोपगमेपि क्षतिविरहादिति ध्येयं। तर्हीति। तादृशनियममभ्युपेत्यराजापुरुष इत्यत्र तथाबारणेहीत्यर्थः। तयोः। राजपुरुषयोस्तथान्वयः। अभेदातिरिक्त सम्बन्धेनान्वयः। विभावनीयेति। तादृशनियमानभ्युपगमे राजापुरुष इत्यत्रैव तथान्वयबोधापत्तिः अभ्युपगमे तु अत्रापि न तथास्यादित्यर्थः। ननु राजपदस्य राज सम्बन्धे लक्षणे वास्तु राजा पुरुषइत्यत्रत्वभेदे एव तात्पर्येण न सम्बन्धे लक्षणेत्याशंकते। अथेति। तथापीति। राजपदस्य राज सम्बन्ध लक्षकत्वेपीत्यर्थः। इति वदिति। इति वाक्य वदित्यर्थः। नामार्थयोरभेदातिरिक्तसम्बन्धेनान्वयस्याव्युत्पन्नतया राजपदार्थस्य राजसम्बन्धस्याश्रयाश्रयिभावेन पुरुषे ऽन्वयासंभव इति भावः। तद्दोषेति। एकसम्बन्धी पुरुष इत्यन्वयानुपपत्तिरूपदोषतादवस्थादित्यर्थः। ननु राजपदस्य राजसम्बन्ध लक्षकतासंभवेपि राजपुरुष इति वाक्यमेव राजसम्बन्धिपुरुष लक्षकमस्त्वित्याशंकते। अथेति। समुदायएव। राजपुरुष इति वाक्यएव। शक्तिविरहे। वाक्ये कुत्रापिशक्तिविरहे। लक्षणायाः। वाक्ये लक्षणायाः। अयोगादित्यर्थः। ननुगङ्गापदस्यतीरेशक्त्यभावेपि यथातीरेलक्षणा तथावाक्ये कुत्रचिदप्यर्थे शक्त्यभावेपिलक्षणस्यादत आह। शक्येति। तथाच लक्षणायाः शक्तिघटितत्वात्तदभावे तदनुपपत्तिः तीरे गङ्गापदशक्त्यभावेपि गङ्गापदशक्यसम्बन्धसत्त्वात् तत्र लक्षणोपपत्तिः अत्र वाक्ये कुत्राप्यर्थे शक्त्यभावाल्लक्षणानुपपत्तेरिति भावः। सम्बन्धीति।

ख्यार्थत्वाभावात् । अन्येतु सुप्रा षष्ठ्येव सम्बन्धं बोधयति ष-
ष्ठी लोपमजानतस्तु तदन्वयबोधशक्तिभ्रमात् राजपदलक्ष-

राजसम्बन्धि लक्षकमित्यर्थः । क्वचित्तथैवपाठः । ननु नामार्थयोरन्वबोधो न स्वीक्रियत इति कथं पुरुषपदार्थे तदन्वय इत्यतआह । तथाचेति । राजपदस्य सम्बन्धि लक्षकत्वेचेत्यर्थः । अभेदेनैवेति । अन्वयः । राजसम्बन्धि पुरुषयोरन्वयबोधः । नामार्थयोरभेदातिरिक्तसम्बन्धेनान्वयो न स्वीक्रियते नत्वभेदेनापि तदस्वीकार इति भावः । न चैवमिति । षष्ठी तत्पुरुषेपि विशेषणविशेष्यवाचकपदार्थयोरभेदान्वयस्वीकार इत्यर्थः । अभेदे कर्मधारय इत्यनेनाभेदबोधस्थले कर्मधारयविधानादिति भावः । समाधत्ते।समासेति । लक्षणाहि वाक्यार्थान्वयानुपपत्त्या स्वीक्रियते समासपूर्वं तु न राजपदादौ लक्षणा अनुपपत्तेरभावात् तथा च समासपूर्वं विशेषणविशेष्यवाचकपदयोः समानार्थकयोर्यश्चाभेदान्वयबोधकत्वं तचैव कर्मधारय इति भावः । पदयोः । राजपुरुषपदयोः । तुल्येति । एकविशेष्यकबोधजनकत्वाभावादित्यर्थः । पदे तुल्याधिकरणे विज्ञेयः। कर्मधारयइत्यनुशासनादिति भावः । ननु राज्ञः पुरुषइत्यत्र सम्बन्धप्रकारकोबोधः राजपुरुषइत्यत्र सम्बन्धिप्रकारकइति विग्रहवाक्यसमासवाक्ययोः समानार्थकत्वभङ्गापत्तिः समानार्थकसमासारंभकवाक्यस्यैव विग्रहवाक्यत्वादिति राजसम्बधी पुरुषइत्येव विग्रहवाक्यं वाच्यमिति कर्मधारयत्वापत्तौ तत्पुरुषोच्छेदः । नच शक्त्याभेदप्रतियोग्युपस्थापने कर्मधारय इति वाच्यं । नीलोत्पलमित्यादौ नीलपदस्य नीलविशिष्टे शक्तिविरहेण कर्मधारयत्वाभावापत्तेः तस्माद्राजपदस्य राजसम्बधे एव लक्षणा स्वीकर्तुमुचिता । न च राजसम्बधी पुरुषइति वत् अनन्वयापत्तिरुक्तैव नामार्थयोरिति व्युत्पत्तेरिति वाच्यं । घटोनेत्यादौ नामार्थयोरन्वयस्य दृष्टत्वान्निपातातिरिक्तस्थलएव तादृशनियमाभ्युपगमे च समासातिरिक्तस्थलएव मयापि तादृशनियमाभ्युपगमात् । नचैवं राजसम्बधे लक्षणा वैयर्थ्यमिति वाच्यं । व्यासमासयोः समानप्रकारकबोधजनकत्वरूपसमानार्थकत्वरक्षणायैव लक्षणाया उपगमात् सम्बन्धप्रकारकबोधस्यानुभवसिद्धत्वाच्चेति । मैवं समानविषयकबोधजनकत्वमित्येव हि समानार्थकं नतु समानप्रकारकबोधजनकत्वं तत् आरूढवानरोद्वृत्त इत्यत्र आरूढवानरोयमिति विग्रहात्

णया वेति स्वीचक्रुः। वैयाकरणास्तु समासस्थलेशब्दसमुदायस्य विशिष्टार्थे शक्तिरेव। नचैवं राजपदशक्तिमविदुषोपि राजपुरुषादिपदादन्वयप्रत्ययः स्यादिति वाच्यं। समस्तश-

---

यत्कर्मकारोहणकर्ता वानर इति बोधेन समासाच्च वानरकर्तृकारोहणकर्म वृक्षइति बोधेन भिन्नप्रकारकबोधस्यैवोदयेन व्यभिचारात् एवं प्राप्तोदकोग्राम इत्यादावपि तत्र प्राप्तमुदकंयं इति विग्रहात्। अथ बहुव्रीहेरविग्रहतयानास्य विग्रहवाक्यत्वं चित्रगुरित्यत्र चित्रागौर्यस्येति समासार्थकथनं नतु विग्रहः समस्यमानपदैरेवार्थकथनस्य विग्रहत्वादितिचेन्न। नहि तत्र विग्रहएवनास्तीति समासारम्भकबाक्यस्यैव विग्रहत्वात् किन्तु बहुव्रीहौ तस्यासाधुत्वं समस्यमान पदैरेव विग्रहस्य साधुत्वात् अतएव बहुव्रीहौ विग्रहस्यासाधुत्वज्ञापनाय तत्र नित्यसमासत्वाभिधानम् अतएव चाविग्रहोऽ स्वपदविग्रहोवा नित्यसमासइति तल्लक्षणम्। अथ समस्य मानपदैरेवार्थकथनरूपविग्रहस्य साधुविग्रहस्य वा व्याससमासयोः समानार्थकत्वनियमे प्रवेशान्नोक्तस्थले व्यभिचार इति चेन्न। अप्रयोजकत्वात्। वस्तुतस्तु नामार्थयोरभेदेनैव व्युत्पत्तेः संकोचे मानाभावात्सम्बन्धिनि लक्षणाया आवश्यकत्वे समानविषयबोधजनकत्वमित्येव कल्पनात् नतु समानप्रकारकबोधजनकत्वरूपं समानार्थकत्वमितिदिक्। षष्ठ्येवेति। स्मृतासतीति शेषः एवंच षष्ठ्याएव सम्बन्धोर्थः आश्रयाश्रयिभावेन पुरुषे भासते नामार्थयोरेव चाभेदातिरिक्तसम्बन्धेनान्वयबोधनिषेधादिति भावः। ननु यस्य न षष्ठीलोपज्ञानं तस्य लुप्तषष्ठीस्मरणासम्भवेनान्वयबोधानुपपत्तिरित्यत आह। षष्ठीलोपमिति। अजानतस्तु। अननुभवतस्तु। शक्तिभ्रमात् राजपुरुष इति समुदायस्य राजसम्बन्धिनि पुरुषे शक्तिभ्रमात्। नतुराजपदस्य शक्तिभ्रमादित्यर्थः। तथासति राजपदलक्षणयावेति राजपदस्य लक्षणयैव सहान्वयकथनानुपपत्तेरितिध्येयं। नन्वेवं तत्र शक्तिभ्रमाच्छाब्दबोधस्वीकारे तत्र दोषादीनामननुगतानां नियामकत्वकल्पने नियमतस्तत्पूर्वं तादृशदोषकल्पने च गौरवमत आह। राजपदेति। पूर्वकल्पे तु राजसम्बन्धिनि निरूढलक्षणा एतस्मतेतु षष्ठीलोपस्मरणासम्भवस्थले राजपदे स्वारसिकी लक्षणा इदमेव लाघ-

शक्तिग्रहोऽनुशासनात् । नचावयवशक्त्यग्रहेऽनुशासनग्रहः संभवतीति तच्छक्तिग्रहस्य समुदायशक्तिग्रहे हेतुत्वादित्याहुस्तन्न । अवयवलक्षणयोपपत्तेः समुदायशक्तौ मानाभावात्

वमिति भेदः । नच ऋद्धस्य राजमातङ्ग इत्यादौ एतन्मते लुप्तषष्ठीस्मरणस्यावश्यकतया समानविभक्तिकत्वेनाभेदेनान्वयबोधापत्तिरिति वाच्यं । नहि समानविभक्तिकत्वाभावनिबन्धनमभेदेनान्वयाननुभावकत्वं किन्तु समासघटकपदसापेक्षतया तदभावेन सविशेषणानां वृत्तिर्न वृत्तस्य विशेषणयोगोनेति नियमात् । नचैवं शरैः शातितपत्रः चैचस्य दासभार्या इत्यादौ शरकरणत्वचैचनिरूपितत्वयोः समानविशेषणीभूतशातनदासत्वयोर्कथमन्वयइति वाच्यम् । अभेदेनान्वये तथानियमात् । स्तोकं पचतीत्यादावभेदान्वयानुरोधेन समानविभक्तिकत्वमित्यस्य विरुद्धविभक्तिराहित्यमित्यर्थकत्वावश्यकतया भवन्मतेप्यगतेश्च । स्वीचक्रुरित्यस्वरसोद्भावनं तद्दीजंतु क्वचित्समासपूर्वं विग्रहश्रवणस्य समासार्थकथनपरतया विग्रहश्रवणस्य सर्वत्रानावश्यकतया लुप्तषष्ठीस्मरणकल्पने गौरवात्क्वचित् राजसम्बन्धिनि स्वारसिकलक्षणाग्रहस्थलानुरोधेन राजसम्बन्धिप्रकारकबोधे तादृशसमभिव्याहारज्ञानस्य कारणत्वकल्पनाया आवश्यकत्वेन तत्र निरूढलक्षणाया एव न्याय्यत्वात् । नच सम्बधिनि तात्पर्यस्यानादित्वकल्पनमेव निरूढलक्षणा कल्पने गुरुअनादितात्पर्यविषयीभूतार्थनिष्ठलक्षणाया एव निरूढलक्षणात्वादिति वाच्यं । नियमतो लुप्तषष्ठीस्मरणकल्पनापेक्षया तात्पर्यानादित्वकल्पनाया एव युक्तत्वात् । नचैवं दधि पश्यतीत्यादावपि दधिपदस्य दधिकर्मके लक्षणापत्त्यातत्रापि लुप्तविभक्त्यनुसन्धानं विनापि बोधापत्तिरिति वाच्यं । तत्र दधिपदस्य द्वितीयेतरविभक्त्यन्तत्वभ्रमदशायां दधिकर्मकः पश्यति दधिकर्मकेण पश्यतीत्यन्वयाबोधेन कर्मत्वार्थकविभक्तिं विना निराकाङ्क्षत्वेन तदनुसन्धानस्यावश्यकत्वात्समासस्थले त्वन्यथैवव्युत्पत्तिः अतएवाग्निनौदनं पचेतीत्यत्र तान्येव पदानि समर्थानि नतु तदर्थकाणि अग्निकरणकौदनकर्मकपाककृतिरिष्टसाधनमितितु वाक्यं ने पदमित्युक्तमिति । समासस्थइति । घटमानयेति शब्दसमुदायवारणाय समासस्थइति । राजपुरुषइत्यादि समासवाक्यस्थेत्यर्थः । विशिष्टे र्थे । राजसम्बन्धिपुरुषादिरूपे विशिष्टे र्थे । शक्तिरेवेति

तदुक्तं जहत्स्वार्थेति तत्रैव यत्र रूढिर्विरोधिनीति तस्मादन्यथोपपत्तौ समासे शक्तिरयुक्तेति संक्षेपः। स्यादेतत् मास्तु तत्पुरुषे शक्तिर्बहुव्रीहौ तु चित्रगुपदे चित्रगोस्वामिनि शक्ति-

---

तथाच समासे शक्त्यैव विशिष्टार्थबोधोपपत्तेर्नातिरिक्त वृत्तिकल्पनमिति भावः एवं। समासे शक्तिस्वीकारे। राजपदेति। राजपुरुषइत्यत्र राजपदं राज्ञि शक्तमिति शक्तिज्ञानशून्यकालेपि राजपुरुषपदं राजसम्बन्धिपुरुषे शक्तमिति शक्तिज्ञानसम्भवेन तादृशबोधापत्तिरित्यर्थः। समस्तेति। समासस्थले विशिष्टार्थे शक्तिग्रहइत्यर्थः। नचेति। नहीत्यर्थः। अवयवेशक्त्यग्रहे। राजपदादिशक्त्यग्रहे। अनुशासनग्रहः। अनुशासनजन्यविशिष्टार्थे शक्तिग्रहः। तच्छक्तिग्रहस्य। अवयवशक्तिग्रहस्य। समुदायग्रहे। समुदायशक्ति ग्रहे। हेतुत्वादिति। व्यवहारादिना नात्र शक्तिग्रहः किन्तु व्याकरणादितः व्याकरणेन हि प्रत्येकशक्तराजपदादिसमुदायो विशिष्टार्थे शक्त इति बोधनीयं नतु प्रत्येकशक्त्यग्रहेन सम्भवतीति तज्जन्यसमस्तशक्तिग्रहे अवयवशक्तिग्रहस्य हेतुत्वात् राजपदादिशक्तिग्रहाभावे समुदायशक्तिग्रहस्याप्यभावान्न ततोऽन्वयबोध इतिभावः। अवयवेति। राजपदस्य राजसम्बन्धिनि लक्षणयैवेत्यर्थः। समुदायशक्तौ। समास वाक्ये विशिष्टार्थेशक्तौ। मानाभावादिति। अनन्यलभ्योहि शब्दार्थइति न्यायादिति भावः। ननु गङ्गायां घोष इत्यत्रैव जहत्स्वार्थेवाच लक्षणोपेया सातु न सम्भवतिराजपदस्य राजसम्बन्धिनि लक्षणायां स्वार्थपरित्यागाभावादित्यत आह। तदुक्तमिति। यत्र रूढिः शक्तिः विरोधिनी स्वार्थविषयकविशिष्टार्थबोधस्वरूपायोग्या तत्रैव जहत्स्वार्था नत्वन्यत्र अन्यत्रतु अजहत्स्वार्था यथा गङ्गायां घोष इत्यत्र तीराधिकरणको घोष इत्यैवान्वयबोध उपेयः तत्रच प्रवाहस्य तादृशबोधविषयत्वाभावेन तादृशबोधस्वरूपायोग्यत्वमस्त्येव। गङ्गापदस्येति। गङ्गापदे जहत्स्वार्था लक्षणा मञ्चाः क्रोशंतीत्यत्र तु मञ्चपदस्य मञ्चस्थपुरुषे लक्षणायां मञ्च रूपस्वार्थस्यापि तादृशबोधविषयत्वादजहत्स्वार्थैव लक्षणा एवं च न केवलं जहत्स्वार्थैव लक्षणा येन राजपदस्य राजसम्बन्धिनि लक्षणाकल्पनं नस्यात् किंत्वजहत्स्वार्थापीति साचाङ्गीकार्येति भावः। वस्तुतस्तु नन्वेवंपङ्कजमित्यादावपि समुदाये शक्तिर्न स्यात् अवयवलक्षणयैव पङ्कत्वविशिष्टबोधोपपत्तेरित्यत आह।

राजशक्तौ न हि तच्च लक्षणया निर्वाहः तथाहि गोपदं गोस्वामिलक्षकं चिच्चपदं च चिच्चस्वामिलक्षकं नाद्यः न हि चित्त्वस्य गवान्वयः संभवति तस्य पदार्थैकदेशत्वात् अत-

---

तदुक्तमिति । यत्र रूढिः प्रसिद्धिः योगविरोधिनी तत्रैव जहत्स्वार्था लक्षणा यथा कर्मणि कुशल इत्यादौ दक्षेरूढिः प्रसिद्धिः कुशान्लातीति कुशादानकर्तृर्योगार्थस्य विरोधिनी दक्षे कुशादानकर्तृत्वबाधादिति कुशलपदस्य विवेचकत्वरूपशक्यसम्बन्धसत्त्वात् दक्षे लक्षणाबाधेन शक्त्यावयवार्थबोधाभावात् । नचात्र विवेचकत्वेन लक्षणायामजहत्स्वार्थत्वमिति वाच्यं । यत्र स्वार्थस्य विशेष्यतया क्रियान्वये प्रवेशः साऽजहत्स्वार्था यथा कुचिणो यान्तीत्यादौ एवं च यष्टीः प्रवेशयेत्यत्रापि जहत्स्वार्थैव प्रकृतेच राजपुरुषइति समुदायस्य राजसम्बन्धिपुरुषे रूढिः प्रसिद्धिः राजाभिन्नपुरुषस्य योगार्थस्य विरोधिनीति तत्र जहत्स्वार्था लक्षणा स्वार्थस्य राज्ञो विशेष्यतया क्रियान्वयेप्रवेशाभावात् पङ्कजमित्यादौतु पद्मस्य पङ्कजनिकर्तृत्व योगार्थस्याविरोधादवयवशक्त्यैव पङ्कजनिकर्तृबोधः पद्मत्वविशिष्टबोधार्थं च पङ्कजपदस्य पद्मत्वविशिष्टे लक्षणा कल्पने तु शक्त्यापङ्कजनिकर्तृयोगार्थस्य लक्षणयाच पद्मत्वविशिष्टस्यबोधो वाच्यः तस्य च युगपद्विरोधेनासम्भवात्पङ्कजपदस्य पद्मत्वविशिष्टे समुदायशक्तिरावश्यकी तस्माद्युगपद्वृत्तिद्वयविरोधेन शक्त्या लक्षणया च बोधानुपपत्तेः पङ्कजपदे समुदायशक्तिरावश्यकी समासेतु नैवमिति । अथवा पङ्कजमित्यत्रापि लक्षणयैवोपपत्तेः समुदायशक्तिर्नस्यादत आह । तदुक्तमिति । यत्ररूढिः । समुदायशक्तिः । योगविरोधिनी । योगः अवयवशक्तिस्तद्विरोधिनी । तत्रैव जहत्स्वार्था लक्षणा यथा पण्डपं भोजयेदित्यत्र तत्रहि मण्डपपदस्य गृहविशेषे रूढिः योगविरोधिनी रूढ्यर्थगृहे मण्डपानकर्तृत्वासम्भवात्तत्ररूढेर्योगापहारितेति प्रवादात् अवयवशक्त्या मण्डपानकर्तृबोधासम्भवात् मण्डपपदस्य मण्डपानकर्तरि लक्षणा इत्यं च रूढ्यर्थगृहसम्बन्धितावच्छेदकतया गृहीतचैत्रत्वादिनान्वयबोधो नतु मण्डपानकर्तृत्वेन पङ्कजमित्यादौतु रूढ्यर्थस्य पङ्कजनिकर्तृत्व योगार्थस्याविरोधादवयवशक्त्यैव बोधः पद्मत्वविशिष्टस्य च लक्षणया बोधोपगमे युगपद्वृत्तिद्वय-

एव नान्त्योऽपि गवान्वयानापत्तेः। अथ गोपदं चित्रगो-स्वामिलक्षकं चित्रपदं तु तात्पर्यग्राहकमिति चेन्न। चित्रप-दं चित्रगोस्वामिलक्षकं गोपदं तु तात्पर्यग्राहकं मिति वि-

---

विरोधात्पङ्कजपदे समुदायशक्तिरावश्यकी राजपुरुष इत्यत्र तु राजसम्बन्धि-पुरुषे राजाभिन्नपुरुषस्यावयवार्थस्य विरोधादवयवशक्त्या तद्बोधाभावे युग-पद्वृत्तिद्वयविरोधाभावाल्लक्षणैव स्वार्थस्यावयवार्थस्य त्यागात् जहत्स्वार्थत्वो-क्तिरिति सारं। स्वोक्ते समासेऽवयवलाक्षणिकत्वे उपष्टम्भकमाह। तदुक्तमि-ति। यत्रेति। यत्रानुभूयमानसमुदायार्थोऽवयवार्थविरुद्धस्तत्र पदे जहत्स्वा-र्था लक्षणेति समुदायार्थ इत्यपि कश्चित्। एतन्मते तत्र जहत्स्वार्थैवेत्यन्वयं वि-नाऽगतिरिति ध्येयं। जहत्स्वार्था नतत्रैव यत्र रूढिर्विरोधिनीति क्वचित्पाठः यत्र लक्षणा रूढिविरोधिनी शक्तिर्विरोधिनी तत्र जहत्स्वार्था लक्षणा यत्र लक्षणायामङ्गीकृतायां शक्त्यासहान्वयबोधस्तत्र न जहत्स्वार्था लक्षणेति या-वत् यथापङ्कजमित्यत्र पद्मत्वेन लक्षणायां पङ्कजनिकर्तृत्वेन शक्त बोधे यु-गपद्वृत्तिद्वयविरोध प्रसङ्गात् न तत्र लक्षणा किंतु समुदाये शक्तिः राजपुरुष-इत्यत्र तु सम्बन्धिलक्षणायां तथेति न तत्र समासे शक्तिरिति ध्येयम्। उपसं-हरति। तस्मादिति। अन्यथेति। अवयवलक्षणोपपत्तावित्यर्थः। अनन्यलभ्यस्य शब्दार्थत्वात् अन्यथा गङ्गापदस्यापि तीरे शक्त्यापत्त्या लक्षणोच्छेदापत्तेरिति भावः। ननु चित्रगुरित्यादौ चित्रगोस्वामीत्यन्वयोरनुभवसिद्धः तस्यचावयव शक्त्या लक्षणयावोपपत्त्यभावाद्वाक्ये शक्तिरावश्यकीति कथं न समासे शक्ति-रित्याशंकते। स्यादेतदिति। बहुव्रीहौ तु। चित्रगुरित्यादिबहु व्रीहौतु। नन्वत्राप्यवयव लक्षणयैवोपपत्तौ न शक्तिः कल्पनीयेत्यत आह। नहीति। लक्षणया। अवयवलक्षया। निर्वाहः। विशिष्टार्थबोधः। अनिर्वा-हमेवोपपादयति। तथाहीति गोपदस्य गोस्वामि लक्षकत्वे चित्रपदार्थ-स्य गवि अन्वयोवाच्यः सच न सम्भवति पदार्थैकदेशत्वादिति भावः। चि-त्रस्य। चित्रपदार्थस्य चित्रत्वविशिष्टस्य। गवान्वयः। गविअन्वयः। ग-वेती तृतीयान्तंवा गवासहेत्यर्थः। सम्भवतीति। चित्रपदार्थस्य चित्रस्याभेदेन-गवि अन्वयो नसम्भवतीत्यर्थः। तस्य। गोः। नच तच्छब्दस्याव्यवहितपूर्वोप-

स्थितमुख्यविशेष्यपरामर्शकतया गवान्वयोपसर्जनतया कथं तच्छब्देन गोपरामर्श इति वाच्यं । तच्छब्दस्याव्यवहितपूर्वोपस्थितमात्रपरामर्शकतया तात्पर्यबलादन्वयोपसर्जनस्यापि गोबोधने बाधकाभावात् । गवेति तृतीयान्तत्वे दोषास्पर्शाच्च । पदार्थैकदेशत्वात् । गोस्वामिरूपपदार्थैकदेशत्वादित्यर्थः । गौर्नित्येत्यत्र गोत्वे नित्यत्वान्वयवारणाय पदार्थः पदार्थेनान्वेति नतु पदार्थैकदेशेनेति व्युत्पत्त्यङ्गीकारस्यावश्यकत्वादिति भावः । केचित्तु चित्रस्य । चित्रविशेषणतयोपस्थितस्य चित्रत्वस्येत्यर्थः । चित्रपदस्योभयत्र प्रयोगात् । तस्य । चित्रत्वस्य । पदार्थैकदेशत्वात् । चित्रपदार्थैकदेशत्वात् । एकविशेषणतयोपस्थितस्यान्यत्र विशेषणत्वेनान्वये निराकांक्षत्वादिति भाव इत्याहुस्तन्न । एवमपि चित्रस्य गवित्रभेदेनान्वये बाधाकानुक्तेः । अतएवेति । चित्रस्य गवान्वयासम्भवादेवेत्यर्थः । गवानन्वयेति । चित्रपदस्य चित्रस्वाम्यर्थकत्वे पदार्थैकदेशतया चित्रे नगोरन्वयः नापि चित्रस्वामिनि नामार्थयोरभेदेनैव व्युत्पत्तेरिति भावः । पदद्वयइति । चित्रपदे गोपदेचेत्यर्थः । ननूभयत्र लक्षणायां गौरवात् तदपेक्ष्य समुदायशक्तिरेवास्तामित्यत आह । नत्विति । अन्येति । अनन्यलभ्यस्यैव शब्दार्थत्वेनोभयत्र लक्षणाया गौरवस्य प्रामाणिकत्वादिति भावः । पदद्वये लक्षणाकल्पनेऽन्यतरपदवैयर्थ्याद्वाक्ये एव लक्षणावादिमीमांसक मतमाह । मीमांसकास्त्विति । समुदायएव । चित्रगुरिति वाक्यएव । लक्षणा । चित्र गोस्वामिनि लक्षणा । समुदायस्य । वाक्यस्य । शक्त्यभावादिति । वाक्यस्य कुत्रचिदप्यर्थे शक्त्यभावात्स्वशक्यसम्बन्धरूपा लक्षणा दुर्वचेत्यर्थः । स्वबोध्यस्येति । गङ्गापदबोध्यस्य प्रवाहस्यसम्बन्धस्तीरेऽस्तीति तत्र तत्त्वमुपपन्नं परन्तु शक्यत्वेन न तत्प्रवेशः किन्तु बोध्यत्वेनेत्यर्थः । अत्र । चित्रगुरित्यत्र बहुव्रीहावित्यर्थः । वाक्यस्यापि । चित्रगुरितिवाक्यस्यापि । विशिष्टं बोध्यमिति । एकदेशविकृतमनन्यवद्भवतीति न्यायेन चित्रगुरित्यत्र चित्रा गौरिति वाक्यस्यसत्त्वात्तस्य च बोध्यंचित्रागोस्तत्सम्बन्धश्च चित्रगोस्वामिन्यस्तीति भावः । शक्यसम्बन्धस्य लक्षणात्वे दूषणं दर्शयन् स्वबोध्यसम्बन्धस्यैव लक्षणात्वमुपपादयति । अन्यथेति । वाक्ये लक्षणाया अनङ्गीकारेइत्यर्थः । कागतिः । कथमन्वयबोधः । तदेवोपपादयति । नहीति । गभीरायामिति । नदीपदस्य नदीतीरत्वेन वालक्षणा-

निर्गंतुमशक्यत्वात् । तस्माद्विनिगमकाभावात्समुदायशक्तिरे-
वेति चेत् । अत्रोच्यते । विनिगमकाभावादस्तु पदद्वये ल-
क्षणा । नतु समुदाये शक्तिरन्यलभ्यत्वात् । मीमांसका-
स्तु । समुदाय एव लक्षणा । न च समुदायस्य शक्यभावाल्ल-
क्षणा नुपपत्तिः । स्वबोध्यसम्बन्धोहि लक्षणा अस्तिच वाक्ये-
पि विशिष्टं बोध्यम् । अन्यथा कागतिर्गभीरायां नद्यां घो-
षद्रत्यादौ । नहि नदीपदं तीरलक्षकं गभीरायामित्यनन्व-
यापत्तेः । नहि तीरं गभीरं । नापि गभीरपदं तीरलक्षकं ।
नद्यामित्यनन्वयापत्तेः । नहि तीरं नदी तस्मादनन्वगति-
कतया वाक्यमेव गभीरनदीतीरलक्षकमित्याहुः । अत्रोच्यते ।
वाक्यं न विशिष्टार्थबोधकं तद्बोधकतावच्छेदकशक्तेरभावा-
त् । अतस्तत्र बोध्यसम्बन्धो लक्षणेति रिक्तं वचः । किञ्च

यां गभीरस्य पदार्थैकदेशतया नद्यामन्वयासम्भवात् तीरे च विशेषणवा-
चकपदयोः समानविभक्तिकत्वस्थलेऽभेदेनान्वयस्यैव व्युत्पन्नतया भेदेना-
न्वया सम्भवादभेदेनैवान्वयोवाच्यः सतु न सम्भवति बाधादिति भावः । नद्या-
मित्यस्येति । गभीरपदस्य गभीरसम्बन्धितीरत्वेन च लक्षणायां नद्याः पदा-
र्थैकदेशतया गम्भीरेऽन्वयासम्भवात् तीरे च समानविभक्तिकस्थलेऽभेदेनान्व-
यस्यैव व्युत्पन्नतया भेदेनान्वयो वाच्यः सतु न सम्भवति बाधादिति भावः ।
अनन्वयमेवाह । नहि तीरं नदीति । उपसंहरति । तस्मादिति । अनन्येति
शक्त्या लक्षणया वा विशिष्टार्थ बोधस्यानुपपत्त्या वाक्यमेव । गम्भीरायां न-
द्यामिति वाक्यमेव लक्षकमिति पङ्कजपदेरनायत्या वाक्ये शक्तिस्वीकारेपि
अन्यलभ्यत्वादच लक्षणैवैक एव वाक्ये शक्तिकल्पनादन्यत्रापि तत्कल्पने च
गङ्गापदस्य प्रवाहे शक्तेः क्लृप्तत्वेन तीरेपि शक्तिकल्पनापत्त्या लक्षणोच्छेदाप-
त्तेरतः स्वबोध्यसम्बन्धस्य लक्षणात्वमुपगम्यैषारीतिः । वाक्यमिति । चि-
त्रगुरित्यादिवाक्यमित्यर्थः । न विशिष्टार्थेति । चित्राभिन्ना गौरित्यादिविशि-

गभीरायां नद्यामिति विभक्त्यन्तभागस्य न तीरे लक्षणा । तदाधारताप्रत्ययानापत्तेः । नापि गभीरायां नदीति भागस्य तस्याबोधकत्वात् । बोधकत्वे वा लक्ष्ये विभक्त्यर्थानन्वयाप-

---

ष्टार्थबोधकं नेत्यर्थः । तद्बोधकतेति । विशिष्टार्थबोधकतावच्छेदकेत्यर्थः । तत्सत्त्वे च किं लक्षणयेति भावः । अत इति । शक्तेरभावात् । रिक्तम् । अर्थं शून्यं वचइत्यर्थः । अपभ्रंशेपि शक्तिभ्रमेण स्वबोध्यसत्त्वात्तत्रापि लक्षणापत्तिः तथाच हस्तिमत्त्वस्यैव पदसाधुत्वरूपत्वेन अपभ्रंशिनां पदानां यत्ने प्रयोगापत्तिः साधूनेव प्रयुञ्जीतेत्यनेन विरोधाभावादतः शक्त्या स्वबोध्यसम्बन्धो लक्षणेत्येव वाच्यं नचैतद्वाक्ये सम्भवतीति भावः । ननु वाक्ये समुदायत्वेन शक्त्यभावेपि प्रत्येकपदशक्त्या स्वबोध्यमस्त्येव गभीरपदसमभिव्याहृतनदीपदशक्तत्वमेव विशिष्टबोधकतावच्छेदकम् अपभ्रंशे तु नैवमित्यस्वरसादाह । किंचेति । स्वबोध्येत्यत्र बोधकत्वमात्रविवक्षणे गङ्गायामिति समुदायस्यापि लाक्षणिकत्वापत्तिरतस्तत्त्वेन बोधकत्वं विवक्षणीयं तथासत्याह । गभीरायामिति । तीरे । गभीरनदीतीरे । तदाधारतेति । तीराधारतेत्यर्थः । विभक्तेः प्रत्ययिकाया अभावेनाधारत्वबोधकाभावादिति भावः । विभक्तिशून्यभागस्यापि न लक्षणेत्याह । नापीति । सप्तमीशून्यभागस्येत्यर्थः । इह तु सप्तम्या एव बोधकत्वान्नाधारताप्रत्ययानुपपत्तिरिति भावः । तस्य । गभीरायां नदीतिभागस्य । अबोधकत्वादिति । समानविभक्तिकपदस्यैवाभेदान्वयबोधकतया विभक्तिशून्यभागस्याभेदान्वयबोधकत्वाभावादिति भावः । तथाच स्वबोध्यसम्बन्धरूपालक्षणापि नात्र सम्भवतीति ज्ञेयं । यद्यपि पदानां स्वस्वान्वयबोधकत्वं न समूहत्वेन नवेतरपदावच्छिन्नेतरपदत्वेन स्वरूपयोग्यतेति विभक्त्यन्तभागस्य लक्षकत्वे प्येषदोषः । तथापि इतरपदावच्छिन्नेतरपदे फलोपधानरूपं बोधकत्वं सम्भवत्येव गभीराभिन्ना नदीति शाब्दबोधे समानविभक्तिकगभीरपदसमभिव्याहृतनदीपदज्ञानत्वेनानुपूर्वीज्ञानस्य कारणत्वादिति पूर्वत्र नायं दोषइतिध्येयं । नन्वभेदान्वयेन समानविभक्तिकत्वं तन्त्रं स्तोकं पचतीत्यत्र व्यभिचारात्किन्तु विरुद्धविभक्तिराहित्यमेव तच्च विभक्तिशून्यभागेप्यस्तीत्यत आह । बोधकत्वे वेति । लक्ष्ये । तीररूपलक्ष्यार्थे । विभक्त्यर्थेति । आधारत्वानन्वयापत्तेरित्यर्थः । अनन्वयमेवाह । प्रत्ययानामिति । यथा घटमित्यत्र घटरूपप्रकृत्य-

क्तेः नहि सप्तमीभागः प्रकृतिर्येन तदर्थे विभक्त्यर्थान्वयः स्यात्। गभीरायामिति सप्तम्यनापत्तेश्च। अथ विभक्त्यन्तस्यैव गभीरनदीतीराधारत्वलक्षकत्वमिति चेन्न। अशक्त्य-

---

र्थान्वितकर्मत्वरूपस्वार्थप्रतिपादकत्वं विभक्तेः। नच धवखदिरौ छिन्धीत्यादौ द्वितीयार्थकर्मत्वस्याप्रकृत्यर्थं धवान्वितत्वात्कथमेतदितिवाच्यं। यादृशं समुदायोत्तरं विभक्तिस्तस्यैव प्रकृतित्वेन धवस्यापि प्रकृत्यर्थत्वात्। सभागः। गभीरायां नदीति विशिष्टवाक्यात्मकभागः। प्रकृतिरिति। नदीपदोत्तरमेव विभक्तेः श्रूयमाणतया नदीपदमेव प्रकृतिस्तदर्थश्च न भवन्मते विशिष्टनदीतीरं विशिष्टवाक्योत्तरं च क्वापि विभक्तेरदृष्टत्वेन न वाक्यस्य प्रकृतित्वमिति भावः। ननु डित्यडपित्यसमुदायवत् गभीरायां नदीति वाक्योत्तरमेव विभक्तिरिति तस्याप्रकृतित्वमस्तीत्यत आह। गभीरायामिति। गभीरायां नदीति वाक्योत्तरं यदि विभक्तिस्तदा सुपो धातुप्रातिपदिकयोः एतयोरवयवस्य सुपो लुक्स्यादित्यनेन गभीरायामिति सप्तम्या लुक्स्यादिति गभीरायां नद्यामिति न स्यात्किन्तु गभीरनद्यामिति स्यादित्यर्थः। वस्तुतस्तु ननु नीलं घटमानयेत्यत्र विशिष्टे कर्मत्वान्वयो न स्यात् नीलस्याप्रकृत्यर्थत्वादित्यत आह। गभीरायामिति। विशेषणवाचकपदस्य विशेष्यवाचकपदसमानवचनत्वानुरोधेन गभीरायामिति सप्तमी भवन्मते च नदीपदस्य विशेष्यवाचकपदत्वाभावात्। गभीरायामित्यस्य विशेषणवाचकपदत्वाभावाच्च गभीरायामिति सप्तमी न स्यादित्यर्थ इतिमारं। नदीपदोत्तरसप्तम्याएव लक्ष्यार्थे आधारत्वान्वयसम्भवे गभीरायामित्यत्र विभक्त्यर्थान्वयासम्भवादिति भाव इत्यपि कश्चित्। तन्न। वक्ष्यमाणस्वमतेपि तदैयर्थ्यसत्त्वात्। अथेति। विभक्त्यन्तस्येति। गभीरायां नद्यामिति विभक्त्यन्तभागस्यैवेत्यर्थः। विभक्त्यन्तस्य नामत्वाभावेन नामार्थयोरिति व्युत्पत्त्यनवकाशाद्गङ्गेनैव घोषे तदर्थान्वय इति भावः। अशक्तत्वादिति। गङ्गायामिति समुदायस्यापि लाक्षणिकत्वापत्त्या तत्त्वेन बोधकत्वं वाच्यम् एवमपभ्रंशवाराणाय शक्तेत्यावश्यकम् इत्यं च शक्त्यवच्छिन्ना या तत्त्वावच्छिन्ना बोधकता तस्या एव निवेशाद्वाक्यत्वेन बोधकतायां च शक्तेरनवच्छेदकत्वात् न वाक्ये लक्षणा सम्भवतीति भावः। व-

त्वात् । तस्मात्पदद्वय एव विनिगमकाभावाद्विशिष्टनदी-तीरे लक्षणा । न चैकपदवैयर्थ्यं परस्परतात्पर्यग्राहकत्वादिति संप्रदायः । विस्तरस्त्वस्माकं मणिमरीचिनिबन्धन

स्तुतस्तु अपभ्रंशवारणाय शक्त्या स्वबोध्येत्यस्यावश्यकतया वाक्येन शक्तिरित्याह । वाक्यमित्यादि । नन्वपभ्रंशस्यापि लक्षकत्वे इष्टापत्तिः वृत्तिमत्त्वमेव पदसाधुत्वमित्यत्र शक्यसम्बन्धरूपलक्षणाया एव वृत्तित्वघटकतया तत्र वृत्तिमत्त्वरूप साधुत्वाभावात् प्रमाधीनस्वबोध्यसम्बन्धो लक्षणेत्यस्य वा तल्लक्षणत्वेनापभ्रंशस्य प्रमाधीनबोध्याभावान्नानुपपत्तिरित्यस्वरसात्तत्त्वेन बोधकत्वावश्यकत्वमभिप्रेत्य दोषमाह । किञ्चेति । अशक्तत्वादिति । स्वबोध्यत्वं हि न स्वजन्यबोधविषयत्वं समवायेन घटपदस्मारितगगनादेः सम्बन्धग्रहादुपस्थितस्य शाब्दबोधापत्तेः । नच स्वजन्यशाब्दबोध विषयत्वं तदिति वाच्यं । गङ्गायां घोषइत्यादौ गङ्गापदे लक्षणानापत्तेस्तेन गङ्गापदेन प्रवाहशाब्दबोधाजननात् । तस्माच्छक्त्या स्वजन्यबोध विषयत्वमेव तत्त्वं वाच्यं तच्च शक्यसम्बन्धस्य लक्षणात्वापेक्षया गुरुतरं वाक्ये शक्त्यभावात् प्रकृते चासम्भवादितिभावः । उपसंहरति । तस्मादिति । वाक्ये लक्षणाया असम्भवादित्यर्थः । पदद्वयएव । गम्भीरपदे नदीपदे च । विनिगमकेति । एकतरपक्षपातिनी युक्तिर्विनिगमना तस्या अभावादित्यर्थः । विशिष्टेति । विशिष्टा गभीरा या नदी तस्यास्तीरे इत्यर्थः । नन्वेकस्मिन्नेव लक्षणया विशिष्टार्थबोधसंभवे अपरपदं व्यर्थमित्यत आह । नचेति । एकपदवैयर्थ्यं नचेत्यन्वयः । परस्परेति । नदीपदेन गभीरनदीतीरबोधे जननीये गभीरपदसमभिव्याहारो नियामकः गभीरपदेन वा तादृशबोधे जननीये नदीपदसमभिव्याहारो नियामकइत्यर्थः लक्ष्यार्थबोधे तात्पर्यज्ञानस्य हेतुतया नदीपदं गभीरनदीतीरप्रतीतीच्छयोच्चरितमिति तात्पर्यज्ञानं गभीरपदसमभिव्याहारादेव भवति अन्यथा केवलनद्यामित्युक्तौ गभीरनदीतीरबोधापत्तेरिति भावः । एकस्मिन्नेव पदे यदा लक्षणाप्रतिसन्धानं तदा तत्पदएव लक्षणा यदातूभयपदे लक्षणा प्रतिसन्धानं तदोभयपदे लक्षणैव शाब्दबोधप्रयोजिका संभेदेनान्यतरवैयर्थ्यमिति न्यायेन चैकमेव विशिष्टतीरं बुध्यते इति द्रष्टव्यम् । अत्रेदं बोध्यं गभीरनद्यीरन्वयबोधोत्तरं

गभीरनदी सम्बन्धग्रहात् नदीपदेन विशिष्टतीरं लक्ष्यते अन्यथा नदीसम्बन्धग्रहाद्विशिष्टतीरबोधानापत्तेः इत्थं च स्वशक्तिज्ञाप्यसम्बन्धो लक्षणा सा च पद एव न वाक्येऽक्लृप्तत्वात् वाक्ये लक्षणा वादिमतेपि प्रत्येकं पदद्वयेविनिगमकाभावा लक्षणाया दुर्वारत्वाच्च। न चैवं नीलं गिरिरिफमानयेत्यत्रविशिष्ट सम्बन्धिनि लक्षणानुपपत्तिः पदद्वयस्यापि लाक्षणिकतयाननु भावकत्वेन स्वज्ञाप्याप्रसिद्धेरिति वाक्ये लक्षणायादिना सह तुल्यत्वमिति वाच्यं। लाक्षणिकस्याप्यनुभावकत्वाङ्गीकारात्। वस्तुतस्तु शक्यसम्बन्धएव लक्षणा नदीपदस्य नद्यादव गभीरनद्या अपि शक्यत्वात् गभीरपदस्य तात्पर्यग्राहकतया च गभीराभिन्ना नदीति अवान्तरवाक्यार्थबोधं विनापि गभीरनदीतीरलाभसंभवादिति दिक्। संप्रदाय इत्यनेनास्वरसः सूचितः स च गभीरपदस्य गभीरत्वशक्ततया तस्य स्वाश्रयाभिन्ननदीसम्बन्धएव तीरे वाच्य इति परंपरासम्बन्धो गौरवात् साक्षात्सम्बन्ध संभवात् नदीपदएव लक्षणा युक्ता यदि च धीरोदारपदवत् धर्मिण्यपि शक्तिर्नीलादिपदवत् केवलगुणमात्रे गभीरपदाप्रयोगादिति विभाव्यते तथापि शुक्लादि पदानां गुणमात्रवाचकत्वेन शुक्लायां नद्यां घोष इत्यादौ साक्षात्सम्बन्धसंभवात्। विशेष्यवाचकपदे एव लक्षणायाः क्लृप्तत्वात्सर्वत्रोत्तरपदएव लक्षणा एवं चित्रगुरित्यत्रापि गोपदएव सा तथा च सर्वत्रोत्तरपदएव बहुव्रीहौ लक्षणेति। केचित्तु गभीरपदे लक्षणायां नदीपदोत्तरसप्तम्याअन्वयो न स्यात् विशेषणविभक्तेः प्रयोग साधुत्वादिति विशेष्यवाचकपदएव लक्षणा। न च विशेष्य वाचकपदोत्तरविभक्तेरेवात्र शब्दसाधुत्वमास्तामिति वाच्यं। विशेषण विभक्तित्वेन सामान्यतः प्रयोगसाधुत्वकल्पनादित्याहुस्तदसत्। लाक्षणिकार्थानुभावकगभीरपदस्य विशेषणपदत्वाभावेन गभीरपदोत्तरसप्तम्या एवान्वयसंभवादिति। अपरेतु प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तेरुत्तरपदएव लक्षणा अव्यहितपूर्ववर्त्तिन एव प्रकृतित्वात् अन्यथा राजपुरुषमानयेत्यत्र राजानमानयेत्यपि बोधापत्तेः। नचैवं सर्वप्रधानद्वन्द्वे पूर्वप्रधानेऽव्ययीभावे घटं भूतलमित्यत्र बहुव्रीहौ नञ् समासेऽर्वाग्विप्पलीत्यादि तत्पुरुषेच विभक्त्यर्थान्वयानुपपत्तिरिति वाच्यम्। तदतिरिक्त स्थलेएव तन्नियमादित्याहुः। ननु चित्रगुरित्यत्र चित्रपदं चित्रगो सम्बन्धिपरं गोपदं च स्वामिपरं चित्रगोसम्बन्धिनश्च तादात्म्येन गोपदार्थ

स्वामिन्यन्वय इति सर्वपदानामिव भार्थक्ये किमिति परस्परतात्पर्यग्राहकत्वम् एवमारूढवानरइत्यत्र धातोर्वानरारोहणे क्तप्रत्ययस्य कर्मत्वे वानरपदस्याश्रये लक्षणा वानरारोहणकर्मत्वाश्रय इति बोधः । चैत्र दत्तधन इत्यत्र चैत्र पदस्य चैत्रकर्तृके दाधातोर्धनदाने क्तप्रत्ययस्य संप्रदानत्वे धनपदस्याश्रये लक्षणा चैत्रकर्तृकधनदानसंप्रदानत्वाश्रय इति बोधः । अथवा वानरपदस्य वानरकर्तृकमर्थः तस्य च धात्वर्थे आरोहणे ऽभेदान्वयः क्त प्रत्ययः कर्मपरः एवं धनपदस्य धनकर्मकमर्थः तस्य च चैत्र कर्तृकधनदानेऽन्वयः क्तप्रत्ययस्य संप्रदानमर्थः, एवं गभीरायां नद्यामित्यत्र गभीरपदं गभीरनदीपदं च तीरपरमित्यप्याहुः । विस्तरस्त्विति । चित्र गुपदात् चित्र गौस्वामीत्यर्थे वानु भवात्रायं प्रकारः साधुः । एवं शोभनचित्रगुरित्यत्र त्रिपदबहुव्रीहौ चित्रपदस्य चित्रगोः सम्बन्धिपरतायां पदार्थैकदेशतया गवि शोभनान्वयानुपपत्तेरगत्या चित्रपदस्य शोभनचित्रगोसम्बन्धिपरता शोभनपदं च तात्पर्यग्राहकमितिरीतिं विना तवाप्यगतेश्च । केचित्तु, चित्रपदस्य चित्र स्वामी गोपदस्य गोस्वामी अर्थः व्यक्तिवचनानां संनिहितविशेषपरत्वमिति न्यायेन च चित्रत्वेन गोत्वेन चैकैव व्यक्तिर्बुध्यते आरूढवानर इत्यत्र क्तप्रत्ययस्य कर्तृसम्बन्धिवानरपदस्य वानरसम्बन्धी अर्थः एकदेशेपि क्तातावारोहणस्यान्वयः पक्षे त्यत्रेवेत्याहुः। तदपि चित्र गोस्वामीत्यनुभवापलापादुपेक्षणीयम् । अन्येतु गोपदं गोस्वामिलक्षकं गवि च चित्रस्याभेदेनान्वयः एकदेशेपि व्युत्पत्तिवैचित्र्येणान्वयस्वीकारादित्याहुः । परेतु गोपदेन शक्त्या गौः लक्षणया स्वामी बोध्य ते युगपद्वृत्तिद्वयविरोधस्याङ्गीकारात्पङ्कजपदस्य पद्मत्वविशिष्टे लक्षणाङ्गीकारस्तु समुदाये शक्तत्वव्यवहारस्य प्रामाणिकत्वादन्यथा तत्रापीष्टापत्तिरिति वदन्ति । अत्रेदंबोध्यं गोपदस्य चित्रगोस्वामिपरतायां सम्बन्धितावच्छेदकतया गृहीतचैत्रत्वादिना चित्रगोसम्बन्धिचैत्रत्वेनैव वा भानं तीरत्ववत् गङ्गासम्बन्धितीरत्ववद्वा आरूढवानरो वृक्ष इत्यत्रारूढः वानरीयमिति बाक्ये आङ्पूर्वकरुहधातोरूर्ध्व देशावच्छिन्नसंयोगानुकूलक्रिया क्तप्रत्ययस्याश्रयः द्वितीयायाश्चाधेयत्वमर्थः वृक्षवृत्त्यूर्ध्वदेशावच्छिन्नसंयोगानुकूलक्रियाश्रयो वानर इत्यन्वयबोधः समासे त्वारोहणकर्तृवानरसम्बन्धी वृक्षइत्यन्वयधीः सम्बन्धः, स्वकर्तृकारोहणकर्मत्वम् एवं चैत्रदत्तधन इत्य-

त्र चैत्रेण दत्तं धनं यस्मै इति वाक्ये चैत्रकर्तृकयत्सम्प्रदानकदानं कर्म धनमित्यनूयबोधः समासे तु चैत्रकर्तृकदानकर्म धनसम्बन्धीत्यनूयबोधः सम्बन्धः स्वकर्मकदानसम्प्रदानत्वमिति अत्र च समानाधिकरणबहुव्रीहिः चक्रपाणिरित्यादौतु व्यधिकरणबहुव्रीहिः। चक्रं पाणौयस्येति विग्रहवाक्ये यत्सम्बन्धिपाणिवृत्ति चक्रमित्यन्वयधोः समासेतु चक्रयुक्तपाणिसम्बन्धीति बोधः। सच तद्गुणसंविज्ञान बहुव्रीहिरतद्गुण संविज्ञानबहुव्रीहिश्चेति द्वेधा तत्र भूवादयोधातवः चैत्रादीन् भोजय लम्बकर्णमानयेत्यादावाद्यः। अन्यस्तु चित्रगुरित्यादौ। तथाहि। भूवादयइत्यत्र क्रियावाचित्वेन निमन्त्रित्वेन लम्बकर्णावयवित्वेनार्थसम्बन्धः तदवच्छिन्नत्वेनान्वयबोधः। लक्षकसम्बन्धस्यैव लक्ष्यतावच्छेदकत्वात् तेन रूपेणैव बोधात्। विशेषणस्यापि भूवादेः क्रियान्वयादजहत्स्वार्थाच लक्षणा तस्य समस्यमानपदार्थस्य गुणीभूतस्यापि सम्यग्विशेष्यविधया ज्ञानं यस्मादिति व्युत्पत्तेरिति सम्प्रदायः। अन्यस्तु। यदिलम्बकर्णेत्यादौ अजहत्स्वार्था लक्षणा तदा लम्बकर्णस्यापि विशेष्यत्वेन च अन्वयेऽनुभवबाधस्तस्मादत्रापि जहत्स्वार्थैव विशेष्यत्वेन विधेयान्वये स्वार्थत्यागात्। यत्र विशेषणतया स्वार्थस्य विधेयान्वयः स तद्गुणसंविज्ञानबहुव्रीहिः। उपलक्षणतया यत्र स्वार्थस्य विधेयान्वयः स अतद्गुणसंविज्ञानबहुव्रीहिः। विशेष्यान्वयिनाऽन्वयित्वं विशेषणत्वं। यद्यपि लम्बकर्णेत्यादौ लम्बकर्णे सम्बन्धित्वेनोपस्थितिः चित्रगुरित्यादौ च चित्रगोसम्बन्धित्वेनोपस्थितिस्तुल्यैव तथापि लम्बकर्णादेर्विशेष्यान्वयिनान्वयात् विशेषणतया विधेयान्वयः। चित्रगोस्तु उपलक्षणतया तथेति। अत्र शब्दस्वाभाव्यमेव तत्त्वमिति। केचित्तु भूवादिः प्रथमः पठितो येषामिति विग्रहवाक्यात् भूवाभिन्नः प्रथमपठितो यत्सम्बन्धीतिबोधः। समासात्तु भूवाभिन्नप्रथमपठितः सम्बन्धीतिबोधः। एवं चैत्र आदिः प्रधानो येषामिति विग्रहवाक्यात् चैत्राभिन्नः प्रधानोयत्सम्बन्धीतिबोधः। समासात्तु चैत्राभिन्नप्रधानसम्बन्धीत्यन्वयबोधः। सम्बन्धश्च स्वपाठप्राथम्यावधित्वं स्वनिष्ठप्राधान्यावाचित्वं वा। अत्र च भूवाभिन्नप्रथमपठितसम्बन्धित्वचैत्राभिन्नप्रधानसम्बन्धित्वादिनाऽऽदिशब्दस्य लक्षणा लक्ष्यतावच्छेदकस्यापि भूवादेर्विशेष्यान्वयिधातुत्वादिनाऽन्वयात् तद्गुणत्वं लक्षणाया अजहत्स्वार्थत्वं चेत्याहुः। अपरेतु। लम्बकर्णे-

तात्पर्यदीपिकयोरनुसन्धेयः । उपकुंभमर्धपिप्पलीत्यादावव्युत्तरपदलक्षणयैवोपपत्तौ न शक्तिरुपेयते अन्यलभ्यत्वात् ।

त्यादौ विशेषतया न्वयाननुभवादस्तु जहत्स्वार्था भूवादयइत्यत्र तु गणपठितत्वनिमन्त्रितत्वादिनैव बोधः शक्यलक्ष्ययोर्विधेयान्वयानुभवात् । काकेभ्यो दधिरक्ष्यतामित्यत्र त्वशक्यलक्ष्ययो र्विशेषान्वयान्वयमात्रादेवं च लम्बकर्णभूवादिसाधारणं तद्गुणत्वादिकमित्याहुः । आदिशब्दगणपठितत्व निमन्त्रितत्वादिना लक्षणा भूवादिपदं तात्पर्यग्राहकमित्यन्ये । भूत्ववात्वादिना चैत्रचैत्रत्वादिना नानारूपेण लक्षणा । युगपद्वृत्तिद्वयविरोधानुपगमात् । तदुपगमेतु पुष्पवन्तादिपदे नानारूपेणैकलक्षणाया स्वीकारान्न दोष इत्यपरे । चैत्रशब्देन शक्त्या चैत्रत्वेनादिशब्दे न च लक्षणया मैत्रत्वादिना बोधः । चैत्रपदार्थादिपदार्थयोरभेदेनान्वयबोधस्यापि तात्पर्यविषयत्वात् । द्वन्द्वे वाभेदेनान्वये तात्पर्याभावान्न द्वन्द्वतापत्तिरित्यपि केचिदिति कृतं पल्लवितेन । अव्ययीभावसमासे तु शक्त्य भाव मुपपादयति । उपकुंभमिति । उपकुंभमित्यत्राव्ययी भावः । अर्द्धपिप्पलीति तत्पुरुषः । उपशब्दे निपाते षष्ठ्यन्तसमाकांक्षत्वाभावात् कुंभस्योपेतिनाच विग्रहः । किन्तु कुंभस्य समीप इति उपकुंभमितिद्रष्टव्यम् । उत्तरपदेति । कुम्भपदस्य कुम्भसम्बन्धिनि पिप्पलीपदस्य पिप्पलिसम्बन्धिनि लक्षणा तस्य चोपाद्यर्थे सामीप्यादावभेदेनान्वयः । वस्तु तस्तु । उपपदार्थे सामीप्यं न तु समीपः तथाचोपपदस्यापि समीपाद्यर्थे लक्षणा एकदेशे च सामीप्ये कुम्भादिसम्बन्धिनस्तादात्म्ये नान्वय इति पदद्वयलक्षणापेक्षया कुम्भपदस्यैव कुम्भसमीपपरता उपपदंच तात्पर्यग्राहकमिति । केचित्तु, चन्द्रइव मुखमित्यादौ इवार्थ सादृश्यस्य भेदेन मुखेऽन्वयेनाव्ययनिपातातिरिक्तस्थल एव नामार्थयोर्भेदेनान्वयबोधानङ्गीकारात् । उपपदार्थसामीप्ये कुम्भस्यान्वयबोधसम्भवात् सम्बन्धप्रकारकानुभवनुरोधेन परकुम्भपदस्य कुम्भसम्बन्धे लक्षणा । अनुभवाननुरोधेतु अत्राप्युत्तरपदे न लक्षणा इत्याह । अन्ये ति । उत्तरपदलक्षणादिना लभ्यत्वादित्यर्थः । अनन्यलभ्यस्यैव शब्दार्थत्वादितिभावः । एवं निर्मक्षिकमित्यव्ययीभावेप्युत्तरपदे मक्षिकाभावे लक्षणा पूर्वपदं तात्पर्यग्राहकमितिध्येयं । समाहारद्व-

समाहारद्वन्द्वे पाणिपादमित्यादौ पाणिपदं पाणिप्रतियोगिकं पादपदं पादसमाहारं लक्षयति न पाणिपादसमाहारे शक्तिः। समाहारस्य तुल्यवदेककियान्वयित्वरूपं साहित्यं सेनावनादिवदपेक्षाबुद्धिविशेषविषयत्वं वा। नन्वेवं पाणिपदं वादय इत्यचानन्वयः। समाहारे वादनकर्मत्वाभावादिति चेत्। परंपरया तस्य कर्मत्वान्वयादित्येके। स-

---

न्द्वे तैरेतरद्वन्द्वभेदेन द्वन्द्वो द्वेधा। तत्र समाहारद्वन्द्वे पाणि पादमित्यादौ पाणिपादपदस्य पाणिपादप्रतियोगिकसमाहारशक्तिरितिमतं दूषयति। समाहारेति। पाणिपदस्य पाणिप्रतियोगिके पादपदस्य च पादप्रतियोगिकेसमाहारे पदद्वयएव लक्षणा पाणिप्रतियोगिकाभिन्नपादप्रतियोगिकसमाहारे वादयेत्यन्वयबोधः। समाहारे च विभक्त्यर्थैकत्वान्वयः। अतएव समाहारस्यैकत्वादेकवचनमेवेति। उत्तरपद एव पाणिपादे प्रतियोगिकसमाहारे लक्षणा पूर्वपदं च तात्पर्यग्राहकमित्यप्याहुः। ननु समाहारे शक्तिरन्यलभ्यत्वादित्याह। न पाणीति। समाहारं लक्षयति। समाहारस्येति। क्रियाधातूपनीतफलानुकूलसजातीयविजातीयव्यापारप्रचयस्तस्यैकरूपस्तुल्यः सम्बन्धः समाहारः। यथा पाणिंवादयेत्यत्र वादनक्रियाया तुल्यवदेव पाणिपादयोरन्वयः। एवं धवखदिरौ छिंधीत्यत्र छेदन क्रतौ यावान् व्यापारः स धवखदिरयोस्तुल्य एव भासते। ननु एकक्रियान्वयित्वस्य वादनादिरूपैकक्रियान्वयरूपतया तस्य न सम्बन्धिभेदाक्षेपेणानुगमइत्यत आह। सेनेति। यथा सेनात्वं तत्तद्व्यक्त्यादिविषयक ज्ञानविषयत्वम्। एवं तत्तद्व्यक्त्यादि विषयकज्ञानविषयत्वं वनत्वं तथाऽपेक्षाबुद्धिविषयत्वमेव समाहारः अपेक्षाबुद्धेरव्याप्यवृत्तेरपि विषयतया व्याप्यवृत्तित्वोपगमान्नानुगम इति भावः। ननु समाहारस्य सम्बन्धिभिन्नत्वे क्रियाजन्यफलशालित्वरूपकर्मत्वस्य क्रियायामसंभवेन कथं पाणिपादमित्यत्र कर्मविभक्तिरित्याशंकते। नन्वेवमिति। एवं। समाहारस्य तुल्यवदेककियान्वयित्वरूपत्वे। वस्तुतस्तु एवमित्यस्य पाणिपादसमाहारस्य लक्ष्यत्वेत्यर्थः। अनन्वयः। द्वितीयार्थे

माङ्गरोत्तरविभक्त्यर्थकर्मत्वादेः समाङ्क्रियमाण एवान्वयः । पदव्युत्पत्तिवैचित्र्यादित्यन्ये । पाणिपादं वादयेत्यत्र पाणिपादमात्रप्रतीतौ न समाहारे लक्षणा शक्तिर्वा । नचैवं द्विवचनापत्तिः असाधुत्वात् । इतरेतरसमाहारसङ्ज्ञातु नदीदृष्ट्यादिवत्पारिभाषिकेत्रेति तु तत्त्वम् । इतरेतरद्वन्द्वे तु

कर्मत्वादेरनन्वयः । अननुयमेवाह । समाहारेति । तुल्यवदेक क्रियानुयित्वरूपत्वे इत्यर्थः । वादनेति । वादनरूप क्रियाजन्यफलशालित्वरूपवादनकर्मत्वस्य तत्राभावादित्यर्थः । तथा च वादनकर्मत्वं पाणिपादयोरेव न तु समाहारे इति भावः । परं परयेति । स्वाश्रयप्रतियोगिकत्वरूपपरंपरयेत्यर्थः । तत्र । समाहारे । एक इत्यनेन साक्षात्सम्बन्धेनानुभूयमानकर्मत्वबोधस्य परंपरयोपपादनमेवास्वरसः सूचितः । समाहारेति । समाहारवाचकपदोत्तरविभक्तिरित्यर्थः । समाङ्क्रियमाण एव । समाहारप्रतियोगिन्येव । एव कारेण न तु समाहारे साक्षात्सम्बन्धाभावादिति पूर्वत्रास्वरसोदर्शितः । ननु प्रत्ययानां प्रकृत्यर्थ गतस्वार्थबोधकत्वनियम भङ्गप्रसङ्ग इत्यत आह । व्युत्पत्तीति । व्युत्पत्तिराकाङ्क्षा तद्वैचित्र्यात् । कार्यकरणभेदेन कार्यकारणभावस्य भिन्नत्वात् प्रकृते भिन्न एव कार्यकारणभावः कल्प्यते । अनुभवानुरोधात्तादृशव्युत्पत्तेश्चात्र संकोच इति भावः । अत्र समाङ्क्रियमाणयोर्द्वित्वात् द्विवचनापत्तिः । प्रत्ययानामिति व्युत्पत्तिसंकोचश्चान्य इत्यनेनास्वरसः सूचितः । पाणिपादमित्यत्र पाणिपाद समाहारस्यानुभवसिद्धत्वाद्वा पाणिपादाविति द्विवचनापत्तिभिया वा इतरेतरसमाहारसंज्ञानुरोधाद्वा पाणिपादसमाहारे लक्षणा कल्पनमिति तत्र दूषणत्रयमुद्धरन् नव्यमतमुपपादयति । पाणिपादं वादयेत्यत्रेति । पाणिपादमात्रेति । मात्रपदात्समाहार व्यवच्छेदः । अनुभवसिद्धत्वात्समाहारे इति कल्पनं तदेव तुन अनुभवस्यैवाभावादितिभावः । वैयाकरणप्राचीन नैयायिकभेदेन शक्तिलक्षणयो रुपादानं । ननु पाणिपादमित्यत्र समाहारे इत्यकल्पने पाणिपादयोर्द्वित्वात्पाणिपादाविति द्विवचनापत्तिः । ममतु समाहारस्यैकत्वात्तत्र द्वित्वान्वयासम्भवेन न तदापत्तिरित्यभिप्रेत्याह । नचैवमिति । एवं । पाणिपादयोरेव प्रतीताविवत्यर्थः ।

धवखदिराविति स्वरूपद्वयप्रतीति र्न लक्षणा शक्तिर्वा। मीमांसकाश्च। अत्रापि धवखदिरसाहित्याश्रये लक्षणा। तदाहुः। साहित्ये द्विवचनबहुवचने द्वन्द्वसमासोवेति। साहित्यं च तुल्यवदेककियान्वयित्वम्। अतएव यत्कर्तव्यं तदनया सहैत्यचपत्न्याः सह भावमात्रं न तु साहित्यं। यागादौ पत्न्याः अनुमति द्वारान्वयेन तुल्यवदनन्वया दित्या-

---

असाधुत्वादिति। व्याकरणप्रतिपन्नत्वादित्यर्थः। प्राणितूर्यसेनाङ्गानामेक वद्भावो वक्तव्यइत्यादि सूत्रेण तत्रैकवचनमेव विहितं। यथा दाराणां बहुत्वाभावेपि बहुवचनमिति भावः। ननु समाहारसंज्ञा अनुपपन्ना समाहारबोधस्य ततोऽनुदयेनान्वर्थसंज्ञाया अभावात् समाहरणं समाहारो नैकस्यैकीकरणम् एकोधर्मइति यावत्। तद्बोधको द्वन्द्वः समाहारद्वन्द्वइति संज्ञेत्यतआह। इतरेतरेति। इतरेतरसंज्ञासमाहारसंज्ञात्वित्यर्थः। नदीति। नदीसंज्ञा ह्रस्वसंज्ञा यथा पारिभाषिकी तथा समाहारसंज्ञापीत्यर्थः। अन्वर्थसंज्ञाभावेपि नक्षतिरिति भावः। स्वरूपेति। धवखदिरस्वरूपद्वय प्रतीतेरित्यर्थः। नलक्षणेति। यद्यपि शक्तेर्मुख्यत्वान्न शक्ति लक्षणेत्येवलेखः समुचितस्तथापि प्राचीननैयायिकमते माहारद्वन्द्वे लक्षणायाः प्रक्रान्तत्वेन सैवादौ निराकृतेति। अत्रापि। इतरेतरयोगेपीत्यर्थः। अपिना समाहारद्वन्द्वसमुच्चयः। समाहारे साहित्ये लक्षणा अत्र तु साहित्याश्रयइति परंभेदः। धवेति। धवपदस्य खदिरपदस्य च धवखदिरसाहित्याश्रये लक्षणा इतरपदं च तात्पर्यग्राहकं मीमांसकमतत्वाद्वाक्ये एव लक्षणा धवखदिरसाहित्याश्रयी छिंधीत्यन्वयबोधः। ननु व्यर्थंसाहित्यलक्षणया इत्यतआह। तदाहुरिति। एतत्सूत्रार्थो हि सर्वं वाक्यं सावधारणमिति न्यायेन साहित्यगम्यमान एव द्विवचनबहुवचने भवतः। द्वन्द्वसमासे वा। वाकारस्यार्थे द्वन्द्वसमासश्च साहित्ये गम्यमान एव भवतीत्यर्थः। धवत्वेन खदिरत्वेन चोपस्थिते संख्यान्वये धवद्वयधीः खदिरद्वयधीश्च स्यात्। अन्वयितावच्छेदकव्याप्यसंख्याबोधकत्वाद्विभक्तीनामन्यथा घटपटवृत्तिद्वित्वमादाय एकस्मिन्नपि घटे घटाविति प्रसङ्गः साहित्ये लक्षणायां तु सहि-

तत्वेनोपस्थिते द्वित्वान्वयः । एवं चार्थे इन्द्वइति सूत्रे समुच्चयान्वाचयसमाहारेतरेतरयोगइति चत्वारश्चार्थाः । तत्र समुच्चयान्वाचयातिरिक्तचार्थे इन्द्व समास इति तदर्थः । समुच्चयान्वाचययोः साहित्यानवगमान्न द्विवचनबहुवचनापत्तिः । नवा इन्द्वसमासइति इन्द्वे साहित्ये लक्षणां विना द्विवचनबहुवचनानुपपत्तिः । इन्द्वसमासानुपपत्तिश्चेति तत्र लक्षणावश्यकीति भावः । ननु समुच्चयान्वाचययोः कथं न साहित्यबोध इत्यत आह । साहित्यं चेति । एतेन साहित्यलक्षणस्य पुनर्वचनमसंगतमिति शंका निराकृता । समुच्चयादि वारकत्वेन तत्सङ्गतेः । तुल्यवदित्यस्य व्याहृत्तिमाह । अतएवेति । तुल्यवदेकक्रियान्वयित्वस्य साहित्यरूपत्वादेवेत्यर्थः । ननु यजमानस्यैव पत्न्या अपि यागादावन्वयात्साहित्यं दुर्वारमतआह । यागादाविति । अनुमितीति एवं कुरु इत्याज्ञाद्वारेत्यर्थः । तथाच यथा यजमानस्य क्रियायां कर्तृत्वेनान्वयः न तथा पत्न्याः अत्र पत्न्याः कर्तृत्वेन साहित्यं न विवक्षितं व्यापारसम्बन्धाभावात् । यदा च प्रयोजकत्वमात्रं तयोः सम्बन्धो विवक्षितस्तदा भवत्येव साहित्यं यथा दंपत्योरित्यादि । तथा च इन्द्वे सहितत्वेन क्रियान्वयात् । यत्रान्योन्यसाहित्यान्वयपूर्वकेतरेतरपदार्थान्वयस्तत्र समासः । इतरेतरसमाहारयो स्तथान्वयात्समासः साधुः । समुच्चये तु असम्बद्धयोरेकैकशः क्रियान्वयो नतु साहित्याश्रयतया यथा धवंछिंधि खदिरं च छिंधीति समुच्चये तुल्यवदसंबद्धयोः क्रियान्वयधीः । एकशब्दरूपसजातीय विजातीयव्यापारयोगित्वरूपसाहित्यं चादीनां द्योतकतया पश्चान्मानान्तरेणावगम्यते चादीनां वाचकत्वेपि तुल्यत्वात्साहित्यान्वयाभावात् द्विवचनबहुवचनयोरेव साहित्यव्यञ्जकत्वादिति क्रियाभेदेत्वन्वाचयः । यथेन्धनमाहर्तुं वनं व्रज शाकमप्यानेष्यसीति । ननु धवं छिंधि खदिरमपि छिंधीत्यत्रान्वाचये अव्याप्तिः क्रियाभेदाभावात् । किंच घटं पश्य पटं चानयेत्यत्र समुच्चयेऽतिव्याप्तिः । उभयत्रैव प्राधान्येन क्रियात्वे तात्पर्येण तस्य समुच्चयत्वात् । आहरणानयनयोः क्रिययोरभेदादेव नाहर्तुमित्याद्यन्वाचयेऽव्याप्तिः । निरूपकभेदेन क्रियाभेदोपपादने समुच्चयेऽतिव्याप्तिरिति चेन्न । प्राधान्येन यत्र क्रियान्वये तात्पर्यं समुच्चयः । प्रधानगुणभावेन तत्र क्रियान्वये तात्पर्यं सोन्वाचयः । सपुत्रको गच्छतीत्यादौ पुत्रस्यैकक्रियान्वयित्वेपि विशेषणेनैवान्वयान्नातिव्याप्तिरिति । यत्तु यु-

गपत् क्रियान्वये तात्पर्यं तत्र समासः समुच्चये च क्रमेण क्रियान्वयो नतु युगपत् क्रिया च व्यापारमात्रम् । इत्थं च तुल्यवदेकविधक्रियान्वयित्वं तेन धवश्चदिराविति क्रियारहिते धातूपनीतफलानुकूलव्यापारवत्त्वाप्रतीतौ कथं साहित्यबोध इति निरस्तं । चैत्रमैत्रौ स्थितिगतिमन्ताविति यथा संख्यस्थले अनुभवत इति क्रियाध्याहारादेव द्वन्द्वः । यद्यप्येतावता द्वित्वान्वयार्थमन्वयितावच्छेदकतया साहित्यभानमित्यायातं तत्र घटेन जलमाहरेत्यत्र छिद्रे तत्तत्वस्यैव योग्यतावच्छेदकतयैव भानोपपत्तौ मीमांसकमते साहित्यलक्षणायां न बीजं तथापि पदानुपस्थितस्य न शाब्दे भानमिति मतमङ्गीकृत्यैदम् । आहुरित्यस्वरसोद्भावनं तद्बीजं तु प्रत्येकमुपस्थितयोर्धवखदिरयोर्द्वित्वबोधसम्भवात्साहित्यलक्षणाकल्पनमनर्थकम् । अन्वयितावच्छेदकसमानाधिकरणसङ्ख्याबोधकत्वं विभक्तीनां न तु व्याप्यत्वान्तर्भूतापि गौरवात् । घटौ आनय पटं चेत्यत्र पटमादाय घटे न द्वित्वान्वयः पटस्याप्रकृत्यर्थमात्रवृत्तिसंख्यावाचकत्वाद्विभक्तीनां याट्टशसमुदायोत्तरविभक्तिस्तस्यैव प्रकृतित्वेन धवस्यापि प्रकृत्यर्थत्वात्प्रकृते न दोषः । किञ्च धवादिपदात्साहित्यत्वेनैव यदि बोधः चैत्रमैत्रौ गच्छत इत्यत्र गमनस्याव्यासज्यवृत्तितया तत्रानन्वयप्रसङ्गः । एवं च द्वित्वबोधार्थंसहितत्वेन लक्षणा गमनबोधार्थं च चैत्रत्वादिना बोधइति युगपद्वृत्तिद्वयविरोधः सहितावस्थे गमनकर्तृत्वासम्भवश्च इत्थं च द्वन्द्वे क्रियान्वयात् पूर्वं साहित्यबोधो न भवत्येवोत्तरंतु भवत्येव यत्र युगपदुपस्थिते द्वये युगपत् क्रियान्वयबोधे तात्पर्यं तत्र समासः । समुच्चये तु क्रमेणोपस्थिते क्रमेण क्रियान्वयबोधे तात्पर्यान्न समासः । एवं प्रधानगुणभावविवक्षया विशेषणविशेष्यत्वविवक्षया वा तत्र तत्र समासो भवतीतिदिक् । घटाविति सरूपैकशेषः विरूपैकशेषेतु पितरावित्यत्र जनकशरीरत्वेन लक्षणया मातापित्रोरवगमः । विभक्त्युपनीतं पुंस्त्वं तु पित्रर्थेएवान्वेति योग्यत्वाच्छक्त्या पितुः लक्षणया स्वार्थनिरूप्यत्वेन सम्बन्धेन जनकस्त्रीत्वेन रूपेण मातुर्बोधकम् एकयैव लक्षणया वा पितृत्वमातृत्वाभ्यां बाधकमिति तु नव्याः । श्वशुरावित्यत्र पत्नीजनकशरीरत्वेन प्रातिस्विकरूपेण वा बोधः । दंपतीपूजाप्रकरणे ब्राह्मणावानयेत्यत्र पुमांस्त्रियेति विरूपैकशेषत्वात् । ब्राह्मणपदे स्त्रीपुंसलक्षणैव विभक्त्यर्थपुंस्त्वस्य च स्त्रियामनन्वयोऽयोग्यत्वाद्विभक्तिरेव वा श-

ङः । नीलोत्पलमित्यादौ नीलाभेदस्यान्वयविधयैवावभा-सनोपपत्तेः । कर्मधारये न शक्तिर्नवां लक्षणा । अतएव त-

---

क्त्या पुंस्त्वस्य लक्षणयाच स्त्रीत्वस्य बोधिका । ननु ब्राह्मणत्वेन शक्त्यैव ब्राह्मणीबोधसम्भवे ब्राह्मणपदे लक्षणाव्यर्थेति चेन्न । आद्यवर्णस्त्रीत्वरूपब्राह्मणीत्वेन बोधार्थं तदादरात् । केचित्तु । विशुद्धमातापित्रयोनिजपुंस्त्वस्य ब्राह्मणत्वव्यंजकतया ब्राह्मण्यां ब्राह्मणत्वाभावेन ब्राह्मणत्वेन शक्त्या तद्बोधाभावाल्लक्षणैव । अतएव ब्राह्मणीवधे प्रायश्चित्तह्रास इत्याहुस्तन्न । पुंस्त्वघटितस्य तद्व्यंजकत्वे गौरवात् । अपकृष्टब्राह्मणवधइव प्रायश्चित्तह्रासस्य अन्यथाप्युपपत्तेरिति शिवौ नमस्कुर्यादित्यत्र शिवपदं शिवदुर्गान्यतरत्वेन बोधकं शक्त्या शिवत्वेन लक्षणाया च शिवाया बोधकमिति तु नव्याः । भ्रातरौ पुत्रावित्यत्र भ्रातृपुत्रौ स्वसृदुहितृभ्यां मिति विरुपैकशेषत्वात् भ्रातृपदेन भ्रातृस्वसारौ सोदरत्वेन पुत्रदुहितरौ लक्ष्येते । हरौ नमस्यावित्यत्र शक्त्यैव विष्णुत्वादिना बोधकं युगपद्वृत्तिद्वयविरोधस्यास्वीकारात् । एकयैव लक्षणया विष्णुत्वादिना बोधकमित्याहुः । उपपदसमासे कुम्भकारः क्षीरपायीखट्वाशयीत्यादौ धात्वर्थनामार्थयोर्भेदेनान्वयस्याव्युत्पत्त्या लक्षणया कुम्भादिपदानि कुम्भविषयकक्षीरकर्मकखट्वाधिकरणपराणि व्युत्पत्तिसंकोचे च शक्त्या कुम्भादेर्विषयकत्वादिसम्बन्धेनान्वयबोध इति । कर्मधारये नीलोत्पलमित्यादौ नीलाभिन्नमुत्पलमित्यभेद प्रकारकबोधो अनुभवसिद्धः तत्र वैयाकरणमते कर्मधारये शक्तिकल्पना समासत्वेनैव मा कल्पि नतु विशेषतः कर्मधारयत्वेनेति सर्वत्र समासे शक्तिः । अन्यमते तु नीलपदस्यैव नीलाभिन्ने लक्षणेति मतद्वयमपि निराचिकीर्षुराह । नीलोत्पलमित्यादाविति । अन्वयविधयैवेति । संसर्गमर्यादयैवेत्यर्थः । एव कारेण प्रकारत्वव्यवच्छेदः । येन तत्प्रकारकबोधोपपत्यर्थमभेदेपि वृत्तिरपि कल्प्येतेति भावः । ननु नीलमुत्पलमित्यत्र सम्भवत्यर्थे साधुत्वे शब्दसाधुत्वमन्याय्यमिति न्यायेन न विशेषणभक्तिः प्रयोगसाधुः किंत्वभेदार्थिका युक्तं चैतत् । नीलमुत्पलमिति शाब्दसामग्रीकाले नीलाभेदाभाववदुत्पलमिति मानसप्रत्यक्षादि वारणाय तत्र सामग्राः पृथक् प्रतिबन्धकताया भवता वाच्यत्वात् मन्मते च नीलाभेदप्रकारकज्ञानस्य

त्पुरुषात्कर्मधारयो बलीयान्। तच्चहि पूर्वपदे सम्बन्धि लक्षणेत्युक्तं। न च त्पुरुषेष्पघटः पटइत्यत्र घटपदं घटस-

---

तत्र योग्यताज्ञानविधया आवश्यकत्वेन विपरीतज्ञानोत्तर प्रत्यक्षनिर्णयं प्रति विशेषदर्शनस्य हेतुतया तदभावादेव मानसवारणात्। विशेषदर्शनसत्त्वे च तदभावव्याप्यवत्तारूपप्रतिबन्धकसत्त्वेन शाब्दबोधस्यैवानुदयात्तादृश-शाब्दसामग्र्याः प्रतिबन्धकत्वाधिक्यं। न च मन्मते नीलस्याभेदसम्बन्धेनान्वयस्वीकारे तादृशसामग्रीकालेऽभेदसम्बन्धावच्छिन्नप्रतियोगिताकनीलाभाववदुत्पत्तिमिति प्रत्यक्षादेरनुत्पादस्य विशेषदर्शनाभावादेव निर्वाह इति वाच्यं। तथापि अभेदप्रकारकबोधस्वीकारेऽभेदे नीलस्य निरूपित्वसम्बन्धेन भानतया नीलमुत्पलमिति शाब्दसामग्रीकाले निरूपितत्वसम्बन्धेन नीलाभाववानभेदइत्यादिप्रत्यक्षप्रतिबन्धकत्वान्तरस्याकल्पनादिति विशेषणविभक्तेरभेदार्थः। एवंच नीलोत्पलमित्यत्रापि अभेदे लक्षणावश्यकी व्याससमासयोः समानप्रकारकज्ञानजनकत्वनियमात् समानार्थसमासारम्भकवाक्यस्यैव विग्रहत्वात्। नचैवं नीलाभेदस्य कथमुत्पलान्वयः। नामार्थयोर्भेदेनान्वयाभावा दितिवाच्यं। समासातिरिक्तस्थलएव तादृशनियमादित्यत आह। अतएवेति। अतएव कर्मधारयेन समासत्वेन शक्तिर्नवालक्षणा अतएवेत्यर्थः। बलीयानिति। कर्मधारयेन यदि समासत्वेन शक्तिस्तर्हितत्पुरुषेपि शक्तिरेवेति तत्पुरुषाद्बलीयस्त्वव्याघातः यदि च कर्मधारये लक्षणा तर्हि तत्पुरुषेपि सेति उभयथापि बलीयस्त्वव्याघात इति न कर्मधारये वृत्तिः कल्प्या। न च विशेषणविभक्तेरभेदार्थकत्वमते व्याससमासयोः समानार्थकत्वानुरोधादभेदे लक्षणा वश्यकीत्युक्तमिति वाच्यम्। आरूढवानरइत्यत्र व्यभिचारेण तादृशनियमाभावात् तदिदमुक्तम् अभेदस्यान्वयविधयैव भानोपपत्तेरिति। ननु राजपुरुष इत्यत्रापि सम्बन्धलक्षणानुपपत्तिः व्याससमासयोः समानार्थकत्वानुरोधेनैव तत्कल्पनात्। नामार्थयोरिति व्युत्पत्तिश्च समासातिरिक्तस्थल एव अन्यथा सम्बन्धलक्षणयाऽनिर्वाहादित्यत आह। तच्चहीति। तत्पुरुषेहीत्यर्थः। पूर्वपदे राजपदे तादृशनियमाभावेपि सम्बन्धप्रकारकबोध-

स्वन्धिपरं । नञ्पदं चान्योन्याभावे शक्तमेव संसर्गाभाव वाचकं नञ्पदं नान्योन्याभावशक्तमिति चेन्न । लाघवेन

स्यानुभवसिद्धत्वात्सम्बन्धे लक्षणा कर्मधारये तु नैवमिति भावः । ननु सम्बन्धप्रकारकानुभवस्य दुभयत्रापि तुल्यः नास्तिचेदुभयत्रापि मास्तु इत्यनुभवविवादइत्यत आह । सम्बन्धिनि लक्षणेत्युक्तमिति । व्युत्पत्तिसंकोचे मानाभावाद्राससमासयोः सर्वत्रापि नामार्थयोर्भेदेनानन्वयाद्राजपदस्य राजसम्बन्धिनि लक्षणा नीलस्य चाभेदेनैवोत्पले अन्वयान्नव्युत्पत्तिविरोध इति न कर्मधारये लक्षणा कल्पनमिति भावः । नच तत्पुरुषात्कर्मधारयस्य बलीयस्त्वमेवासिद्धमिति वाच्यं । निषादस्थाधिकरणविरोधापत्तेः । तथाहि । एतयैव निषादस्थपतिंयाजयेदित्यत्र निषादः स्थपतिर्यस्येति बहुव्रीहिस्वीकारे उभयपदलाक्षणिकतया गौरवात् । तस्योत्तरपदलाक्षणिकत्वमते पुरः स्फूर्तिकप्रथमपदलाक्षणिकतत्पुरुषस्यैव लघुत्वादिति । निषादानां स्थपतिरिति वा निषादस्थासौ स्थपतिश्चेति वासमासः । तत्र षष्ठीतत्पुरुषस्वीकारे नामार्थयोर्भेदेनान्वयाभावेन निषादपदस्य निषादसम्बन्धिनि लक्षणावश्यकतया गौरवं कर्मधारये तु न तदिति तदपेक्षया लघुत्वात्कर्मधारय इति सिद्धान्तः तस्य च कर्मधारयेपि लक्षणाकल्पने व्यघातः । ननु निषादस्य सङ्करजतीयत्वेन तस्य यागोपयुक्तापूर्वविद्याप्रयुक्तिकल्पने गौरवम् । एवं स्त्रीशूद्रौ नाधीयातामित्यत्र संकोचकल्पने चेति तदपेक्ष्य तत्पुरुषएव साधुः । नचाचशूद्रपदस्य निषादेतरशूद्रपरतया संकोचे निषादस्य वेदान्तराध्ययनप्रसंगः अध्ययनपदस्य यागोपयुक्ताध्ययने तराध्ययनपरत्वे च शूद्रेतरस्यापि यागोपयुक्ताध्ययनप्रसंग इति वाच्यं । विशेषतः प्राप्तेतराध्ययनपरत्वादध्ययनपदस्य तेन निषादस्य वेदाच्छराध्ययनप्रसंगः अध्ययनपदस्य यागपयुक्तेतराध्ययनपदस्य तेन निषादस्य यागोपयुक्तवेदे तरवदेनिषेधः शूद्रान्तरस्य तु यावद्वेदराशेरेव तस्य विशेषतः प्राप्त्यभावादितिचेन्मैवं । लाघवात्कर्मधारये प्रवृत्तेउत्तरमपूर्वविद्याप्रयुक्तेः कल्पनस्य फलमुखत्वेन न्याय्यत्वात् । तर्कितगौरवस्य चाप्रतिबन्धकत्वात् कर्मधारयेपि लक्षणाकल्पने तु तत्पुरुषापेक्षया लघुत्वाभावेना-

पूर्वविद्याकल्पनप्रयुक्तगौरवग्रस्तत्वेन च तत्र कर्मधारयस्वीकार अनर्थक एव स्यादिति तत्र लक्षणानङ्गीकारएव साधुः। ननु लक्षणाया अभावेपि कर्मधारय एव स्वीक्रियते न तत्पुरुषइत्यत्र बीजाभावः शक्तिलक्षणाज्ञानयोः शाब्दबोधे हेतुतायां विशेषाभावात्। नच मुख्यार्थपरत्वे सम्भवति लक्ष्यार्थपरताया अन्याय्यत्वादिति न्याय एव शरणमिति वाच्यम्। असति विशेषतो बाधके कर्मधारयविधयैव वेदानां प्रामाण्यं न तु तत्पुरुषविधयापीति मन्मतेपि सुवचत्वात् तस्मात्कर्मधारये समासत्वेन शक्तेर्लक्षणाया वा स्वीकारेपि बलीयस्त्वमुपपादयितुं शक्यत एवेति चेन्न। शक्यसम्बन्धरूपलक्षणाज्ञानस्य विना शक्तिज्ञानमसम्भवितया शक्तिज्ञानादेव शाब्दबोधोपपत्तौ लक्षणाज्ञानकल्पने गौरवादिति वैदिकशाब्दबोधस्य शक्तिज्ञानमूलकत्वे लाघवस्यैव सिद्धान्तबीजत्वादित्यलं पल्लवितेन॥ ननु तथापि चित्रगुधनमित्यत्र बहुव्रीहिगर्भतत्पुरुषस्थले बहुव्रीहिलक्षणोत्तरं तत्पुरुषे लक्षणा स्वीकारे लक्षितलक्षणापत्तिः। बहुव्रीहेरन्यपदार्थसम्बन्धिनि अनुशासनाभावात्परंपरासम्बन्धे नैकलक्षणाया अनिर्वाहाद्बहुव्रीहौ शक्तिस्वीकारस्यावश्यकतया समासत्वेन सर्वत्रैव समासे तत्कल्पनमिति चेन्न। चित्रगुपदस्य बहुव्रीहिलक्षणया ऽन्यपदार्थपरत्वे तत्सम्बन्धिनि परंपरासम्बन्धे न तत्पुरुषलक्षणायां च लक्षणाद्वयादेव युगपदन्वयबोधोपपत्तेः। युगपद्वृत्तिद्वयविरोधस्य च मणिकृन्मतेऽनङ्गीकारादिति। अघटः पट इति नञ्तत्पुरुषे घटभिन्नः पट इत्यन्वयबोधस्यानुभविकत्वान्नञश्च संसर्गाभावमात्रवाचकत्वेन ततोऽन्योन्याभावप्रकारकबोधस्यासम्भवितया घटभिन्ने समासे शक्तिरिति मतं दूषयति। नञ्तत्पुरुषेपीति। घटसम्बन्धिपरमिति। घटसम्बन्धिनि लाक्षणिकमित्यर्थः। सम्बन्धश्चाच प्रतियोगित्वम्। अनन्यलभ्यस्यैव शब्दार्थत्वान्न तत्र शक्तिरिति भावः। कथं तर्ह्यन्योन्याभावप्रकारकबोध इत्यत आह। नञ्पदं चेति। ननु संसर्गाभावोऽन्योन्याभावश्च नञर्थ इति संसर्गाभावत्वमन्योन्याभावत्वं च शक्यतावच्छेदकमिति नञ्पदस्य नानार्थकत्वकल्पनापेक्षयाऽन्योन्याभावे लक्षणैवोचिताऽनन्यलभ्यस्यैव शब्दार्थत्वादित्यभिप्रायेणाह। संसर्गेति। अत्यन्ताभावमात्रवाचकत्वे घटप्रागभावदशायां ध्वंसदशायां च कपाले घटो नास्तीति बुद्धेरनुदयप्रसङ्गः ध्वंसप्रागभावप्रतियोगिभिस्त्रिभिः सह-

त्यन्ताभावस्य प्राचां मते विरोधादत्यन्ताभावविषयकत्वासम्भवात् अतो ध्वंसादिविषयकत्वमेवोपेयं तथा च तत्साधारण्याय संसर्गाभावेति । संसर्गाभावत्वं च संसर्गारोपजन्यप्रतीतिविषयीभूताभावत्वं ध्वंसप्रागभावदशायां कपाले घटो नास्तीति धीर्ध्वंसादिविषयिणी तत्र चोत्तरकालीनत्वविशिष्टसमवायः प्रागभावस्य पूर्वकालीनत्वविशिष्टसमवायश्च ध्वंसस्य प्रतियोगितावच्छेदकसम्बन्धः प्रसक्तं हि निषिध्यत इति न्यायादुत्पत्तेः पूर्वमुत्तरकालीनत्वविशिष्टसमवायेन कपाले घटस्याभावस्तत्र तेन सम्बन्धेन कपाले घटोऽस्तीति संसर्गारोपानन्तरं घटो नास्तीति बुद्धिः एवं ध्वंसदशायां पूर्वकालीनत्वविशिष्टसमवायेन घटस्याभावात्तेन सम्बन्धेन कपाले घटोऽस्तीति संसर्गारोपानन्तरं घटो नास्तीति बुद्धिः । अत्यन्ताभावे तु संयोगमात्रेणैव घटवत्तारोपादत्यन्ताभावधीः । नचान्योन्याभावप्रत्यक्षे तादात्म्यारोपस्य हेतुतया तादात्म्यस्यापि संसर्गत्वेनान्योन्याभावेऽतिव्याप्तिरिति वाच्यं । संयोगादिसम्बन्धे एव भूरिप्रयोगात्संयोगादिष्वेव संसर्गव्यवहारात्तादात्म्यातिरिक्तत्वेन संसर्गस्य प्रवेशाद्वा । नच तथापि नेत्याकारकाभावप्रत्यक्षवारणायाभावलौकिकप्रत्यक्षे प्रतियोगिज्ञानस्य हेतुतायां आवश्यकत्वे प्रतियोगिसंसर्गारोपहेतुत्वे मानाभाव इति वाच्यम् । एकदा नानासम्बन्धावच्छिन्नाभावप्रत्यक्षवारणाय तत्सम्बन्धावच्छिन्नाभावप्रत्यक्षे तत्तत्संसर्गारोपस्यापि हेतुत्वात् । नच ध्वंसप्रागभावयोः प्रतियोगितावच्छेदकसम्बन्धे मानाभावेन कथं तत्प्रत्यक्षे प्रतियोगिसंसर्गारोपः कारणमिति वाच्यम् । अनुभवबलेन प्रतिबध्यप्रतिबन्धकभावानुरोधेन चात्यन्ताभावस्येव तयोरपि प्रतियोगितावच्छेदकसम्बन्धाङ्गीकारात् । तथाहि । अत्यन्ताभावस्येव ध्वंसप्रागभावयोरपि ज्ञानदशायां तत्कालावच्छेदेन प्रतियोगिमत्ताज्ञानानुदयात् समवायेन तद्घटवत्ताज्ञानं प्रति तद्घटत्वावच्छिन्नप्रतियोगिताकात्यन्ताभावप्रागभावादिमत्ताज्ञानत्वादिना प्रतिबन्धकत्वमपेक्ष्य समवायेन तद्घटत्वावच्छिन्न प्रतियोगिताकाभाव वत्ताज्ञानत्वेनैव प्रतिबन्धकतयाऽत्यन्ताभावस्येव तयोरपि सम्बन्धावच्छिन्नविशेषधर्मावच्छिन्नप्रतियोगिताकत्वस्वीकारात् । तथाच संसर्गाभावत्वं न शक्यतावच्छेदकं । नचान्योन्याभावत्वमेव तथास्तामिति वाच्यम् । सामान्ये पक्षपात इति न्यायेन ध्वंसप्रागभावादिसाधारणतया संसर्गाभावत्वस्यैव

विनिगमनाविरहेण चा भावमाच एव तच्छक्यत्वावधारणा-

तथात्वात्। न घटः पट इत्यादौ सामानाधिकरण्यानुरोधेनान्योन्याभाववति लक्षणयाऽन्योन्याभावे शक्त्या नञः प्रयोगाभावाच्च चैत्रो न पचति नेदं चैत्रस्य भूतले न घट इत्यादौ मन्यते नञो मुख्यार्थतासम्भवादित्याशयः। लाघवेनेति। संसर्गाभावत्वं ससर्गारोपजन्यप्रतीतिविषयाभावत्वमिति तदपेक्षया तत्प्रविष्टत्वेनाभावस्यैव लघुत्वेनोभयत्रैव शक्तिरिति भावः। ननु संसर्गाभावत्वं न संसर्गारोपजन्यप्रतीतिविषयाभावत्वं संसर्गारोपस्य हि अनाहार्यस्य हेतुत्वे ऽनाहार्यबाधबुद्धेः प्रतिबन्धकतयाऽभावप्रत्यक्षानुपपत्तिः आहार्यस्य च तस्य तदानीं बाधाभावेनासम्भवः बाधकालीनेच्छाजन्यज्ञानस्यैवाहार्यत्वात् यदि च बाधसामग्रीकालिकस्याप्याहार्यत्वमिति मन्यते तथाप्यभावलौकिकप्रत्यक्षे एव प्रतियोगिसंसर्गारोपस्य हेतुतया ऽतीन्द्रियाभावेऽव्याप्तिः। नच संसर्गावच्छिन्नप्रतियोगिताकाभावत्वं तत्। संयोग्यन्योन्याभावेऽतिव्याप्तेः संयोगितादात्म्यस्य संयोगरूपत्वेन तस्यापि संसर्गावच्छिन्नप्रतियोगिताकत्वात् संसर्गतया तादात्म्यतया चावच्छेदकतावैलक्षण्यं दुर्वचम्। एवं तादात्म्यावच्छिन्नप्रतियोगिताकाभावत्वं नान्योन्याभावत्वं संयोगसम्बन्धावच्छिन्नप्रतियोगिताक संयोग्यत्यन्ताभावे ऽतिव्याप्तेः संयोगितादात्म्यस्य संयोगरूपतया तादात्म्यावच्छिन्नप्रतियोगिताकत्वात् तादात्म्यत्वेन तादात्म्यावच्छिन्नत्वोक्तौ च तादात्म्यत्वस्यातिरिक्तत्वोपगम एव निस्तार इति संसर्गाभावत्वमखण्डमेवेति किं तदपेक्षाभावत्वे लाघवं। न च सामान्यधर्मत्वादभावत्वे लघ्विति वाच्यं। सामान्यधर्मस्यावच्छेदकत्वे नञ्पदाच्छक्त्यैवाभावबोधोपपत्तौ लक्षणां विनैवोपपत्तेरित्यस्यैव बीजतया संसर्गाभावत्वादीनामखण्डत्वे नञ्पदाद्यच संसर्गाभावत्वप्रकारकबोधस्तत्राभावत्वप्रकारकबोधस्य कलहग्रस्तत्वेन प्रकृते तदसम्भवादित्यत आह। विनिगमनेति। संसर्गाभावत्वस्यातिरिक्तत्वेऽभावत्वस्याप्यतिरिक्तत्वेन तदपि शक्यतावच्छेदकमित्यर्थः। अभावमाच एवेति। संसर्गाभावे ऽन्योन्याभावेचेत्यर्थः। तच्छक्यत्वेति। नञ्पदशक्यत्वावधारणादित्यर्थ इति सम्प्रदायानुसारिणी व्याख्या। वस्तु तस्तु नञ्भावत्वस्य नञ्शक्यतावच्छेदकत्वे घटो नास्तीत्यत्र संसर्गाभावत्वप्रकारको बोधः घटो नेत्यादौ अन्योन्याभावत्वप्रकारको बोधः कथं स्यात्। य-

दि च संसर्गावच्छिन्नप्रतियोगिताकसंसर्गाभावविषयकशाब्दत्वादेः कार्यतावच्छेदकतया तादृशानुभवोपपत्तिरिति विभाव्यते । तथा प्यभाव इति प्रतीतेरवश्यक्लृप्तात्यन्ताभावत्वध्वंसत्वादिविषयकत्वेनैवोपपत्तौ अतिरिक्ताभावत्वे मानाभाव इति नाभावत्वं शक्यतावच्छेदकमत आह । विनिगमनेति । संसर्गाभावत्वमिवान्योन्याभावत्वमपि शक्यतावच्छेदकं विनिगमनाविरहादिति भावः । भूरिप्रयोगस्य संसर्गाभाव इवान्योन्याभावेपि सत्त्वान्नियमतः प्रतीयमानेप्यर्थे शक्त्यस्वीकारे नानार्थोच्छेदापत्तेः । चैत्रो न पचतीत्यादौ वैयाकरणमते कर्तुर्वाच्यतयाऽस्माकमपि यदाख्याते कर्तरि लक्षणा तदा शक्त्यैवान्योन्याभावस्य नञा प्रत्यायनसम्भवादिति व्याख्येयं । यदि च घटो नास्तीत्यत्रात्यन्ताभावत्वप्रकारकएव बोध आनुभविकः ध्वंसप्रागभावयोरत्यंताभावविरोधित्वे मानाभावेन ध्वंसप्रागभावकाले घटो नास्तीति बुद्धेरत्यन्ताभावविषयकत्वे नैवोपपत्तेरिति विभाव्यते । तदात्वत्यन्ताभावत्वमन्योन्याभावत्वं च शक्यतावच्छेदकमिति मन्तव्यम् । अत्र च घटवति भूतले यत्किञ्चिद्घटप्रतियोगिकाभावसत्त्वात् भूतले घटो नास्तीति बुद्ध्यापत्तिवारणायान्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वं व्युत्पत्तिबललभ्यं तच्च घटत्वावच्छिन्नप्रतियोगिताकाभावविषयकशाब्दत्वावच्छिन्नं प्रति यत्किञ्चित्पदाममभिव्याहृतघटपदसमभिव्याहृतनञ्पदज्ञानत्वेन कारणता तेन नीलो घटो नास्तीत्यत्र न घटत्वावच्छिन्नाभावधीः । किञ्चित्पदं च नीलादिपदत्वेन विशिष्योपादेयं तेन भूतलादिपदसमभिव्याहारेपि न दोषः ॥ नच तथापि नीले घटो नास्तीत्यत्रानुपपत्तिः । अभेदेन नीलादिसाकांक्षत्वे नाज्ञातमिति तदर्थात् कम्बुग्रीवादिमान्नास्तीत्यादौ तु सम्भवति लघौ गुरौ तदभावादिति न्यायेन कम्बुग्रीवादिमत्त्वस्य घटत्वापेक्षया गुरुत्वेनानवच्छेदकतया कम्बुग्रीवादिमत्त्वावच्छिन्नप्रतियोगिताकाभावबोधो भ्रमात्मक एव । यद्यपि कम्बुग्रीवादिमत्त्वावच्छिन्नप्रतियोगिताकत्वस्य प्रसिद्धया तेन सम्बन्धेन कम्बुग्रीवादिमतो नाभावोपरि भ्रमः । तथापि सांसर्गिकविषयतायामपि प्रकारतात्वोपगमेन प्रतियोगितायां कम्बुग्रीवाद्यवच्छिन्नत्वांशे भ्रम इति बोध्यम् । केचित्तु घटो नास्तीत्यादौ प्रतियोगितया घटस्य स्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन च घटत्वस्याभावोपरिभानं कम्बुग्रीवादिमान्नास्तीत्यत्र तु घटत्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन कम्बुग्रीवादिम-

त् । ननु न घटःपट इति वद्भावघटयोरन्वयोपपत्तेर्न घटपदेपि लक्षणा युक्तेति चेन्न । नामार्थयोर्भेदान्वयस्या व्युत्पत्तेः । कथं तर्हि न घटः पट इत्यान्वय इति चेत् घटपदस्य घटप्रतियोगिके लक्षणेति गृहाण । प्रथमाया वा षष्ठ्यर्थे लक्षणा । ननु सुब्विभक्तौ न लक्षणेति चेत् । तर्हि कथं षष्ठीतः कर्मतोप्रत्ययः कथं वा एकस्यां दारादिति बहुवचनम् ।

स्वस्याभावोपरि भ्रमः स्वावच्छिन्नप्रतियोगिताकत्वस्यैव स्वस्य सम्बन्धत्वादित्याहुः । आशयमविद्वान्शंकते । ननु न घट इति । अभावघटयोरिति । प्रतियोगितया घटस्याभावोपरिबोधोपपत्तेरित्यर्थः । घटपदेपीति । अपिना नञ्पदसमुच्चयः । नामार्थयोरिति । नीलो घट इत्यत्र नीलघटयोरभेदेनान्वयाङ्गीकारेणेति । अभेदातिरिक्तसम्बन्धेनेत्यर्थः । तथा च नञर्थाभावे प्रतियोगितासम्बन्धेन घटस्यान्वयो न सम्भवति लुप्तसुबन्तत्वेन नञोऽपि नामत्वादिति भावः । कथं तर्हीति । नामार्थयोरिति व्युत्पत्तेः स्वीकारे हीत्यर्थः । न घट इति । प्रथमायाः शब्दसाधुत्वात्प्रतियोगितासम्बन्धेनैव नञर्थान्योन्याभावे घटस्यान्वयइति भावः । अर्थसाधुत्वे सम्भवति शब्दसाधुत्वस्यान्याय्यतया प्रथमायामेव लक्षणामाह । प्रथमायांवेति । षष्ठ्यर्थे प्रतियोगित्वे । ननु सुब्विभक्तौ लक्षणा न सम्भवति कर्तृकर्मणोः कृतीति व्युत्पत्त्यानुशासनवैयर्थ्यापत्तेः कर्तृत्वत्वकर्मत्वत्वप्रकारकबोधस्य षष्ठ्यास्तद्धर्मविशिष्टे लक्षणयैवोपपादयितुं शक्यत्वादित्यभिप्रायेणाशंकते । नन्विति । तर्हि । सुब्विभक्तौ लक्षणानङ्गीकारे हि । षष्ठीतः । भ्रातरस्य श्रवणं व्यासस्य कृतिरिति कर्तृकर्मकृद्योगविहितषष्ठीतः । कर्मतेति । कर्तृत्वेत्यपि बोध्यम् । शेषे षष्ठीत्यनेन सम्बन्धमात्रशक्तषष्ठीतः सम्बन्धत्वेन बोधसम्भवेपि कर्तृत्वत्वेन कर्मत्वत्वेन बोधो न सम्भवतीति तथा बोधोपपत्तये लक्षणास्वीकार आवश्यकः । नचानुशासनस्य शक्तिनियामकतया कर्तृकर्मकृद्योगविहितषष्ठीत्वेन कर्तृत्वत्वादिना शक्तिरेवास्त्वामिति वाच्यम् । अनन्यलभ्यस्य शब्दार्थत्वादिति भावः । असन्दिग्धस्थलमुदाहरति । कथंवेति । एकस्यां । स्त्रीव्यक्तौ । दारा इतीति । "दाराः पुंसि च भूम्न्येवेति" बहुवचनान्तएव शब्दः साधुरिति भा-

आनुशासनिकीयं लक्षणा दृष्टैवेति चेत्तुल्यं तदिदमाहुः । नियत प्रतियोगाहि केचिदव्यया इति तथापि नञर्थपटयोः कथमाश्रयाश्रयिभावेनान्वयः । नञुत्तरलुप्तषष्ठीस्मरणादि-

---

वः । यद्यपि प्रकृत्यर्थहत्ति संख्यावाचकत्वं सुपां नतु तन्मात्रहत्ति संख्यावाचकत्वमिति तद्गतगुणानादाय बहुत्वान्वयः सम्भवत्येव तथाप्येको घटाइत्यत्राप्यसाधुत्वज्ञानाभावदशायां घटगतगुणानादाय बहुत्वान्वयापत्तिः । नच भवन्मतेपि बहुवचनलक्षणाया एकत्वं बोध्यतामिति वाच्यम् । एक इति पदेनैकत्वबोधसम्भवे घटा इति बहुवचनस्यैकत्वे तात्पर्यग्रहेण लक्षणया एकत्वबोधवारणसम्भवात् प्रकृतेच सम्भवत्यर्थसाधुत्वे शब्दसाधुत्वस्यान्याय्यत्वादिति । आनुशासनिकीति । इयं । लक्षणा । षष्ठ्याः कर्मत्वे बहुवचनस्य चैकत्वे लक्षणेत्यर्थः । इष्टैवेति । कर्तृकर्मणोः कृतीति व्यत्ययानुशासनवैयर्थ्यभिया सुब्विभक्तौ न लक्षणेत्यस्यानुशासितविभक्त्यर्थातिरिक्तेन लक्षणैव तदर्थ इति । भारतस्य अवणमित्यादौ विभक्तौ लक्षणोपपत्तावपि न घटः पट इत्यत्र प्रथमायां कथं लक्षणा तथाऽनुशासनाभावादिति भावः । तुल्यमिति । प्रकृतेपि नञ्समभिव्याहृतघटपदोत्तर प्रथमायामप्यानुशासनिकी लक्षणा सम्भवतीति तुल्यमित्यर्थः । अनुशासनमेवाह । तदिदमाहुरिति । नियतेति । नियतः प्रतियोगिवाचकपदेन नियतः प्रयोगो येषां ते केचिदव्यया नञादिरूपाः प्रतियोगिवाचकपदार्थान्वितस्वार्थबोधकाः केचिदव्यया इति यावत् । नइति न कदाचिदपि प्रयोगः किंतु न घटः पटइत्यादिरूप एव तथा च स्वार्थे प्रतियोगिवाचकपदार्थान्वितत्वमभेदेन विभक्त्यर्थद्वारा वा तत्र च घटपदस्य घटप्रतियोगिके लक्षणायामभेदेन प्रथमायाः प्रतियोगित्वेन लक्षणायां तु विभक्त्यर्थद्वाराऽन्वयः घटपदे लक्षणायां प्रथमायाः शब्दसाधुत्वमात्र कल्पनापेक्षया प्रथमाया एव प्रतियोगित्वे लक्षणोचितेत्यत्रापि प्रतियोगित्वे लक्षणानुशासनिकीति भावः । यद्यपि प्रतियोगित्वरूपार्थे प्रथमेति न व्याकरणे प्रतिपादितम् । तथापि तादृशानुशासनतात्पर्यं तत्रैवेत्यनुशासितत्वमिति ध्येयम् । शंकते । तथापीति । नञर्थेति । न घटः पटइत्यत्र घटान्योन्याभावस्य पटे कथमन्वयः नामार्थयोरभेदातिरिक्तसम्बन्धेनान्वयबोधासम्भवादित्यर्थः । शंकते । नञुत्तरेति । तथा च न नामार्थयोरन्वयः किंतु

ति चेन्न। षष्ठीलोपप्रसङ्गानतोपि ततोऽर्थ प्रत्ययात्। नञ्पदस्य-भाव वस्तुत्तकमिति चेन्न। घटस्याभावे अनन्वयापत्तेः। तस्य पदार्थैकदेशत्वात्। नैवं। ससम्बन्धिकस्थले एकदेशेप्यन्वय स्वीकारात्। यथा चैत्रस्य पितेत्यादौ चैत्रस्य जनकत्वेऽन्वयः। अ-

---

विभक्त्यर्थ नामार्थयोरिति भावः। ततइति । न घटः पट इति वाक्यादित्यर्थः। शंकते। नञ्पदमिति। नञर्थस्याभाववतः पटे भेदेनैवान्वय इति नैतदुत्पत्तिविरोध इति भावः। घटस्येति। नञोऽभाववति लक्षणया घटस्य प्रतियोगितासम्बन्धे नाभावेऽन्वयो वाच्यः स च न सम्भवतीति भावः। तदेवाह। तस्येति। अभावस्येत्यर्थः। पदार्थैकदेशेति। नञो ऽभाववदर्थकतयाऽभावस्यैकदेशत्वादिति भावः। गौर्नित्यापशुरपशुरित्यादौ सविशेषणेहिविधिनिषेधौ विशेषणमुपसंक्रामतः सति विशेष्ये बाधइतिन्यायेन स्वर्गो ध्वस्त इतिवत् नित्यत्वस्य गोत्वे अन्वयापत्त्या पदार्थः पदार्थेनान्वेतिन तु पदार्थैकदेशेनेति नियमस्यावश्यकतया नञर्थाभाववदेकदेशे ऽभावे घटस्य प्रतियोगितया ऽन्वयासम्भव इति भावः। तथापीति शंकोपरिसमाधत्ते। नैवमिति। ससम्बन्धिकेति। नामार्थयोरिति व्युत्पत्त्या नञोऽ भाववति लक्षणैव अभाववतश्चाभेदेनैव पटे ऽन्वय इति न नामार्थयोरिति व्युत्पत्तिविरोधः पदार्थः पदार्थेनान्वेति नतु पदार्थैकदेशेनेति व्युत्पत्तेश्च ससम्बन्धिकपदार्थातिरिक्तस्थल एवाभ्युपगमात्। नञर्थाभाववदेकदेशेप्यभावे घटस्यान्वये बाधकाभाव इति भावः। ननु व्युत्पत्तिसंकोचे प्रमाणाभाव इत्यत आह। यथेति। जनकत्वइति। जनकपूंस्त्वं हि पितृत्वं तच्चैकदेशे जनकत्वे यथा चैत्रस्य निरूपितत्वसम्बन्धेनान्वय इत्यर्थः। तथाच व्युत्पत्तिसंकोच आवश्यक इति भावः। ननु चैत्रस्य पितेत्यादौ जनकपूंस्त्वरूपपितृत्वैकदेशे जनकत्वे चैत्रस्य नान्वयः किन्तु स्वनिरूपितजनकत्वसम्बन्धेन पितृपदार्थे एवेति न पदार्थः पदार्थेनान्वेतीति व्युत्पत्तिसंकोचः। एवं च प्रकृतेपि घटो नेत्यादौ घटपदस्य घटप्रतियोगिके लक्षणायां घटप्रतियोगिकस्य स्वाभिन्नाभावाश्रयतासम्बन्धेन प्रथमायाः प्रतियोगित्वे लक्षणायां तु घटस्य स्वप्रतियोगिकाभावाश्रयतासम्बन्धेन पटे ऽन्वये बाधकाभाव इति मतं दर्शयति। अन्ये-

न्ये तु समुदाय एवेतरपदार्थान्वयः परंपरासम्बन्धेनेत्याहुः । युक्तं चाभाववल्लक्षकत्वमेव । अन्यथा घटं पट मित्यत्र समानविभक्तिकतानुपपत्तेः । परे तु निपातस्थलेऽन्यैव व्युत्पत्तिरिति घटनञर्थयोः प्रतियोग्यनुयोगिभावेनान्वयोपपत्तौ न घ-

---

त्विति । समुदायएव । अभाववत्येव । एवकारेणाभावरूपपदार्थैकदेशव्युदासः । इतरपदार्थेति । घटपदार्थान्वयः । परंपरासम्बन्धेन । स्वाभिन्नाभावाश्रयतासम्बन्धेन स्वप्रतियोगिकाभावाश्रयतासम्बन्धेन वेत्यर्थः । नच नामार्थयोरिति व्युत्पत्तिभङ्ग इति वाच्यम् । नामार्थयोरभेदान्वितसम्बन्धेन विभक्त्यर्थान्वितसम्बन्धेन च नान्वय इत्येव व्युत्पत्तेरिति भावः । एवं चैचस्य पितेत्यादौ चैचस्य स्वनिरूपितजनकत्वसम्बन्धेन पितर्येवान्वय इति बोध्यम् । आहुरित्यस्वरसोद्भावनं । तद्वोजं तु घटीयोऽभाववान् पट इत्यन्वये कस्याभाव इत्याकाङ्क्षाया अनिवृत्तिर ननु भवर्त्वेति । नन्वभाववति लक्षणाङ्गीकारे पदार्थ इत्यादेर्भवन्मते सङ्कोचः नञर्थाभावस्याश्रयतासम्बन्धेन पटेऽन्वये नामार्थयोरित्यस्य सङ्कोच इति तुल्यत्वे किमिति आभाववति लक्षणा घटपदस्य घटप्रतियोगिके नञस्याभाववति लक्षणायां लक्षणाद्वयप्रसङ्गस्येत्यत आह । युक्तं चेति । व्युत्पत्तिसङ्कोचस्याविशिष्टत्वे पीति शेषः । लक्षकत्वमेव । नञपदस्येतिशेषः । अन्यथा । नञो ऽभाववति लक्षणाऽकल्पने । अघटः पट इति विशेषण विशेष्यवाचकपदयोः समानविभक्तिकत्वस्य विरुद्धविभक्तिराहित्यस्य वा ऽभेदान्वयबोधे हेतुत्वेन भवन्मते ऽभावस्यैवाश्रयतया ऽन्वये ऽभेदेनान्वयबोधाभावेन प्रतियोगिवाचकपदयोः समानविभक्तिकत्वमनुपपन्नं स्यादित्यर्थः । निपातेति । निपातादीत्यर्थः । आदिनाऽव्ययसङ्ग्रहः । अन्यैवेति । अव्ययनिपातातिरिक्तनामार्थयोर्भेदान्वयबोधाभाव इत्यर्थः । नामार्थप्रकारकशाब्दबोधे ऽव्ययनिपात प्रत्ययाद्यन्यतमजन्योपस्थिते हेतुत्वादित्यर्थः । नञ्स्थले च प्रत्ययजन्योपस्थितेरसत्त्वेपि निपातजन्योपस्थितेः सत्त्वेन व्यभिचाराभाव इत्यपि कश्चित् । तत्त्वन्यतमत्वनिवेशे गौरवाच्चिन्त्यं । नन्वव्ययातिरिक्तनिवेशे गौरवमत आह । अतएवेति । अव्ययातिरिक्तत्वनिवेशादेवेत्यर्थः । भेदेनेति । इवार्थे सादृश्ये चन्द्रस्य प्रतियोगितया ऽन्वयइत्यर्थः ।

टिप्पणी लक्षणा। अतएव चन्द्र इव मुखमित्यादौ चन्द्रइवार्थयोर्भेदेनान्वयः। अतएव घटो नास्तीत्यत्रापि घटतदभावयोरन्वयो निष्कलङ्क इत्याहुस्तन्न। मानाभावात्। चन्द्रइव मुखमित्यादौ तु चन्द्रपदं तत्सदृशलक्षकं। इवपदं च तात्पर्यग्राहकम्। अतएव चन्द्रमिव मुखंपश्यामीत्यत्र द्वितीया।

चन्द्ररूपनामार्थस्य सादृश्यरूपैवार्थेऽभेदातिरिक्त प्रतियोगितासम्बन्धेनान्वयोपपादनाय तादृशनियमव्युत्पत्तिसङ्कोचकल्पनस्यावश्यकत्वादिति भावः। अत एव। चन्द्र इव मुखमित्यादौ चन्द्रइवार्थयोर्भेदेनान्वयोपपादनाय नियमसङ्कोचस्यावश्यकत्वादेव। घटेति। घटतदभावयोः प्रतियोग्यनुयोगिभावस्य संसर्गमर्यादयैव भानाल्लक्षणा कल्पनमन्याय्यमिति भावः। मानाभावादिति। नामार्थयोरित्यादि नियमेऽव्ययनिपातातिरिक्तस्थल इति सङ्कोचे मानाभावादित्यर्थः। नन्वेवं चन्द्र इव मुखमित्यादौ चन्द्र इवार्थयोः कथमन्वयबोध इत्यत आह। चन्द्रइवेति। तत्सदृशेति। चन्द्रसदृशेत्यर्थः। नन्वेवमिव पदमनर्थकमत आह। इवपदंचेति। तात्पर्येति। केवलं चन्द्र इति पदान्न सादृश्यबोध इति चन्द्रपदस्य चन्द्रसदृशे लक्षणायामिवपदसमभिव्याहारस्तत्त्वमित्यर्थः। नन्वेवमनन्तलक्षणा कल्पनमपेक्ष्य इव पदस्य नियतप्रतीयमाने सादृश्ये शक्तिरेवास्तामत आह। अतएवेति। चन्द्रपदस्य चन्द्रसदृशलक्षकत्वादेव। अन्यथा। लक्षणा ऽकल्पने। तदनुपपत्तेः। चन्द्रमिवेति द्वितीयानुपपत्तेः। चन्द्रपदस्य चन्द्रसदृशे लक्षणायां तस्याभेदेनान्वयात् अभेदान्वये च विशेषणविशेष्यवाचकपदयोः समानविभक्तिकतायास्तन्त्रतया चन्द्रमिति विशेषणवाचकपदोत्तरं द्वितीया आवश्यकी भवत्यतेत्विवार्थं सादृश्यस्याश्रयतया मुखेऽन्वयेनाभेदेनान्वयाभावाद्द्वितीयानुपपत्तैव चन्द्रइव मुखं पश्यामीत्यतोऽपि तादृशबोधोपपत्तेरिति भावः। ननु चन्द्रपदस्य चन्द्रप्रतियोगिकमर्थः सादृश्यशक्तस्य चेवादेः सादृश्याश्रये लक्षणा तस्याभेदेन मुखेऽन्वय इति रीत्या चन्द्रमिव मुखमित्यत्र समानविभक्तिकत्वोपपत्तिः समभवत्येव न घटः पट इत्यत्रैव अन्यथा तत्रापि घटपदस्य घटाभाववति लक्षणा नञ्पदं च तात्पर्यग्राहकमित्यपि प्रसज्येतेति चेन्न। भूतले न घट इत्यत्राभावविशेष्यकबोधस्य ग्र-

अन्यथा तदनुपपत्तेः । अस्तुवा षष्ठ्यर्थ एव विभक्तौ लक्षणाऽनुशासनानुग्रहात् । घटो नास्तीत्यत्रापि तथेत्यदोषः । अन्ये तु । घटो नास्तीत्यत्र घटस्याभावोस्तीतिनार्थः । तथासति भूतले घटो नास्तीत्यस्याप्यापत्तेः । अभावस्यैकत्वादिति ।

क्त्या नञाजननात् अभावशक्तस्य नञोऽभाववति लक्षणोचिता । केवलं चन्द्र इवेत्यप्रयोगाच्छक्त्या इव पदात्सादृश्यविशेषकबोधाभादादिवादेः सादृश्ये शक्तेरेवाकल्पना तेषां निरर्थकत्वमेवेत्याशयात् इवादीनां सादृश्ये शक्त्यभ्युपगमेपि न व्युत्पत्तिसङ्कोच इत्याह । अस्तुवेति । षष्ठ्यर्थे । प्रतियोगित्वे । विभक्तौ । चन्द्रपदोत्तरप्रथमाविभक्तौ । इवपदोत्तरलुप्तविभक्तेरनुसन्धानं तथाच नामार्थयोरिति व्युत्पत्तिसङ्कोचो नेति भावः । ननु सुब्विभक्तौ न लक्षणेत्यत आह । अनुशासनेति । नियतप्रयोगाहि केचिदव्यया इत्यनुशासनबलादित्यर्थः । अनुशासितविभक्त्यर्थातिरिक्तस्थले सुब्विभक्तौ लक्षणा नास्तीति भावः । तथेति । घटोनास्तीत्यत्र घटपदोत्तरप्रथमाविभक्तेरपि प्रतियोगित्वे लक्षणेत्यर्थः । भूतले न घटइत्यत्रैव केवलं चन्द्र इवेति न प्रयोगः चन्द्र इव मुखमित्यत्र तु लुप्तविभक्तेरननुसन्धानेपि बोधाच्चन्द्रपदस्य चन्द्रसदृशलक्षकत्वमेवोचितमिति कुत्रापि इवादिना शक्त्या सादृश्यबोधात्तेषां निरर्थकत्वमेवेत्यस्वरसोऽस्तुवेत्यनेन सूचितः । पृथिव्यां गन्धो न जलइत्यत्र पृथिवीवृत्तिर्गन्धो गन्धाभावो जलवृत्तिरित्यन्वयबोधस्वीकारे समानविशेषकत्वानुपपत्तेः । पृथिवीवृत्तिर्गन्धो जलवृत्त्यभावी योगन्य इत्यन्वयबोधस्वीकार आवश्यक इत्यभिप्रायिणां मतमाह । अन्ये त्विति । ननु पृथिव्यां गन्धो न जलइत्यादौ समानविशेषकत्वानुरोधेन तथान्वयस्वीकारेपि भूतले घटो नास्तीत्यत्र भूतलवृत्तिर्घटाभाव इत्यन्वयबोधे बाधकाभाव इत्यत आह । घटोनास्तीत्यत्रेति । एकत्वादीति । भावनान्वयिन्येव संख्यान्वयेन घटो नास्तीत्यत्र घटाभावोऽस्तित्वाश्रय इत्यन्वयस्वीकारे भावनाविशेषे घटाभावे द्वित्वादेरसम्भवितया घटो न स्त इति न स्यात् तत्रैकत्वसत्त्वेनैकत्वबोधे बाधकाभावाद्घटो नास्तीति च स्यात् भावनाविशेषवृत्ति संख्याबोधकत्वादाख्यातस्येत्यर्थः । तर्हि कीदृशोऽन्वयबोध इत्यत आह । किन्त्विति । भूतले

किन्तु भूतलवृत्त्यभाव प्रतियोगी घटोस्तीति तन्न। क्वेत्यधिकरणाकांक्षापत्तेः। कथं तर्हि घटोनस्त इत्यादीति चेत्। भावनान्वय्यभावप्रतियोगिनि संख्यान्वयात्। कथमिति चेत्। तथैव प्रतीतेरिति गृहाण। परेतु इह भूतलास्तित्वरूपा-

---

घटो नास्तीत्यत्र सप्तम्या निरूपितत्वार्थकतया अस्धातोर्विद्यमानार्थकतया आख्यातस्याश्रयत्वार्थकतया भूतलनिरूपितविद्यमानत्वाश्रयो घटाभाव इत्यन्वयबोधस्वीकारे भावनान्वयिनि संख्यान्वयनियमात् भवन्मते विद्यमानत्वाश्रयत्वरूपाख्यातार्थ भावनाया अभावएवान्वयेनाभावस्यैकत्वाद्घटो नास्तीति स्यात्। मन्मते च सप्तम्या आधेयत्वमर्थः। तथाच भूतलवृत्त्यभावीयो घटोऽस्तित्वाश्रय इति बोधोदयेन भावनाया घटे एवान्विततया घटद्वये एकत्वबोधासंभवाद्घटो नास्तीत्यस्यापत्तिरिति भावः। क्वेति। भूतलवृत्त्यभावप्रतियोगी घटोऽस्तित्वाश्रय एवेत्यन्वयबोधस्वीकारे किंनिरूपितास्तित्वाश्रयो घट इत्याकांक्षाया अनिवृत्तेर्न घटे भावनान्वय इति भावः। कथं तर्हीति। भूतलनिरूपितास्तित्वाश्रयो घटाभाव इत्यन्वयबोधस्वीकारे ह्रीत्यर्थः। इत्यादीति। भावनान्वयिन्यभावे द्वित्वान्वयाभावाद्घटौ न स्त इति न स्यात् स्याच्च घटो नास्तीत्यर्थः। भावनेति। भावनान्वयी योऽभावस्तत्प्रतियोगिनि संख्यान्वय इत्यर्थः। तथाच भावनान्वयिन्येव संख्यान्वय इति नञ्समभिव्याहारे नियमः नञ्समभिव्याहारस्थले तु भावनान्वय्यभावप्रतियोगिनि संख्यान्वय इति व्युत्पत्त्यन्तरकल्पनेनैव घटौ न स्त इत्यत्र घट एव द्वित्वान्वयाद्न घटौ न स्त इत्यस्यानुपपत्तिः न वा घटो नास्तीत्यस्यापत्तिरिति भावः। कथमिति। अन्यत्र भावनान्वयिन्येव संख्यान्वयस्य दृष्टत्वात् कथमत्र भावनान्वय्यभावप्रतियोगिनि संख्यान्वय इत्यर्थः। तथैवेति। अभावप्रतियोगिन्येव संख्यान्वयप्रतीतेरित्यर्थः तथाच न नञ्समभिव्याहृताख्यातार्थसंख्याप्रकारकबोधे नञर्थाभावप्रतियोग्युपस्थितित्वेन हेतुत्वं कल्प्यते इति भावः नञ्समभिव्याहारे यद्विशेषणं प्रतीयते नञा तद्विशेष्ये तद्विशेषणाभावः प्रत्याय्यते अन्यथा वचनैक्यनियमानुपपत्तेः इत्थं च भूतलवृत्तित्वाभाववान् घट इत्येवान्वय इति नियमवादिनां मतमाह। परेत्विति। इह। भूतले घटोना-

ख्यातार्थं निषेधएव घटे प्रतीयते । न पचतिचैत्र इत्यत्रैव नातो द्विवचनानुपपत्तिः । नन्वेवं जातौ सत्तानास्तीत्यत्र कागतिः । जातिवृत्तित्वाभावस्य सत्तायामसत्त्वात् । जातिसमवेतत्वस्य वा प्रसिद्धा निषेद्वमशक्यत्वादिति चेत् । यागति-

---

स्तीत्यादौ । नन्वाख्यातार्थस्य निषेधे ऽन्वयो न दृष्टचर इत्यत आह । नपचतीति । पाकानुकूलकृत्यभाववान् चैत्रइतिवदभूतलास्तित्वाभाववानेको घट इत्यन्वयबोधे बाधकाभाव इत्यर्थः । नातइति । घटस्य विशेष्यत्वादित्यर्थः । द्विवचनेति । घटौ न स्त इति द्विवचनानुपपत्तिरित्यर्थः । इदमुपलक्षणं घटो नास्तीत्येकवचनापत्तिरपि नेत्यपि द्रष्टव्यम् । अभावस्य विशेष्यत्वे घटौ न स्त इति द्विवचनादिकं न स्यात् विशेषणपदस्य विशेष्यपदसमानवचनत्वनियमात् परंत्वभावस्यैकत्वाद्घटो नास्तीत्येकवचनमेव स्यात् घटस्य विशेष्यत्वे च तस्य द्वित्वबहुत्वयोः सत्त्वाक्रियापदस्यापि द्विवचनादिकं साध्विति भावः । घटौ नास्तीत्यत्र घटाविति द्विवचनेन द्वित्वावरुद्धे एकत्वान्वयासंभवादयोग्यत्वं घटौ न स्त इत्यत्र च घट इत्येऽन्वयसंभवाद्योग्यत्वमिति नात इत्यस्य भावार्थ इति कश्चित् । ननु भूतले घटो नास्तीत्यत्र सप्तम्यानिरूपितत्वार्थकतयाऽस्धातोर्विद्यमानत्वार्थकतयाऽख्यातस्याश्रयत्वार्थकतया भूतलनिरूपितविद्यमानत्वाश्रयत्वाभाववान् घट इत्येव बोधस्तत्र चाख्यातार्थाश्रयत्वस्याभाव एव विशेष्यो नतु घट इति भावनाविशेष्यगतसंख्याबोधस्तत्र चाख्यातार्थाश्रयत्वस्याभाव एव विशेष्यो नतु घट इति भावनाविशेष्य गतसंख्याबोधकत्वाभावात्कथं द्विवचनोपपत्तिरिति चेत् न । साक्षात्परंपरासाधारणभावनाविशेष्ये संख्यान्वयस्वीकरेण प्रकृते परंपरयाभावनाविशेष्यत्वस्य घटे सत्त्वादिति एवं परंपरया विशेषणस्यापि विशेष्यसमानवचनत्वमवसेयम् । चैत्रो न पचतीत्यादौ दृष्टत्वादिति बोध्यं । नच तथापि द्वित्वावच्छेदेन भूतलनिरूपितविद्यमानत्वाश्रयत्वाभावस्यान्वये एकघटवति भूतले घटौ न स्त इति न स्यात् घटवृत्तिद्वित्वसामानाधिकरण्येन नञर्थान्वये च घटद्वयवत्यपि घटौ न स्त इति स्यात् अधिकरणान्तरीयघटे भूतलास्तित्वाभावादिति वाच्यं । घटवृत्ति द्वित्वावच्छेदेन नञर्थसामानाधिकरण्यान्वयात् अधिकरणान्तरीयद्वित्वे-

जातिर्नसत्ताहृत्तिरिति वाक्यस्य। अयोग्यमेवेदं वाक्यं हृत्तिपदं वा साक्षात्सम्बन्धावच्छिन्नहृत्तिपरमिति तु तुल्यं। तथापि नञर्थनिषेधोघटे कथमन्वेतीति चेन्न। निपातातिरिक्तनामार्थस्य हि नामार्थेनभेदेनान्वयेन नामार्थमाचष्टेयेति प्रतियन्ति। स्याद्देतत्। घटो नास्तीत्यादौ भेदएव प्रतीयते। भूतले न घट इत्यत्रात्यन्ताभाव एवेत्यत्र किं नियामकं।

नञर्थसामानाधिकरण्येपि एतद्भूतलहृत्तिघटहृत्तिद्वित्वे भूतलास्तित्वाभावसामानाधिकरण्याभावान्न घटद्वयवति घटो न स्त इत्यस्यापत्तिरितिध्येयम्। नन्वेवमिति। सर्वत्रैवानुयोगिहृत्तित्वाभावस्य प्रतियोग्यन्वयस्वीकारइत्यर्थः। जातौ सत्तानेत्यस्य जातिहृत्तित्वाभाववतीसत्तेत्यर्थः। तत्रसंबन्धसामान्यावच्छिन्न जातिहृत्तित्वाभावो वा समवायसंबन्धावच्छिन्नजातिहृत्तित्वाभावो वा बोध्येत तत्राद्ये आह। जातिहृत्तित्वाभावस्येति। एकार्थसमवायेन सत्ताया जातौ सत्त्वेन तदभावबोधनासंभवादित्यर्थः। नचैककालीनत्वादिवदेकार्थसमवायस्यापि हृत्त्यनियामकतया तेन संबन्धेन सत्ताया: सत्त्वेपि संबन्धसामान्यावच्छिन्नहृत्तित्वाभावो ऽस्त्येव जन्यमात्रस्य कालोपाधितया मूर्तमात्रस्य दिगुपाधितया कालिकदैशिकविशेषणतयोस्तत्रासंभवितया तदादायापि क्षतिविरहादितिवाच्यं। जातिः सतीति प्रतीतेस्तस्यापि हृत्तिनियामकत्वात् द्वितीये आह। जातिसमवेतत्वस्येति। प्रतियोग्यप्रसिद्धया न समवायसबन्धावच्छिन्नजातिहृत्तित्वाभावः प्रत्येतुं शक्यत इति भावः। यागतिरिति। जातौनसत्तेत्यत्र जातिहृत्तिः सत्ताभाव इत्युपपत्तावपि जातिर्नसत्ताहृत्तिरित्यत्र सम्बन्धसामान्यावच्छिन्नसत्ताहृत्तित्वाभावस्य जातावसंभवात् समवायसम्बन्धावच्छिन्नसत्ताहृत्तित्वस्य वा प्रसिद्धया निषेधासंभवात्तुल्यत्वं तवापीत्यर्थः। अयोग्यमेवेति। निश्चितानन्वयमपार्थकमिति भावः। इदंवाक्यं। जातिर्नसत्ताहृत्तिरिति वाक्यं। यथाकथंचिद्योग्यतयोपपत्तावयोग्यत्वमन्याय्यमत आह। हृत्तिपदंवेति। साक्षादिति। जातिर्नसत्ताहृतिरित्यत्र लक्षणया सत्तानिरूपितसाक्षात्संबन्धावच्छिन्नहृत्तित्वाभावः प्रतीयते सत्तानिरूपितसाक्षात्संबन्धावच्छिन्नहृत्तित्वं च स्वरूपसंबन्धमादाय प्रमेयत्वादौ प्रसिद्धमिति नोक्तदोष इति भावः

अधिकरणवाचकपदं सप्तमीविभक्तिरत्यन्ताभाव बोधे तन्त्र । प्रतियोग्यनुयोगिपदयोः समानविभक्तिरन्योन्याभाव बोध इति चेन्न । न पचति चैत्रश्चैत्रस्य न धनमित्यत्र सप्तम्यभावात् । अलघुपचतीत्यत्र समानविभक्तेर भावाच्च । अवाङ्नः । न अग्निर्माणवकेयत्र प्रतियोग्यनुयोगिपदयोर भेदान्वयबोधे आकांक्षा । तत्रान्योन्याभाव बोधकत्वमन्यत्रान्य

तुल्यमिति । जातौ नसत्तेत्यपि वाक्यमयोग्यमेव योग्यत्वे वा जातिनिरूपितसाक्षात्सम्बन्धावच्छिन्नवृत्तित्वाभावः प्रतीयत इति भावः । केचित्तु सत्तापदं सत्तासमवायपरं सप्तम्यर्थेश्चानुयोगित्वं तथाच जात्यनुयोगिकत्वाभाववान् सत्तासमवाय इति बोध इत्याहुः । समवैति । इति पदाध्याहारेण तथाबोधइत्यन्ये । शंकते । तथापीति । निषेधः । भूतलास्तित्वनिषेधः । कथमिति । नामार्थयोरभेदेनैव व्युत्पत्तेरिति भावः । निपातेति । निपातातिरिक्तस्थलएव नामार्थयोरिति व्युत्पत्तिरिति भावः । न नामार्थमात्रस्य । न नामार्थसामान्यस्य । प्रतिपत्तीत्यनेनाखरसः सूचितः स च व्युत्पत्तिसंकोचे गौरवम् । एवं जातौ न सत्तेत्यत्र जातिवृत्तिः सत्ताभाव इत्येतावतैवोपपत्तौ लक्षणादिकल्पनेपि न हि जातिर्न सत्ताहत्तिरित्येकत्र लक्षणाकल्पनादन्यत्रापि तथेत्यत्र प्रमाणमस्ति भावनान्वयभावप्रतियोगिवृत्तिसंख्याबोधकत्वेनैव वचनैक्यनियमस्याप्युपपत्तिरिति न किञ्चिदेतत् । किं नियामकमिति । नञो ऽभावमात्रवाचकत्वेन घटो नायमित्यत्रात्यन्ताभावः । भूतले न घट इत्यत्र चान्योन्याभावः प्रतीयेतेत्यर्थः । सामग्र्यास्तुल्यत्वादिति भावः । शङ्कते । अधिकरणेति । नञ्जन्यात्यन्ताभावविषयकशाब्दत्वावच्छिन्नं प्रति अनुयोगिवाचकपदसमानविभक्तिकप्रतियोगिवाचकपदजन्योपस्थितित्वेन च कारणत्वान्न पूर्वोक्तदोषापत्तिः सामग्र्याविलक्षणत्वादित्यर्थः । नपचतीति । पाकानुकूलकृत्यभाववांश्चैत्र इत्यत्रानुयोगिवाचकपदसमभिव्याहृतसप्तमीपदस्याभावेन न तस्याः सामग्रीत्वमित्यर्थः । ननु वैयाकरणमते आख्यातस्य कर्तरि शक्तितया पाककर्तृभिन्नश्चैत्र इत्येव बोधान्नेदमत्यन्ताभावोदाहरणं घटत इत्यत आह । चैत्रस्येति । चैत्रस्वत्वाभावबोधनमित्यर्थः । षष्ठ्याःस्वत्वमर्थो नतु स्वामित्वंवृत्त्यनियामकसम्बन्धस्याभावप्रतियोगितानवच्छेदकत्वेन निरूपकतासम्बन्धाव-

बोधकत्वमिति व्युत्पत्तिः। अस्ति च न घटः पट इत्यत्र नञ्-सत्त्वे घट पटयोरभेदान्वयबोधे आकाङ्क्षा अतस्तत्रान्योन्या-भाव प्रत्ययः। भूतले न घट इत्यत्र नञ्विनिर्मोकेनाभेदान्वये

च्छिन्न प्रतियोगिताकस्वामित्वाभावबोधासंभवादाश्रयतासम्बन्धावच्छिन्नप्रतियोगिताकस्वामित्वाभावबोधस्वीकारे चचैचोयेऽपि धने नेदं चैत्रस्येति प्रमङ्गात् स्वामित्वस्य चैवद्वृत्तित्वेन धने आश्रयतासम्बन्धेनासत्त्वात् यदि च तादात्म्यवद्वृत्त्यनियामकसम्बन्धान्तरस्याभावप्रतियोगितावच्छेदकत्वस्वीकारे स्वामित्वमेव षष्ठ्यर्थस्तदापि विनिगमनाविरहेण स्वत्वमप्यर्थोऽवसेयः अन्योन्याभावबोधे समानविभक्तिकत्वस्य नियामकत्वे व्यभिचारमाह। अलघ्विति। क्रियाविशेषणस्थले कर्मविभक्तेर्नपुंसकलिङ्गत्वं विशेषणविभक्तिश्च साधुत्वार्था तथाच लघुभिन्नपाकानुकूलाकृतिरित्यन्वयबोधेऽन्योन्याभावविषयके विशेषणविशेष्यवाचकपदयोः समानविभक्तिकत्वाभावेन व्यभिचारइत्यर्थः। नञ्विनिर्मोके। न ञ् समभिव्याहारस्थले। तत्रेति। यथा भूतलं घट इत्युक्तेऽभेदान्वयबोधे समानविभक्तिकपदत्वेन कारणतया भूतलघटयोरभेदान्वयबोधे आकांक्षाऽतो नञ्समभिव्याहारे भूतलं न घट इत्युक्ते भूतले घटान्योन्याभावबोधः। अन्यत्रेति। नञ्समभिव्याहारे प्रतियोग्यनुयोगिपदयोरभेदान्वये आकांक्षाशून्यस्थलेइत्यर्थः। अन्येति। अत्यन्ताभावबोधकत्वमित्यर्थः। यथा पचतीत्युक्ते पाकानुकूलकृतिचैत्रयोर्नाभेदे आकांक्षा किंत्वाश्रयतयेवेति न पचतीत्यत्र नान्योन्याभावबोधः किंत्वत्यन्ताभावबोध इति तथाच प्रतियोग्यनुयोगिनोरभेदान्वयबोधे यादृशसमभिव्याहारज्ञानं कारणं तयोरन्योन्याभावबोधे तादृशसमभिव्याहारज्ञानंकारणम् एवमत्यंताभावबोधे भेदान्वये आकाङ्क्षाशून्यप्रतियोग्यनुयोगिवाचकपदसमभिव्याहृतनञ्पदज्ञानं कारणमित्यर्थः। तदेवोपपादयति। अस्तिचेति। नञ्सत्वे। न ञ्समभिव्याहारे। घटपटयोरिति। विशेषणविशेष्यवाचकपदयोः समानविभक्तिकत्वस्य विरुद्धविभक्तिराहित्यस्य वाऽभेदान्वयबोधे आकाङ्क्षात्वादिति भावः। तत्र। न घटः पट इत्यत्र। नाभेदेति। भूतले घटइत्यत्र भूतलवृत्तिर्घटइत्येवान्वयबोधादाधारत्वस्य सप्तम्यर्थतया नाभेदान्वयबोधकत्वमिति तत्र संसर्गाभावप्रत्ययएवेति भावः

आकाङ्क्षेति तत्र संसर्गाभाव प्रत्ययएवेति संक्षेपः । व्यंजनाच्च न वृत्त्यन्तरं । लक्षणयैव तदर्थसिद्धेः । नन्विदमयुक्तं । त-

---

अत्र वा न्योन्याभावबोधे विशेषणविशेष्यवाचकपदयोः समानविभक्तिकत्वस्य तन्त्रत्वे दधि न सुन्दरमित्यत्र लुप्तविभक्त्यनुसन्धानेन शाब्दबोधोपपादनेपि चैत्रो न पचतीत्याख्यातस्य कर्तरि लक्षणायां चैत्रे पाककर्तृभेदान्वयान्न स्तोकं पचतीत्यादौ पाके स्तोकस्य भेदप्रतिपादनाच्च तत्र समानविभक्तिकत्वाभावाद् व्यभिचारः विरुद्धविभक्तिराहित्यस्य तन्त्रत्वे च प्रतियोगिपदोत्तरविभक्तिविरुद्धविभक्ति शून्यानुयोगिपदसमभिव्याहृतनञ् पदत्वेनानुयोगिपदोत्तरविभक्तिविरुद्धविभक्ति शून्यप्रतियोगिपदसमभिव्याहृतनञ् पदत्वेन वा हेतुत्वे न पचतीत्यादौ प्रतियोगिपदोत्तरविभक्तेरप्रसिद्धेःन स्तोकंपचतीत्यादौ अनुयोगिक्रियापदोत्तरसुब्विभक्तेश्चाप्रसिद्धतया नानुगतरूपेण हेतुत्वम् अनयोरन्यतरस्य हेतुत्वे चाननुगमः किंतु विशिष्यानुयोगिप्रतियोग्यपस्थापकनामपदयोः समभिव्याहारे समानविभक्तिकत्वं तन्त्रं घटो न नील इत्यत्र घटपदार्थान्वितनीलपदार्थान्योन्याभावबोधे नीलपदसमानविभक्तिकघटपदसमभिव्याहृतनञ्पदत्वेन चैत्रो न पचतीत्यादौ धर्मिपराख्यातसमभिव्याहृतनञ्पदत्वेन न स्तोकं पचतीत्यादौ क्रियाविशेषसमभिव्याहृतद्वितीयातस्तोकादिपदसमभिव्याहृतनञ्पदत्वेन हेतुरिति बोध्यं। ननु पुरुषोत्तमइत्यत्र न तावत्कर्मधारयः कर्मधारये विशेषणवाचकपदस्य पूर्वभावनियमेनोत्तमपदस्य पूर्वनिपातापत्तेः । नच विशेषणविशेष्यभावे कामचार इति वाच्यं । जातिनिमित्तके गुणनिमित्तकं विशेषणमेवेति नियमात् अतएवोत्पन्नोलमिति न प्रयोगः नापि षष्ठीसमासः। न निर्धारण इत्यनेन निर्धारणे षष्ठीसमास निषेधादित्यतआह । संक्षेप इति । पुरुषोत्तम इत्यादौ क्वचिद्विशेषणंपरं स्यादित्यनेन परनिपातस्यानुशासनसिद्धत्वात्कर्म धारयस्यैवोपगमात् अथ तथापि विशेषणं विशेष्येणं बहुलमिति सूत्रे उभयोपादानबलाद्विशेषणविशेष्यतावच्छेदकयोः परस्परव्यभिचारित्व एव कर्मधारय इति प्राप्तम् एवंचाचदुःखवद्भिन्नत्वस्य घटादिसाधारण्येन पुरुषावधिकोत्तमत्व रूपत्वासंभवेन सर्वज्ञत्वादिमत्त्वरूपोत्तमत्वस्य पुरुषत्वव्यभिचारित्वाभावात्कथं कर्मधारय

इति चेन्न। उद्देश्यतावच्छेदकविधेययोरन्यतरव्यभिचारित्वे एव कर्मधारयात् अत एव शिंशुपा वृक्षस्येति संगच्छते। एतेनोद्देश्यतावच्छेदके विधेयभिन्नवृत्तित्वमेव तत्त्वमिति संप्रदायमतमपास्तम्। प्रमेयवह्निमानित्यादावगतेः। नच तथापि गुणवद्द्रव्यस्येत्यादावगतिरिति वाच्यं। तत्रानायत्याऽभेदार्थकषष्ठीसमासोपगमात् अन्यथा भवन्मतेप्यगतेः। अथवा षष्ठीसमास एवायम्। नच ननिर्धारण इत्यनेन निषेधः समुदायापेक्षया जातिगुणक्रियादिभिरेकदेशस्य पृथक्करणं हि निर्धारणं निधार्यत्वविशिष्टस्य सामान्यधर्मावच्छिन्नापेक्षया जातिगुणक्रियाद्यवच्छेदेन यत्किञ्चिद्धर्मिणोभेदबोधनमिति यावत् नचाच तत्संभवति। श्रीकृष्णत्वविशिष्टोपस्थापकपदाभावात् पुरुषोत्तमपदस्य योगरूढतया तत्संभवेपि समासवाक्यादन्यतस्तदनुपस्थितेः तथा नराणां क्षत्रियः शूरतम इति नतु नरक्षत्रियः शूरतमइति अपिच निर्धारणरूपार्थे षष्ठीसमासनिषेधेपि राहोःशिर इति वदभेदार्थकषष्ठीसमासे बाधकाभावः। अचच निर्धारणषष्ठ्याअभेदो भेदस्यार्थः। निर्धार्यपदार्थविशेषतया प्रकृत्यर्थविशेषणतया विशेष्यतया च भेदान्वयः नराभिन्नःक्षत्रियः क्षत्रियान्यनरान्यशूरतमाभिन्न इत्यन्वयबोधः शूरतमत्वावच्छेदेन च क्षत्रियान्यनरान्यत्वान्वयः नातः क्षत्रियान्यनरस्य शूरता यां तादृशप्रयोगः धनीनां क्षत्रियः शूरतमइति विजातीयापेक्षया निर्धारणापत्तेरभेदोप्यर्थः। अभेदसंसर्गकबोधे विरुद्धविभक्तिराहित्यस्य तन्त्रतया संसर्गमर्यादया तद्ज्ञानासम्भवात्। केचित्तु निर्धारणषष्ठ्या अभेदएवार्थः। न रभिन्न क्षत्रियस्य तादात्म्येन शूरतमत्वावच्छेदेनान्वयान्नराहोः शिरइत्यादिनाऽविशेषः शूरतमत्वं नरनिष्ठशूरतमताविशेषः तेन देवानामपि शूरत्वान्नतादृशप्रयोगानुपपत्तिरित्याहुः। तन्न। क्षत्रियमुख्यविशेष्यकानुभवापलापापत्तेः। नराणां प्रमेयः शूरइत्यपि प्रयोगापत्तेश्च क्षत्रियनरः शूरत्ववान् क्षत्रियाभिन्ननरः शूरत्वाभाववानिति ऋजुमतमपि प्रथमान्तार्थमुख्यविशेष्यकबोधस्यानुभवापलापापत्तेरनादेयम्। क्षत्रियान्यनरत्वव्यापकभेदप्रतियोगितावच्छेदकत्वविशिष्टतादात्म्यसम्बन्धेन नराभिन्नक्षत्रिये शूरतमस्यान्वय इत्यभेदएव निर्धारणषष्ठ्या अर्थइत्यपरे। अन्ये तु निर्धारणाषष्ठ्यास्तादात्म्यव्यवच्छेदस्यार्थः व्यवच्छेदश्च द्विरूपो ऽत्यन्ताभावो ऽन्योन्याभावश्च षष्ठीसमभिव्याहृतप्रातिपदिकस्य च स्वार्थीभूततत्तदन्यस्मिन् लक्षणा षष्ठ्यर्थव्यवच्छेदे चाधिकरणत्वेन लाक्षणिकार्थप्रतियो-

थाहि । लक्षणायां मुख्यार्थे इतरान्वयानुपपत्तिर्बीजं । न-च व्यञ्जनायांसा सर्वत्रास्ति । गच्छ गच्छसीत्यादौ तदभावात् ।

गित्वेन च विधेयपदार्थो भासते चक्रियायां कर्णः प्रचुरं ददातीत्यादौ कर्णपदस्य कर्णः कर्णान्यस्वार्थः । चक्रियाभिन्नकर्णः प्रचुरदानकृतिमान्चक्रियाभिन्नः कर्णान्यः प्रचुरदानकृत्यभाववानित्यन्वयबोधः । गवां कृष्णा सम्यन्चक्षीरेत्यत्र कृष्णापदस्य कृष्णातदन्याचार्थः । गवाभिन्ना कृष्णा सम्यन्न क्षीरा गवाभिन्ना कृष्णान्यासम्यन्नक्षीरान्येत्यन्वयबोध इत्याहुः । पुरुषेषूत्तम इति सप्तमीसमासएव । नच ननिर्धारण इति षष्ठीसमासवत्सप्तमीसमासोपि निषिद्ध इति वाच्यं । स्वरविशेषनिषेधस्यैव सूत्रप्रयोजनकत्वात् षष्ठीसमासे उत्तरपदस्यांतोदात्तत्वं सप्तमीसमासे तु पूर्वपदे प्रकृतिस्वरएवावतिष्ठत इति । सप्तमीसमासो निर्धारणरूपेऽर्थेपि साधुरित्यपि कैंचिदिति कृतं पल्लवितेन । ननु स्वायत्ते शब्दप्रयोगे किमित्यवाचकं प्रयुञ्जामह इति न्यायेन तटे घोष इति विहाय गङ्गायां घोष इति लक्षणा मुख्यप्रयोगे बीजाकांक्षायां शैत्यपावनत्वादि प्रयोजनत्वेनावसीयते साच क्लृप्तत्वेन नोपपादयितुं शक्येति व्यञ्जनाख्यातिरिक्तवृत्ति रूपेया इत्यत आह। व्यञ्जनाचेति। न वृत्त्यन्तरमिति। शक्तिलक्षणातिरिक्ता न वृत्तिरित्यर्थः । तथाचेयं यदिशक्ति लक्षणात्मिका तदा शक्ति लक्षणातिरिक्तत्वाभावः । यदिच न शक्ति लक्षणात्मिका तदा न वृत्तिरित्यतिरिक्तवृत्तित्वाभासत्वमव्याहतं तेन न सिद्धासिद्धिव्याघातः । कथं तर्हि शैत्यपावनत्वादि प्रतीतिरित्यत आह । लक्षणायैवेति । तदर्थेति । व्यंग्यार्थप्रतीत्युपपत्तेरित्यर्थः । प्रत्यक्षानुमित्योरिव सामग्रीभेदाद्भेद इत्याशंकते । नन्विति । इदं । लक्षणायैव तदर्थसिद्धिरूपं । मुख्यार्थ इति । गङ्गायांघोषइत्यत्र गङ्गापदमुख्यार्थे प्रवाहे इतरान्वयानुपपत्तिर्घोषाधिकरणत्वानुपपत्तिर्लक्षणा बीजमित्यर्थः । ननु किमेतावतेत्यत आह । नचेति । नहीत्यर्थः । "वापीं स्नातुमितोगतासि नपुनस्तस्याधमस्यान्तिकमित्यत्र" गतामपि दूतीं प्रति नगतासीति मुख्यार्थान्वया नुपपत्तिरस्त्येवेत्यधमपदे लक्षणा सम्भवत्येवेत्यत आह । सर्वत्रेति । तदेवाह । गच्छ गच्छसीति । "गच्छ गच्छसि चेत्कान्त पन्थानः सन्तु ते शिवाः । ममापिजन्मतत्रैव भूयाद्यत्रगतोभवानित्यत्र" तव गमने मममरणं भवितेत्यतस्त्वं मागाइति व्यज्यते तत्र च मुख्यार्थान्वयानुपपत्तेर्लक्षणा

अतोऽन्त्यंतरमास्थेयमिति चेन्न। किमिदं लक्षणाबीजत्वं। नतावज्जनकत्वं। गङ्गातीरयोः सम्बन्धस्यानुपपत्तिज्ञानाजन्यत्वात्। नापितज्ज्ञापकत्वम्। अनुपपत्ति ज्ञानमन्तरेणापि गङ्गातीरयोः सम्बन्धस्य चक्षुरादिनाग्रहात्। नापितात्पर्यग्राहकत्वं। तात्पर्यज्ञाप्यान्तरतोपि तद्ग्रहात्। अथ लक्षणाजन्यशाब्दबोधे सहकारित्वं तदिति चेन्न। यष्टीः प्रवेशयेत्यत्र व्यभिचारात्। तात्पर्यविषयानुपपत्ति रत्राप्यस्तीति चेत्। तर्हि तात्पर्यानुपपत्तिरेव लक्षणा बीजमस्तु।

बीजस्याभावान्न लक्षणा सम्भव इति व्यञ्जनाख्यवृत्त्यन्तरमावश्यकमिति भावः। अन्वयानुपपत्तिर्लक्षणा बीजमित्यत्र बीजशब्दार्थं विकल्पादूषयति। किमिदमिति। तज्जनकत्वं। लक्षणाजनकत्वं। गङ्गेति। शक्यसम्बन्धोलक्षणा साच गङ्गायां घोषइत्यत्र गङ्गातीरयोः संयोगस्यच च नानुपपत्तिज्ञानं कारणमित्यर्थः। तज्ज्ञापकत्वं। लक्षणाज्ञापकत्वं। चक्षुरादिनेति। यत्र गङ्गापदस्य गङ्गातिरे न लक्षणा तत्र तत्सम्बन्धविषयकशाब्दात्मकज्ञानस्यानुपपत्तिज्ञानव्यतिरेकेऽनुदयेपि चक्षुरादिना तल्लौकिकप्रत्यक्षे जननीये तदनपेक्षणाद्व्यतिरेकव्यभिचारेण न सामान्यतस्तज्ज्ञापकत्वसम्भव इति भावः। नच लक्षणाविषयकशाब्दबोधजनकत्वमेव तत्त्वमिति वाच्यं। यत्र गङ्गापदस्य तीरे जहत्स्वार्थालक्षणा तत्र गङ्गातीरसम्बन्धस्य शाब्दबोधाविषयत्वेनान्वयव्यभिचारेण न तथात्वसम्भव इति। एव मग्रेपीति हृदयं। नापीति। तत्तात्पर्यग्राहकत्वं। शक्यसम्बन्धरूपलक्षणा तात्पर्यग्राहकत्वं। तात्पर्यति। प्रकारणादिनापि। तद्ग्रहात्तात्पर्यग्रहादित्यर्थः। तथाच मुख्यार्थानुया नुपपत्तिज्ञानस्य व्यभिचारान्न सामान्यतस्तात्पर्यग्रह हेतुत्व मेवं च क्वचित्तदपेक्षेपि सर्वत्रानपेक्षततया प्रकृते प्रकारान्तरेणैव तात्पर्यग्रह सम्भवेन लक्षणायां बीजत्वाभाव इति भावः। तत्। लक्षणा बीजत्वं। यष्टीरिति। यष्टीः प्रवेशयेत्यत्र यष्टिपदस्य यष्टिधरे लक्षणा। नच तत्र मुख्यार्थयष्टौ प्रवेशनान्वया नुपपत्तिरिति व्यभिचारादित्यर्थः। ननु मुख्यार्थे इतरानुयानुपपत्तिर्नलक्षणा बीज-

सा चेहाप्यस्ति। स्यादेतत्। गङ्गायांघोष इत्यादौ लक्षणा प्रयोजनं शैत्यपावनत्वादिप्रतीतिः। नच तत्प्रतीतिर्लक्षणा साध्या। प्रयोजनाभावात्। लक्षणायाश्च प्रयोजनवत्त्वनियमादिति चेन्न। लक्ष्यप्रतीतेरेव प्रयोजनत्वात्। तथापि प्रयोजनान्तरंनास्तीति चेत्। ततः किं लक्षणया प्रयोजनय-

---

मपितु तत्तात्पर्यविषयानुपपत्तिरेवेति क्वाभिचारइत्याशंकते। तात्पर्येति। अत्रापीति। यष्टीः प्रवेशयेत्यत्रापीत्यर्थः। अस्तीति। भोजन प्रयोजनकप्रवेशनमेवात्र तात्पर्यविषयः तदनुपपत्तिर्मुख्यार्थयष्टावस्त्येवेत्यर्थः। सर्वत्रेति। गङ्गायांघोष इत्यादावपीत्यर्थः। अस्तुवाकोदोषइत्यत आह। साचेहापीति साच। तात्पर्यानुपपत्तिश्च। इहापि। गच्छगच्छसीत्यादि व्यञ्जनास्थलेपि। अस्तीति। अत्र कान्तगमनाभाव एव तात्पर्यविषयः तदन्यथा नुपपत्त्या गमनबोधकपदस्य गमनाभाव लक्षणयैवोपपत्तौनातिरिक्तवृत्तिकल्पनं गौरवादितिभावः। लक्षणा प्रयोजनम्। तीरेलक्षणा प्रयोजनं। शैत्येति। स्यायत्ते शब्दप्रयोगे किमित्यं वाचकं प्रयुञ्जामाह इति न्यायाद्गङ्गातटेघोष इति विहायगङ्गायांघोष इति लक्षणाया प्रयोगस्तच्छैत्यपावनत्वादि प्रतीत्यर्थमेवेत्युन्नीयते लक्षणायाः प्रयोजनवत्त्वनियमादिति भावः। तत्प्रतीतिः। शैत्यपावनत्वादिप्रतीतिः। लक्षणेति-शैत्यपावनत्वादौ लक्षणा साध्येत्यर्थः। प्रयोजनाभावात्। प्रयोजनस्य प्रयोजनान्तराभावोदित्यर्थः। प्रयोजनाभावेपि लक्षणायां कोदोषइत्यत आह। लक्षणायाश्चेति। यथागङ्गापदस्य तीरे लक्षणायां लक्ष्यप्रतीत्यतिरिक्त शैत्यपावनत्वादिप्रतीतिः प्रयोजनं तथा शैत्यपावनत्वे लक्षणायां तस्याः प्रयोजनान्तराभावाल्लक्षणयानिर्वाहेण प्रयोजनप्रतिपत्तये व्यञ्जनाख्यवृत्तिरादरणीयेति भावः। शैत्यपावनत्वादौ लक्षणैव। नच तस्याः प्रयोजनाभावः शैत्यपावनत्वादि प्रतीतेरेव प्रयोजनत्वादिति समाधत्ते। लक्ष्येति। तथापि। लक्ष्यप्रतीति प्रयोजनकत्वेपि। प्रयोजनान्तरम्। लक्ष्य प्रतीत्यतिरिक्तं। प्रयोजनान्तरं। ततः किं। लक्ष्यप्रतीत्यतिरिक्त प्रयोजनाभावेकिमनिष्टमित्यर्थः। ननु लक्षणाया लक्ष्यप्रतीत्यतिरिक्त प्रयोजनवत्त्वनियमभङ्गएवानिष्टमित्यत आह। लक्षणाया हीति। ननु गौरवेप्यत्रच दृष्टत्वात्तथा कल्पनीयं नत्वत्र कार्यकार-

क्त्वेन नियमोनतु लक्ष्यप्रतीत्यतिरिक्तप्रयोजनत्वेन। गौरवात् अप्रयोजकत्वाच्च। स्यादेतत्। नानार्थस्थले तात्पर्यं विशेषप्रत्यये प्रकरणादि निर्णायकं। तथाच यत्र प्रकरणादि शून्यार्थान्तरं प्रतीयते तत्र नाभिधामूलं सहकार्यभावात्। नापि लक्षणा। अयोग्यत्वादिति चेन्न। प्रकरणादीनामननुगततया सहकारित्वानुपपत्तेः। तात्पर्यग्राहकत्वे नैषामनुगम इति चेत्। तर्हि लाघवात्तात्पर्यज्ञानमेव हेतु र-

---

णाभावे गौरवमित्यत आह। अप्रयोजकत्वाच्चेति। तर्हि यत्र क्वचिद्दर्शनमात्रे गौरव तादृशनियमावधारणं मानाभावादिति भावः। तथाच लक्षणयैव प्रयोजनप्रतीति निर्वाहेन वृत्त्यन्तरकल्पनमिति। प्रसिद्धतया लक्षणा मूलकांव्यञ्जनां निरस्याभिधामूलां तां निरसितुं शंकते। स्यादेतदि। नानार्थेति। सैंधवमानयेत्यादौ। अर्थविशेषेति। अश्वादिरूपार्थप्रत्यये। प्रकरणादिति। गमनप्रकरणादि। निर्णायकमिति। शक्तावच्छेदकैक्येसति शक्यतावच्छेदकनानात्वमेव नानात्वं तत्र सैंधवमानयेत्यादौ भोजनप्रकरणे शक्त्य विशेषालक्षणस्थेवाश्वादेरपि प्रतीत्यापत्त्याऽभिधयानानार्थ विषयकशब्दबोधे जननीये प्रकरणादिकं सहकार्यवश्यं वाच्यमिति भावः। प्रकरणादि शून्ये ति। गमनादिप्रकरणादि शून्याश्वादिरूपार्थां तरमित्यर्थः। तत्र। अर्थान्तरप्रत्यये। अभिधा। शक्तिः। सहकारीति। गमनादि प्रकरणरूपसहकार्यभावादित्यर्थः। लक्षणा। मूलमित्यनुषज्यते। अयोगात्। लक्षणाया अयोगात्। मुख्यार्थानुयानुपपत्त्याहि लक्षणा कल्पनं प्रकृतं च तदसम्भवेन न लक्षणेति भावः। अतः। अर्थान्तरप्रत्ययानुरोधेन। तथाच तत्प्रतीत्यर्थं व्यञ्जनारूपवृत्त्यन्तरमावश्यकमिति भावः। नानार्थस्थलेऽर्थान्तरप्रतीतिः शक्त्यैव। नच प्रकरणाभावेन सहकार्यभाव इति वाच्यम्। तस्य सहकारित्वासम्भवादिति न वृत्त्यन्तरमिति समाधत्ते। प्रकरणादीनामिति। सहकारित्वेति। नानार्थ विषयक शाब्दत्वावच्छिन्नं प्रतिप्रकरणादीनां न कारणता अननुगमेन व्यभिचारादित्यर्थः। तत्तत्प्रकरणादीनाम ननु गमेपि तात्पर्यग्राहकत्वे नानुगमान्न व्यभिचार इत्याशंकते। तात्पर्येति। लाघवादिति। नानार्थ विषयक शाब्दत्वावच्छिन्नं प्रति तात्पर्य-

स्तु । तत्रेहाप्यस्ति । लक्षणा हि पदवृत्तिरित्यस्तु पदतदे-
कदेशसाक्ष्य रचनार्थभंग्यादेर्या कारास्रितेत्याश्रयभेदाल्लक्ष
इति चेन्न । असिद्धेः । तदेकदेशादयोऽर्थविशेषेतात्पर्य-
ग्राहका नतु तत्प्रतिपादकाइति । स्यादेतत् । लक्ष्ये तात्पर्य-
ज्ञानं लक्षणा सहकारि । नतु व्यङ्ग्यार्थे तात्पर्यग्रहो नियतः ।
स्वार्थरचितकाव्यादौ तात्पर्यविषयस्यापि व्यंग्यस्य चम-
त्कारादिति चेन्न । व्यंग्यतात्पर्यग्रहस्यानपेक्षायां गङ्ग-

यग्रहजनकत्वेन कारणत्वापेक्षया लाघवात् तात्पर्यग्रहत्वेनैव हेतुतास्तीति न प्रकरणादीनां सहकारितेति भावः । ननुस्तु तात्पर्यग्रह एव सहकारी तथापि तत्स्वरूपसहकार्यभावादेव कथमभिधया परपदार्थे प्रतीतिरित्यत आह । सचेति । तात्पर्यग्रहस्येत्यर्थः । इहापीति । प्रकरणादि शून्यार्थान्तरस्थलेपीत्यर्थः । अस्तीति । नानार्थस्थले शक्त्या एकार्थप्रत्ययानन्तरं पदार्थान्तरप्रतीतिस्तत्रापि तात्पर्यग्रहोऽस्त्येवेत्यर्थः । तात्पर्यग्रहएवार्थ विशेषप्रत्यायकः । परन्तु यत्रार्थे प्रकरणं तत्र प्रथमत एव तात्पर्यग्रहादादावेवतदर्थ प्रतीतिरपरार्थे तु तात्पर्यग्राहकान्तरात्तात्पर्यग्रहे सत्यपरार्थप्रतीतिरिति कृतं वृत्त्यन्तर स्वीकारेणेति हृदयं । लक्षणयैव व्यंग्यत्वेनाभिमततत्तदर्थं प्रतीति निर्वाहेऽलं व्यञ्जनयेत्युक्तं तत्र लक्षणातोभेदं साधयति । स्यादेतदिति । पदवृत्तिः । पदनिष्ठाः । इयन्तु । व्यञ्जनात्वेनाभिमता तु । पदपदैकदेशेति । पदेपदैकदेशेवर्णे क्वचिद्वाक्यरचनाविशेषेक्वचिदर्थ भङ्गीविशेषे आकारे च । क्वचिदाश्रितेति । आश्रयभेदात् । लक्षणाव्यञ्जनयोराश्रयभेदात् । भेदः । लक्षणाव्यञ्जनयोर्भेदइत्यर्थः । असिद्धेरिति । व्यञ्जनात्वेनाभिमतवृत्तेः पदैकदेशाद्याश्रितत्वासिद्धेरित्यर्थः । कथं पदेकदेशादितोऽर्थविशेष प्रतिपत्तिरत आह । तदेकेति । पदैकदेशादयोहीत्यर्थः । नतु तत्प्रतिपादकाः । नतु तदर्थप्रतिपादकाः ये । तत्प्रतिपत्त्यनुकूलव्यञ्जनाख्यवृत्ति स्तत्र स्वीकरणीयेति भावः । लक्षणेति । लक्षणा जन्यशाब्दबोधे कारणमित्यर्थः । स्वेति । स्वेनरचितेत्यर्थः । यत्र स्वयं अन्यतात्पर्येण काव्यं रचितं श्रोतुश्चान्यपदार्थ शाब्दबोधस्तत्र । एवं देवताप्रसादादिना रचित

यांघोषइत्यादौ शैत्यादिकमेव प्रतीयते नतु केशवत्वकादिक-त्वमिति नियमोनस्यात्। वासनाविशेषपरिपाकान्नियमइ-ति चेत्। तर्हिलक्षणास्थलेपि सनियामकऽस्तु। ज्ञातंत-त्यर्थग्रहेणेति। वस्तुतो व्यञ्जनायां गच्छगच्छसीत्यत्रयोगा इत्यत्रइवशब्दात्यर्थमुन्नीयते। सम्भाव्यतेवा। नतुमागादिति-निर्णीयतइतिज्ञातंवृत्त्यन्तरेण। स्यादेतत्। यथेतेइवहृष्टो कथंतर्हिप्रजयतीत्यादौ प्रकर्षबोधः। नहिप्रादेःप्रकषादौ-शक्तिर्योगिकत्वात्। नचलक्षणा। अशक्तत्वात्। उच्यते।

काव्येतस्यार्थ ज्ञानाभावेन तदर्थं तात्पर्याभावेन च तात्पर्यग्रहासम्भवादिति भावः। च मत्कारादिति। च मत् कारिबोधविषयत्वादित्यर्थः। तथाच तात्पर्यज्ञानरूपमङ्गकार्यभावेन लक्षणया तदर्थबोधस्योपपादयितुमशक्यतया व्यञ्जनास्वीकार्येति भावः। व्यंग्य इति। गङ्गायां घोष इत्यादौ व्यञ्जनयाहि शैत्यपावनत्वं प्रतीयते इति त्वदभिमतं तच्च यदि न तात्पर्यग्रहापेक्षा तर्हि लक्षणायाः प्रयोजनवत्त्वनियमात् केशवालुकादिप्रतीतिरेव व्यञ्जनया स्यादिति तत्र तात्पर्यग्रहस्यावश्यापेक्षणे ज्ञातं वृत्त्यन्तरेणेति भावः। शंकते। वासनेति। सहृदयानां कश्चिदेव संस्काराविशेषः प्रतिभाव्यपदेश्यो येन शैत्यपावनत्वमेव प्रतीयते न केशवालुकादिकमित्यर्थः। नियम इति। शैत्यपावनत्वादेरेव भाननियमः। सएव। वासनाविशेषपरिपाक एव। नियामकः। तत्तदर्थविशेषबोधनियामकः। ननु तात्पर्यग्रहस्य लक्ष्यार्थबोधेऽनियामकत्वे लक्षणायां मुख्यार्थानूया नुपपत्त्युपयोगो न स्यात् लक्ष्यतात्पर्यग्राहकत्वेनैव तस्या उपयोगात् अत आह। वस्तुत इति। अस्याः। स्त्रियः। उन्नीयते। अनुमीयते। यच्च मानुमिति मामग्री तत्राह। सम्भाव्यतेवेति। उत्कटकोटिसंशयरूपसम्भावनाविषयीक्रियतेवेत्यर्थः। नत्विति। तथाच मागादित्यत्र गमनाभाव प्रतीतीच्छयो च रितत्वरूपतात्पर्यमात्र मुन्नीयते सम्भाव्यतेवा नतु शब्दात्मकस्तन्निर्णयः येन वृत्त्यन्तरं स्वीकरणीयमिति भावः। एते ए वेति। शक्ति लक्षणेएवेत्यर्थः। तर्हीति। प्रजयतीत्यत्र प्रकृष्टो जयोबुद्धाते तत्र जिधातोर्जयार्थः प्रकर्षस्य कस्यार्थः प्रादेरूपस-

जयतीत्यत्र प्रकृत्यजयलक्षकः । प्रशब्दस्तात्पर्यग्राहकः । तत्त्वमेव च द्योतकत्वं । नचजयः शक्यएवप्रकर्षोलक्ष्यइतिवाच्यं । जयमात्रंहि शक्यंननुविशिष्टजयः । तदाहुः । शक्या-दन्येनरूपेणज्ञाते भवतिलक्षणेति । ननुप्रादेरेव प्रकर्षादौ नकथंशक्तिः कल्पनइति चेन्न । अन्यलभ्यत्वादितिगृहाण ।

र्गस्य शक्त्य नङ्गीकारात् व्यञ्जनाख्यावृत्तिः स्वीकरणीयेत्याखण्डलार्थः । तस्य । प्रादेरुपसर्गस्य । द्योतकत्वात् । व्यञ्जकत्वाङ्गीकारादित्यर्थः । अशक्तत्वादिति । उपसर्गाणां क्वचिदपि शक्त्यभावे न शक्यसम्बधरूपायालक्षणाया असम्भवादित्यर्थः । तथाच प्रकर्षबोधार्थं व्यञ्जनास्वीकार आवश्यक इति भावः । जयतिः । जीधातुः । जिधातुनैव लक्षणया प्रकर्षबोधे प्रशब्दवैय्यर्थ्यमत आह । प्रशब्दस्त्विति । तात्पर्येति । प्रकृष्टजयतात्पर्यग्राहकइत्यर्थः । प्रशब्दसमभिव्याहरब्दवतिधातुः प्रकृष्टजयप्रतीतिच्छयोच्चरित इति तात्पर्यग्राहात् । अन्यथा जयतीत्यत्रापि प्रकर्षबोधापत्तेरिति भावः । नन्वेवमुपसर्गाणां द्योतकत्वप्रवादव्याघातइत्यत आह । तत्त्वमेवेति । तात्पर्यग्राहकत्वमेवेत्यर्थः । तटस्थः शंकते । नचेति । जयः शक्यएव । जिधातोः शक्यएव । तथाच शक्त्यैव तदर्थबोधसम्भवे किमर्थंतदंशेपि लक्षणेति भावः । प्रकर्षइति । तच्च शक्त्यभावादिति भावः । शक्यंजिधातोः । विशिष्टजय इति । प्रकृष्टजयइत्यर्थः । तथाच जिधातोर्जयत्वं शक्यतावच्छेदकमिति प्रकृष्टजयत्वप्रकारकबोधोविनालक्षणां न सम्भवतीति तेन रूपेणलक्षणा । नच जयस्य शक्त्या प्रकर्षस्य च लक्षणया बोधे बाधकाभाव इति वाच्यं । युगपद्वृत्तिद्वयविरोधेन शक्तिलक्षणाभ्यां युगपद्बोधासम्भवादिति भावः । ननु जयस्य शक्यत्वात्कथं तत्र लक्षणेत्यतः प्राचांसंवादमाह । तदाहुरिति । शक्यादिति । शक्यतावच्छेदकविशिष्टे शक्तिस्वीकारेण शक्यतावच्छेदकस्यापि शक्यत्वात्तदन्येनरूपेण ज्ञाते लक्षणाभवतीत्यर्थः । व्यक्तावेव शक्तिरिति नव्यमतेतु शक्यादित्यस्य शक्यतावच्छेदकादित्यर्थोवसेयः । ननु प्रादेरुपसर्गस्य प्रकर्षशक्तिः जिधातुनाच जयबोधइत्यस्त्विति उपसर्गे शक्तिवादी शंकते । नन्विति । अन्यलभ्यत्वादिति । धातोर्लक्षणादिना लभ्यत्वादित्यर्थः । अन्यथा गङ्गापदस्यापि तीरे शक्त्यापत्तेरिति भावः । ननु व्यतिसेत्यादौ अस्धातोर्लोपात् कथं व्यत्ययप्रत्ययः । धातोस्त-

व्यतिमेत्यत्र तु लुप्तोधातुरेवार्थंप्रत्याययति । धातुलोपमज्ञान-

---

च लुप्तत्वेन लक्षणा सम्भवादनाय त्याउपसर्ग एव शक्तिरत आह । व्यतिम इति । लुप्तोधातुरिति । स्मृतः सन्निति शेषः । धातोरप्रतिसन्धाने व्यत्ययबोधाभावे इष्टापत्तिमाह । धातुलोपमिति । ननु उपसर्गएव शक्तिः धातोरेव तात्पर्यग्राहकत्वमित्येव किंन स्यादत आह । संक्षेप इति । उपसर्गं विनापि जयतीत्यत्र धातुप्रयोगात्तत्र शक्तिरावश्यकी केवलस्योपसर्गस्य चाप्रयोगान्न तुल्यत्वम् । एवं धातोरशक्तत्वे प्रजयतीत्यादौ जये आख्यातार्थभावनान्वयोनस्यात् । प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वमिति व्युत्पत्तेरितिध्येयं । नच जीधातोर्जयवत्प्रकर्षेपि शक्तिरेवास्तु किंतत्र लक्षणया एकतिङुपस्थाप्यकृतिवर्तमानत्वयोरिव एकपदार्थयोरपि प्रकर्षजययोः परस्परमन्वयः धातूनामनेकार्थत्वस्य च क्लृप्तत्वादिति वाच्यं । धातूनामनेकार्थत्वं हि न सर्वत्र सर्वार्थकत्वं किंन्तु व्याकरणकोशाद्यभियुक्ततत्तदर्थकत्वं तत्तु लक्षणयापि प्रकर्षबोधोपपत्तेर्न शक्तिमाधकमिति । अथैवं प्रत्ययमात्रस्यैव निरर्थकत्वप्रसङ्गः; घटमित्यादावपि घटपदस्य घटकर्मत्वे लक्षणयैवोपपत्तेरिति चेन्न । घटमानयेत्यादौ घटपदस्य घटकर्मत्वे लक्षणोपगमे चैत्रः पचतीत्यत्र पचधातोरेवपाककृतौ लक्षणायां तयोरानयनचैत्रयोरनन्वयापत्तिः । नामार्थयोरपि अभेदातिरिक्तसम्बन्धेन साक्षादन्वयबोधानुपगमात् । नच तथापि द्वितीयादेरेकत्वशक्तौ बीजाभावः । घटपदस्यैकत्वविशिष्टघटे लक्षणयाप्युपपत्तेः । अमः कर्मत्वे शक्तिः एकत्वविशिष्टघटे लक्षणायां तात्पर्यग्राहकत्वाच्च : एवं पचेत्यादौ कार्यत्वेष्टसाधनत्वादेरपि विध्यर्थत्वविलोपः । पचधातोरेवेष्टसाधनत्वविशिष्टपाके लक्षणयाप्युपपत्तेः । विधिः कृतौ शक्तः विशिष्टार्थे तात्पर्यग्राहकश्चेति वाच्यं । घटपदादेर्वा विशिष्टे लक्षणा द्वितीयादेर्वा एकत्वे इत्यत्र विनिगमनाविरहाद्द्वितीयादेरेकत्वबोधकत्वे सिद्धे कर्मत्वत्वं वाशक्यतावच्छेदकं एकत्वादिकंवेत्यत्र विनिगमनाविरहाल्लाघवाच्च तत्र शक्तिः एवं पचेतेत्यत्र धातोर्वा विशिष्टे लक्षणाविधेर्वाकार्यत्वेष्टसाधनत्वे इत्यत्र विनिगमनाविरहेण विधेरपि कार्यत्वं भावाबोधकत्वे सिद्धे लाघवात्तत्र शक्तिरेवेति। एवं च उपसर्गाणां मध्येयस्य उपसर्गस्य क्वचिदप्यर्थे शक्तिर्न प्रामाणिकी तस्य द्योतकत्वमेव । तथा प्रदोषस्य च शक्तिः प्रामाणिकी तस्य बोधकत्वमेव ।

यद्यपि निरूपादेरन्यथा उपलब्धमित्यव्ययीभाव समासानुपपत्तिः । तस्य निरर्थकत्वेन निराकाङ्क्षत्वात् पूर्वं वाच्यं भवत्यस्य सोव्ययीभावइष्यते इत्यनुशासनात् । नच प्रादेरपि निरर्थकत्वेन तेनसह समासानुपपत्तिः । नाम्नामेव समासविधानात् । वस्तुवाचिन एव नामत्वादिति वाच्यं । स्वाद्यन्तमिह नामेष्टमित्यनेन स्वाद्यन्तत्वेन तस्यापि नामत्वात् । वस्तुवाचीनि नामानीत्यस्यैकदेशिमतत्वात् । केचित्तु । प्रोत्तरत्वेनप्रकृष्टजयेशक्तिरिति उपसर्गाणां शक्ति तावच्छेदकत्वं मिदमेव द्योतकत्वं तथाचोपसर्गाणा मौपसन्दानिकीशक्ति रित्याहुः । भुक्त्वा व्रजतीत्यत्र भोजने पूर्वकालीनत्वस्य नियमेन प्रतीतः पूर्वकालीनत्वं त्क्वाप्रत्ययार्थः । नच माल्यादीनां व्यवधानेपि तथा प्रयोगापत्तिरितिवाच्यं । तथाविवक्षायामिष्टत्वात् । अन्येतु अव्यवहित पूर्वकालीनत्वं वाच्यम् । अव्यवधानंच क्रियान्तरानुकूलविलम्बाभाववत्त्वमेव तदनुकूलक्रिया यास्तदव्यवधायकत्वात् इन्द्रियव्यापाराणामित्याहुः । अच चक्षणविषयांतरसञ्चारेपि भुक्त्वाव्रजतीति प्रयोगात् क्रियान्तरानुकूलविलम्बाभाववत्त्वरूपाव्यवधानस्य दुर्वचत्वात् । तदुत्पत्तिक्षणोत्पत्तिकध्वंस प्रतियोगिकालत्वमेव तदव्यवहितपूर्वकालत्वं । कालश्चाच यावताकालेन भोजनानन्तरं व्रजनव्यवहारः तावान्स्थूलकालोपाधि र्विशेषनिवेशनीयः । तेननासम्भवः । ननु दिवसादिरूपोपि । तेन नदिवसादिना बिलम्बे भुक्त्वाव्रजतीतिप्रयोगापत्तिरिति केचित् । तत्तु कालस्य तत्तद्व्यक्तित्वेन निवेशेनाननुगतत्वाद्दुर्ज्ञेयं । तस्मात्पूर्वकालत्वमेव त्क्वावाच्यं । ननु मुखं व्यादायस्वपतीत्यादौ ओष्ठपुटविभागरूपव्यादानस्य स्वापोत्तरकालीनत्वाद्व्यादानेस्वापपूर्वकालत्वाभावेनकथं त्क्वानिर्देश इतिचेन्न । स्वापपूर्वकालेपि व्यादानसम्भवेन तथा प्रयोगात् । सुप्तव्यादत्तइत्यत्रैव निरूढ लक्षणया तथा प्रयोगाद्वेति । प्राभाकरास्तु समानकर्तृकत्वमेव त्क्वावाच्यं । नियमेन तेनरूपेणबोधासमानकर्तृकक्रियाद्वयस्यैकदासम्भवाद्भोजनव्रजनयोरेककर्तृकत्वेऽवगतेऽस्यापरपूर्वकालत्वस्यात्रेपि लाभान्न पूर्वकालत्वेपि शक्तिः विभिन्नकर्तृकेपि पूर्वकालत्वसम्भवेन तेन समानकर्तृकत्वाच्चेपासम्भवात् समानकर्तृकत्वे शक्तिरेव । नचयज्ञोपवीतं वहन् पत्यानमीक्षमाणोऽधीयानोगच्छतीत्यादौ युगपदनेक क्रियाकर्तृत्वस्य एकस्मिन्न पि सम्भवान्न ते न पूर्वकालत्वाक्षेपो युक्त इति वाच्यं । तथाप्येककर्तृकप्रधान क्रियाद्वयस्ययुगपदसम्भवेन तयोः पूर्वोत्तरभावनिय-

मात्। " न चाव जानामिमां यस्मादतस्तेन भविष्यति । मत्प्रसूतिमनाराध्य-प्रजेतित्वांशशापसेत्यत्र" मत्प्रसूतिमनाराध्यते प्रजा नभविष्यतीतिभिन्न कर्तृ-केपि तत्रानिर्देशात्साक्षात्यं समानकर्तृकत्वं तत्रावाच्यं । तत्रानाराध्यस्थित स्येति-क्रियान्तरमध्याहृत्य समाधानस्य सम्मतत्वादित्याहुः। तदसत्। समानकर्तृ-कत्वस्य तत्रावाच्यत्वे तस्यप्रधान क्रियापेक्षयोत्तरकालत्वेनाप्युपपत्तेः। नच भोजनेनियमेन पूर्वकालत्वात्क्षेपसम्भवः। नच भोजनव्रजन क्रिययोरेकः कर्ते-ति नानुभवोऽपितु भोजन क्रियाव्रजन क्रियाएककर्तृकेति। तथाभुजि क्रिया-याः प्रधानत्वेनोपस्थितेस्तत्रैवपूर्वत्वान्वयइति वाच्यं। प्राधान्ये नोपस्थितेर्हि आकांक्षाभावः प्रयोजकत्वेन शाब्दबोधे कथञ्चिन्नियामकत्वंस्यात्। इह त्वाक्षे-पोनसम्भवत्यत्र व्याप्यपक्षधर्मतयोरेव प्रयोजकत्वेन पौर्वापर्यावधारणसम्भवे-पि पूर्वत्वमात्राक्षेपे कलिङ्गाभावेन पूर्वत्वाक्षेपासम्भवात्। नचपरमतेशब्दानु-पस्थितस्यापि शाब्दे भानमिति वाच्यं । शाब्दीतिन्यायेन तन्मतस्य दुष्टत्वात्। नच भुक्त्वाव्रजतीत्यत्र आख्यातार्थकालावरुद्धत्वेन व्रजनस्य कालान्वयनिरा-कांक्षतया तदनवरुद्धत्वाद्भुजि क्रियायामेवपूर्वत्वान्वयः । इत्यञ्चकालान्तरस-म्बन्धित्वेनानुपस्थितिरेव प्राधान्ये नोपस्थितिः सैवचनियामिकेति वाच्यं । प-दानुपस्थितस्य शाब्दबोधाविषयतया कालान्तरासम्बन्धित्वेनोपस्थितेरकिञ्चि-त्करत्वात्। किञ्चित्समानकर्तृकत्वेन न पूर्वत्वाक्षेपः। किन्तुसमानकर्तृकप्र-धान क्रियाद्वयस्यैकज्ञाने सम्भवात्प्रधानसमानकर्तृकत्वेन पूर्वत्वाक्षेप इति वाच्यं । तच्चप्राधानत्वं न तावन्मुख्योद्देश्यत्वं मुख्यत्वञ्च इदम्भवतुमाभवतुवा इदन्तुस्यादेवेत्यनवस्थाविरहरूपंक्रिययोस्तुल्यवदुद्देश्यत्वेपि एकदासम्भवेन-व्यभिचारात्। तथोद्देश्यतायाश्चविनिगन्तुमशक्यत्वात्। किञ्चसमानकर्तृक-त्वे एव परेण शक्तिरूपेयते नतुप्रधानत्वेपीति कथन्तेनपूर्वत्वाक्षेपः। तदंशेपि-शक्त्यभ्युपगमेतुकिमपराद्धं पूर्वकालीन त्वेनेति नकिञ्चिदेतत्। नच समान-कर्तृकत्वस्य नियमे न प्रतीतिस्तत्रापिशक्तिरिति वाच्यं। अभिन्नकर्तृकत्वरूपे-समानकर्तृकत्वेअभेदांशे शक्त्यभावेपिकर्तृलकाराभ्यांभोजनकर्त्तरि व्रजन-कर्तुरभेदान्वयबोधसम्भवात्तयोः क्तिमाचवाक्तिव्रजनपूर्वकालीनभोजनक्त-तिमान्व्रजनक्तिरित्यन्वये भोजनव्रजनक्त्योश्च ऐकाधिकरण्यस्यापि भा-नसम्भवात्। अन्यसमानकर्तृकत्वस्याशक्यत्वेचैचो गच्छतिमैचो भुंक्ते इति

प्रयोगवत् चैत्रो भुक्त्वामैत्रोगच्छतीति भिन्नकर्तृकेपि क्त्वाप्रयोगप्रसङ्ग इति वाच्यं । वस्तुतःसमानकर्तृकक्रियायामेकत्क्त्वासाधुत्वात् । भोक्तुं व्रजतिपश्यन् व्रजतीत्यत्र वलट्तुमुनोरपि समानकर्तृकत्वे शक्ते केनाप्यनङ्गीकारात् मणिकृतस्तु । आनन्तर्यमेवत्क्त्वावाच्यं पूर्वकालत्वस्य शक्यत्वे व्रजनपूर्वकालीने भोजनमिति भोजनविशेष्यकानुभवः स्यात् जायतेतुभोजनानन्तरं व्रजनमिति व्रजनविशेष्यकानुभवस्य बाधानुभवस्यात्र विनिगमकत्वेनानन्तर्यमेव क्त्वावाच्यं । नच पूर्वकालत्वस्य शक्यत्वेपि तस्य निरूपकतासम्बन्धेन व्रजनेऽन्वयोपगमे व्रजनविशेष्यकोऽनुभव उपेयतएवेति वाच्यं । नभुक्त्वाव्रजतीत्यत्र व्रजनेस्वरूपसम्बन्धेन पूर्वकालत्वस्याभावबोधने भुक्त्वाव्रजत्यपिन भुक्त्वाव्रजतीति प्रयोगप्रसङ्गात् भोजननिष्ठपूर्वकालत्वस्य व्रजनेऽसत्त्वात् तन्नियामकसम्बन्धस्याभावप्रतियोगितानवच्छेदकतया निरूपकतया तदभावबोधासम्भवादित्याहुः । केचित्तु, सत्यपिकदाचिदध्ययने अधीत्यतिष्ठतीत्यप्रयोगा न्निरन्तराध्ययनशालित्वेतत्प्रयोगाच्च कदाचित्सामानाधिकरण्यविशिष्टाध्ययनव्याप्यत्वमपि क्त्वा प्रत्ययार्थः व्याप्तिश्चकालिकी । तथाचाध्ययनसामानाधिकरण्यविशिष्टाध्ययनव्याप्यस्थितिमानित्यन्वयधीः । निरन्तराध्ययनविरहिणि अन्यदीयतथाध्ययनमादायातिप्रसङ्गवारणाय सामानाधिकरण्यनिवेशः । नच स्वीयाध्ययनसामानाधिकरण्यविशिष्टपरकीयाध्ययनव्याप्यस्थितिमादाय तथाप्यतिप्रसङ्गोदुर्वारइति वाच्यम् । प्रधानक्रियायांप्रकृत्यर्थीभूते कर्तृव्यक्तिनिरूपितयोरिव सामानाधिकरण्यव्याप्यत्वयोः क्त्वाप्रत्ययेनबोध्यत्वस्य व्युत्पत्तिविशेषबलेनकल्पनात् । एतेनपूर्वकालत्वस्यैव क्त्वावाच्यत्वेव्यादानशून्यकालेपि मुखं व्यादाय स्वपतीत्यादिप्रयोगापत्तिरित्यपिनिरस्तम् । आद्यापिव्याप्यत्वस्यैव क्त्वाबोध्यत्वात् । तत्स्वापेव्यादाननिरूपितव्याप्तेरभावादेवतथाप्रयोगापत्त्यसम्भवात् । भुक्त्वैवाहंदृष्टो नतुपीत्वेत्यादौभोजनपानयोस्तन्निष्ठपूर्वकालत्वस्य दृष्टौतदानन्तर्यस्यवाऽविशेषेपि तथा प्रयोगात् जन्यत्वमपिक्वचित् क्त्वाप्रत्ययार्थः । एवं च भुक्त्वाव्रजतीत्यादौ पूर्वकालत्वमानन्तर्यंवा उक्तस्थले च सामानाधिकरण्यविशिष्टव्याप्यत्वंजन्यत्वंचार्थ इति क्त्वाप्रत्ययोनानार्थएवेत्याहुः । अपरेतु क्त्वाप्रत्ययस्य क्त्वप्रत्ययान्तर्गतत्वात्सामान्यशक्त्याऽन्ययोपस्थिते क्त्वप्रत्ययेन सम्भवात् व्यादानाश्रये स्वापाश्रयत्वस्य विशिष्टवैशिष्ट्यमिति न्यायेनैवबोधः । विशिष्टवैशिष्ट्यमिति न्यायेन शाब्दबोधे चोद्देश्यतावच्छेदकविधेयतयोः

तस्त्वार्थप्रत्ययाभावादिति संक्षेपः । स्यादेतत् । आख्या-

समानकालीनत्वभानं व्युत्पत्तिसिद्धं । अन्यथा तिलकीकर्मकुर्वीतेत्यादौ तिलकविशिष्टे कर्मकरणवैशिष्ट्यलाभेपि तिलकैभत्वे वचकर्मकरणमित्यस्या प्राप्यातिलकशून्यकालेपि कृतस्य कर्मणः नैष्फल्यानापत्तेः । तद्विधायैकैतद्वाक्यस्यानर्थक्यापातात्च । तथाचैतादृशव्युत्पत्त्याकर्मकरणे तिलकसमान कालीनत्वस्य भानेतच्छून्यकाले चतत्समाजकालीनत्वस्याभावन्नैष्फल्योपपत्तिरिति प्रकृतेपि मुखंव्यादाय स्वपतीत्यादौ व्यादानविशिष्टे स्वापाश्रयत्ववैशिष्ट्यभाने व्यादानसमानकालीनत्वस्यभानात् व्यादानशून्यकाले तथाप्रयोगापत्त्यसम्भवः ।• एवमधीत्यतिष्ठतीत्या दावपीत्याहुरितिदिक् । एवमेवकारस्यान्ययोगव्यवच्छेदः । अयोगव्यवच्छेदोऽत्यन्तायोगव्यवच्छेदश्चार्थः । तत्र विशेष्यसङ्गतएव कारस्थले पार्थ एव धनुर्धरइत्यादौ पार्थान्यतादात्म्यव्यवच्छेदोबुध्यते पार्थान्यतादात्म्या भाववद्वनुर्द्धराभिन्नपार्थ इति बोधः । पृथिव्यामेव गन्धइत्यत्र पृथिव्याः न्यासमवेतत्वाभाववानपृथिवीसमवेतश्चगन्ध इति बोधात्प्रथमेतरविशेषण विभक्ति समभिव्याहृतत्वमपि नियामकमत्र च भावान्वयबोधानुपगमे पृथिव्यामेव आकाशमित्यपि प्रसज्येत तथा चान्ययोगव्यवच्छेदबोधे विशेष्यवाचकपदप्रथमेतरविशेषण विभक्त्यन्यतर समभिव्याहृतैवकारोहेतुः । विशेषणसङ्गतैवकारस्थले अयोगव्यवच्छेदबोधः यथा शंखः पाण्डुरएवेत्यादौ शंखत्वावच्छेदेन पाण्डुरत्वायोगव्यवच्छेदबोधात् । नीलंसरोजंभवत्येवेत्यादौ क्रियासङ्गतैवकारस्थलेऽत्यन्तायोगव्यवच्छेदबोधः अयोगे आत्यान्तिकत्वस्यान्वयितावच्छेदकव्यापकत्वरूपस्य व्यवच्छेदइत्यर्थः । इत्थञ्चान्वयितावच्छेदकसामानाधिकरण्येनायोगव्यवच्छेदः अत्यन्तायोगव्यवच्छेदः । अन्वयितावच्छेदकावच्छेदेनायोग व्यवच्छेदोऽयोग व्यवच्छेद इति परिभाषेतिध्येयम् । आख्यातस्येति । आख्यातत्वंनजातिः । तिङ्त्वादिनासाङ्कर्यात् । नापिदशलकारसाधारणं लत्वन्तत् तन्नाच साधारणस्यैकस्यनित्यादि लादेशस्थलेप्याख्यातार्थ कृतिबोधापत्तिरिति विभाव्यते तदभावात् । किन्तु रूढिसम्बन्धेनाख्यातपदत्वं तत् । यदिचलकारेषु वाभियुक्तानामाख्यातपदरूढिः तथाच पचलत्वस्यादातिङन्तस्वादिकमेव विशिष्यशक्तावच्छेदकम्बोध्यं । नचैवं केवलतिप्पदादपि कृतेर्बोधापत्तिः । आनुपूर्वीज्ञानस्यापि स-

तस्य तावद्गुल एवगकार:पचतीत्यस्य पाकङ्करोतितिविवरणात् । व्यवहारवद्विवरणादपि शक्तिनिर्णयात् । तथाच-

---

हकारित्वात् पाकोयत्नश्चेतिनिराकाङ्क्षवाक्यात् । पचतीत्यत्रैव पाकानुकूलयत्नबोधापत्तिवारणायाख्यातपदजन्यपाकानुकूलयत्नविषयकशाब्दबोधंप्रतितिबादिपदनिष्ठपचादिधात्वव्यवहि तोत्तरत्वरूपानुपूर्वीज्ञानस्य हेतुत्वजल्पनाया आवश्यकत्वात् । यत्नएवेति । यत्नत्वं शक्यतावच्छेदकमित्यर्थः । नच पाकगोचरनिर्वृत्तिकालेपचतीति प्रयोगापत्तिरिति वाच्यं । प्रवृत्त्यभावार्तिरिक्त निर्वृत्त्याख्ययत्ने मानाभावात् । त्रिलक्षण विषयतासम्बन्धेन वा पाकस्य कृतावन्वयेनादोषत्वाच्च । करोतीति । पूर्वोच्चरितवाक्यस्योत्तरवाक्येनार्थ कथनं हि विवरणं । तथाच यत्नत्वविशिष्ट शक्तिकृधातुनाऽऽख्यातस्य विवरणादाख्यातस्य यत्नवाचकत्वमिति भावः । कृतश्च यत्नाभिधायकत्वं सिद्धमेव । अन्यथा तस्य व्यापारवाचकत्वे व्यापारजन्यत्व प्रतिसन्धानाविशेषेपि यत्नजन्यत्व प्रतिसन्धाना प्रतिसन्धाभ्यां पटांकुरयोः कृता कृतव्यवहारानुपपत्तेः । ज्ञातेत्यत्रैव कर्तेत्यत्रापि कृत्याश्रयबोधाच्च । तथाआख्यातपदं यत्नत्वावच्छिन्नेशक्तं यत्नत्वावच्छिन्नशक्तकरोतिधातु प्रतिपादितार्थकत्वात् । यद्यद्धर्मावच्छिन्नशक्त प्रतिपादितार्थकभवति तत्तद्धर्मावच्छिन्ने शक्तं भवतिपाकत्व विशिष्टेशक्त पाकपदप्रतिपादितार्थकपचधातुवदिति सामान्यतोदृष्टानुमानेन विवरणस्य शक्तिग्राहकत्वात् । ननु विवरणस्य शक्तिग्राहकत्वे किं मानमत आह । व्यवहारवदिति । तथा सति तुल्ययुक्त्या व्यवहारस्यापि शक्तिग्राहकत्वानुपपत्तेरिति भावः । तथाचोक्तं । "शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद्व्यवहारतश्च । वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाइति" । नच विवरणस्य शक्तिग्राहकत्वेयत्र कर्तुरपि विवरणात्तत्रापि शक्तिः स्यादिति वाच्यं । असतिबाधके इत्यनेन विशेषणाद्धर्मिणि अन्यलभ्यत्वस्यैव बाधकत्वात् एवं आख्यातस्य व्यापार वाचकत्वे किं करोतीति यत्नप्रश्ने पचतीत्यस्योत्तरत्वानुपपत्तिरपि । तथाहि । यद्धर्मविशिष्टे यद्धर्मावच्छिन्नस्य सम्बन्धः प्रश्नवाक्यात्प्रतीयते तदुत्तरवाक्यात्तद्धर्म विशिष्ट एव तद्धर्मव्याप्यतद्धर्मावच्छिन्न सम्बन्धश्चेत्प्रतीतो भवति तदैव प्रश्नोत्तरभावनिर्वाहः । यथाकस्माद्दण्डइति प्रश्ने दण्डाद्दण्डइति उत्तरं ननु दण्डाद्व्यामिति । एवं च

रथोगच्छतीत्यत्र नमुख्यः प्रयोगः । रथादीनामचेतनतया गमनानुकूलप्रयत्नशून्यत्वात् । नापिलक्षणा । विभक्तौ लक्षणानङ्गीकारात् । अन्यथा व्यत्ययानुशासनवैयर्थ्यात् । अतः सिद्धं तृत्यंतरेणेतचेन्न । व्यत्ययानुशासनबलाद्विभक्त्यर्थेऽन्यस्मिन्न लक्षणा नत्वन्यत्रापि । इह चन विभक्त्यर्थेलक्ष-

---

क्तोयत्नार्थकत्वात्किंकरोतीति यत्नत्व विशिष्टे प्रश्नेपचतीत्यनेन व्यापारत्व विशिष्टे पाकसम्बन्धबोधेजातेपि नोत्तरत्वनिर्वाह इत्याख्यातस्यापि यत्नत्वविशिष्टवाचकत्वमवसेयमिति निगर्वः। तथा चेति । आख्यतस्य यत्नवाचकत्वेचेत्यर्थः । न मुख्येति । नाख्यातस्य शक्त्या प्रयोगइत्यर्थः । मुख्यार्थबाधमेवाह । रथादीनामिति । नापीति । लक्षणा । गमनानुकूल व्यापारे लक्षणा । अन्यथेति । विभक्तौ लक्षणाङ्गीकार इत्यर्थः । व्यत्ययेति । व्यासस्य कृतिः भारतस्य श्रवणमित्यादौ कर्तृकर्मकृद्योगेषष्ठीतः कर्तृत्वकर्मत्वबोधोऽनुभवसिद्धः । तथाच कर्मणिद्वितीया कर्तृकरणयोस्तृतीयेत्यनेन कर्मत्वकर्तृत्वार्थकत्वेन द्वितीया तृतीये विहितेशेषेषष्ठीत्यनेन च सम्बन्धसामान्ये षष्ठी विहितेति षष्ठीतः कर्तृत्व कर्मत्वबोधः कथ मतः कर्तृकर्मणोः कृतीति व्यत्ययानुशासनेन षष्ठ्याअपि कर्मत्वाद्यर्थकत्वमभिहितं । यदि च विभक्तौ लक्षणाङ्गीकारएव तदातत्सूत्रं विनैव लक्षणया कर्मत्वादिबोधस्योपपादयितुं शक्यतया तत्सूत्रानर्थक्यं स्यादित्यर्थः । अत इति । रथोगच्छतीत्यादौ गमनानुकूलव्यापारबोधस्य शक्तिलक्षणाभ्यामुपपादयितुमशक्यत्वादित्यर्थः । व्यत्ययेति । कर्तृकर्मणोः कृतीतिव्यत्ययानु शासनबलादित्यर्थः । विभक्त्यर्थेऽन्यस्मिन्निति । अनुशासितविभक्त्यर्थातिरिक्त विभक्त्यर्थे इत्यर्थः । नत्वन्यत्रापीति । अनुशासित विभक्त्यर्थातिरिक्त विभक्त्यर्थभिन्नेपि न लक्षणा इत्यर्थः । इह चेति । रथोगच्छतीत्यादौ आख्यातस्थले चेत्यर्थः । किन्तु व्यापार इति । व्यापरश्चनकस्याअपि विभक्तेरर्थ इत्यर्थः । तथाच विभक्तौ लक्षणास्त्येव । व्यत्ययानुशासनभिया विभक्तौ लक्षणा नास्तीति प्रवादस्तु एक विभक्तिरन्य विभक्त्यर्थे लक्षणानास्तीत्यभिप्रायकः । अन्यविभक्त्यर्थोऽनुशासित विभक्त्यर्थातिरिक्तोग्राह्यः । एवं च रथोगच्छतीत्यादौ आख्यातस्यानुकूलव्यापारलक्षणायां बाधकाभा-

णा । किन्तुव्यापारे । दृश्यते च विभक्त्यर्थेष्वानुशासनिकीलक्षणा । यथा क्त्योगे षष्ठ्याः कर्मत्वे । नच कर्मत्वमपि सम्बन्धः सच शक्य एवेति नलक्षणा । कर्मत्वत्वप्रकारकबोधस्य तया विनोऽसम्भवात् । तत्प्रकारकबोधो नभवत्येव किन्तुसम्बन्धत्वप्रकारक इति चेन्न । अनुशासनवैयर्थ्यात् । द्वितीय-

---

वात्र हत्यन्तर कल्पनमिति भावः । अनुशासित विभक्त्यर्थातिरिक्त विभक्त्यर्थे न लक्षणेत्यत्र अन्यस्मिन्नित्यस्य व्यावृत्तिं प्रदर्शयितुं आनुशासनिक लक्षणास्थलं दर्शयति । दृश्यते चेति । क्त्योगे । क्त्वात्ययोगे । कर्मत्वे लक्षणेति पूर्वान्वयि । यथा भारतस्य श्रवणं ग्रामंगन्तेत्यादौ भारतकर्मक श्रवणग्रामकर्मक गमनबोधः । ननु शेषेषष्ठीत्यनेन सम्बन्धमात्रे षष्ठीविधानात्कर्मत्वमपि शक्त्यैव षष्ठ्याबोध्यतां किं तत्र लक्षणयेत्या शंकते । नचेति । सच । सम्बन्धश्च । शक्य एव । षष्ठ्याशक्य एव । न लक्षणा । न कर्मत्वेलक्षणा । कर्मत्वत्वेति । सम्बन्धत्वस्यैव षष्ठीशक्यतावच्छेदकतया ततः कर्मत्वत्वप्रकारकबोधस्य विनालक्षणा मुपपादनासम्भवादित्यर्थः । तया । लक्षणया । तत्प्रकारकेति । कर्मत्वत्वप्रकारकेत्यर्थः । किन्त्विति । सचशक्त्यैवेति भावः । अनुशासनेति । कर्तृकर्मणोः कृतीति वार्त्तिकयानुशासनेत्यर्थः । षष्ठीतः कर्मत्वबोधनार्थंहितत् । तच्च शेषे षष्ठीत्यनेनैव सम्बन्धत्वेन कर्मत्वबोधोपपत्तौ निरर्थकंस्यादिति भावः । शंकते । द्वितीयया इति । तृतीया इत्यपि बोध्यं । असाधुत्वं । व्याकरणानिष्पन्नं तत् । अनुशासनं । भारतस्य श्रवणमित्यत्र कर्मणिद्वितीयेति सूत्रेण भारतं श्रवणमिति प्राप्तं तन्निषिध्यते । कर्तृकर्मणोः कृतीत्यनेन कर्तृकर्मबोधार्थं षष्ठ्येव साधुनतु द्वितीया तृतीया वेति द्वितीयाया असाधुत्व प्रतिपादकतयैव तत्सार्थकं । षष्ठीतु शेषे षष्ठीतु । शेषे षष्ठीत्यनेनैवेति भावः । निष्ठादीति । कर्तृकर्मणोः कृतीत्यनेन यदि कर्तृकर्मक्त्वयोगे कर्तृत्वत्वबोधार्थं षष्ठीविहितास्यात्तदानिष्ठा दियोगेपि तस्याः प्रसक्तौ नलोकाव्ययनिष्ठाखलर्थतृनामित्यनेन निष्ठादियोगे षष्ठीनिषेधोयुक्तः स्यात् तच्च न सम्मत इति भावः । एतत्सूचार्थोहि । नलोकेति । एषांयोगे षष्ठीनस्यात् । कर्तृकर्मणोः कृतीत्यनेन प्राप्तषष्ठीनिषिध्यते । लः । लादेशः । यथा ओदनपंचन् पचमान

याऽसाधुत्वज्ञापकमनुशासनमिति चेन्न। निष्ठादिवर्जनवैफल्यात। तच द्वितीयायाः साधुत्वज्ञापकत्वादिति चेन्न। क्त्वायोगे विकल्पविधानवैयर्थ्यात्। अनिषेधेनैव तृतीयोपपत्तेः। पाञ्चिकषष्ठ्यर्थत्वादिति चेन्न। सम्बन्धत्वप्रकारकबोधजनिकायाः शेषवचनादेव सिद्धेः। निष्ठादियोगे शेषषष्ठ्याऽसाधुत्वज्ञापकत्वादिति चेन्न। तद्योगेपि तादृशवृद्धप्रयोगदर्शनात्। किञ्च यदि विभक्तौ न लक्षणा कथन्तर्हि भाविनं घटं जानातीति विषयतायां कर्मत्वशक्ता द्वितीया विषयतैव द्वितीयार्थः। क्रियाजन्यफलशालित्वापेक्षया लघुत्वादिति चेन्न।

इति। उत्कटश्चिकीर्षुः। कन्याकरिष्युः। उकः। वाराणस्याःकामुकः। लक्ष्म्याःकामुक इति प्रयोगात्। कर्मेर्षायामनिषेधः। अव्ययकृत्वा। क्तक्तवतूनिष्ठा। यथा ओदन भुक्तवान् देवदत्तेन कृतमिति। खलर्थः। त्वयासुकरं। क्त्वेति प्रत्याहारः तेनशानच् प्रभृतीनांग्रहणं। यथा सोमंपवमान इति। शंकते। तच्चेति। निष्ठादियोगे इत्यर्थः। साधुत्वेति। कर्तृकर्मकृद्योगे द्वितीयान साधुकिन्तु षष्ठ्येवेति कर्तृकर्मणोः कृतीत्यनेन विहितं तच्च निष्ठादियोगेपि द्वितीयाया असाधुत्वप्राप्तौ अन्नंपक्वमित्यादौ अन्नस्य पक्वमित्यपिप्रसज्येतेति नलोकेत्यादिनानिष्ठादिवर्जनं। तथाच निष्ठादियोगे द्वितीयैवसाधुः। ननु षष्ठीतिन निष्ठादिवर्जनवैफल्यमित्यर्थः। त्यागइति। तव्यत्तव्यानीयर इति कृत्यप्रत्ययाः। तद्योगे कर्तृकर्मणोः कृतीत्यनेन नित्यषष्ठीप्राप्तौ कृत्यानां कर्तरिवाषष्ठीस्यादित्यनेन कर्त्तरिबोध्ये तृतीयावाभवति षष्ठीवा भवतीति षष्ठोविकल्प्यते यथा देवदत्तेन कर्त्तव्यः कटः देवदत्तस्य कर्त्तव्यः कट इति। इदन्तु तदा मङ्गच्छते यदि कर्तृकर्मणोः कृतीति सूत्रं षष्ठीविधायकं तदा विशेषविधिनिषेधयोः शेषनिषेधाभ्यनुज्ञाफलकत्वमिति न्यायेन द्वितीया तृतीय योर्निषेध मुखेनैव नित्यं षष्ठीप्राप्तौ कृत्यानां कर्तरिवेत्यनेन तृतीयावाभवति षष्ठीवाभवतीति षष्ठीनिषेध मुखेनैव तृतीयायां विहितायां षष्ठीप्राप्त्यर्थं विकल्पेन षष्ठोविधानमिति भवन्मते च

कर्तृकर्मणोः कृतीति सूत्रं द्वितीययोरसाधुत्वज्ञापकं । नलोकाव्ययनिष्ठाखलर्थतृणामिति च तयोः साधुत्वज्ञापकं तदाकृत्ययोगे तृतीयोपपत्त्यर्थं कृत्यानां कर्त्तरीत्येव सूत्रं प्रणयनं स्यात् । नेत्यस्य चानुवृत्तिः । तथाच कृत्यानां योगे षष्ठीनेत्यस्य तृतीया साधुरित्यर्थतयाच सामञ्जस्यं कृत्यानां कर्त्तरीति सूत्रस्य विधायकत्वाभावात् षष्ठ्या अनिषेधमुखेन तृतीयोपपत्त्याविकल्पेन षष्ठीविधानमनर्थकमापद्येतेत्याखण्डलार्थः । ननु कर्तृकर्मणोः कृतीत्यनेन तृतीयायाः असाधुत्वबोधनात्कथं तृतीयास्यादतस्तृतीयाविधानमावश्यकं तृतीयाविधाने च विशेष विधिनिषेधयोः शेषनिषेधाभ्यनुज्ञाफलकत्वमिति न्यायेन षष्ठीनिषेधमुखेनैव तृतीयायाः प्रवृत्त्याषष्ठीप्राप्त्यर्थं विकल्पेन षष्ठीविधानमावश्यकमत आह । अनिषेधेनैवेति । षष्ठ्या अनिषेधमुखेनैवेत्यर्थः । तृतीयोपपत्तेः । कर्तृकरणयोस्तृतीयेत्यनेन तृतीयोपपत्तेः । कृत्यानां कर्त्तरीति सूत्रस्य नेत्यस्यानुवृत्त्यानलोकेत्यादिवत् तृतीयायाः साधुत्वज्ञापकत्वं नतु तृतीयाविधायकत्वेन षष्ठीनिषेधकत्वमिति षष्ठ्या अनिषेध मुखेनैव तृतीयोपपत्तौ षष्ठीविधानमफलमिति भावः । षष्ठीप्राप्त्यर्थमेव विकल्पविधानमावश्यकमित्याशंकते । पाक्षिकेति । कृत्ययोगे षष्ठ्या अनिषेधमुखेनैव तृतीयोपपत्तावपि कृत्ययोगे पक्षे षष्ठ्यपि साधुरिति बोधनाय विकल्पविधानमित्यर्थः । सम्बन्धबोधोवेति । कर्तृत्वबोधार्थंहि तृतीया षष्ठीवाकृत्ययोगेविधीयते-सतुशेषे षष्ठीत्यनेन सम्बन्धत्वेन कर्तृत्वभविष्यत्येवेति विकल्पविधानं वृथास्यादिति । मन्यतेतु कर्तृत्वत्वप्रकारकबोधस्य शेष षष्ठ्या अनिर्वाह्यत्वात् विकल्पविधानसार्थक्यमिति भावः । शेषवचनादिति । ननु शेषे षष्ठीत्यत्र उक्तादन्यः शेषः उक्ता त्कर्तृत्वकरणत्वादन्यः शेष इत्यर्थः । तथाच कथं कर्तृत्वादेर्बोधः षष्ठ्येति चेन्न । कर्तृत्वत्वकर्मत्वत्वाद्यतिरिक्तरूपेण सम्बन्धे षष्ठीत्यस्य तदर्थत्वात् । शंकते । निष्ठादीति । तदिति । विकल्पविधायकानुशासनमित्यर्थः । कृत्यानां कर्तरीति सूत्रस्य नेत्यनुवृत्त्यातृतीयायाः साधुत्वज्ञापकताषष्ठी तु शेषे षष्ठीत्यनेन पाक्षिकषष्ठी उपपन्नेतिविकल्पविधानं वृथेत्युच्यते चेत्तदा नलोकेत्यस्यापि साधुत्वज्ञापकतया कृत्ययोगेइव निष्ठादियोगेपि शेष षष्ठ्या आपत्तिरिति विकल्पविधानं तेन शेष षष्ठ्यपि कृत्ययोगे साधु नतु निष्ठादियोगे इत्यसाधुत्वज्ञापकतया विकल्पविधानं सार्थकमिति भावः । तद्योगेपि । निष्ठादियोगेपि । तादृश्याः । सम्बन्धत्वप्रकारकबोधजनिकायाः शेषषष्ठ्याः । बहुश्रइति दे-

वदत्तस्य कृतमित्यादावित्यर्थः। तदुक्तं नलोकेतिकारकषष्ठ्याः प्रतिषेधः। शेषषष्ठीतुस्यादेव। ब्राह्मणस्य कुर्वन्। सत्यानुरक्तानरकस्य जिष्णवः। क्वाचस्य हसितमित्यादि। इच्छाकूणांदुरापेर्थेत्वदधीनाहिसिद्धयः। " अपिवागधिपस्य दुर्वचंवचनं तद्विदधीतविस्मयमित्यादि च "। केचित्तु। इच्छाकूणां सिद्धयइत्यन्वयः। मतु इच्छाकूणां दुरापेर्थेइत्यनेनान्वयः। एवं वागधिपस्य विस्मयमित्यन्वयि। तत्तु,वागधिपस्यदुर्वचमित्यनेनान्वयीतिसमादधुः। तस्मात्कर्तृकर्मकृद्योगेषष्ठीतः कर्तृत्वत्व कर्मत्वत्व प्रकारकबोधएवोपेयः। एवंचकर्मणोः कृत्यात्यनेन कर्तृत्वत्व कर्मत्वत्व प्रकारकबोधजनिकायाः षष्ठ्याःनिष्ठादियोगेपि प्रसक्तौ न निष्ठादिष्वित्यनेनषष्ठीनिषेधे कृत्यानां कर्त्तरीत्येवसूचस्यनेत्यनुवृत्त्या कृत्ययोगेपि षष्ठीनिषेधे प्राप्ते निष्ठादिष्विवकृत्ययोगेपि षष्ठीनस्यादिति कृत्यानां कर्त्तरिवेतितत्रषष्ठ्याविकल्पविधानं सार्थकमित्तिशेषषष्ठ्यास्तु प्रसक्तिरेब न तस्याःकर्मत्वत्वादि प्रकारकबोधजननेऽसामर्थ्यादितिषष्ठ्याः कर्मत्वत्वादि प्रकारकबोधजनकत्वं कर्तृकर्मकृद्योगे आवश्यकं तच्च नगत्या अनन्यलभ्यस्यैव शब्दार्थत्वादिति कर्मत्वत्वप्रकारकबोधोलक्षणयैवेति विभक्तौवाआनुशासनिकीलक्षणेतिध्येयं। कर्मकृद्योगे षष्ठीतःकर्मत्वत्व प्रकारकबोधस्यविवादेपि विभक्तौलक्षणास्थलान्तरमाह। किञ्चेति। कर्मत्वेक्रियाजन्यफलशालित्वरूपे। कर्मत्वेशक्तादितीयाकथं विषयतायामित्यन्वयः। विषयतायामिति विषयसप्तमीविषयताचव्यापारानुबन्धिनी तथा च विषयताबोधिका कथमित्यर्थः। तथा च शक्त्याविषयतायाः बोधासम्भवात्तत्रद्वितीयायालक्षणाऽवश्यकीतिविभक्ता वपि लक्षणास्वीकार इति भावः। विद्यमानघटस्थलेज्ञानेन ज्ञाततोत्पादनमङ्गी कृत्यक्रियाजन्यफलशालित्वरूपकर्मत्वमपि कदाचित्सम्भवतीतिभाविनमित्युक्तंतत्र पूर्वघटस्था भावेनज्ञातत्तायाजननासम्भवादिति भावः। शङ्कते। विषयतैवेति। द्वितीयार्थः। द्वितीयायाः शक्यार्थः। तथा च शक्त्यैव तद्बोधसम्भवान्नतत्र लक्षणेतिभावः। अत्रविनिगमकमाह। क्रियेति। ग्राममिति ग्रामविषयकत्वस्यागमनेऽभावेनक्रियाजन्यफलशालित्वरूपकर्मत्वं लक्षणयैव त्वन्मतेबोधनीयमिति भावः। आयुष्मतेति। तथा च विभक्तौ लक्षणावश्यकीतिभावः। क्रियाजन्यफलशालित्वस्य विषयत्वापेक्षयागुरुत्वेपितत्र भूरिप्रयोगात्तत्रैवशक्ति रुचितेत्यतउक्तं। विभावनीयमिति। ननुद्वितीयायाः क्रियाजन्यफल-

तर्हि ग्रामङ्गच्छतीत्यत्र कुतः कर्मत्वप्रतीतिर्लक्षणां विनेत्या-
युष्मतावभावनीयम् । आस्तान्तत्रापि वृत्त्यन्तरमिति चेन्न ।
लक्षणवृत्त्यैवोपपत्तेः । मीमांसकास्तु । अनुकूलव्यापारमात्र
माख्यातार्थः । रथो गच्छतीत्यादौ मुख्यप्रयोगस्तिङ्वृत्त्याह्वः
तन्न । यत्नत्वस्य जातित्वेन तस्यैव शक्यतावच्छेदकत्वात् । न-
त्वनुकूलत्वस्य गुरुत्वात् । कथं तर्हि पाकानुकूलता यत्नस्य
भासत इति चेत् । संसर्गविधयेत्यवेहि । कथं तर्हि जानाति

शालित्वरूपेकर्मत्वएव शक्तिःभाविनंघटं जानातीत्यादौ विषयत्वरूपकर्म-
त्वबोधस्तु विभक्तीलक्षणानङ्गीकारात् वृत्यन्तरेणैवभविष्यतीत्याशङ्कते ।
आस्तान्तत्रापीति । भाविनंघटंजानातीत्यत्रापीत्यर्थः । लक्षणे
ति । लक्षण-
यैवेत्यर्थः । विभक्तीनलक्षणेतिप्रवादस्तु न अत्रेयदृति भावः । वस्तुतस्तु ।
विभक्तीलक्षणानास्तीत्यस्य सुब्भिन्नविभक्तीलक्षणानास्तीत्यर्थात्तिङ् विभक्तीलक्ष-
णा स्वीकारएव । अतएव विद्यतेव्योम विद्यते घटः सत्तातिष्ठतीति प्रयोगा-
इतिहृदयं । रथोगच्छतीत्यनुरोधादाख्यातस्य व्यापारमात्रमर्थ इति यिभ-
क्तीलक्षणानङ्गीकारेपि नत्वतिरितिमीमांसक मतमाह । मीमांसकास्त्विति ।
व्यापारमात्रं । व्यापारसामान्यं न तुयत्न एवेति भावः । मुख्यइति । श-
क्त्याप्रयोगइत्यर्थः । व्यापारत्वस्यैवाख्यातशक्यतावच्छेदकत्वेनयत्नबोधेपि
व्यापारबोधेबाधकाभावादिति भावः । तस्यैव । यत्नत्वस्यैव । न त्विति ।
ननुअनुकूलव्यापारत्वस्य शक्यताच्छेदकत्वमिति विभक्ति विपरिणामेना
न्वयः । अनुकूलत्वं जनकत्वन्तदुत्कीर्तनञ्च प्रकारतयाभान मभ्युपेत्यागुरुत्वात् ।
यत्नत्वापेक्षयागुरुत्वात् । व्यापारत्वस्य नियतोत्तरवर्त्तित्वरूपजन्यत्वरूपत्वा-
दिति भावः । ननु अनुकूलयत्नत्वस्याख्यातशक्यतावच्छेदकत्वेऽनुकूलत्वां-
शे शक्तेरावश्यकतया यत्नत्वांशंविहायानुकूलमात्रएव शक्तिरास्तामेव च
रथोगच्छतीत्यत्र मुख्यप्रयोगइत्यतः अनुकूलत्वांशंविहायलाघवाद्यत्नत्वमेव
शक्यतावच्छेदकमित्येवोपेयं । तथाचकथं अनुकूलत्वं प्रतीयतइत्यभिप्रायेे-
णाशङ्कते । कथंतर्हीति । यत्नत्वस्यैवाख्यात शक्यतावच्छेदकत्वेहीत्यर्थः ।

इच्छति यतते करोतीत्यादयः प्रयोगाः। नहि ज्ञानाद्यनुकूलोयत्नोऽस्ति। प्रतीयतेवेति चेत्। आश्रय तालक्षकत्वादाख्यातस्येति गृह्यताम्। चिन्तामणिकृतस्तु जानातीत्यादौ धात्वर्थ एव चैत्रादौ साक्षादन्वेति। आख्यात प्रतिपाद्यश्च कालः संख्याच। ननु यत्नोपि। अयोग्यत्वादित्याहुः। तन्नित्यम्। नामार्थधात्वर्थयोः साक्षाद्भेदान्वयबोधस्य व्युत्पत्तेः। अन्-

---

पचतीत्यत्र पाकानुकूलयत्नोभासते तत्रानुकूलताबोधःकथंआख्याता शक्यत्वादित्यर्थः। संसर्गेति। पाकयत्नयोः संसर्गविधयेत्यर्थः। अशक्यस्यापि संसर्गस्य भानोपगमात्। तत्प्रकारकबोधस्तु नानुभवसिद्धइति भावः। कथंतर्हीति। व्यापारमात्रस्याख्यात वाच्यत्वेहीत्यर्थः। यतते करोतीतियतीप्रयत्नेहुकृञ्करणेइतिधातुभेदे न प्रयोगभेदः। ननु जानातीत्यादौ ज्ञानानुकूलयत्नवानितिबोधेबाधकाभावइत्यतआह। नहीति। ज्ञानादीति। आदिनाइच्छादि परिग्रहः। ननुज्ञानानुकूलयत्नोस्त्येव आत्ममनः संयोगस्यज्ञानासमवायिकारणत्वात्। तस्यमनः क्रियाजन्यत्वात्। तस्याश्चप्रयत्नवदात्मसंयोगजन्यत्वादतआह। प्रतीयतेवेति। जानातीत्यादौ ज्ञानाश्रयत्वमात्रंप्रतीयते न तुज्ञानानुकूलयत्नवानितीत्यर्थः। आश्रयतेति। जानातीत्यत्राख्यातस्याश्रयत्वेन। लाक्षणिकत्वादित्यर्थः। घटोनश्यतीत्यत्रतुनष्टस्यापि प्रतियोगितासम्बन्धेननाशाश्रयत्वसम्भवेपि प्रतियोगितासम्बन्धावच्छिन्नाश्रयतायांलक्षणायांगौरवात् प्रतियोगित्वमेव तत्राख्यातार्थोवसेयः। धात्वर्थएव। ज्ञानरूपोधात्वर्थएव। साक्षात्। विभक्त्यर्थमद्वारीकृत्य। तथाचाश्रयतासम्बन्धेन ज्ञानंचैत्येऽन्वेतीतिनाख्यातस्य कोप्यर्थइतिभावः। तर्ह्याख्यातं निरर्थकमतआह। आख्यातेति। प्रतिपाद्यः। लटूत्वेनएकवचनत्वादिना च प्रतिपाद्यः। कालः। वर्त्तमानादिः। संख्या एकत्वादिरूपा। ननुयत्नोपि आख्यातत्वेनाख्यात प्रतिपाद्यः। अयोग्यत्वादिति तथा च जानातीत्यादौ नाश्रयत्वलक्षणेति भावः। नामार्थेति। साक्षादिभक्त्यर्थं मद्वारीकृत्य। भेदेति। अभेदान्वितसम्बन्धेनान्वयबोधस्याव्युत्पन्नत्वादित्यर्थः। स्तोकं पचतीति क्रियाविशेषणस्थलेस्तोकस्यपाकेअभेदेनान्वयाद्भेदेति। न चतत्रविशेषणविभक्तेरभेदोर्थइति वाच्यं। विशेषणवि-

था ओदनः पचतीत्यत्रौदनपाकयोः कर्मतासंसर्गेणान्वयः स्यात् । वस्तुतो जानातीत्यादावाख्यातार्थानवभासे आख्यातार्थसंख्यान्वयो नस्यात् तस्याख्यातार्थे विशेष्यतानियमात् । विभक्त्यर्था विशेषणीभूतानामार्थे विशेष्यः । तेनैव ओदनं पचतीत्यत्र तथाविधश्चैत्र आख्यातार्थे विशेष्यौदनत्वौदनः । द्वितीयार्थे विशेषणत्वात् । पच्यत इत्यत्र कर्मत्व-

---

भक्तेः साधुत्वार्थकत्वात् । स्तोकःपाकइत्यादावगतेश्च । विभक्त्यर्थस्य प्रकारतया संसर्गतयान भानमितिमतेघटमा न येत्यत्र घटस्यकर्मतासम्बन्धे नानयनेऽन्वयात्तात्रादिति । न चनक्तंजभक्षयेदित्यत्रक्तंजभक्षणं बलवदनिष्टाननुबन्धीष्टसाधनत्वाभाववदितिबोधात् । भक्षणधात्वर्थेनजर्थाभावान्वयाच्युत्पत्ति भङ्ग इति वाच्यं । निपातातिरिक्तनामार्थ धात्वर्थयोरन्वयस्य व्युत्पत्तेरित्यर्थात् । न जोऽभाववतिलाक्षणिकत्वाद्वा । अन्यथेति । नामार्थ धात्वर्थ योर्विभक्त्यर्थ महारोक्तत्यापि अभेदातिरिक्त सम्बन्धेनान्वयस्वीकारइत्यर्थः । ओदनइति । ओदनंपचतीत्यत्र विभक्त्यर्थ कर्मत्वादेःप्रकारतया संसर्गतया च भानोपगमात् । यथाओदनपाकयोः कर्मतासंसर्गेणान्वयः । तथाओदनः पचतीत्यत्रापि कर्मतासंसर्गेणौदनस्यपाकेऽन्वयबोधापत्तेरित्यर्थः । ननुनिपातातिरिक्तत्वमिवसविषयधात्वतिरिक्ते त्यपिदेयमतआह । वस्तुतइति । कश्चित् । तन्नभवतीत्यादावगतेः । आख्यान्तत्व प्रतियोगित्वे लक्षणेति चेत्किमपराद्धन्तर्हि जानातीत्यत्राख्यपत्वे लक्षणया व्युत्पत्तिसङ्कोचेनाप्यनिर्वाहे तद सङ्कोचस्यैवन्याय्यत्वात् । वस्तुतस्तु । ननुनामार्थ धात्वर्थयोः साक्षाङ्गेदेनान्वयबोधोन स्वीक्रियतइति नियमबलान्नामार्थनिष्ठाभेदातिरिक्तसम्बन्धावच्छिन्नप्रकारतानिरूपितविशेष्यतावच्छेदकतासम्बन्धेनशाब्दबुद्धित्वावच्छिन्नं प्रतिविभक्तिपद निरूपितवृत्तिज्ञानजन्योपस्थितित्वेनहेतुत्वम् । एवं धात्वर्थनिष्ठ प्रकारतानिरूपितविशेष्यतावच्छेदकतासम्बन्धेनशाब्दबुद्धिं प्रत्यपीतिलक्ष्यन्त च चैत्रं स्तण्डुलंपचतिमैत्रेण पच्यतेतण्डुलइत्यत्रैव चैत्रःपचतितण्डुलः मैत्रःपच्यतेतण्डुलइत्यत्रापितण्डुलस्य कर्मतासम्बन्धेनमैत्रस्य च कर्तृतासम्बन्धेनपाकेऽन्वयवारणायनामार्थप्रकारकधात्वर्थविशेषकान्वयबोधानुपगमे-

पिधात्वर्थं प्रकारकनामार्थविशेष्यकान्वयबोधोपगमे क्षतिविरहात् द्वितीयकार्यकारणभावे मानाभावात् । चैत्रो जानातीत्यादौ आश्रयतासम्बन्धेनज्ञानरूपधात्वर्थस्य चैत्रेऽन्वयेबाधकाभावः । नच तथासतिज्ञानं चैत्रइत्यत्रापि ज्ञानस्याश्रयतासम्बन्धेनान्वयापत्तिरिति वाच्यं । नामार्थयोरभेदातिरिक्त सम्बन्धेनान्वयाभावादिति व्युत्पत्त्यन्तरेणैव तदापादानसम्भवात् किञ्चानुपूर्वीज्ञानस्य शाब्दबोधहेतुतया ज्ञान प्रकारकाश्रयता संसर्गकचैत्रविशेष्यकशाब्दबोधं प्रतिज्ञाधातुसमभिव्या हृताख्यातसमभिव्याहृत चैत्रपदज्ञानत्वेन हेतुत्वादेवतद्वारणसम्भवात् । भवन्मतेप्या श्रयत्वप्रकारकशाब्दबोधेताद्दशसमभिव्याहार ज्ञानहेतुताया आवश्यकत्वात् । अन्यथा ज्ञान माश्रयत्वं चैत्रस्येत्यतोपि तदापत्तेः । अथैवं पचतीत्यत्रापिस्वानुकूलकृतिमत्त्व सम्बन्धेनपाकस्य चैत्रेऽन्वयोपपत्तेः कृतेरप्याख्यातार्थत्वविलोप प्रसङ्गइति चेन्न । नपचति चैत्र इत्यत्र कृत्यनियामकसम्बन्धस्याभाव प्रतियोगितानवच्छेदकतया अनुकूलकृतिमत्त्वसम्बन्धावच्छिन्नप्रतियोगिताक पाका भावस्य बोधासम्भवात् । आश्रयतासम्बन्धावच्छिन्नप्रतियोगिताक पाका भावबोधोपगमे पचत्यपि न पचतीति प्रसङ्गात् । न च पचतीत्यत्र पाककृतिमार्थे च इत्याख्यातार्थ प्रकारकशाब्दबोधोदयेनाख्यात जन्यकृत्युपस्थितेः कारणत्वकल्पने तत्तदर्थनिवेश्यात्मनिष्ठ प्रत्यासत्या आख्यात जन्योपस्थिते र्हेतुत्वकल्पने गौरवेणलाघवाद्धात्वर्थ प्रकारकशाब्दबोधंप्रति प्रत्ययजन्योपस्थितेः समानविशेष्यताप्रत्यासत्याहेतुत्वकल्पनादाख्यातस्य जानातीत्यादौ आश्रयत्वार्थकत्व मावश्यकमिति वाच्यं । सामान्यतः धातुत्वस्य प्रत्ययस्य चैकस्याभावेन सामान्यतस्तथाहेतुत्वासम्भवात् । विशिष्यहेतुत्वे च जानातीत्यादौ तदकल्पनात् । यत्तु जानातीत्यत्र घटादौ स्वारसिकलक्षणा ग्रहकाले ज्ञानीयो घट इति शाब्दोत्पत्त्याज्ञान प्रकारक घटा दिविशेष्यक शाब्दवृत्तित्वावच्छिन्नं प्रतिज्ञाधातुसमभिव्याहृताख्यात जन्यघटाद्युपस्थितित्वादिना हेतुत्वकल्पने घटत्व पटत्वादिनिवेशेगौरवात् । ज्ञाननिष्ठ प्रकारतानिरूपितविशेष्यतावच्छेदकतासम्बन्धेनशाब्दवृत्तित्वावच्छिन्नं प्रतिआख्यातपदनिरूपितवृत्तिज्ञानजन्योपस्थितेः प्रकारतासम्बन्धेन हेतुत्वकल्पनादाश्रयत्वेलक्षणावश्यको । अथ आख्यात पदजन्यघटाद्युपस्थिति कालेपि ज्ञानीयो घट इति शाब्दबोधस्यात्मनि

समवायेनापत्तिः । समवायेन तादृशशाब्दहेतो र्ज्ञानीयो घट इति योग्यता ज्ञानस्य समवायेन सत्वादिति विषयंनिवेश्य पद जन्यपदार्थोपस्थिते र्हेतुत्वमावश्यकं । न च योग्यताज्ञानस्यापि विशेष्यतावच्छेदकता प्रत्यासत्त्यैव हेतुत्वमिति वाच्यं । तथापि भिन्नविषयकानुमिति सामग्रीभावरूप कारणबलादात्मनितथाविध शाब्दबोधापत्ते र्दुर्वारत्वादिति चेन्न । पद जन्य पदार्थोपस्थिते: तत्तद्विषयंनिवेशात्मनिष्ठ प्रत्यासत्याहेतुत्वे तत्तद्विषयकत्वैःसहविनिगमनाविरहेण गौरवात् विशेष्यतावच्छेदकताप्रत्यासत्त्यैवहेतुत्वं । घट त्वादिवृत्तिविषयता सम्बन्धेन ज्ञानत्वावच्छिन्नं प्रति घटत्वादिवृत्तिविषयतासम्बन्धेन ज्ञानत्वेन हेतुत्वान्तरकल्पनेन चदर्शितापत्तिवारण सम्भवात् । आधातुसमभि व्याहृताख्यात पद जन्योपस्थिति विशिष्ट घटत्व प्राकारक ज्ञानस्य विरोधिसामग्रीभावेन ज्ञानीयो घट इति शाब्दबोधेजननीयेसहकारित्वात् प्राकारतासम्बन्धेन स्वाधिकरणविषयतासम्बन्धेन वृत्तित्वरूप सामानाधिकरण्य सम्बन्धेन च तथोपस्थितिवैशिष्ट्य घटत्वज्ञानेऽवसेयम् । इत्थञ्चाख्यातपदजन्यपटोपस्थितिकाले भिन्न विषयकानुमिति सामग्रीभावरूपकारणबलात्रा त्मनिज्ञानीयो घट इति शाब्दबोधापत्ति: आख्यात पद जन्योपस्थिति विशिष्ट घट त्वज्ञानरूपसहकार्यभावात् । न च पुरुषान्तरस्याख्यात पद जन्य घटोपस्थितिकाले तथा विधसहकारिसत्त्वादापत्तिरिति वाच्यं । एकात्मसमवेतस्यान्यात्मन्या पत्तिवारणायतत्तदात्मसमवे तत्वावच्छिन्नं प्रतितादात्म्यप्रत्यासत्त्यातत्तदात्मत्वेनापि हेतुतयात्त्युरुषीयाख्यात पद जन्योपस्थिति विशिष्टतत्तत्पुरुषीय घटज्ञान विशिष्टतत्तदात्म विशिष्टविरोधि सामग्रीभावस्यतत्तदात्मनि ज्ञानीयो घट इति शाब्दबोधसामग्रीत्वात् । तत्तदात्मनि घटत्वज्ञान वैशिष्ट्यमेककालीनत्वसम्बन्धेन विरोधिसामग्रीभावेनतत्तदात्म वैशिष्ट्यञ्चतादात्म्य विशेषणतोभय घटित सामानाधिकरण्य सम्बन्धेनेति । इत्थञ्च ज्ञाननिष्ठ प्रकारतानिरूपितविशेष्यतावच्छेदकता सम्बन्धेन शाब्दबुद्धिं प्रतिआधातुसमभिव्याहृता ख्यात पद जन्योपस्थिते: प्रकारता सम्बन्धेन हेतुत्वात् । चैत्रो जानातीत्यादौ चाश्रयत्वलक्षणावश्यकीति । तदसत् । तदादिपदेनापि ज्ञानीयो घट इति शाब्दबोधजननात् । तच्च तथाविधाख्यात पद जन्योपस्थितेरभावे न व्यभिचारात् । तथोपस्थिति विशिष्टशाब्दत्वमेव तथोपस्थिते:

कार्यतावच्छेदक मुपेयं। एवं च तथोपस्थिति विरहेतथोपस्थिति विशिष्ट शाब्दबोधानुपपत्तावपि तदनुत्तरशाब्दबोधस्य जानातीत्यादावनुपपत्तौ बाधकाभावः। आधातुसमभिव्याहृताख्यातसमभिव्याहारज्ञानरूप कारण बलादाश्रयता संसर्गकबोधोपगमात्। न चाश्रयता सम्बन्धेन ज्ञान प्रकारक शाब्दबोधे ज्ञान प्रकारक योग्यता ज्ञानस्य कारणत्वकल्पनेनैतन्मते गौरवमिति वाच्यं। भवन्मतेपि ज्ञानाश्रयत्व प्रकारक चैत्रविशेष्यक शाब्दबोधं तथाविधयोग्यताज्ञान हेतुतायां आवश्यकत्वात्। आश्रयत्वस्यापि सम्बन्धनिवेश्ययोग्यताज्ञान हेतुत्वस्य कल्पने भवन्मतएव गौरवाच्च। मन्मते चाश्रयत्वस्यैव संसर्गत्वाच्च तस्यापि सम्बन्धनिवेशः। न च आधातुसमभिव्याहृताख्यातस्यैव च ज्ञानाश्रयत्वेलक्षणातच्च भवतापि ज्ञानाश्रयत्व प्रकारक योग्यताज्ञानस्य हेतुत्वंकल्पनीयमिति वाच्यं। आश्रयतायाः संसर्गतावादिना ज्ञानाश्रयत्वप्रकारकबोधस्यानुपगमात्। एतेनयच्च आधातुसमभिव्याहृताख्यातस्य ज्ञानाश्रयत्वेलक्षणा तच्च भवतापि ज्ञानाश्रयत्व प्रकारक शाब्दबोधे आधातुसमभिव्याहृताख्यात पदनिरूपितवृत्ति ज्ञान जन्याश्रयत्वोपस्थिते र्हेतुत्वस्यकृप्तया कृप्तेनैवनिर्वाहादाश्रयत्वेलक्षणा सर्वत्रावश्यकीति परास्तं। तथा सति यत्र चैत्रपदएवाश्रयता सम्बन्धेन ज्ञान विशिष्ट चैत्रे लक्षणातच्च चैत्रपदजन्यज्ञानविशिष्ट चैत्रोपस्थितेः कृप्तया चैत्रो जानातीत्यत्र चैत्र पदादेवाश्रयता सम्बन्धेन ज्ञानवार्थे च इति बोधस्यापि कृप्तेनैवोप पादयितुमशक्यापि शक्यत्वात्। न चैवं जानातीत्यस्य वैयर्थ्यमिति वाच्यं। आख्यातत्वेनाख्यातस्यैव जानातीत्यस्य सर्वस्यैवतात्पर्य ग्राहकत्वोपगमस्य सुवचत्वात्। किञ्च जानातीत्यत्र ज्ञानाश्रयत्व प्रकारक बोधस्यैवानुपगमेन कृप्तेनोपपत्त्यभावात्। तस्मादा श्रयता सम्बन्धेन ज्ञानस्य चैत्रेऽन्वये बाधकाभावेना श्रयत्वेलक्षणावैयर्थ्यमतआश्रयस्तुत इति। केचित्तु। यत्र आधातोर्ज्ञाना श्रयत्वेलक्षणातच्च ज्ञानस्य धात्वर्थैक देशतया चैत्रेऽन्वयासम्भवेन ज्ञाना श्रयत्व प्रकारक एव शाब्दबोधउपगन्तव्य इति तत्र ज्ञानाश्रयत्वप्रकारक शाब्दबोधेतत्प्रकारक योग्यताज्ञान हेतुत्वमुभयसिद्धं। आश्रयता संसर्गक शाब्दबोधाङ्गी कर्त्तमते तुआश्रयता संसर्गक योग्यताज्ञान कारणत्वकल्पन मधिकं। न च तच्छब्देनयत्राश्रयता सम्बन्धेन ज्ञानविशिष्टचैत्रशाब्दबोधस्तत्रा श्रयता

संसर्गक योग्यताज्ञान हेतुत्वमप्युभयसिद्धमिति वाच्यं । तत्र शाब्दबोधे पदार्थान्तरभाननियमेन ज्ञानविशिष्ट चैत्रमात्रविशेष्यक योग्यताज्ञानस्य विशिष्टचैत्रादिमात्रविशेष्यकशाब्दबोधहेतुतायाः कुत्राप्यक्लृप्तत्वात् । न च तथापिभिन्न विषयक प्रत्यक्षादिकं प्रति जानातीत्यानुपूर्वी ज्ञान घटित ज्ञाधातु जन्य ज्ञानोपस्थिति घटित शाब्दसामग्र्याः प्रतिबन्धकतायां आख्यातजन्याश्रयत्वोपस्थितिके निवेशे गौरवमिति वाच्यं । ज्ञाना श्रयत्वाभाववांश्चैत्रस्सुन्दर इति विशिष्टवैशिष्ट्यावगाहि प्रत्यक्षे जानाति चैत्र इत्यानुपूर्वीज्ञान ज्ञाधातु जन्योपस्थिति घटित शाब्दसाग्र्याः प्रतिबन्धकत्वाधिक्यात् । मन्यते आश्रयत्व प्रकारकोपस्थितिकाले बाधबुद्धिसम्भवेन तादृशसामग्र्योर्युगपदसम्भवेन क्लृप्ते नैवोपपत्ते रित्याहुः । तच्चिन्त्यम् । एवंसति विशेषणविभक्तेरप्यभेदार्थकत्वापत्तेः । तत्रापि नीलाभेदाभाववान् घट इति प्रत्यक्षादौ नीलोघट इति शाब्दसामग्र्याः बाधमुद्रया प्रतिबन्धकतयैवोपपत्तेरतिरिक्तप्रतिबन्धकत्वाकल्पने लाघवसम्भवात् । इष्टापत्तौ च विशेषणविभक्तेः साधुत्वमिति सिद्धान्तव्याकोपइत्याशयविस्तरः । आख्यातार्थेति । आख्यातत्वेना ख्यातार्थबोधेइत्यर्थः । तस्याः । आख्यातार्थ संख्यायाः । आख्यातार्थेति । संख्यायाः कालातिरिक्ताख्यातार्थस्य भावनाया यद्विशेष्यतन्नाभित्वनियमादित्यर्थः । भावनान्वयिन्येव संख्यान्वय इति नियमात् संख्याकालातिरिक्ता ख्यातार्थाहि भावनेत्यभिधीयत इति भावः । नन्वाख्यातार्थविशेष्यः कइत्याकांक्षायामाह । विभक्त्यर्थाविशेषणीभूत इति नामार्थइत्यनेन विभक्त्यर्थनिरासः । न च पचतीत्यत्र वर्तमानत्वरूपा ख्यातार्थस्य कृतिरेवविशेष्यति कथमीदृशनियम इति वाच्यं । आख्यातार्थविशेष्य एव संख्यान्वय इति नियमप्रविष्टाख्यातार्थविशेष्यस्यैवाभिधानादिति भावः । उपपादनपुरः सरंविभक्त्यर्थाविशेषणीभूतइत्यस्य व्यावृत्तिमाह । तेनेति । विभक्त्यर्थाविशेषणीभूतस्यैव नामार्थस्या ख्यातार्थस्य विशेष्यत्वादेवेत्यर्थः । तथाविध विभक्त्यर्थाविशेषणीभूतप्रथमायाः साधुत्वादिति भावः । द्वितीयार्थेति । द्वितीयार्थे कर्मत्वे विशेषणत्वादित्यर्थः । कर्माख्यातस्थलेप्याह । पच्यत इत्यत्रेति । चैत्रेण पच्यते तण्डुल इत्यत्र कर्मतण्डुलः आख्यातार्थ विशेष्यः । न कर्ता । न चैत्रः । तृतीयार्थेति । तृती-

कर्त्ता ' तृतीयार्थावरुद्धत्वात्। स्थीयत इत्यत्र स्थित्यनुकूलाक्षतिरिति। आख्यातार्थे कर्त्र्यपि न विशेष्यत्वमिति संख्यानन्वितैव, अत एवौत्सर्गिकमेक वचनमेवेत्यूचुः। धात्वर्थविशेष्य-

---

यार्थेन कर्त्तृत्वेनावरुद्धत्वात्। कर्त्तृत्वे विशेषणत्वादित्यर्थः। ननु चन्द्रइव मुखमस्तीत्यादौ चन्द्रपदार्थे इवार्थे वा भावनान्वयापत्तिः। तस्य विभक्त्यर्था विशेषणीभूतनामार्थत्वात्। न च विभक्त्यर्थाविशेषणीभूतइत्यस्येतराविशेषणत्वमर्थइति वाच्यं। चन्द्रइव मुखंचद्रोराजतेइत्यत्र चन्द्रे तदन्वयानुपपत्तिरिति चेन्न। प्रकृत पद जन्यशाब्दबोधे विशेष्यत्वाभाववत्वे सति यत् इतरविशेषणत्वंतदभाववत्वे सतीत्यस्यतदर्थत्वात्। वस्तुतस्तु। चन्द्रइव मुखमस्तीत्यादौ नामार्थयोरिति व्युत्पत्तौअव्ययनिपातातिरिक्तत्वविशेषणाभावात् चन्द्र पदं चन्द्र सदृशलक्षकं इवपदं तात्पर्य ग्राहकमिति मते चन्द्र सादृश्य विशिष्टे मुखेभावनान्वये विशेषणांशेपितदन्वयेन चन्द्रपदार्थतदन्वये इष्टापत्तिः। तत्रइवपदस्य निरर्थकतया तदर्थाभावादेवनाति प्रसङ्गः। इवपदस्य सार्थकत्वेपि चन्द्र पदोत्तर प्रथमायाः प्रतियोगित्वार्थकतया इवपदस्य च सादृश्यार्थकतया चन्द्रस्य विभक्त्यर्थविषेषणीभूतनामार्थत्वाभावात्। इवपदार्थे सदृशे च विशिष्टेतदन्वये विशेषणांशेतदन्वये इष्टापादनमेवेति प्रतिभाति। ननु चैत्रेण स्थीयत इत्यत्र संख्यानन्वयापत्तिः। तत्र विभक्त्यर्था विशेषणीभूत नामार्थाभावे न भावना विशेष्या भावात्। अतः इष्टापत्यापरिहरति। स्थीयतइत्यत्रेति। संख्येति। भावनान्वयिन्येव संख्यान्वयनियमादत्रभावनाया अनन्वयेन संख्याया अप्यनन्वय इत्यर्थः। अतएव भावाख्यातस्थले संख्याया अनन्वयादेव ' औत्सर्गिकमिति। स्वाश्रयस्य द्विबहुत्वेपि संख्याया अनन्वयात्प्रथमोपस्थितत्वात्साधुत्वार्थमेकवचनमित्यर्थः। भावाख्यातस्थले प्रकारांतरेणबोधे कस्य चिन्मतेनाह। धात्वर्थेति। चैत्रेणस्थीयते इत्यत्र चैत्रकर्त्रका वर्तमानस्थितिरित्यर्थः। नन्वेवं भावना विशेष्यएव संख्यान्वयात् धात्वर्थस्य च भावनाविशेष्यत्वात् द्विवचनापत्तिरित्याशंकते। न चैवमिति। एवं। धात्वर्थ विशेष्यकान्वयस्वीकारे। धात्वर्थस्यस्थित्यादेर्द्विवचनापत्तिः। द्वित्वस्यतत्राबाधादिति भावः। असाधुत्वादिति। देवदत्तेन-

कोऽवान्वयबोधः । नचैवं धात्वर्थस्य द्वित्वादि विवक्षया द्विवचनाद्यापत्तिः । असाधुत्वादित्यपि कश्चित् स्यादेतत् । आख्यातार्थः कालः कृदर्थे अन्वेति इति चेत् । एकपदोपात्तत्वप्रत्यासत्त्या क्रियाविशेषेऽन्वेति । धात्वर्थइत्यपरे । कथमन्यथा जानातीत्यादौ ज्ञाने वर्त्तमानत्वादि प्रतीयेतेति । स्यादेतत् ।

स्थीयतेदेवदत्ताभ्यां स्थीयते देवदत्तैः स्थीयते इत्येकवचनमेवाचमाश्रिति भावः । चैत्रःपचतीत्यादौ प्रथमांतार्थ एव भावनायाअन्वयात् भावनायांधात्वर्थस्य विशेषणत्वेनैवान्वयस्य क्लृप्तत्वात् । भावना विशेषणकधात्वर्थ विशेष्यकान्वयस्वीकारे गौरवमेवाचाखरसः कश्चिदित्यने न सूचितः । आख्यातार्थः कालः वर्तमानत्वादिः । एकपदेति । एकेनपदेनाख्यातेनोपात्तत्वाद्भावनायां वर्तमानत्वान्वयइत्यर्थः । नच संख्यायामेव कुतो न कालान्वयः समानपदोपात्तत्वाविशेषादिति वाचां । तर्हि पक्वेपि प च तीतिप्रयोगःस्यात्संख्यायां वर्तमानत्वस्य सत्वादिति भावः । धात्वर्थइति । चैत्रः पचतीत्यादौ वर्तमानोयः पाकः स्तदनुकूलक्रतिमानितिबोधः । इदमेव मतमुपपादयति । कथमन्यथेति । वर्तमानत्वादेर्धात्वर्थेऽन्वये जानातीत्यादौ क्रतेर्बाधादाश्रयत्वेलक्षणा । आश्रयत्वे च वर्तमानत्वादेरन्वयासम्भवाद्धात्वर्थ एवान्वयो वाचां: । एवं चाख्यातार्थ वर्तमानत्वादिनिष्टप्रकारतानिरूपित विशेष्यतानिच्छेदकता सम्बन्धेनशाब्दबोधं प्रति प्रकारतासम्बन्धेनधातुजन्योपस्थितेः कारणत्वात्तेनैवनिर्वाहे आख्यातार्थक्रतौ कालान्वयस्वीकारे कार्यकारण भावान्तरकल्पने गौरवमेव पूर्वकल्पे । अखरसइतिदृष्टव्यं । भविष्यत्वेति । स्यतासील्लृटोरित्यनुशासना द्भविष्यत्वंलृडर्थः । अतीते लुङ् इत्यनुशासनाद्यातीतत्वंलुङर्थ इत्यर्थः । ननु भविष्यत्वं वर्तमाना प्रागभाव प्रतियोग्युत्पत्तिकत्वं अतीतत्वं च वर्तमानध्वंस प्रतियोग्युत्पत्तिकत्वं । एवं च घटो भविष्यतीत्यत्र भूसत्तायामिति भूधातोरुत्पतिरेवार्थः । आख्यातस्य चाश्रयत्वमर्थः । तत्राख्यातार्थाश्रयत्वे भविष्यत्वादेरन्वयासम्भवाद्धात्वार्थो त्पत्तावेवान्वयो वाचां: । तथा च वर्तमान प्रागभाव प्रतियोग्युत्पत्तिका या उत्पतिस्तदाश्रयो घट इत्यन्वयबोध स्वीकारे उत्पत्तेरप्युत्पत्युपगमेऽपसिद्धान्ता

भविष्यतोऽतीतत्वेऽप्याख्यातविशेष वाच्ये। भविष्यत्वं च विद्यमानप्रागभाव प्रतियोगित्वं। विद्यमानध्वंसप्रतियोगित्वं अतीतत्वमिति पचति चैत्रे भाविक्रतिप्रागभावमादाय पक्ष्यति। आद्यक्रतिध्वंसमादाया पाक्षीदिति स्यात्। न स्यात्। आद्यक्रति प्रागभावस्यैव भविष्यत्प्रत्ययेन चरमक्रतिध्वंसस्यैवातीतप्रत्ययेनाभिधानात् अथोदनं पचतीत्योदननिष्ठविक्लित्तिजनकव्यापारविशेषकर्तृत्वं प्रतीयते। तत्र विक्लित्तिस्तदनुकूलंव्यापारश्च कस्यार्थः। उच्यते। विक्लित्तिफलं तद्द्वितीयाया अर्थस्तदनुकूलो विलक्षणव्यापारोधात्वर्थः। अनुकूलता च संसर्गः। ननु कर्मत्वं द्वितीयाया वाच्यं तच्च

भावेपि अननुभवदित्यतआह। भविष्यत्वंचेति। तथा च वर्तमान प्रागभाव प्रतियोगित्वमेव भविष्यत्वं तच्चभविष्यतीत्यादौ धात्वर्थांशस्तौ पक्ष्यतीत्यादौ आख्यातार्थे क्रतावन्वेतीति भावः। पचतीतिसमभ्यंतं। आख्यातार्थकालस्य समानपदोपात्तत्वप्रत्यासत्या क्रतावन्वयइत्युक्तं। तथा च पक्ष्यतीत्यत्र वर्तमानप्रागभाव प्रतियोगिनी या पाकानुकूलाक्रतिस्तद्वांश्चैत्रइतिबोधस्वीकारे चैत्रेण यदा पाकः क्रियते तदा एकस्याः क्रतेर्जातत्वे पिंध्वंस प्रागभावयोःसामान्यधर्म्मावच्छिन्न प्रतियोगिताक्रत्वाभावेन भाविनी या न्या क्रतिस्त आगभावस्य सत्वात्पक्ष्यतीति प्रयोगापतिः। एवमपाक्षीदित्यत्रलुङ्र्थातीतत्वस्य वर्तमानध्वंसप्रतियोगित्वरूपस्य क्रतावेवान्वये वर्तमानध्वंसप्रतियोगिनी या पाकानुकूलाक्रतिस्तद्वांश्चैत्रइत्यन्वयो वाच्यः। एवं चाद्यक्रतेर्नष्टत्वेन पाकदशायामपि अपाक्षीदिति प्रयोगापत्तिरित्यर्थः। समाधत्ते। नस्यादिति। आद्येति। तथा च पक्ष्यतीत्यत्र प्राग भावत्वेन रूपेणाद्यक्रति प्रागभावस्यापाक्षीदित्यादौ अंत्यक्रतिध्वंसस्यैववक्रतात्पर्यविषयत्वात् न भाविक्रति प्रागभाव मादायपक्ष्यतीति आद्यक्रतिध्वंसमादाय च पाकदशायां अपाक्षीदिति प्रयोगापत्तिरिति भावः। ननु भविष्यत्वंयदि वर्तमान प्रागभाव प्रतियोगित्वं तदा नंक्ष्यतीत्यादौ प्रतियोगित्वस्याख्यातार्थतया तत्र भवि-

ष्यत्वस्यान्वया सम्भवात् धात्वर्थेनाशे तदन्वयो वाच्य:। तथा च श्वोभाविनाशके परश्वोनंक्ष्यतीति प्रयोगापत्ति: । तथाहि परश्वस्तनकालस्य नाशेऽन्वयस्वीकारे नाशस्य परश्वस्तनकालवृत्तित्वात् परश्वोनंङ्क्ष्यतीतिस्यात् । न च परश्वस्तनकालस्य भविष्यत्व घटकीभूत प्राग भावेऽन्वय:। एवं च परश्वस्तनकालवृत्तित्व वर्तमान प्राग भाव प्रतियोगित्वस्यनाशेऽ भावान्न तथा प्रयोगापत्तिरिति वाच्यं । तथासति श्वोभाविनाशके श्वोनङ्क्ष्यतीतिनस्यात्। नाशप्रगभावस्य श्वस्तनकालवृत्तित्वाभावात्। इहाद्यघटो भविष्यतीत्यादौ दैशविशेषस्य कालविशेषस्य वाधिकरणत्वेनोन्नतिरूपधात्वर्थ एवान्वयेस्वीपेयत्वात्। अन्यथा कपालनाशजन्य घटनाशस्थले इहकपाले घटध्वंसोभविष्यतीति प्रत्ययापत्ति:। घटरूपप्रतियोग्यात्मक घटध्वंस प्रागभावस्य कपालेसत्वात्। एवं श्वोभाविन्यद्यतनभविष्यद्घ्वंसो भविष्यतीति प्रत्ययापत्ति: । आद्यक्षालवृत्तित्वस्य प्रागभावेसत्वात् एवमुत्पत्तिमति तदन्वय स्वीकारे भवने श्व: समुत्पद्यप्रांगणे परश्वोगमिष्यति मैत्रे प्राङ्गणे परश्वो भविष्यतीति बुद्धिप्रसङ्गात्। उत्पत्ति मतश्चैत्रस्य प्राङ्गणवृत्तित्वात् परश्वस्तनकालवृत्तित्वाच्चैतिदेशविशेषस्य काल विशेषस्योत्पत्तिरूपधाधत्वर्थ एवान्वयो वाच्य: तथा च श्वोभाविनाशके परश्वोनङ्क्ष्यतीत्यापत्ति:। एवं नश्यति नष्ट इत्यत्र वर्तमानत्वं अतीतत्वं च धात्वर्थे नाशे एवान्वेष्यतीतिनष्टे नश्यतीति स्यात् नाशस्य वर्तमानत्वात्। नष्टे च नष्ट इतिनस्यात् नाशेऽतीतत्वाभावादिति चेन्नैवं। अत्र वर्तमान प्रागभाव प्रतियोग्युत्पत्तिकत्वरूप भविष्यत्वस्य वर्तमानध्वंस प्रतियोग्युत्पत्तिकत्वरूपा। तीतत्वस्य च प्रत्ययार्थत्वात् । प्रत्ययार्थोत्पत्तावेव च काल विशेषादेरन्वयात्। भविष्यत्वं च वर्तमान प्रागभाव प्रतियोगित्वं वर्तमानध्वंस प्रतियोगित्वमतीतत्वमित्युक्तिस्तु भविष्यति पच्यतीति स्थलाभिप्रायेण तत्र धात्वर्थोत्पत्ते; आख्यातार्थकृतेश्च सम्भवितयानुपपत्य भावात्। एवं च वर्तमान प्रागभाव प्रतियोगित्वे लाघवाच्छक्ति:। नङ्क्ष्यतीत्यादौ वर्तमान प्रागभाव प्रतियोग्युत्पत्तिकत्वबोधस्तु लक्षणयेति हृदयम्। अथेति । ओदनपदन्तण्डुलप्रं । विक्लित्यवच्छिन्न तण्डुलस्यैवोदनतया तस्य पाकासम्भवेन यथाश्रुता सङ्गते:। ओदननिष्ठा या विक्लितिस्तज्जनको यो व्यापारविशेषस्तत्कर्तृत्वं तदनुकूलकृतिमत्वं प्रतीयतइत्यर्थ:। तत्रेति । कर्तृत्वस्यानन्यलभ्यत्वादिति भाव: । तत्। फलं। द्वितीयाया इति। ओदनमित्यत्र द्वितीयाया इत्यर्थ: । फलस्यै-

क्रियाजन्यफलशालित्वं नतु फलमात्रमिति चेन्न। क्रियाया धातुवाच्यत्वात्। जन्यत्वाश्रयत्वयोश्च संसर्गमर्यादयालाभात्फलमात्र एव शक्तेः कल्पनात्। अनन्वलभ्योहि शब्दार्थः। ननु फलमपि धातुलभ्यमेव। फलानुकूलोव्यापारोहि धात्वर्थ इति चेन्न। फलानुकूलत्वोपलक्षितो विलक्षणव्यापारोहि धात्वर्थो नतु फलानुकूलत्वमपि गौरवात्। नन्वेवं त्यजिगम्योः पर्यायतास्यात् तथाहि। संयोगानुकूलं कर्मगमेरर्थः। विभागानुकूलं च कर्म त्यजेरर्थः। तच्च यदि फलानुकूलत्वमुपलक्षणं तदा कर्ममात्रं शक्यं तच्च वाच्यं। तथाच कुतोन पर्यायता। आस्तां पर्यायता कोदोष इति चेन्न। ग्रामं गच्छतीति वक्तव्ये ग्रामं त्यजतीत्यापत्तेः। मैवं। गच्छतीत्यादि समभिव्याहृत द्वितीयायाश्च विभागबोधकत्व व्युत्प-

---

वद्वितीयार्थत्वादिति भावः। तदनुकूलइति। फलानुकूलइत्यर्थः। विलक्षणेति। अधः संतापनादिरूपो व्यापारो धात्वर्थ इत्यर्थः। अनुकूलता चेति। व्यापारानुकूलक्रांतिमानित्यत्रानुकूलता चेत्यर्थः। संसर्ग इति। व्यापारक्रत्योः संसर्गइत्यर्थः। ननु कर्मत्वमिति कर्मणि द्वितीयेति सूचेण कर्मत्वस्य द्वितीयार्थ त्वबोधनादिति भावः। तच्च। कर्मत्वं च। नतुफलमात्रं कर्मत्वमित्यर्थः। क्रियाया इति। क्रियाजन्यफलशालित्वरूपे कर्मत्वइत्यर्थः। जन्यत्वेति। क्रिया जन्येत्यत्र जन्यत्वफलशालित्वमित्यत्र च शालित्वं आश्रयत्वमित्यर्थः। तयोःसंसर्गमर्यादयालाभात् फलमात्र एवशक्तेः। द्वितीयायाशक्तेः कल्पनादित्यर्थः। ननु क्रियादीनां धात्वादिना लाभेपि द्वितीयाया अपि शक्तिरास्तामत आह। अनन्येति। हि यस्मादनन्यलभ्य एव शब्दार्थ इत्यर्थः। धातुलभ्यमेवेति। तथा च कथन्तत्रापि द्वितीयायाः शक्तिः अन्यलभ्यत्वादिति भावः। वस्तुगत्या फलावच्छिन्नो यो व्यापारस्तद्बोधकत्वादेवधातूनां सकर्मत्व व्यवहारः जानातीत्यादिस्थले तुभाक्त इति सूचनार्थं फलानुकूल-

क्तेरेव यथोक्तेति प्रसङ्गनिरासात् । न्यायभास्करस्तत्तु । फलमवच्छेदकमेव । द्वितीयार्थस्वाश्रयता । नन्वेवं भूमौपतनीत्यत्र भूमिपदाद् द्वितीयापत्तिः समभिव्याहृतधात्वर्थतावच्छेदकफलाश्रयतावोधकत्वव्युत्पत्तेः । अतएव धात्वर्थतावच्छेदकफलाश्रितत्वं कर्मत्वमिति लक्षणं ध्रुवं । न

त्वोपलक्षितइत्युक्तं । ननुफलानुकूलत्वमपि धात्वर्थइत्यनुषज्यतो गौरवादिति । अनुकूलत्वस्य संसर्गमर्यादया लाभादिति भावः । नन्वेवमिति । व्यापार मात्रस्य धात्वर्थत्वे इत्यर्थः । त्यजिगम्योः त्यज् गम् धात्वोरित्यर्थः । उत्तर देशसंयोगावच्छिन्न क्रिया गम् धातोरर्थः पूर्वदेश विभागावच्छिन्नक्रिया त्यज् धात्वर्थः । तत्रफलावच्छिन्नत्वं यदिनधात्वर्थः तदा क्रिया मात्रस्यैव धात्वर्थत्वात्क्रियारूपैकार्थ प्रतिपादकत्वात् पर्यायता स्यात् शक्यतावच्छेदकैक्ये सति विभिन्नशक्तावच्छेदकत्वस्य पर्यायत्वरूपत्वादिति भावः । शङ्कते । आस्तामिति । त्यजतीति । गम् धातुनैव त्यज् धातुनापि व्यापारबोधनादिति भावः । नन्वेवमिति । पूर्वपक्षे समाधत्ते । नैवमिति । द्वितीयायाःफलमर्थः तत्र गम् धातुसमभि व्याहारे द्वितीयया संयोगरूपं फलं बोध्यते त्यज् धातुसमभिव्याहारे च विभागरूपं फलं बोध्यते इत्यर्थः । यथोक्तेति । ग्रामं गच्छतीति वक्तव्ये ग्रामंत्यजतीति प्रयोगापत्तिप्रसंगनिराकरणादित्यर्थः । तथा च व्यापार मात्रस्य धात्वर्थत्वे त्यजिगम्योः पर्यायत्वे इष्टापत्तिः । ग्रामङ्गच्छतीत्यत्रैव ग्रामवृत्तिसंयोगानुकूलकृतिमानितिबोधस्यगम् धातुसमभि व्याहाराभावात् ग्रामं त्यजतीत्यतोऽसम्भवेन ग्रामङ्गच्छतीति वक्तव्ये ग्रामं त्यजतीति प्रयोगापत्तेर्वारयितुं शक्यत्वादिति भावः । अवच्छेदकमेव । धात्वर्थतावच्छेदकमेव । फलावच्छिन्न व्यापारस्य धात्वर्थत्वादिति भावः । नन्वेवं द्वितीयाया निरर्थकत्वापत्तिः । फलस्य धातुत एव लाभादित्यतआह द्वितीयार्थ स्त्विति । ग्रामङ्गच्छतीत्यादौ ग्रामवृत्तिसंयोगावच्छिन्नक्रियानुकूलकृतिमानित्यन्वयबोधः । तत्र पूर्वकल्पे फलस्य द्वितीयार्थत्वात् । आधेयत्वं संसर्गमर्यादया भासते । अस्मिन् मते तु फलस्य धात्वर्थत्वात् द्वितीयार्थे एवाश्रयतेति

क्रियाजन्यफलाश्रयत्वं तत्। वृक्षाद्भूमौ पततीत्यत्र वृक्ष-भूम्योः कर्मजन्यविभागसंयोगाश्रयतया कर्मत्वापत्तेः। ननु तत्राश्रयः संयोगानुकूलव्यापारस्य पतत्यर्थतया कर्मत्वं भूमेर्दुरत्यजमिति चेन्न। पतत्यर्थे फलस्यावच्छेदकत्वानङ्गीकारात् तद्धात्वर्थावधिकरणत्वे सतीति विशेषणाच्च। नचैवस्य धात्वर्थतावच्छेदकफलग्रामसंयोगाश्रयत्वेपि कर्मत्वमिति स्वीकुर्वतीति संक्षेपः। तस्य शब्दस्य निराकाङ्क्षादाश्रयबोधकत्वादाकाङ्क्षादिकं सहकारि। तत्र यत्प्रदेन

भावः। नचैवमिति। एवं आश्रयत्वार्थकत्वे। भूमाविति। भूमौपततीत्यत्र भूमावाश्रयत्वस्यात्रबोधाद्भूमिपदोत्तरद्वितीयापत्तिः। मन्मते तु तत्र फलस्याबोधनात् न तद्बोधक द्वितीयापत्तिरितिभावः। समभिव्याहृतेति। समभिव्याहृतो यो धातुस्तदर्थतावच्छेदकं यत्फलन्तदाश्रयतावोधकत्वं द्वितीयाया इत्यर्थः। तथा च यत्र समभिव्याहृतधात्वर्थतावच्छेदकफलाश्रयत्वे बोधस्तत्र द्वितीया भूमौ पततीत्यादौ तु पत्धातोरकर्मकतया धात्वर्थतावच्छेदकफलाभावेन तदाश्रयत्वस्याबोधनात्। आश्रयत्वबोधेपि न द्वितीयेति भावः। न च तथापि फलावच्छिन्न व्यापारस्य धात्वर्थत्वे फलस्यैकदेशतया कथन्तत्र द्वितीयार्थाश्रयत्वादेरन्वय इति वाच्यं। आकांक्षावैचित्र्यादेकदेशेप्यन्वयस्वीकारात्। अतएव पदार्थान्विताधेयत्वबोधकसमभीतो द्वितीयाभेद इति हृदय। अतएवेति। फलावच्छिन्ने व्यापारस्य धात्वर्थत्वादेवेत्यर्थः। ध्रुवमिति। अन्यथा व्यापारमात्रस्य धात्वर्थत्वे फलस्य धात्वर्थत्वे फलस्य धात्वर्थतानवच्छेदकतया कर्मत्वं दुर्वचमिति भावः। ननु मास्तु धात्वर्थतावच्छेदकफलशालित्वं कर्मत्वं किन्तु क्रियाजन्यफलशालित्वमतआह। नहीति। तदिति। कर्मत्वमित्यर्थः। चैत्रो ग्रामङ्गच्छतीत्यत्रोत्तरदेश संयोगावच्छिन्न क्रिया गम् धातोरर्थः। तज्जन्योत्तरदेशसंयोगरूपफलशालित्वात् ग्रामकर्मत्वं। न च संयोगस्य द्विनिष्ठत्वाच्चैत्रस्यापि कर्मत्वापत्त्या चैत्रः स्वात्मानङ्गच्छतीति प्रयोगापत्तिरिति वाच्यं। परसमवेतत्वस्य क्रिया विशेषणत्वात्। तथा च परसमवेता या क्रिया तज्जन्यफलशालित्वं कर्मत्वं। न चोभयकर्मजस्थले मञ्जोम-

ङ्गं गच्छतीतिवत् मल्लः स्वात्मानङ्गच्छतीति स्यादिति वाच्यं । प्रकृत्यर्थान्वयेच्छया हि परत्वं द्वितीयादिना बोध्यते ग्रामङ्गच्छतीत्यत्रग्रामभिन्नसमवेतग्राम-वृत्तिसंयोगजनक क्रियानुकूलकृतिमानित्यन्वयबोधः । स्वात्मानं गच्छतीत्यत्र तु स्वात्मभिन्नसमवेता स्वात्मवृत्तिसंयोगजनिका या मल्लोत्तरवृत्तिक्रिया तदनु-कूलकृतिमत्वस्य स्वस्मिन्नभावेन तादृश प्रयोगापत्यसम्भवात् । अथ प्रकृत्यर्थ-स्यान्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन परत्वे ऽन्वये पृथिवीं प्रयातिविहगइत्यत्र पृथिवीत्वस्यान्वयितावच्छेदकतया तदवच्छिन्नभिन्नत्व-स्य विहगेऽभावादेरन्वयापत्तिः । प्रतियोगितासामान्येनैवान्वये च द्वित्वावच्छिन्न भेदमादायस्वात्मानं प्रयोगापत्तिरितिचेन्न द्वितीयार्थफले यद्यत्कर्तृनूयस्तद्वृत्ति-त्वावच्छिन्न प्रयितोगितासम्बन्धेन प्रकृत्यर्थस्य परत्वेऽन्वयात् । पृथिवीं प्र-याति विहगइत्यादौ यत्पृथिवीव्यक्तिवृत्तिसंयोगजनकं प्रयाणं शाब्दबोधवि-षयस्तद्व्यक्तिभिन्नत्वस्य विहगेऽबाधादिति । केचित्तु । सामान्यपदस्य विशेष्य-परतया पृथिवीपदेन भूखण्डमेव बुध्यते नतु विहगसाधारणपृथिवीत्वजात्य-वच्छिन्नमित्यनूयितावच्छेदकावच्छिन्नमित्यनूयितावच्छेदकावच्छिन्न प्रति-योगिताकत्वसम्बन्धेन प्रकृत्यर्थस्यापरत्वेऽन्वयेपि न दोष इत्याहुः । वृक्षभू-म्योरिति । वृक्षस्यकर्मजन्यविभागाश्रयतया भूमेश्चकर्मजन्यसंयोगाश्रयतये-त्यर्थः । पतनरूप क्रियाजन्यं फलं पूर्वदेशेन वृक्षेण सह विभागभूमिरूपोत्तरदे-शसंयोगश्चेति वृक्षभूम्योरुभयोरपि कर्मत्वापत्तिः । पतधातोरकर्मकतयेष्टाप-त्तेरयोगादिति भावः । इदमुपलक्षणं । गमनजन्यविभागरूपफलशालित्व-स्य पूर्वदेशे सत्वाद्गमेः पूर्वस्मिन् देशे कर्मत्वापत्तिः । त्यजेश्चोत्तरस्मिन् देशे स्य-देश्च पूर्वापरयोः कर्मत्वापत्तिरित्यपिद्रष्टव्यं । पतत्यर्थतया । पतधात्वर्थतया । दुस्त्यजमिति । धात्वर्थतावच्छेदकाधःसंयोगादिरूपफलशालित्वादिति भावः । पतत्यर्थ इति । अधःसंयोगावच्छिन्न क्रिया न पतत्यर्थः । किन्तु गुरु-त्वासमवायिकारणकविजातीयक्रियामात्रमिति धात्वर्थतावच्छेदकफला-भावेन न कर्मत्वापत्तिरिति भावः । ननु धात्वर्थतावच्छेदकफलशालित्वस्य कर्मत्वरूपत्वे चैत्रोग्रामङ्गच्छतीत्यत्रोत्तरदेशसंयोगावच्छिन्नक्रिया गम् धा-त्वर्थ इति धात्वर्थतावच्छेदक संयोगरूपफलशालित्वस्य ग्रामे इव चैत्रे पि स-त्वात्तत्रापि कर्मतापत्तिः । तथा च चैत्रः स्वात्मानङ्गच्छतीति प्रयोगापत्तिरत-आह । तद्वात्वर्थेति । यद्वात्वर्थतावच्छेदकफलशालित्वं तद्वात्वर्थानधिकरणत्वे-

मतीत्यर्थः। तेनकर्मणोधात्वर्थान्तराधिकरणत्वेपि नामस्भवः। न चैवस्येति। गम्धात्वर्थतावच्छेदकंयत्फलंग्रामवृत्तिसंयोगस्तदाश्रयत्वेपि चैचस्य न कर्मत्वमित्यर्थः। गमनरूपधात्वर्थानधिकरणत्वाभावादिति भावः। स्वीकुर्वंतीत्यनेनास्वरसः सूचितः। सच फलावच्छिन्न व्यापारस्य धात्वर्थत्वे द्वितीयार्थाश्रयत्वस्य तदेकदेशे फलेऽन्वयस्वीकारे एकदेशान्वयापत्तिः। एवंलज्जासत्ताद्यर्थकाकर्मकधातूनां व्यापारमाचार्थकतया तच पर्यायत्वापत्तिवारणवर्म्मैव सकर्मकधातूनामपि पर्यायत्ववारणे किमिति गुरुफलावच्छिन्नव्यापारत्वं शक्यतावच्छेदकं। न चैवं कर्मत्वस्य दुर्वचत्वापत्ति वाच्यं। परसमवेततद्धात्वर्थान्वयिफल विशेषशालित्वं तद्धात्वर्थकर्मत्वमिति तन्निर्वचनात्। संयोगरूपफल विशेषस्य गम्धात्वर्थन्वयित्वादुत्तरदेशे कर्मत्वं विभागरूपफलस्य च गम्धात्वर्थानन्वयेन पूर्वदेशे कर्मत्वापत्त्यभावात्। पततीत्यच फलविशेषाबोधाद्धात्वर्थत्वेन्वयिफल विशेषशालित्वरूपकर्मत्वस्य न वृक्षभूम्योरापत्तिरिति। अत्रेदमवधेयं। कर्त्राख्यातस्थले चैत्रः पचतीत्यादौ पाकानुकूलकृतिमांश्चैत्र इति शाब्दबोधः। कर्माख्यातस्थले तु चैत्रेण पच्यते तण्डुल इत्यादौ तृतीयायाआधेयत्वमर्थः। फलावच्छिन्न व्यापारोधात्वार्थः। आख्यातवलाच्चकृतेर्लाभः। तथा च चैत्र निष्ठकृतिजन्यपाक जन्यफलशाली तण्डुल इत्यन्वयबोधः। आख्यातार्थकृतेर्धात्वर्थ विशेष्यत्वविशेषणत्वाभ्यामेवकर्तृाख्यात व्याहार इति प्राञ्चःनव्यास्तु क्रियाजन्यफलशालित्वरूप कर्मत्वबोधस्य कर्माख्यातस्थले आख्यातस्य फलबोधकत्वं विनानुपपत्तिः। तथाहि। फलस्य प्रकारतया भानात्संसर्गमर्यादया भानासम्भवफलावच्छिन्न व्यापारस्य धात्वर्थत्वेपि विशेष्ये विशेष्यभावव्यत्यासस्यासम्भवात् क्रिया जन्यफलशालित्वं कथं बुध्यते। इसच्च फलस्य धात्वनेपदार्थत्वे व्यापारमात्रं धात्वर्थः चैत्रेण गतमित्यादौ तृतीयायाः कर्तृत्वार्थत्वावश्यकतया तृतीयाया एव कृतिरर्थः आख्यातार्थ कृतेर्धात्वर्थ विशेष्यतयैव भानस्य कर्त्राख्यातस्थले क्लृप्तत्वात्तङ्गीकापत्तेः सुबर्थकृतेश्च धात्वर्थविशेषणत्वेनैव भानस्य क्लृप्तत्वात्कर्तृत्वकर्मत्वबोधकत्वादेव च कर्तृकर्माख्यात व्यवहार इति प्राहुः। वैयाकरणास्तु। आख्यातस्य कर्त्तरि शक्तिः। कर्तृकर्माभिधानानभिधानाभ्यां तृतीया द्वितीया नियमस्य कर्तृकर्मसंख्याभिधानानभिधानाभ्यामुपपत्तावपि लाघवादेव तत्र शक्तिः। तथाहि। चैत्रः पचतीति शाब्दसामग्रीकाले कर्तृप्रकारक ज्ञानाभावप्रत्यूहवारणाय-

सह यादृशान्वयानुभवजनकं तत्पदस्य तत्पदसमभिव्याहारस्तादृशान्वयबोधे आकाङ्क्षा । भवति हि नामपदमुत्तरवर्त्ति विभक्तिपदेनैव सहान्वयबोधकमतस्तस्य समभिव्याहारस्तादृगन्वय आकाङ्क्षा । अतएव घटकर्मत्वमित्यतो न घटमिति वदन्बोध आकाङ्क्षाविरहात् । धातुपदं चाख्यातपदेनैव सहान्वय विशेषबोधकमिति । भवति तचाख्यातपदसमभिव्याहार आकाङ्क्षा । अतएवानयनं कृतिरित्यादावानयतीति वदन्नान्वयबोधः । कृतिवाचकाख्यात समभिव्याहाराभावेन निराकाङ्क्षत्वात् । ननु नामपदं द्वितीया दि-

---

तादृशप्रत्यक्षे शाब्दसामग्र्याः प्रतिबन्धकत्वं कल्पनीयं । वैयाकरणमते तु विषयासत्वादेव तादृशप्रत्यक्षवारणान्नतत् कल्पनं । न च कृतिप्रकारक ज्ञानाभाव प्रत्यक्षे ममापि कल्पनमिति वाच्यं । कर्तृप्रकारकज्ञान काले कृतिप्रकारकज्ञानस्यावश्यकतया ममापि विषयासत्त्वयेव तद्वारणात् । कृतिप्रकारक ज्ञानकाले च कर्तृप्रकारक ज्ञानस्याभावेन साम्याभावात् । एवं शाब्दसामग्र्याभावे तादृशप्रत्यक्षहेतुत्वसम्बन्धकल्पने गौरवमित्याहुस्तदसत् । गुरुशरीर कर्तृप्रकारक योग्यताज्ञानाभावादिरूपबाधाभावादिघटित तथाविधशाब्दसामग्र्याभावे घटपटादिप्रत्यक्षकारणत्वकल्पने गौरवात् । लाघवेन कृतित्वजातेरेवाख्यातशक्यतावच्छेदकत्वादिति दिक् । तस्य शब्दस्येति । वृत्तिमच्छब्दस्येत्यर्थः । निराकाङ्क्षादाविति । आदिना अयोग्यानासन्नपरिग्रहः । सहकारीति । ज्ञायमानं सत् सहकारीत्यर्थः । तच्च । आकाङ्क्षां निरूपयति । तच्चेति । यादृशान्वयइति । यद्विशेषप्रकारकयत्प्रकारकयत्संसर्गकान्वयबोधजनकमित्यर्थः । इदमेवोपपादयति । भवति हीति । नामपदमिति । घटमानयेत्यत्र नामघटपदं उत्तरवर्त्तिविभक्तिपदेन स्वोत्तरवर्त्ति अमूरूपविभक्ति पदेनैव सह । अन्वयेति । घटीया कर्मतेति । आधेयतासंसर्गकं घट प्रकारक कर्मत्व विशेषप्रकारान्वयबोधजनकमित्यर्थः । अतस्तस्येति । घटपदस्य विभक्ति समभिव्याहार इत्यर्थः । तादृगन्वय इति । घटीया कर्मतेत्यन्वये आकाङ्क्षेत्यर्थः । अत एवेति यादृशा-

विभक्तिसमभिव्याहृतमेव । कर्मत्वादीनामाश्रयाश्रयिभावेनान्वयबोधकमित्यत्र किंनियामकमिति चेन्न । नाम्नः स्वार्थनिष्ठकर्मत्वानुभवजनने तदुपस्थापक विभक्ति सहकारित्वमिति गृह्यताम् । हन्तैवं यस्य पुरुषस्य घटः कर्मत्वमित्यादि वाक्यव्युत्पत्तिरभूत् न कुतस्तनोऽन्वयबध इति चेत् । तस्मिन्पुरुष एव मानं नास्ति का कथा तस्यान्वयबोधे । तथापि यदि कश्चित्साहसः स्यात्तस्य किं भविष्यतीति चेत् । शाब्दानुभववैधर्म्यमेवान्वय व्यतिरेकसिद्धकारण विरहादिति । एतस्याश्चाकाङ्क्षाज्ञायाज्ञानं हेतुः। तद्भ्रमेणान्वयबोधात् । अपरा च प्रकृतान्वय बोधसमानाकारस्वजन्यान्वयबोध विरहः प्रकृतान्वयबोधे स्वरूपसति हेतुराकाङ्क्षा । अतो घटमानयतीति पदमेकदान्वयबोधे जनितेनान्वय बोधान्तरं जनयति । स्वजन्यान्वय बोधवैधुर्यविरहात् । एवं च गामानयेत्यतोऽन्वय बोधे जाते दण्डेनेत्यन्वय बोधे निराकाङ्क्षता स्यात् । अतउक्तं प्रकृतान्वयबोध समानाकार इति नच गामानयेत्यन्वयबोधः प्रकृतो येन दण्डेन गामानयेत्यन्वयबोधस्तेन समाना-

---

न्वयनिप्रवेशादेवेत्यर्थः । घटः कर्मत्वमिति । घटः कर्मत्वमानयनं कृतिरिति-निराकाङ्क्षवाक्ये समानविभक्तिकनामपदयोरभेदान्वय साकाङ्क्षत्वेन घटः कर्मत्वमित्यादौ अभेदान्वय साकाङ्क्षत्वेपि आधेयतासम्बन्धेन साकाङ्क्षत्वाभावात् यादृशान्वयेति विवक्षणीयमिति भावः । योग्यताभ्रमेणाभेदान्वयबोधस्येष्टत्वात् घटमिति वदित्युक्तं । घटीया मतेति नान्वयबोधइत्यर्थः । आकाङ्क्षेति । घटपदस्यामूपदसमभिव्याहाररूपाकाङ्क्षाविरहादित्यर्थः । धातुपदं चेति । आनयेत्यत्र धातुपदं चाख्यातपदेनैवसहानुकूलतासंसर्गकानयनप्रकारक प्रकृति विशेषाकान्वयबोधजनकं भवति तत्र धातुपदे आख्यातपद समभिव्याहार आकाङ्क्षेत्यर्थः । अत एवं धातुपदे आख्यातपद समभिव्याहारस्या-

काङ्क्षत्वादेव । आनयनं कृतिरिति अभेदान्वय साकाङ्क्षत्वेपि आनयतीत्यत्रे-वानुकूलता संसर्गकानयन प्रकारक कृतिविशेष्यकान्वयबोधइत्यर्थः । कृतीति । कृतिवाचक कृतिपदस्य सत्वेपि कृतिवाचकाख्यातसमभिव्याहाराभावेनेत्यर्थः । निराकाङ्क्षत्वादिति । आनयनानुकूलाकृतिरित्यनूयबोधे निराकाङ्क्षत्वादित्यर्थः । नन्विति । कर्मत्वबोधकर्मत्वोपस्थापकपदत्वेन कारणतया घटः कर्मत्वमित्यत्रापि कर्मत्वोपस्थापकपदमत्वेन घटमिति वत् कृतोनान्वयबोधः । कार्यस्य सामग्र्याधीनत्वात्सामग्र्याश्चापि सत्वादिति भावः । कर्मत्वादीनामिति । घटादिनामहेतिशेषः । स्वार्थेति । नामार्थेत्यर्थः । कर्मत्वोपस्थापकेत्यर्थः । तथाचान्वयान्वयिभाव सम्बन्धेन नामार्थनिष्ठकर्मत्व विषयकशाब्दबोधत्वावच्छिन्नं प्रतिनामपदममभिव्याहृत द्वितीयापदज्ञानत्वेन कारणत्वात् घटः कर्मत्वमित्यादौ तदभावान्न घटमिति वदनूयबोध इति भावः । इतिवमिति । एवं आधेयता संसर्गकनामार्थनिष्ठकर्मत्वानूयबोधकर्मत्वोपस्थापक विभक्तेरेव सहकारित्वे । घटः कर्मत्वमित्यादेर्निराकाङ्क्षत्वे इति यावत् । व्युत्पत्तिरिति । आधेयतासम्बन्धेन घटीया कर्मतेत्यनूबोधे घटः कर्मत्वमिति समभिव्याहारः कारणमिति कारणत्वग्रहोऽभूदित्यर्थः । तत इति । घटः कर्मत्वमित्यादि वाक्यादित्यर्थः । कर्मत्वोपस्थापक विभक्ति समभिव्याहारादिति भावः । तस्मिन्पुरुषे । घटः कर्मत्वमित्यादि निराकाङ्क्षवाक्ये विपरीत व्युत्पन्नेत्यर्थः । काकथेति । तथाच तादृशपुरुषस्यालोकतया तस्यानूयबोधस्यापि अलीकत्वेन घटीया कर्मतेत्यनूयबोधे कर्मत्वोपस्थापक विभक्तित्वेन कारणतायां न व्यभिचार इति भावः । तादृशः स्यात् घटः कर्मत्वमिति वाक्ये विपरीतव्युत्पन्नः स्यात् तस्य किमिति तस्यानूयबोधः कथं भविष्यतीत्यर्थः । कर्मत्वोपस्थापक विभक्ति समभिव्याहाराभावादिति भावः । शाब्देति । घटीया कर्मतेति शाब्दबोधाभावइत्यर्थः । ननु कर्मं न तत्र कार्यमतआह । अनूयेति । प्रयशः घटमिति वाक्यएव व्युत्पन्नानां घटः कर्मत्वमिति वाक्यात् घटीया कर्मतेत्यनुभवाभावेन तादृशानूयबोधे घटमिति समभिव्याहारस्य कारणत्वावश्यकतया पुरुषभेदेन कारणत्वकल्पने गौरवात् घटः कर्मतमिति वाक्यान्न कस्याप्यनूयबोध इति । आधेयता संसर्गकघट प्रकारक कर्मत्वविशेष्यक शाब्दबोधे घटपद समभिव्याहृत कर्मत्वोपस्थापक द्वितीया विभक्तित्वेन कारणत्वेन व्यभिचार इति दिक् । तस्याश्चेति । समभिव्याहा-

कार इति दिक्। योग्यता च एकपदार्थेऽपरपदार्थस्य प्रकृतसंसर्गवत्त्वं। तेन पयसा सिंचतीति योग्यं पयसि सेककरणत्वसंसर्गस्य सत्त्वात्। यस्मिंश्च पयसि सेककरणत्व संसर्गो नास्तितस्मिन्नयोग्यं। आकाशं शब्द इत्यत्र समवायरूपसंसर्गवत्त्वमादायाभेदान्वयबोधेपि योग्यतास्यादतउक्तं प्रकृतेति। अस्याश्च ज्ञानं कारणं। तद्भ्रमेणाप्यन्वयबोधात्। ननु संसर्गस्यापूर्वत्वात्कथं प्रथमं तदा न संभव इति चेत्। उच्यते। योग्यताज्ञानमात्रं हेतुः। अस्तिचात्रपयः सेककरणतावन्नवेति संशयरूपं ज्ञानं क्वचित्तन्निश्चयेपि। यथा

रूपायाश्चाकाङ्क्षायाज्ज्ञानं कारणमित्यर्थः। तद्भ्रमेणेति। समभिव्याहारभ्रमेणेत्यर्थः अन्वयेति। स्वरूपसत्त्वास्तस्या हेतुत्वे स्वरूपसत्त्वास्तत्राभावेन शाब्दानुदयप्रसङ्गाज्ज्ञानं कारणं तच्च भ्रमात्मकं तच्च सम्भवत्येवेति भावः। प्रकृतेति। यद्विशेषणकयत्प्रकारक यत्संसर्गकोऽन्वय बोधस्तत्समानाकारकः तद्विशेषणकः तत्प्रकारकः तत्संसर्गकोयः स्वजन्या अन्वयबोधः पदजन्यान्वयबोधः। तद्विरहः प्रकृतान्वये तद्विशेषणकतत्प्रकारक तत्संसर्गकान्वयबोधे स्वरूपसती अपराऽकाङ्क्षा हेतुरित्यर्थः। अत इति अपराकाङ्क्षायाः स्वरूपसत्त्वाद्धेतुत्वादित्यर्थः। एकदेति। घटकर्मकानयनमिति बोधे जनिते अन्वयबोधान्तरं घटकर्मकानयनमिति बोधान्तरं न जनयतीत्यर्थः। तत्र हेतुमाह। स्वजन्येति। वाक्यजन्यानुभवविरहरूपकारणाभावादित्यर्थः। घटमानयेत्यत्र घट कर्मकानयनानुकूलाकृतिरिति शाब्दबोधे जाते पुनस्साट्टगन्वयबोधापत्तिवारणाय प्रकृतशाब्दबोधाभावरूपाकांक्षाया अपि कारणत्वमावश्यकमिति भावः। एवं चेति। स्वजन्यान्वयबोधविरहरूपाकांक्षाया अवश्यहेतुत्वे चेत्यर्थः। गामिति। दण्डेन गामानयेत्यात्रावांतरवाक्यार्थबोध पूर्वकस्यैव महावाक्यार्थबोधस्यानुभवसिद्धत्वात् गोकर्मकानयनमित्यन्वयबोधे जाते दण्डेनेत्यन्वयबोधे दण्डकरणकगोकर्मकानयनमिति महावाक्यार्थबोधे निराकांक्षता स्यादित्यर्थः। न चेति। नहीत्यर्थः। गामिति। गोकर्मकमानयनमित्य-

न्वयबोध इत्यर्थः प्रकृतः । दण्डेन गामानयेति वाक्यतात्पर्यविषयः । तेन गामानयेत्यन्वयबोधेन । समानाकार इति । समानविषयक इत्यर्थः । तथा च प्रकृतान्वयबोध समानाकारत्वं स्वजन्यानुभवविशेषणमिति भावः । नन्वेवमन्वयबोधइयंजायतामिति तात्पर्ये घटमानयेति वाक्यादेकबोधे जाते घटान्वयबोधो न स्यादित्यत आह । दिगिति । एवंतात्पर्यविषयत्वमप्यन्वयबोधे विशेषणमित्यर्थः । तथा च तात्पर्यविषयीभूतबोधइयस्य तत्र जातत्वान्नाकांक्षा च्युतिरिति योग्यतालक्षयति । योग्यता चेति । एकपदार्थेऽपरपदार्थस्य यादृश संसर्गवत्वं योग्यतेत्यर्थः । लक्ष्येलक्षणंयोजयति । पयसीति । नन्वेवंकरकाभिप्राये प्रयुक्तं पयसा सिंचेतीति वाक्यमपियोग्यं स्यादत आह । यस्मिंश्चेति । करकासमुद्रमध्यस्थजलादावित्यर्थः । तस्मिन् करकादिरूपे पयसि । अयोग्यमिति । एकाकारवाक्यस्यापि विषयबाधाबाधाभ्यां योग्यायोग्यत्वमिति भावः । आकाशमिति । आकाशे शब्दसमवायसत्वादभेदान्वयमादायापि योग्यतापतिरिति प्रकृतेति विशेषणोपादानं । तथा च एकपदार्थेऽपरपदार्थस्य यादृश संसर्गवत्वं तत्संसर्गमादाय योग्यता प्रकृतेचाभेदसंसर्गस्याकाश शब्दयोर्बाधान्नाभेद संसर्गमादाय योग्यतेति । अस्याश्चेति । एकपदार्थेऽपरपदार्थ संसर्गरूपाया योग्यताया श्चेत्यर्थः । तद्भ्रमेणापि योग्यताभ्रमेणापि । अन्वयेति । करकाभिप्राय प्रयुक्तपयसा सिञ्चतीत्यत्रान्वयबोधादित्यर्थः । स्वरूपसत्वास्तस्याः कारणत्वे सेकसंसर्गस्यासत्वेन शाब्दबोधानुदयप्रसङ्गाज्ज्ञानकारणमिति भावः । एतन्मते वह्निना सिञ्चतीति वाक्यं स्वरूपायोग्यंध्यम् । तदुक्तं । नहि आरोपितसामर्थ्यं इतिप चति वेति । संसर्गस्य । पयसि सेकसंसर्गस्य । अपूर्वत्वात् । शाब्दबोधात्पूर्वमप्रप्रतीतत्वात् । कथमिति । तथाच कथंयोग्यता ज्ञानं शाब्दबोधे कारणमिति भावः । ज्ञानमात्रमिति । संशयनिश्चयसाधारण ज्ञानमात्रमित्यर्थः । अत्र पयसा सिञ्चतीत्यत्रासंशयरूपं ज्ञानमिति । तथा च निश्चयरूपज्ञानस्य पूर्वमसत्वेपि संशयस्यासत्वात्ज्ञानस्य कारणत्वे बाधका भावः इति भावः । ननु निश्चयस्य क्वचित्पूर्वसत्वे तत्साधारणं ज्ञानं कारणंस्यात्तदेव तु कुतइत्यताह । क्वचिदिति । तत्रनिश्चयोपि । योग्यता निश्चयोपि । संभवतीत्यनुषज्यते । निश्चयस्य स्थलमाह । प्रत्यक्षेणेति । दृष्टे । घटे दृष्टे । घटोस्तीति । भूतले घटनिश्चये जाते भूतले घटोस्तीति वाक्याच्छाब्दबोध इत्यर्थः । शाब्दसिद्धेरेव शाब्दबोध प्रतिबन्धकतया प्रत्य-

प्रत्यक्षेण दृष्टे घटोऽस्तीति। परेतु। असंसर्गग्रहः प्रतिबन्धकस्तदभावो योग्यता स्वरूपसती हेतुः। नचैवं जलह्रदो वह्निमानित्यप्यसंसर्गाग्रहदशायां योग्यंस्यात्। दृष्टत्वात्। नच ज्ञात्वासंसर्गज्ञानं कारणं नत्वसंसर्गाग्रह इति वाच्यं। असंसर्गाग्रहस्य लौकिकसाक्षात्कारातिरिक्तपित्तादिदोषाजन्य विशिष्टज्ञानमात्रे एव हेतुत्वावधारणात्। कथमन्यथा चन्दनं न सुरभीति निश्चये सुरभिचन्दनमितिज्ञानं न स्यात्। तदभावानुमितावपि चक्षुषा घटस्य लौकिकसाक्षा-

---

त्वनिर्णये शाब्दबोधोदयादिति भावः। अत एव स्वजन्यान्वयबोधविरहः आकांक्षेत्युक्तं। नत्वन्वयबोधविरह इति। असंसर्गग्रह इति। तेन सम्बन्धेन तदभावग्रह इत्यर्थः। प्रतिबन्धकः शाब्दबोधे प्रतिबन्धकः। तदभावः। तेन सम्बन्धेन तद भाव ग्रहाभावो योग्यतेत्यर्थः। सा। असंसर्गाग्रहरूपा योग्यता स्वरूपसती शाब्दबोधे हेतुः। नचैवमिति। असंसर्गाग्रहस्यैव योग्यतात्वे इत्यर्थः। जलह्रद इति। जलह्रद दोवन्त्य भाववानिति बोधा भावदशायाञ्जलह्रद दोवह्निमानित्यपि वाक्यं योग्यंस्यादित्यर्थः। दृष्टत्वादिति। तवापि योग्यताभ्रमाच्छाब्दभ्रमाभ्युपगमादिति भावः। वह्निना सिञ्चतीति वाक्यंतु स्वरूपा योग्यमेव। नह्यारोपितसामर्थ्यं दहति पचतिवेति। न चेति। लाघवात्। संशयनिश्चयसाधारण संसर्गज्ञानत्वेन कारणत्वे लाघवात्। कारणं शाब्दबोधे कारणं नतु असंसर्गा ग्रहः नतु सम्बन्धाभाव निश्चया भावः। संसर्गग्रहापेक्षया संसर्गाभावनिश्चयाभावत्वेन कारणत्वे गौरवादित्यर्थः। असंसर्गाग्रहस्येति। बाधाभावस्येत्यर्थः। लौकिकेति। लौकिकसाक्षात्कारातिरिक्तं पित्तादिरूप दोषाजन्यञ्च यद्विशिष्ट ज्ञानन्तस्यैव एव कारणत्वावधारणादित्यर्थः। तथा च विशिष्टबुद्धिसामान्य एव बाधाभावस्य कारणत्वात्तेनैवायोग्यवारणे विशिष्य योग्यतायाः शाब्दबोधे न कारणत्वमतिरिक्त कारणत्वकल्पने गौरवादिति भावः। विशिष्टबुद्धिसामान्ये बाधाभावस्य हेतुतां व्यवस्थापयति। कथमन्यथेति। बाधाभावस्य विशिष्टबुद्धिसामान्ये च हे-

त्कारः शंखेषु पीतत्वभ्रमस्य दृश्यत इति अजन्यान्तं । न च घ-टोभिधेय इत्यत्राभिधेयत्वासंसर्गाप्रसिद्धया तद्ग्रहाप्रसिद्धिः । अभिधेयत्वप्रतियोगिकत्वेन योऽभावभ्रमरूढभावस्य प्रसि-

---

तुल्ये इत्यर्थः । लौकिकसाक्षात्कारातिरिक्त इत्यस्य व्यावृत्तिमाह : तद भावेति । घटाभावानुमितावपि घटस्य लौकिकसाक्षात्कारोदयाल्लौकिकसाक्षात्कारातिरिक्तत्वं विशेषणं । पित्तादिदोषाजन्यत्वस्य व्यावृत्तिमाह । शंखइति । तद भावानुमितावपीत्यनुषज्यते । शंखे पीतत्वा भावानुमितावपि शंखः पीत इति दोषजन्यज्ञानोदयादूदोष जन्यत्वं देयमिति भावः । अजन्यान्तमिति । लौकिकसाक्षात्कारातिरिक्त पित्तादिदोषाजन्यत्वं विशेषणमित्यर्थः । नेदं रजतमिति ज्ञाने इन्द्ररजतमिति दोषजन्य ज्ञानापत्तिवारणाय पित्तादिरूपो दोषो निवेशितः । केचित्तु । दोष विशेषजन्यपीतः शंख इति ज्ञानोत्तरं पीतंसाक्षात्करोमीति साक्षात्कारित्वग्रहोदयाल्लौकिक विषयतायाश्च साक्षात्कारित्व व्यञ्जकतया तत्र लौकिक विषयतया अवश्यंस्वीकारेण लौकिकसाक्षात्कारित्वग्रहोयात् लौकिक विषयताशालिसाक्षात्कारातिरिक्तेत्यनेनैवपीतः शंख इति ज्ञानवारणे पित्तादिदोषाजन्यत्वं प्रतिबध्यतावच्छेदक कोटौ नदेयमेव । न च लौकिक विषयतायां लौकिकसंनिकर्षस्यैव नियामकतया कथं तत्र तेन विना पीतत्वांशे लौकिक विषयतेति वाच्यं । लौकिकसंनिकर्षवत् दोष विशेषस्यापि लौकिक विषयतानियामकत्वोपगमात् । फलानुरोधित्वात्कल्पनाया इत्याहुः । न च घट इति घटोभिधेय इत्यत्र स्वरूप सम्बन्धसंसर्गकघटविशेष्य काभिधेयत्वप्रकारकबुद्धिं प्रति घट विशेष्यकस्वरूप सम्बन्धावच्छिन्न प्रतियोगिताकाभिधेयत्वाभाव प्रकारक निश्चया भावस्वरूप बाधाभावत्वेन कारणता वाच्या । तत्तु न सम्भवति स्वरूप सम्बन्धेनाभिधेयत्वा भावस्य कुत्राप्यप्रसिद्धेरित्यर्थः । अभिधेयत्वेति । आभिधेयत्व प्रतियोगिकस्वरूप सम्बन्धाभावा प्रसिद्धेरित्यर्थः । तदग्रहाप्रसिद्धेः । अभिधेयत्वा संसर्गग्रहा प्रसिद्धेः । समाधत्ते । अभिधेयत्वेति । वस्तुगत्यास्वरूप सम्बन्धेनाभिधेयत्वाभावस्या प्रसिद्धावपि घटाभावेऽभिधेयत्व प्रतियोगिकत्व भ्रमः प्रसिद्ध एवेत्यर्थः । तदभावस्य । अभिधेयत्वप्रतियोगिकत्वेना भावग्रहा भावस्य प्रसिद्धेरित्यर्थः । घट विशिष्टबुद्धिं प्रति वस्तुगत्याघटा भावग्रहाभा-

द्धेः। यदि च सोपि न प्रसिद्धस्तदास्तान्तत्र योग्यता हेतुरेव। नचैवं व्यभिचारात्कथं शब्दबोधं प्रति योग्यतायाः कथं कारणत्वमिति वाच्यं। नहि शाब्दबोधत्वावच्छेदेन योग्यतायाः

वस्य हेतुत्वे यत्र घट प्रतियोगिकत्वेन पटाभाव भ्रमस्तत्र घट विशिष्टबुध्यापत्ते र्घट विशिष्ट बुद्धिं प्रति प्रतियोगिता सम्बन्धावच्छिन्न घटत्वावच्छिन्न निष्ठप्रकारतानिरूपिताभाव निष्ठ विशेषताशालि निश्चया भावत्वेनैव हेतुताया वाच्यतया प्रकृतेपि स्वरूपसम्बन्धावच्छिन्न प्रतियोगितासम्बन्धेन वाच्यत्व प्रकारक अभावविशेष्यकभ्रमस्य सम्भवितया तदभावस्य हेतुतायां व्यभिचाराभावादिति भावः। ननु भ्रमस्य दोषाधीनतया यत्र न तादृशो भ्रमस्तत्रका गतिरत आह। यदि चेति। सोपि भ्रमोपि। तत्र। घटोभिधेय इति शाब्दबोधे। असंसर्गग्रहे शाब्दबोध वारणाय हि योग्यता कारणं यत्र तु स एव न प्रसिद्धस्तत्रापत्त्य भावेन तस्या अहेतुत्वेपि न क्षतिरिति भावः। न चैव मिति। एवं। घटोभिधेय इति शाब्दबोधे योग्यताया अहेतुत्वे व्यभिचारात् अभिधेयत्व विषयक शाब्दबोधे व्यभिचारात्। व्यतिरेकव्यभिचारात्। शाब्दबोधं प्रति। शाब्दबोधसामान्यं प्रति। न हीति। शाब्दबोधत्वावच्छेदेन सकल पुरुषसाधारण विशिष्ट बुद्धिसामान्ये इत्यर्थः। शाब्दबोधत्वस्य कार्यतावच्छेदकतायाः पूर्वमनभिधानाद्व्यर्थात्वतासङ्गतेः। किन्तु विशिष्यैवेति। नहि शाब्दबोधसामान्ये योग्यता हेतुरित्युच्यते किंतु तत्पुरुषीयतद्विशेष्यकतत्प्रकारक विशिष्टबुद्धिं प्रति तत्पुरुषीय तद्विशेष्यकतत्सम्बधावच्छिन्न प्रतियोगिताक तदभावनिश्चयाभावत्वेन कारणत्वं। एवं चाभिधेयत्वादिकेवलान्वयिस्थले बाधाभावस्याहेतुत्वेपि नक्षतिः। कार्यकारणभावस्य विषयभेदेन पुरुषभेदेन च भिन्नत्वादिति भावः। ननु समवायेन विशिष्ट बुद्धिं प्रति समवायसम्बन्धावच्छिन्न प्रतियोगिताक बाधाभावस्य कारणतायां विषयभेदेन भिन्नत्वेपि पुरुषभेदेन भेदे मानाभावः। एकपुरुषीयबाधस्य अन्यान्यसत्वेन व्यभिचाराभावात्। तथा च घटोभिधेय इत्यत्र भ्रांतेः पुरुषधर्मतयाऽनादौ संसारे कस्याप्यभिधेयत्वप्रतियोगिकत्वेनाभावभ्रमस्य प्रसिद्धया तदभावस्य भ्रमशून्येपि पुरुषभेदं निवेश्य व्यभिचारवारणमिति चेन्नैवं बाधकालेऽप्रामाण्यग्रहदशायां विशिष्ट बुद्ध्युदयात् अप्रामाण्यग्रहाविषय बाधाभाववत्त्वेन

कारणत्वे एक पुरुषस्याप्रामाण्यग्रहकाले बाधकाले पुरुषान्तरस्य विशिष्ट बुद्धिवारणाय तत्पुरुषीयाप्रामाण्यग्रहाविषय बाधाभावत्वेन कारणत्वावश्यकत्वात् । न च स्वविशेष्यत्वस्वसामानाधिकरण्योभयसम्बन्धावच्छिन्न प्रतियोगिताकाप्रामाण्यग्रहाभावविशिष्टबाधाभावत्वेन हेतुत्वे क्व तत्पुरुषीयत्वनिवेश इति वाच्यं । प्राचीनमते वृत्त्यनियामकसम्बन्धस्याभावप्रतियोगितानवच्छेदकतया तथा कारणत्वासम्भवात् । न च । प्रामाण्यग्रहा भाव विशिष्ट बाधाभावत्वेन कारणत्वे मिथो विशेषणविशेष्यभावे विनिगमनाविरह इति तदपेक्ष्य बाधविशिष्टान्यत्वावच्छिन्नं प्रति बाधा भावः अप्रामाण्यज्ञान विशिष्टावच्छिन्नं प्रति चाप्रामाण्यज्ञानं हेतुरित्येवोचितं । वैशिष्ट्यं च स्वाव्यवहितोत्तरत्व स्वसामानाधिकरण्योभय सम्बन्धेनेति वाच्यं । तथामतिएक स्मिन्बोधे अप्रामाण्यग्रहकाले अप्रामाण्यग्रहानास्कन्दित बाधान्तरमत्वे पि विशिष्टबुध्युपपत्तेरिति दिक् । अचाङ्गरित्यस्वरसोद्भावनं । तद्दीजन्तु नहि विशिष्टबुद्धिसामान्ये बाधाभावो हेतुः किन्तु बाधकाले पीच्छाकाले आहार्य प्रत्यक्षोदयादिच्छाया उत्तेजकत्वावश्यकतया प्रत्यक्षस्यैव प्रतिबध्यतावच्छेदकतयोपनीतभानसाधारणबाधप्रतिबध्यतायाः शाब्दबोधाङ्गत्वात् । नच तथाप्यनुमिति साधारणबाधप्रतिबध्यतायाः शाब्दसाधारण्यमिति वाच्यं । प्रत्यक्षान्यज्ञानत्वस्य बाधप्रतिबध्यतावच्छेदकत्वे प्रत्यक्षान्यत्वज्ञानत्वयोर्मिथोविशेष्यविशेषणभावे विनिगमनाविरहेणानुमितित्वस्यैव बाधप्रतिबध्यतावच्छेदकत्वात् । तस्माच्छब्दबोधं प्रति स्वातंत्र्येणैवाऽसंसर्गाग्रहत्वेनैव हेतुता वाच्येति तदपेक्षया संसर्गरूपयोग्यताज्ञानस्यैव कारणत्वमुचितमिति । नच बाधनिश्चयत्वेन प्रतिबन्धकत्वे संशयनिश्चय साधारणाप्रामाण्यज्ञानस्योत्तेजकत्वं संशयनिश्चयसाधारण्ययोग्यताज्ञानत्वेन हेतुतायास्त्वप्रामाण्यनिश्चयस्यैवोत्तेजकतया गौरवस्तदभाववद्विशेष्यकत्वावच्छिन्न तत्प्रकारकत्वाभावाप्रकारकतदभाववद्विशेष्यकत्वावच्छिन्नतत्प्रकारकत्व प्रकारकज्ञानाभावविशिष्टतत्प्रकारकज्ञानत्वेन हेतुतायाश्चावतावाच्यत्वात् । मम्मतेतु तद्वद्विशेष्यकत्वावच्छिन्नतदभावप्रकारकज्ञानाभावविशिष्टे तदभाव प्रकारकज्ञानाभावत्वेनेति शाब्दबोधं प्रति स्वातंत्र्येण बाधाभावहेतुत्वकल्पनमेवोचितमिति वाच्यं । तद्धर्मावच्छिन्नाभानाभाववति तद्धर्मावच्छिन्नाभावप्रकारकमित्यप्रामाण्यग्रहस्य तद्धर्मावच्छिन्नवति तद्धर्मावच्छिन्नाभावप्र

कारणत्वं। किन्तु तदीयतादृशान्वयबोधे तदीय तादृशान्वय निरूपितनिश्चयाभावत्वेनैव विशिष्यैवेति न व्यभिचारइत्याहुः। आसक्तिः पदार्थयवधानं। अत एव गिरिरग्निमानित्यासन्नं। अनासन्नं च गिरिर्भुक्तमग्निभान् देवदत्तेनेति। नचैवं स्यात्यामोदनं पचतीति स्यात्यामित्यस्य प्राकैनानाऽऽकाङ्क्षतापर-

---

कारकमित्यप्रामाण्यग्रहस्य च तदभावनिश्चय प्रतिबन्धकतयां निवेशनीयतया द्विविधाप्रामाण्यग्रहाभाव निवेशेन बाधप्रतिबन्धकतायां गौरवात्। योग्यताज्ञानहेतुतया च तदभाववति तत्प्रकारकमित्येकविधस्येवा प्रामाण्यग्रहस्याभावोनिवेशनीय इति लाघवं। किञ्च प्रतियोगितासम्बन्धावच्छिन्नप्रतियोगिताकतदभाववत्त्वभावे प्रतियोगितासम्बन्धेन तत्प्रकारकमित्यप्रामाण्यग्रहाभावस्याधिकस्य निवेशाद्बाध प्रतिबन्धकतायां गौरवं। एवं शाब्दबोधे ब्रत्तदभावतद्वदन्योन्याभावतदभावव्याप्यवत्ताज्ञानादीनां प्रतिबन्धकत्वकल्पनापेक्षया योग्यताज्ञाने हेतुत्वमेवोचितं। वस्तुतस्तु पयसा सिञ्चतीति शाब्द सामग्रीकाले सेकः पयःकरणकत्वाभाववानू इति मानसवारणाय तादृशमानसे शाब्दसामग्राः प्रतिबन्धकत्व कल्पने गौरवं। मन्मते योग्यता ज्ञानस्यावश्यकतया विपरीत ज्ञानोत्तर प्रत्यक्षनिर्णयं प्रति विशेष दर्शन हेतुतया विशेष दर्शना भावादेव न मानसापत्तिः। विशेष दर्शनसत्वे च तदभावव्याप्यवत्तानिर्णयरूपप्रतिबन्धकमत्वेन शाब्दसामग्राएवाभावान्मानसेऽनुष्टापत्तेः। न च निर्णयं प्रत्येव विशेषदर्शनहेतुतया शाब्दसामग्रीकाले मानससंशयवारणाय शाब्दसामग्राः प्रतिबन्धकत्वे कल्पनीये संशयत्वमनिवेश्य सेकत्वावच्छिन्नविशेष्यकपयःकरणकत्वाभावप्रकारकमानसत्वमेव तत्प्रतिबध्यतावच्छेदकमिति वाच्यं। सेकत्वावच्छिन्नविशेषकपयः करणकत्वप्रकारकमानसे शाब्दसमिग्रीप्रतिबन्धकत्वांतरस्यावश्यकतया तेनैव संशयवारणात्। संशये प्रतिबन्धकत्वांतराकल्पनात्। न च विपरीतज्ञानोत्तर प्रत्यक्षनिर्णये विशेषदर्शनस्य हेतुत्वे सिद्धे एव योग्यताज्ञानहेतुत्वसिद्धिरिति वाच्यं। गुरुभूतशाब्द सामग्रीप्रतिबन्धकत्वकल्पनापेक्षयातत्कल्पनाया न्याय्यत्वादितिध्येयं। शाब्द प्रमांप्रति योग्यताप्रमाया गुणतया यद्विशेषयोरिति न्यायेन योग्यताज्ञानस्य शाब्दसामान्ये हेतुतावश्यकतेत्याहुः।

क्तिः । ओदनमित्यनेन व्यवधानादिति वाच्यं । प्रकृतान्वय-बोधानुकूलत्वव्यवधानाभावस्य विवक्षितत्वात् । ओदनपदं च स्याल्यधिकरणकौदन कर्मकपाककर्त्तृत्वान्वयबोधानुकूलमेव । स्थाल्यां पचतीत्यन्वये तु अनासन्नमेवेति प्राञ्चः । नन्वेवं श्लोकादेर्योजनयाप्यन्वयबोधः कथं व्यवहितत्वेन प्रत्यूहसिद्धेऽव्यवहितत्वेन भ्रमासम्भवादिति वाच्यं । तत्र हि श्लोकपदान्नान्वयबोधः । किन्तु योजनावाक्यादित्याहुः । वस्तुतस्तु

शाब्दे प्रमायां । स्वपरसाधारण बाधकप्रमाविरह हेतुत्वस्य तेन सुवचतया नेयं युक्तिः साधीयसीत्यपरे । आसत्तिं निरूपयति । आसत्तिरिति । एकपदेऽपरपदाव्यवधानमासत्तिरित्यर्थः । अतएव पदाव्यवधानस्यासत्तित्वादेव । गिरिरिति । अग्निमत्पदे गिरिपदाव्यवधानस्य सत्वादासन्नमित्यर्थः । अनासन्नमिति । गिरिर्भुक्तमग्निमान् देवदत्तेनेत्यत्राग्निमत्पदे भुक्तमित्यनेन व्यवधानात् गिरिपदाव्यवधानस्याभावादनासन्नमित्यर्थः । नचैवमिति । पदाव्यवधानस्यासत्तित्वइत्यर्थः । स्थाल्यामिति । सर्वेषां कारकाणां क्रियायामेवान्वयात् स्थाल्यधिकरणक ओदन कर्मकपाकानुकूलकृतिमानित्यन्वयबोधोजायत इति भावः । पाकेनेति । पाकवाचकपदेनेत्यर्थः । विवक्षितत्वादिति । अव्यवधानपदेन विवक्षितत्वादित्यर्थः । ओदनपदस्थेति । स्थाल्यामोदनंपचतीत्यादौ ओदनपदस्थेत्यर्थः । अनुकूलमेवेति । तथा चौदनपदेन व्यवधाने तस्यान्वयबोधानुकूलत्वात् अन्वयबोधाननुकूलपदव्यव्यवधानाभावस्य सत्त्वान्नानासन्नत्वापत्तिभावः । यच्च स्थाल्यांपचतीत्यन्वयबोधे तात्पर्यंतत्रौदनपदेन व्यवधाने अनासन्नत्वे इष्टापत्तिरित्याह स्थाल्यामिति । प्राञ्च इति । यद्यदाकांक्षितं योग्यंसंनिधानं प्रपद्यते तेन तेनान्वितः स्वार्थः पदैरेवावगम्यत इति तेषाङ्गाथापि । नचैवमिति । पदाव्यवधानस्यैवासत्तित्वे इत्यर्थः । श्लोकादेरिति पञ्चमी भावा कथमिति । पदाव्यवधानादिति भावः । नन्वासत्तिर्नस्वरूपसती हेतुः किन्तु तज्ज्ञानं एवं चाव्यवधानभ्रमादेव तत्र शाब्दबोधइत्यत आह । व्यवहितत्वेनेति । भ्रमेति । तथाच तत्र विशेषदर्शनेनाव्यवहितत्वभ्रमासम्भवादासत्ति भ्रमोपि न सम्भवतीति भावः । तत्र हि श्लोकेति । श्लोकपदात् श्लो-

आकाङ्क्षादिमत्त्वे सति तात्पर्यज्ञाने व्यवहितादप्यन्वयबोधात्तद्विलम्बेनाविलम्बाच्चैतज्ज्ञानं हेतुः। किन्तु व्यवहितपदतात्पर्यज्ञानं। तच्चैतत्पदमेतत्पदाव्यवहितोत्तरमभिसन्धातु इत्यपि सन्धापयितुरिच्छा। अतएव मौनिस्त्रीभिर्व्याप्तिः वक्तुरभावेऽप्यभिसन्धातुः सत्वात्। शुकवाक्ये च भगवत्तात्पर्यमादायैव गतिरिति नव्याः। तदपिन। सत्यर्थतात्पर्यज्ञानादावेतद्विलम्बेन शाब्दबोधविलम्बाभावात्। तस्माद्दृष्ट्या पदजन्यपदार्थोपस्थितिरासक्तिः। सा च स्वरूपसती हेतुः। नहि पदार्थानुपस्थितावन्वयबोधः। नच दृष्ट्या पदजन्येति व्यर्थं। घटपदात्समवायेनाकाशकृतौ घटोऽस्तीति

क घट कपदात्। नान्वयबोध इति। तथा च श्लोकस्थानामन्त्यत्वेपि न क्षतिरिति भावः। कथं तर्हि शाब्दबोध इत्यत आह। किंत्विति। योजनेति। क्रियाकर्मभावेनान्वयबोधजनकपदसमूहादित्यर्थः। तत्र चासन्नत्वमस्त्येवेति भावः। आहुरित्यस्वरसं सूचयन्नभ्युपगममाह। वस्तुतस्त्विति। आकांक्षादीत्यादिना योग्यतापरिग्रहः। व्यवहितेपीति। श्लोकादावपीत्यर्थः। तद्विलम्बेन। पदाव्यवहितत्व ज्ञानविलम्बेन। अविलम्बाच्च शाब्द बोधविलम्बाभावाच्च। तथा च व्यतिरेक व्यभिचार इति भावः। किंत्विति। अव्यवहितपदतात्पर्यज्ञानं हेतुरित्यनुषज्यते। तथा च पदतात्पर्यमासत्तिरिति भावः। तच्चेति। अव्यवहितपदतात्पर्यं चेत्यर्थः। अभिसन्धाविति। एतत्पदमेतत्पदेनसह सम्भूयान्वयबोधञ्जनयत्विति अभिसन्धापयितुरिच्छेत्यर्थः। ननु वक्तुरिच्छेत्येवास्तु कृतमभिसन्धापयितुरिति निवशैनेत्यत आह। अत एवेति। मौनीति। मौनिनोवक्तृत्वाभावेपि सभिसन्धापयितृत्वादिति भावः। ननु शुक वाक्याद्बोधो न स्यात् शुकस्यार्थज्ञानाभावेनाभिसन्धपयितृत्वाभावादित्यत आह। शुकवाक्ये चेति। भगवदिति। यत्र शुकवाक्याद्बोधस्तत्रे श्वरीयतात्पर्यसत्वात् पदतात्पर्यसत्वात्। पदतात्पर्यज्ञानस्य कारणतायां न व्यभिचार इति भावः। सत्यर्थेति। अर्थतात्पर्यज्ञानेविद्यमाने एतद्विलम्बेन। पदतात्पर्यज्ञा-

ति वाक्यादाकाङ्क्षान्वयबोधापत्तेः । ननु घटमानयेत्यत्र घटकर्मत्वानयनकृत्युपस्थितीनां न युगपत्समभवः । आशुविनाशिनांक्रमिकाणां मेलकाभावादिति चेन्न । क्रमिकपदानुभवजन्यानेकसंस्कारैर्युगपत्तावत्पदस्मरणाद्युगपत्तावत्पदार्थोपस्थितान्वयबोधः सम्भवतीति सङ्क्षेपः । अत एवाव्यवधानेन पदजन्यपदार्थोपस्थितिरासत्तिरित्यपास्तं । तृतीयांत-

---

नस्य विलम्बेन शाब्दबोधविलम्बाभावादित्यर्थः । तथा च न पदतात्पर्यमासत्तिरिति भावः । तस्मादिति । अन्यविधासत्तेर्दुर्वचत्वादित्यर्थः । हृत्याग्रहीति लक्षणान्यतररूपसम्बन्धेन पदजन्या या पदार्थोपस्थितिः सैवासत्तिरित्यर्थः । साचेति । हृत्या पदजन्यपदार्थोपस्थितिरूपासत्तिश्चेत्यर्थः । ननु स्वरूपमत्वास्तस्या हेतुत्वे यत्र न सा स्वरूपमती तत्रान्वय बोधो न स्यात् अत आह । नहीति नचेत्यर्थमित्यनेनान्वयः । घटपदादिति । पदस्य पदार्थस्मारकत्वं एकसम्बन्धिज्ञानमपरसम्बन्धिस्मारकमिति न्यायेन । एवं च घटपदस्य शब्दत्वात्समवायेनाकाशस्मारकत्वे घटपदादाकाशशाब्दबोधापत्तेः हृत्वेति निवेशनीयतया समवायेनाकाशस्मारकत्वेतिशङ्कितलक्षणान्यतरसम्बन्धेनास्मारकत्वाददोष इति भावः । नन्विति । घटकर्मकानयनानुकूल कृतिमानिति शाब्दबोधे घटकर्मत्वानयनकृत्युपस्थितीनां कारणता वाच्या । साच न संभवति एकक्षणे तासामसम्भवादित्यर्थः । असम्भवे हेतुमाह । आशुविनाशिनामिति । हृतीयक्षणवृत्तिध्वंस प्रतियोगिनामित्यर्थः । क्रमिकाणां । एकाधिकरणक्षणाध्वंसाधिकरणक्षणोत्पत्तिकानां । मेलकाभावादिति । एकक्षणावस्थायित्वाभावादित्यर्थः । आशुविनाशिनामपि ज्ञानानां सहोत्पत्तिकानां यौगपद्यासम्भवात् क्रमिकाणामिति । क्रमिकाणामपि घटपटादीनांमेलकादाशुविनाशिनामिति मिलितोपादानं । क्रमिकेति । क्रमिकानियानि पदानि तदनुभवजन्या येऽनेकसंस्काराः तैर्युगपत्तावत्पदानां स्मरणात् युगपत्तावत्पदार्थानां स्मृतौ सत्यां शाब्दबोधः सम्भवतीत्याखण्डलार्थः । तथा च सर्वत्र समूहालम्बनात्मकपदजन्यपदार्थोपस्थितावेव शाब्दबोध इति भावः । ननु घटगोचरसंस्कारात् पदस्मरणानुदयेन समानविषयकसंस्कारस्य स-

वैयर्थ्यात् । व्यवहितोपस्थितावेकस्यानुपस्थितेर्विनाशात् । तात्पर्यं चेदं एतस्मिन्नर्थेऽस्यान्वयं प्रत्यापयत्विति प्रयोक्तुरिच्छा । प्रयोक्ता चाभिसन्धापयितृमात्रं । नतु वक्तैव । मौनिन्योक्त्याद्याप्तेः । शुकवाक्ये च भगवदिच्छयैवगतिः । त-

---

मानविषयकस्मृति हेतुतया कथं नानापदगोचरैः प्रत्येकसंस्कारैर्भिन्न विषयकनानापदगोचरमेकं स्मरणमत आह । संक्षेपइति । भिन्नविषयकत्वां शे संस्कारः कारणं नेत्येव नतु जायमानंस्मरणं भिन्नविषयकमेवन जायत इति । यथा घटपटचक्षुःसंनिकर्षसंयोगमत्वे संमूहालम्बनमेकप्रत्यक्षमिति भावः । अतएवेति । हत्या पदजन्यपदार्थोपस्थितेरासत्तित्वादेवेत्यर्थः । हतीयान्तेति । अव्यवधानेनेत्यस्य वेयर्थ्यादित्यर्थः । ननु गिरिर्भुक्तमग्निमान् देवदत्तेनेत्ये तत्तद्वारणार्थमेव तदित्यत आह । व्यवहितेति । उपस्थितेः क्रमिकपदार्थोपस्थितेर्नष्टत्वादित्यर्थः । अव्यवधानस्यभेदघटितत्वे व्यवधानेन क्रमिकपदार्थोपस्थितौ तासां सर्वासामेकदासम्भवेन समूहालम्बनस्मृतेरेव कारणत्वं वाच्यं । इत्यञ्च तत् ध्वंसाधिकरणक्षणध्वंसानधिकरणत्वे सति तदधिकरणक्षणध्वंसाधिकरणक्षणोत्पत्तिकत्वरूपभेदघटिताव्यवधाननिवेशेऽ सम्भवात् । तत्ध्वंसाधिकरणक्षणध्वंसाधिकरणक्षणोत्पत्तिकत्वरूपभेदाभेदासाधारणमव्यवधानमेव निवेशनीयं । तथा च तदुपादानेपि गिरिर्भुक्तमित्यादौ समूहालम्बनात्मक स्मृतिमादायाव्यवधानसम्भवादव्यवधानांशो हृथैव । गिरिर्भुक्तमित्यादौ अन्वयबोधाभावस्यार्थतात्पर्यज्ञानविरहेणैवोपपन्न इति भावः । आसत्तिं निरूप्य तात्पर्यं निरूपयति । तात्पर्यं चेदमिति । अर्थतात्पर्यं चेत्यर्थः । एतस्मिन्निति । इदमेतस्मिन्नर्थे अस्य पदार्थस्य अन्वयंप्रत्यापयतु बोधयतु इति प्रयोक्तुरिच्छेत्यर्थः । अभिसन्धापयितृमात्रमिति । एकपदार्थज्ञानवदपरपदार्थं ज्ञानवन्मात्रमित्यर्थः । नतु वक्तैव । नतु शब्दोच्चारयितैव । मौनीति । तच्च शब्दोच्चारणाभावेन तात्पर्याभावप्रसङ्गादित्यर्थः । नन्वेवं शुकवाक्ये शुकस्यार्थज्ञानाभावेनाभिसन्धापयितुरभावात्तात्पर्याभावप्रसङ्ग इत्यत आह । शुकवाक्ये चेति । भगवदिच्छा ईश्वरेच्छैव गति रित्यर्थः । तथा च तत्रापीश्वरतात्पर्यसत्वान्न दोष इति भावः । तस्य चेति । तात्पर्यस्य चेत्यर्थः । अस्येति ।

स्य च निश्चयोहेतुः । अस्य च संशये व्यतिरेकनिश्चये चान्वयबोधात् । तङ्गमेचान्वयबोधाच्चेति सङ्क्षेपः । सोयंशब्दोद्विविधः । विधिरर्थवादश्च । तत्र विध्यभिधायकः प्रत्ययस्तद्घटितवाक्यो वा विधिः अभिधेयविधिश्च कार्यत्वं तच्च ज्ञातिसाध्यत्वमिति । किमत्र मानमिति चेत् । उच्यते । विधिस्तावत्प्रवर्तकज्ञानमजनयित्वा प्रवृत्तिजनिकामिच्छामजनयित्वा न प्रवृत्तिजननायालं । अतो यस्य बुद्धिः प्रवृत्तिजननीमिच्छां सूते स विधेरभिधेयः । प्रवृत्तिजननी च ज्ञातिसाध्यत्वप्रकारिकेच्छा तज्जननीच ज्ञातिसाध्यत्वप्रकारिका

तात्पर्यसंशये व्यतिरेकनिश्चयेनान्वयबोधादित्यर्थः । यत्संशयव्यतिरेकनिश्चयौ यत्र प्रतिबन्धकौ तन्निश्चयस्तत्र हेतुरिति नियमबलादित्यर्थः । तङ्गमे चेति । तात्पर्यभ्रमे च अन्वयबोधाङ्गभ्रमासाधारणतन्निश्चयो हेतुरित्यर्थः । संक्षेप इति । अयमिति घुचोराज्ञः पुरुषोऽप्यसार्यतामित्यादौ राजपुत्र संसर्गप्रतीतीच्छयोच्चरिते राज्ञ इत्यस्य पुरुषपदेन साकांक्षत्वव्यावृत्तये यत्पदंय त्पदव्यतिरेकेण तात्पर्यविषयीभूतार्थान्वयाननुभावकत्वात्पदत्वात्पदेन साकांक्षमिति तात्पर्यगर्भाकांक्षा ज्ञानकारणत्वा वश्यकतया आकांक्षा घटकतयैव तात्पर्य ज्ञानं हेतुर्नतुखातंत्र्येणेत्यादि । सोयमिति । आकांक्षादिसङ्कृतः शब्दइत्यर्थः । तत्र । तयोर्विध्यर्थवादयोर्मध्ये । विध्यभिधायकेति । अभिधायकप्रत्ययत्वं सुवादिविभक्तावतिव्याप्तमतः विधीति । विधिः विध्यर्थः । विधिशब्दस्य विधिप्रत्यये विध्यर्थे च प्रयोगदर्शनात् । अत एव स्वर्गकामो यजेतेत्यादौ इष्टसाधनत्वं कार्यत्वंवा यद्विधिः स इममभिव्याहृतक्रियान्वयी वेति मणिकृद्भिः कार्यत्वंवा यद्विधिरित्युक्तं । तथा चार्थविशेषाभिधायकः प्रत्ययः विधिप्रत्यय इत्यर्थः । सचलिङ्लोटतव्यप्रभृतिकारकत्व प्रत्ययसपदेति । ननुयजाद्यसमभिव्याहृते लिङ्पदे विधित्वेन व्यवहारः अत आह तद्घटितमिति । तद्घटितमिति । तद्घटितं विध्यभिधायकप्रत्ययघटितवाक्यमित्यर्थः । तत्र स्वर्गकामो यजेतेत्यादिकं । ननु कस्तावद्विध्यर्थः । तत्राभिधेयविधिरित्यः सैवचप्रवृत्ति हेतुरि-

ति भट्टाः । तेषांचायमाशयः । करणस्य परनिष्ठव्यापारजनकत्वं स्वनिष्ठ व्यापारद्वारेतिनियमः यथा घटं प्रति करणस्य दण्डादेः चक्रनिष्ठभ्रमिरूपव्यापारजनकत्वं स्वनिष्ठस्पंदाजनद्वारा व्यापारेण व्यापारे जननीये स्वनिष्ठव्यापारांतरापेक्षणेनवस्थापत्त्या व्यभिचारवारणाय करणस्येति । अभिधारूपव्यापारसिद्धये स्वनिष्ठेति । अन्यथेष्ट साधनता ज्ञानादिरूप व्यापारमादाय सिद्धसाधनापत्तेः । तथाच विधेः प्रवर्तकतया परनिष्ठ प्रवृत्तिरूपस्वर्गादिफलक व्यापारजनकत्वं स्वनिष्ठव्यापारद्वारेतिलिङ्समवेतः लिङ्जन्योऽभिधारूपव्यापारः स्वीकरणीयः । भट्टमते शब्दस्य द्रव्यत्वात्तस्य समवायिकारणत्वाविरोधात् । तन्मते हि भावना द्विविधा शाब्दी आर्थीच । तत्रेयं शब्दनिष्टत्वाच्छाब्दीभावनेत्युच्यते । अन्याचार्थी अर्थो यागादिस्तद्विषयिणी प्रवृत्तिरूपा । तदुक्तं । अभिधा भावनामाहुरन्यामेवलिङादयः । अर्थात्मभावनात्वन्या सर्वाख्यातस्य गोचर इति । आर्थीभावनायाच कर्मकरणमितिकर्त्तव्यताश्चापेक्षत इति अंगप्रयवती । तथाच स्वर्गकर्मिका यागकरणिका प्रयाजादीतिकर्त्तव्यताकाचार्थीभावना । इयमपि च भावनात्वेन किं केन कथमित्यंशत्रयवती किंभावयति केन भावयति कथं किंसहकारिण मासाद्य भावयतीति तदर्थत्वात् । तथाचोक्तं । लिङोभिधा सैव च शाब्दभावना भाव्या च तस्याः । पुरुषप्रवृत्तिः सम्बन्धबोधः करणं तदीयप्ररोचनायचांगतयोपयुज्यते तत्र सम्बन्धबोधः लिङपदे शक्तिग्रहः प्ररोचना स्तुत्यर्थवादः अङ्गतया संहकारितयोपयुज्यते । तत्र चाभिधा स्वरूपसती अभिधात्वेन ज्ञाता वा न प्रवर्त्तिकेति प्रवर्तनात्वेन तज्ज्ञानं कारणं प्रवर्तनात्वं च प्रवृत्तिजनकत्वं यजादिपदसमभिव्याहारेण यागविषयक प्रवृत्तिजनकत्वं ग्राह्यं । तत्र च समानसंवित्संवेद्यतया यागे कृतिसाध्यताबोधोपि । एवमिष्टसाधनताज्ञानंविना प्रवृत्तिजनकत्वं दुर्ग्रहमिति भावनात्वेनापि तत्ज्ञानं कारणं । भावनात्वं च भाव्यजनकत्वं भाव्यत्वं चेष्टत्वं । एवमभिधात्वेनापि तत्ज्ञानं कारणं । अन्यथा धर्मितावच्छेदकापरिचयेन धर्मितावच्छेदकबोधानुपपत्तेः । तथाच गुरुमते विध्यर्थकार्यविशेष्यकबोधः । भट्टमते तु यागविषयकप्रवृत्तिजनिकाऽभिधा स्वर्गजनिका अभिधात्वज्ञानानुकूलाप्रवर्तनात्व ज्ञानानुकूलाऽभिधात्वनुकूलाचेति शक्ति च तुष्टयं । अभिधाज्ञानं वैदिक प्रवृत्तिं प्रतिहेतुः । लौकिकप्रवृत्तिं प्रति तु इष्टसाधनताज्ञानं हेतुरितिबोध्यं । वस्तुतस्तु प्रवृत्तिर्द्विविधा स्वरसवाहिनी पराधीना च

तत्र पराधीनप्रवृत्तौ प्रवर्तनाज्ञानं । हेतुः । अत एव राजाज्ञया पितुः शिरः छेदादौ प्रवर्तते । शाब्दे प्रवृत्तावाचार्यादेः प्रवर्तकत्वं । आचार्यप्रेरितोऽहं गामानयामि नतु स्वेच्छयेत्यनुभवात् । आचार्यादेश्च साक्षात्र प्रवर्तकत्वं किन्तु शब्देन स्वप्रवर्तनाज्ञापयित्वेच्छामुत्पाद्येत्यनुभवसिद्धं । प्रवर्तनाच प्रवृत्तिप्रयोजकः प्रवर्तयितुर्व्यापारः । स चेतरस्येच्छारूपः । अहमेनं प्रवर्तयामीत्यनुभवसिद्धः अचेतनस्य शब्दादेस्तूपदार्थांतरं अभिधा भावना प्रवर्तनाद्यपदेश्यस्यैव च लिङर्थः । तथा च विधिः राजैव मां प्रवर्तयतीति प्रवर्तना ज्ञायते । तेन यागादौ पुरुषं प्रवर्तयतीति भट्टमतनिष्कर्षः । तदसत् । सामान्यतः प्रवृत्तिसामान्ये इष्टसाधनताज्ञानहेतुत्वे नैवोपपत्तौ प्रवर्तनाज्ञानस्य हेतुत्वे मानाभावात् । राजाज्ञया पितुः शिरः छेदादौ प्रवृत्तिरपि स्वेष्टं प्रतिसन्धायैव नहि प्रयोजनमनुद्दिश्य मंदोपि प्रवर्ततेइति । एवमभिधायां इष्टसाधनत्वे ज्ञातेपि इष्टसाधनत्वाज्ञाने अप्रवृत्तिः अभिधायां इष्टसाधनत्वं यागे इष्टसाधनतांविनाऽनुपपन्नमिति यागेष्टसाधनताज्ञानस्यावश्यकत्वे कृतमभिधाज्ञान हेतुतया । न च करणस्येत्यादिनियमादभिधासिद्धिः । अप्रयोजकत्वात् । अनुमितिकरणव्याप्तिज्ञानादौ व्यभिचाराच्चेति नाभिधा लिङर्थ इत्यतः प्राभाकरमतन्दर्शयति । अभिधेयविधिश्चेति । प्रतिपाद्यरूपोविधिः विध्यर्थ इतियावत् । प्रागभाव प्रतियोगित्वरूपकार्यत्वं न प्रवर्तकज्ञानप्रकारइत्यर्थ आह । तच्चेति । कार्यत्वंचेत्यर्थः । शङ्कतेकिमचेति । अच कृतिसाध्यत्वस्य विध्यर्थत्वं । अलं । समर्थः । यस्य बुद्धिः । यद्विषयिणीबुद्धिः । सइति । प्रवृत्तिजनकेच्छाजनकज्ञानप्रकार इत्यर्थः विधेरभिधेयः । प्रतिपाद्यः । तज्जननीचेति । कृतिसाध्यत्वप्रकारकेच्छाजननीचेत्यर्थः । ननु तादृशेच्छां प्रतिज्ञानत्वे नकारणत्वमास्तामत आह । कृत्यसाध्यत्वेति तदनुत्पत्तेः । कृतिसाध्यत्वप्रकारकेचानुत्पत्तेरित्यर्थः ननु नियत पूर्ववृत्तित्वेन कृप्तत्वात् कृत्यसाध्यताज्ञानाभाव एव हेतुः ननु कृतिसाध्यताज्ञानं तत्र नियमानन्यथासिद्धत्वयोर्द्वयोकल्पनीयत्वे गौरवादित्यत आह । नत्विति । नतु कृत्यसाध्यत्वज्ञानाभावोहेतुरिति शेषः । गौरवादिति । कृत्यसाध्यत्वप्रकारकज्ञानाभावत्वेन कारणत्वे गौरवात् । लाघवात्कृतिसाध्यत्व प्रकारकज्ञानत्वेनैव नियमानन्यथा सिद्धत्वयोः कल्पनादित्यर्थः । ननु कृतिसाध्यतानिश्चयत्वे कारणत्वमपेक्ष्य लाघवेन कृत्यसाध्यताज्ञानाभावत्वेनैवे हेतुत्वमिति चेन्न । निश्चयत्वेन हेतुत्वे संशयनिश्चय-

बुद्धिः । कृत्यसाध्यत्वज्ञानेतदनुत्पत्तेः । ननु कृत्यसाध्यत्वप्रकारकज्ञानाभावो गौरवात् । सर्वदा चिकीर्षोत्पत्त्यापत्तेश्च ।

साधारणप्रामाण्यज्ञानस्यैवोत्तेजकत्वं कृत्यसाध्यताज्ञानत्वेन प्रतिबन्धकत्वे चाप्रामाण्यनिश्चयस्योत्तेजकत्वमिति गौरवात् । अप्रामाण्यज्ञानेऽ प्रामाण्यज्ञानस्योत्तेजकत्वानभ्युपगमात् । एतेनाप्रामाण्यनिश्चय स्योत्तेजकत्वे तचाप्रामाण्यज्ञान सामान्यस्योत्तेजकत्वं अप्रामाण्यज्ञानस्योत्तेजकत्वे च तचाप्रामाण्यनिश्चयस्योत्तेजकत्वमिति विपरीत गौरवमिति परास्तं । वस्तुतस्तु कृत्यसाध्यताज्ञानप्रतिबन्धकत्वे कृतिसाध्यत्वाभाव कृतिसाध्यभेदतद्ग्राप्यतदवच्छेदकधर्मदर्शनादीनां प्रतिबन्धकत्वापेक्षया कृतिसाध्यताज्ञानत्वेनैव हेतुत्वमुचितमिति । ननु ज्ञायमानेष्टभेदाग्रहस्य तन्मते कारणत्वं न स्यात् तचाप्यतदग्र हेकारणत्वे लाघवात् । यदिच नियतपूर्ववर्तित्वेन कृप्तत्वात् तन्तोरितिन्यायेन कारणत्वं तदा प्रकृतेपि तुल्यमित्यताह । सर्वदेति । सत्त्वात् । कृत्यसाध्यता ज्ञाना भावसत्त्वात् । ननु भवन्मतेसर्वदा भेदग्रहसत्त्वात् सर्वदा विसंवादिप्रवृत्त्यापत्तिः । यदि ज्ञायमानेष्टभेदाग्रहत्वेन कारणत्वं तदा मयापि ज्ञायमानकृतिसाध्यत्वा भावज्ञानाभावकरणत्वमपि सुवचं अत आह । अतइति । तन्मते अन्यथाख्यात्यभावेन दृष्टाभेदग्रहदृष्टभेदाग्रहयोर्युगपत् स्थित्यभावेन भेदाग्रह एव विसंवादिप्रवृत्तिहेतुःअच तु कृतिसाध्यताज्ञानकृत्यसाध्यताज्ञानाभावयोर्युगपत्स्थित्या लाघवेन कृतिसाध्यता ज्ञानत्वेनैव प्रवृत्तिहेतुत्वमिति भावः । केचित्तु । साक्षाद्विरोधिनो ज्ञानस्य प्रतिबन्धकत्वञ्जनकज्ञानविघटकत्वेनैवतिनियमात् कृत्यसाध्यताज्ञानस्य साक्षादविरोधिनःचिकीर्षाकारणकृतिसाध्यता ज्ञानविघटकत्वेनैव प्रतिबन्धकत्वमिति कृतिसाध्यता ज्ञानं हेतुरिति । ननु बाधादिवारणाय साक्षादविरोधित्वं विशेषणं । तदर्थस्य ग्राह्याभावतद्व्याप्यादानवगाहित्वं तच्च प्रकृतेप्यसिद्धचिकीर्षाविषय कृतिसाध्यताभावावगाहित्वात् कृत्यसाध्यता ज्ञानस्य । यदि च कारणीभूता भावप्रतियोगित्वरूपं प्रतिबन्धकत्व घटकन्तदापि कृत्यसाध्यता ज्ञानस्य साक्षादेव विरोधित्वोपगमेन साक्षाद विरोधित्वसिद्धेरितिकथमेतत् । उच्यते । साक्षादविरोधिनं प्रति यत्प्रतिबन्धकं भवतितज्जनक ज्ञानविघटकं सदेव प्रतिबन्धकं भवतीति नियमः साक्षादविरो-

धित्वं च तद्विषयविरोध्यवगाहि ज्ञानभिन्नत्वं तेन न सत्प्रतिपक्षादौ व्यभिचारः चिकीर्षा च ज्ञानभिन्नत्वादेवसाक्षाद्वि विरोधिनीति तज्जनक ज्ञानविषटकत्वेनैव कृतिसाध्यता ज्ञानस्य प्रतिबन्धकत्वमिति गुरुमते सिद्धे रनुमिति प्रतिबन्धकत्वाभावान्न तत्र व्यभिचारः सिद्धत्वस्य ज्ञानेच्छाप्रतिबन्धकत्वेपि तदग्राहक्त प्रतिबन्धकता निवेशनीया असिद्धत्वज्ञानं वा हेतुः । असाधुत्वज्ञानस्य शाब्दबोधप्रतिबन्धकत्वेमानाभावः । न च संशयादिप्रवृत्तौतन्मते दृष्टभेदाग्रहहेतुतया तत्रव्यभिचारइति वाच्यं । संशयादित्वविशेषणेन तद्वारणात् । संशयादिप्रवृत्तौ तु तन्मतेपि विशिष्ट ज्ञानं हेतुरिति न क्वापि व्यभिचारइत्याहुः । तच्च साक्षादविरोधिनो ज्ञानस्य प्रतिबन्धकत्वं जनकज्ञानविषटकत्वेनैवेत्येव नियमस्य तेनाप्युपेयत्वात् । साक्षादविरोधिनं प्रति यत्प्रतिबन्धकत्वंतत्तज्जनक ज्ञानविषटकत्वेनैवेतिनियममाहृत्य साक्षादविरोधित्वशरीरे च ज्ञानभिन्नत्वे त्यत्रज्ञानेति निवेश्य कृतिसाध्यता ज्ञानहेतुतासाधनस्य शपथनिर्णयतापत्तिरितिध्येयम् । ननु कृतिसाध्यता ज्ञानं चिकीर्षाद्वाराप्रवृत्तिहेतुरितिसिद्धं । एवं च जीवनयोनियत्नसाध्ये प्राणपञ्चकसञ्चारे प्रवृत्त्यापत्तिः । अथ अदृष्टवदालब्धयोगेनैव प्राणपञ्चकसञ्चारोपपत्तेर्जीवनयोनियत्ने मानाभावः । न च भस्त्राबायूदीरणदृष्टान्तेन वायूदीरणत्वेन यत्नजन्यत्वा नुमानात् परिशेषात्तल्लिङ्गिरिति वाच्यं । वाह्यवायूदीरणे व्यभिचारात् । न च तस्यापीश्वरीययत्नजन्यत्वान्न व्यभिचारइति वाच्यं । प्रवृत्तेपि तेनैवार्थान्तरात् । जन्यत्वविशेषणे च वाह्यवायूदीरणे व्यभिचारात् । यत्नसमाधिश्वासनां श्वासवारणेश्वास क्रियानुदयः । सर्वसिद्धः । जीवनादृष्टस्य च तदापि सत्त्वेन तदनुत्पादो जीवनयोनियत्नव्यतिरेकादिति । तत्र । तदानीजीवनयोनियत्नानुवृत्तिर्यत्नयुक्ता सतएवश्वासक्रिया विरहोपपत्तेरिति । मैवं । धावतःयत्नोत्कर्षेणश्वासक्रियोत्कर्षदर्शनात् श्वासक्रियात्वावच्छिन्न एव यत्नजन्यत्वनिश्चयात् । यद्विशेषयोःकार्यकारणभावोऽसतिबाधकेतत्सामान्ययोरपीतिन्यायात् । जीवनयोनियत्नसिद्धिः । न च विषभक्षण व्यावर्तनाय स्वविशेषणवत्ता प्रतिसन्धानजन्यकार्यता ज्ञानस्यावश्यहेतुतया तद भावादेव न प्राणपञ्चकसञ्चारे प्रवृत्तिरिति वाच्यं । अहंकृतिसाध्य प्राणपञ्चकसञ्चारो जीवित्वात् प्राणपञ्चकसञ्चारो मत्कृतिसाध्यः मत्कृतिंविना सत्वे सति मदिष्टसाधनत्वादिति च तत्सम्भवादिति । उच्यते ।

चिकीर्षाधीन कृतिसाध्यता ज्ञानत्वेन प्रवृत्तिकारणत्वात्। ननु तथापि भोजनचिकीर्षाधीनकृतिसाध्ये नांतरीयकत्वमे प्रवृत्ति प्रसङ्गः। अत्रकश्चित्। चिकीर्षाधीन कृतित्वेन न श्रमजनकत्वं द्वेषयोनियत्नादपि श्रमोत्पत्तेरित्याह। तत्र। शत्रुवधप्रवृत्तौ प्रतियोगिनि शत्रौ द्वेषः कारणमिति तावदूदुर्वचं। तस्य भिन्न विषयतया शत्रुवधप्रवृत्तावहेतुत्वात्। किन्तु शत्रुवधस्येष्टसाधनत्वेन तदिच्छाया एव तत्र हेतुत्वात्। न च शत्रुनिवृत्तौ शत्रु द्वेषस्य समानविषयकत्वेन हेतुत्वप्रसङ्गइति वाच्यं। इष्टत्वात्। द्वेषयोनिनिवृत्तितस्तु न श्रमोत्पत्तिसम्भावनापि। व्याघ्रादिसमीपवृत्तिदेशादेव निवृत्तेः। तत्र तद्देशवर्जनरूपेष्टसाधनता ज्ञानात् पलायनप्रवृत्त्यैव श्रमसम्भवात्। न च प्रवृत्त्यभाव एव निवृत्तिरिति वाच्यं। निवृत्त्यभाव एव प्रवृत्तिरित्यस्यापि सुवचत्वात्। न च प्रवृत्त्यभावकाले कदाचिन्निवृत्तत्वव्यवहारात्प्रवृत्त्यभाव एव निवृत्तिरिति वाच्यं। निवृत्तेर्द्वेषसमान विषयकत्वस्यानुभवसिद्धत्वात्। अथ निवृत्त्याख्ययत्नस्वीकारे विषयभेदेन प्रवृत्ति निवृत्तियौगपद्यापत्तिरिति चेन्न। दृष्टानिष्टसाधनता सम्मूढालम्बन सम्भवेपि रागद्वेषयोरेकदाऽसम्भवेन तद सम्भवात्। न च यत्रापेक्षाबुध्यात्मकं तत्स्मरणं अनन्तरं फलेच्छयाफलद्वेषौ तत उपायेच्छा उपायद्वेषौ तत्र तदापत्तिरिति वाच्यं। उपायेच्छाकाले एवापेक्षाबुद्धेर्नाशात्। उपादान प्रत्यक्षस्यमात्राप्रवृत्तिहेतुतया तदभानाच्च ज्ञानेच्छाद्वेषाणांयौगपद्याभावात्। एवं प्रयत्नयौगपद्यस्य चेष्टाश्रय इव चेष्टेरभावाच्च। विंशत्यंगुल्यवच्छेदेन विजातीय चेष्टानुरोधेनविजातीयविंशति प्रयत्नानांयुगपदुत्पादात्। अन्यथासमवायेनविजातीयतच्चेष्टां प्रत्यवच्छेदकतासम्बन्धेन कृतेर्हेतुतया एकाङ्गुल्यामिवापरस्यापि तस्या एव कृतेरवच्छेदकतया सत्वाद्विजातीये तच्चेष्टाया एवांगुल्यन्तरे व्यापत्तिः। नाना कृतिस्वीकारे तु एतत्कृतेरवच्छेदकतयांऽगुल्यन्तरे असत्वादेवनतत्र विजातीये तच्चेष्टापत्तिः ननु समवाय सम्बन्धेन विजातीये तच्चेष्टांप्रति स्वीयविजातीयैतच्चेष्टाहेतुत्वसाध्यत्वाख्यविषयतानिरूपित सिद्धत्वाख्यविषयता सम्बन्धेन कृतिर्हेतुरिति एककृति स्वीकारेपि नानुपपत्तिः। एकस्या एव कृतेर्विजातीयैतच्चेष्टाहेतुत्वसाध्यत्वाख्य विषयतानिरूपि तसिद्धत्वाख्य विषयतयांगुल्यन्तरेऽ भावात्। अथ यदापुरुषान्तरस्य एतदङ्गुल्यांविजातीयचेष्टा साध्य-

का कृतिरुत्पन्ना तदा एतत्पुरुषस्य कथं न स्वाङ्गत्वमवच्छेदेनविजातीयचेष्टो-त्पद्यते इति तत्पुरुषीयत्वं निवेश्यकार्यकारणभावकल्पने गौरवं । नानाकृति-स्वीकारे तु अवच्छेदकतयापुरुषान्तरीयकृतेरेतत्पुरुषीयाङ्गत्वासम्भवादेव न तदापत्तिरिति चेन्न । अवच्छेदकता तादृशविषयत्वोभयसम्बन्धेन कृतेर्हेतुतया-ममापि तत्पुरुषीयत्वानिवेशात् । भवन्मते तु अनन्तवैजात्यकल्पनेन तदवच्छे-दनियामककल्पनेन च गौरवमिति नानाकृतिस्वीकारो निरर्थकइति मैवं । अवच्छेदकता तादृशविषयतोभयसम्बन्धेन कृतेर्हेतुत्वंतु उभयत्वस्यापेक्षा-बुद्धिविशेषविषयत्वरूपस्य दुर्वचतया एकविशिष्टापरत्वरूपस्य च विनिगम-नाविरहग्रस्ततया गौरवेण तादृश विषयता सम्बन्धेनैव कारणता वाच्या । तथा तत्पुरुषीयत्वनिवेशे गौरवादवच्छेदकता सम्बन्धेनैव कृतर्हेतुतेति एक कृति स्वीकारेविजातीय चेष्टानामनुपपत्त्या नानाकृतिस्वीकार आवश्यकइति-दिक् । अत्रोच्यते । स्वचिकीर्षाधीनकृतिसाध्यता ज्ञानत्वेन प्रवृत्तिकारण-त्वात् भ्रमे स्वचिकीर्षाधीन कृतिसाध्यता ज्ञानाभावादेवा प्रवृत्तेः । अत एवा-न्येच्छाधीनेच्छा विषयत्वादेवभ्रमो नान्तरीय इत्युच्यते । ननु प्राणपञ्चकसञ्चारे भ्रमे च प्रवृत्तिवारणय स्वचिकीर्षाधीन कृतिसाध्यता ज्ञानत्वेन कारणतेत्युक्तं । तदयुक्तं । प्राणपञ्चकसञ्चारादेःप्रवृत्ति स्वरूपायोग्यतयैवतत्र प्रवृत्तिवारणात् किंस्व चिकीर्षाधीनत्वविशेषणेन । अन्यथावस्तुगत्या चिकीर्षाधीना याकृते-स्तत्साध्यताभ्रमत्वमात् प्राणपञ्चकसञ्चारे प्रवृत्तेर्व्यभिचारत्वात् । तथा च प्रवृत्ति स्वरूपयोग्यत्व ज्ञानस्य पृथक्कारणतया प्रवृत्तिस्वरूपायोग्यवृत्तिविशेषतापत्या-सत्या कृतिसाध्यता ज्ञानत्वेन कारणतयैवोपपत्तौ न तद्विशेषणमिति । अत्रे-दमवधेयं । स्वेच्छाधीनत्वं न ज्ञानतंत्रमपि तु वस्तुगत्या स्वेच्छाधीनायाकृति-स्तत्साध्यता ज्ञानं कारणमिति । प्राणपञ्चकसञ्चारे वस्तुगत्यास्वेच्छाधीन कृतेरप्रसिद्धतयाकृयं भ्रममादायातिप्रसङ्गवारणाय प्रवृत्तिस्वरूपयोग्यत्व ज्ञानस्य प्रवृत्तिस्वरूपायोग्य व्यावृत्तत्तविशेषतापत्यासत्या कृतिसाध्यता ज्ञा-नस्यवा कारणत्वावश्यकतयातद्विशेषणानुपादानमिति । न च तथापिसुखे-च्छामादायसुखे प्रवृत्तिप्रसङ्गइति तया ज्ञानकारणत्वमावश्यकमिति वाच्यं । फलेच्छाया अप्रवर्तकत्वात् । तथापि स्वचिकीर्षाधीनत्वस्य विवक्ष-णात्सुख चिकीर्षाधीनत्वेन तु न प्रवर्तकत्वमिति 'वस्तुतस्तु' प्रवृत्तिस्वरूपा-योग्य व्यावृत्तविशेषता प्रत्यासत्या कृतिसाध्यता ज्ञानत्वमात्रेण कारणत्वेघ-

सर्वदा तत्सत्वात् अतः कृतिसाध्यत्वमेवविध्यर्थ इति। नन्वेवं मण्डलीकुर्यादितिवाक्यादुत्पन्नकृतिसाध्यताज्ञानवतोबलवदनिष्टजनकमेव मण्डलीकरणं। जानतोमण्डलीकरणे प्रवृत्तिः स्यात् अथ बलवदनिष्टानुबन्धि कृतिसाध्यताज्ञानं प्रवर्त्तकमिति चेन्न। इत्थमपीष्टजनकत्वेन बलवदनिष्टानुबन्धि

टादौ जीवनयोनि यत्नसाध्यताभ्रमकाले प्रवृत्त्यापत्तिवारणाय चिकीर्षाधीन कृतिसाधयताज्ञानत्वेन हेतुताया आवश्यकतया चिकीर्षाधीनत्वविशेषणमावश्यकमेवेति। एतेन प्रवृत्तिस्वरूपयोग्यत्वज्ञानं कारणमिति प्रवृत्तिस्वरूपा योग्यव्याहत्तविशेष्यता प्रत्यासत्या कृतिसाधयताज्ञानं कारणमिति वा न ब्रूमः किन्तु कृतेनैव प्राणपञ्चकसञ्चारेण प्रवृत्तिरिति। तथाहि। घटोघट इति तदुद्देश्यतावच्छेदक तद्विधेयकशाब्दबोधवारणाय निर्वन्हिर्वन्हिमानिति तदभावधर्मितावच्छेदकतद्धर्मावच्छिन्नप्रकारताकानुमिति वारणाय च तन्निरूपितविषयतासम्बन्धेन ज्ञानंप्रति तद्धेदत्वेन हेतुता वाच्या। तत्रच कार्यतावच्छेदकेज्ञानत्वमनिवेश्य तन्निरूपितविषयतासम्बन्धेन गुणत्वावच्छिन्नं प्रत्येवतद्धेदस्य हेतुत्वमभ्युपेयते एवंच प्रवृत्तिलक्षणो गुणः प्राणपञ्चकसञ्चारभिन्न एव जायत इति प्राणपञ्चकसञ्चारभिन्न वृत्तिविषयतासम्बन्धेन प्रवृत्तौ प्राणपञ्चकसञ्चारभेद एव हेतुरिति नातिरिक्तकार्यकारणभावकल्पनमिति चिकीर्षाधीनत्वविशेषणमफलमिति निरस्तं। तावतऽपि घटादौ जीवनयोनिकृतिसाधयताभ्रममादाय प्रवृत्तिवारणाय चिकीर्षाधीनत्वविशेषणावश्यकत्वादिति दिक्। नन्वेवमिति। एवं कृतिसाधयत्वमात्रस्य विधयर्थत्वे। जानत इति वाक्यैर्निष्फलमपि मण्डलीकरणं फलभ्रांत्याक्रियते। तस्य च हयाचेष्टांनकुर्वीत न विप्रःक्षणिकोभवेत्यादिना वेद निषेधादनिष्टजनकत्वेन तत्र बलवदनिष्टजनकत्व ज्ञानकाले आस्तिकानामपि प्रवृत्तिप्रसङ्गः। प्रवर्त्तिकस्य कृतिसाधयता ज्ञानस्य सत्वादित्यर्थः। अथेति। तथाच बलवदनिष्टानुबन्धित्वेसति कृतिसाधयत्वंविधयर्थ इति भावः। इत्थमपीति। बलवदनिष्टानुबन्धित्वेसति कृतिसाधयताज्ञानस्य प्रवर्त्तकतया बलवदनिष्टजनकत्वज्ञानकाले प्रवृत्तिवार-

कृतिसाध्यत्वेन च मण्डलीकरणं ज्ञानवतस्तच्च प्रवृत्तिः स्यात् । प्रवृत्तिजनकज्ञानस्य च सत्वात् । अत्र प्राभाकरमतानुवर्त्तिनः । नित्ये शौचादिमत्वप्रतिसन्धानजन्यं कार्यताज्ञानं प्रवर्त्तकं । अन्यच्च चेष्टसाधनताज्ञानजन्यमिष्टसाधनताज्ञान-

---

णेऽपीत्यर्थः । तच्च मण्डलीकरणे । प्रवृत्तिजनकेति । बलवदनिष्टाननुबन्धि कृतिसाध्यताज्ञानस्य सत्वादित्यर्थः । प्राभाकरमते इष्टसाधनत्वमपि विध्यर्थो भवत्येव । अत एव तैर्नित्यापूर्वनिषेधापूर्वरूपं परागपूर्वमपि सन्ध्यामुपासीत न कलञ्जभक्षयेदित्यादि नित्यनिषेधयोः कल्प्यते । तस्य च स्वतएवपुरुषार्थत्वान्नेष्टत्वविरोध इति सर्वप्राभाकराणामेव नेदंमतमिति सूचनायाच्च प्राभाकरमताऽनुयायिन इत्युक्तं । तथाच तदप्येकदेशिमतमिति भावः । नित्ये इति । सन्ध्यावन्दनादावित्यर्थः । शौचादीत्यादिना तत्कालजीवित्वपरिग्रहः । सन्ध्यामुपासीतेत्यादिस्थले अहं एतत्कालीन कृतिसाध्यसन्ध्यावन्दनकः शुचिः तत्कालजीवित्वात् पूर्वसन्ध्यायामहमिवेत्याकारक कार्यताज्ञानं प्रवर्तकमित्यर्थः । अन्यच्च चेति । काम्ये चेत्यर्थः । इष्टेति । पाको मत्कृतिसाध्यः मत्कृतिंविना सत्वे सति मदिष्टसाधनत्वादित्यानुमानिकं कार्यताज्ञानं काम्यगोचरप्रवृत्तौ हेतुरित्यर्थः । ननु स्तनपानकार्यता स्मरणात्प्रवृत्तिर्नस्यात् व्याप्त्याद्यात्मक स्मरणेनानुमानिकस्येष्टसाधनताज्ञानजन्यकार्यताज्ञानस्याभावादित्यत आह । इष्टसाधनता ज्ञानकालीनं चेति । कालश्चात्र यावता कालेन व्याप्त्यादि ज्ञानात् कार्यतानुमितिस्तावानेव विशिष्यग्राह्यः । तेन न स्थूलकालमादाय दोषः । लिङ्गोपस्थितलैंगिकभानोपगमे तु यथा श्रुते न दोष इति । सामान्ये चेति । प्रवृत्तिसामान्ये चेत्यर्थः । यद्विशेषयोः कार्यकारणभावोऽसतिबाधके तत्सामान्ययोरपीति न्यायादिति भावः । न कश्चिदिति । मण्डलीकरणे प्रवृत्तिप्रसङ्गरूपोदोषो नेत्यर्थः । प्रवृत्तित्वावच्छिन्नं प्रति कार्यताज्ञानत्वेन हेतुता काम्यगोचरप्रवृत्तिप्रति इष्टसाधनतालिंगककृतिसाध्यताज्ञानत्वेन नित्यगोचरप्रवृत्तिं प्रति शौचादिमताप्रतिसन्धानजन्यकार्यताज्ञानत्वेन हेतुतया विशेषसामग्रीसहकृतायाएव सामान्यसामग्र्याः फलोत्पादकतया विशेषसामग्रीविरहादेव न मण्डलीकरणादौ प्रवृत्त्यापत्तिरिति भावः । पाको मत्कृतिसाध्यः मत्कृतिंविना सत्वे सति मदिष्टसाधनत्वादिति पाकानुमानं । तच्च अ-

कालीनं वा कार्यतावच्छेदकं प्रवृत्तिहेतुः। सामान्ये च कृति-साध्यताज्ञानसामान्यमिति न कश्चित् दोषः। नचैवं लाघवादिष्टसाधनताविषयक कृतिसाध्यताज्ञानमेव प्रवृत्ति

मे प्रवृत्तिवारणाय स्वेच्छाधीनकृतिसाध्याताज्ञानस्यैव प्रवर्त्तकतया स्वेच्छाधीन मत्कृतिसाध्यत्वमेव साध्यं हेतुरपि इच्छाधीन मत्कृतिं विना ऽसत्वे सति मदिष्टसाधनत्वादिति। तेन प्राणपञ्चकसंचारे न व्यभिचारः। मदिष्टसाधनत्वमात्रस्य हेतोर्दृष्टौ व्यभिचार इति सत्यंतं। मदिष्टसाधने परकृतेपाके व्यभिचारवारणाय मत्कृतिं विनेत्यत्रमत्पदं। अमे व्यभिचारवारणय विशेष्यदलनिवेशः। तस्यापि मदीयशत्रोरिष्टसाधनत्वाद्व्यभिचार इत्यतः मदिष्टेत्यत्र मत्पदं। अथ मदिष्टसाधनेनांतरीयके जलसंयोगे व्यभिचारः अमवतस्तस्याप्यन्येच्छाधीन मत्कृतिसाध्यत्वात् स्वेच्छाधीनमत्कृतिंविनेति विवक्षणे च अमेपि तेनैवानतिप्रसङ्गात् मदिष्टेत्यस्यवैय्यर्थ्यमिति चेन्न। अखण्डाभावघटकतयावैयर्थ्याऽभावात्। तस्य हेत्वन्तरत्वादिति। अथात्र सिद्धपाकस्य पक्वत्वे कृत्यनन्तरभविष्यत्वरूपस्य कृतिसाध्यत्वस्य बाधः अनागतपाकस्य च सामान्यलक्षणानङ्गीकारात् ज्ञानासम्भव इतिचेन्न। पक्षधर्मताज्ञानस्य समानप्रकारकत्वेनैवानुमितिहेतुतया पक्वतावच्छेदकपाकत्वप्रकारक सिद्धपाकविशेष्यकज्ञानादसिद्धपाकविषयकानुमिते सम्भवात्। तदुक्तं मणिकृता। पाके कृतिसाध्यत्वं सिध्यत्सिद्धेबाधादनागतंपाकमादय सिध्यति। पक्वतावच्छेदकसामानाधिकरण्यं साध्यसामान्यस्य सिध्यतीत्यनुमाने क्लृप्तत्वादिति। ननु भावियौवराज्ये प्रवृत्तिवारणायेदानीं तन मत्कृतिसाध्यताज्ञानस्यैव प्रवर्त्तकतया इदानींतनमत्कृतिसाध्यत्वमेव साध्यं। हेतुरपि चेदानीं तनत्वघटितः स तु सिद्धपाके ऽसम्भवी असिद्धस्य चाज्ञानात् पक्षधर्मताज्ञानंदुर्भिक्षमिति चेन्न। स्व समानाधिकरणपाकत्वरूपपरंपरासम्बन्धेन सिद्धपाके एव हेतुमताज्ञानसम्भवात् नच द्रव्यत्वेन पर्वतेवह्निव्याप्यधूमवत्ताज्ञानाद्द्रव्यत्वेन ह्रदपक्षकानुमित्यापत्तिः अन्यथा ख्यात्यापत्त्या इष्टापत्तेरयोगादिति वाच्यं। द्रव्यत्व प्रकारक तत्तद्व्यक्तिपक्षकानुमितित्वं कार्यतावच्छेदकं। द्रव्यत्वप्रकारकपरामर्शत्वेन च कारणताकारणतावच्छेदके परं तत्तद्व्यक्तित्वविवेशः। समानविषयकत्वेन कारणत्वेपि तत्तद्व्यक्तिभेदेन कारणत्वस्यावश्यकत्वात् कारणताव-

च्छेदकेपि तत्तद्व्यक्तिनिवेशस्य लघ्वते परमाधिक्यात् । इत्थञ्च ह्रदव्यक्तिमनंतर्भाव्यैव कारणत्वान्न दोषः । ननु व्याप्यताघटकसम्बन्धेनैव हेतुमताज्ञानस्यैवानुमिति हेतुतया तदसम्भवः । सिद्धपाके व्यभिचारेण स्व समानाधिकरणपाकत्वरूप परंपरासम्बन्धस्य हेतुता न वच्छेदकत्वात् । नच साध्यमपि तेनैवसम्बन्धेनेति वाच्यं । प्रवृत्तिजनकचिकीर्षायां स्वरूपसम्बन्धेनैव कृतिसाध्यत्वस्य प्रकारतया तज्जनकज्ञानेपि तेनैव सम्बन्धेन तस्यप्रकारत्वात्स्वरूपसम्बन्धस्यैव साध्यतावच्छेदकत्वादिति चेन्न । गुरुमते येनकेनचित्सम्बन्धेनैव हेतुमताज्ञानादप्यनुमिति स्वीकारात्कालिकसम्बन्धेन पर्वते धूमवत्ता ज्ञानेपि अनुमितेरिष्टत्वात् । नचैवं पर्वते धूमवत्ताज्ञानात्धूमावयवह्रदादौ वन्ह्यनुमित्यापत्तिरिति वाच्यं । पक्षतावच्छेदकभेदेनानुमितिपरामर्शयोः कार्यकारणभावात् । ह्रदत्वाद्यवच्छिन्नपक्षकानुमितेरलीकतया तदन्तर्भावेनकार्यकारणभावाकल्पनात् । नच समानविशेष्यतावच्छेदकता प्रत्यासत्याकारणत्वे लाघवाद्रश्यत्वेन ह्रदपक्षकानुमित्यापत्तिरिति वाच्यं । अन्यथा ख्यात्यापत्तिभयेन गुरुत्वेपि पक्षतावच्छेदकभेदेन कारणत्वकल्पनाद प्रामाण्यज्ञानाभावनिवेशानुरोधेनापि पक्षतावच्छेदकनिवेशस्यावश्यकत्वाच्चेति दिक् । अपरेतु संनिकृष्टपर्वते पर्वतत्वेन धूमाभाववत्ताग्रहे येनकेनचित्सम्बन्धेन धूमवत्तापरामर्शादासन्निकृष्टपर्वतेवन्ह्यनुमित्यापत्तिः । इष्टापत्तौ च वन्ह्यर्थं प्रवृत्त्यापत्तेरेतच्चिंत्यमित्याहुः । तदसत् । उपादानप्रत्यक्षाभावादेव तत्र प्रवृत्तिवारण सम्भवादिति । नचैवमिति । एवं । इष्टसाधनताज्ञानजन्यकार्यताज्ञानत्वेन हेतुत्वे । लाघवादिति । इष्टसाधनताज्ञानजन्यत्वापेक्षया इष्टसाधनताज्ञानकालीनत्वापेक्षया च इष्टसाधनताविषयकत्वस्य निवेशे लाघवादित्यर्थः । प्रवृत्तिसामान्ये इति । तथाच प्रवृत्तिसामान्यसामग्रीविरहादेव न मण्डलीकरणे प्रवृत्तिरिति भावः । नित्ये इति । संध्यावंदनादावित्यर्थः । तदभावात् । तस्येष्टसाधनत्वाभावेनेष्टसाधनताविषयककृतिसाध्यताज्ञानाभावादित्यर्थः । ननु तत्रापि प्रत्यवायानुत्पादरूपेष्टसाधनत्वमस्त्येव यत्र फलं न श्रूयते तत्रापि तत्कल्प्यते इत्यत आह । साध्यत्वेति । ननु तन्निरूपितसाध्यत्व तन्निरूपितसाधनत्वं च विरुद्धमिति कृतिनिरूपितसाध्यत्वेष्टसाधनत्वयोर्भाने बाधकाभावः । सामान्यतस्तु साध्यत्वसाधनत्वयो न विरोध इत्यभिप्रेत्य शङ्कते । कथमिति । अनयोः साध्यत्वसाधनत्वयोः । अनयोः कृतिसाध्यत्वेष्ट

सामान्ये हेतुरिति वाच्यं। नित्येतदभावात्। साध्यत्वसाधनत्वयोर्विरोधेनैकदैकस्मिन्कृतिसाध्यत्वेष्टसाधनत्वयोर्भानासम्भवाच्च। कथमनयोर्विरोध इतिचेदृष्टं। साधनत्वं हि सिद्धधर्मः। असिद्धावस्थायांतदनुपपत्तेः। साध्यत्वं असिद्धधर्मः। सिद्धतादशायां तदभावात्। नचैकदासिद्धमसिद्ध-

---

साधनत्वयोरित्यर्थ इत्यपिकश्चित्। साधनत्वंहीति। सिद्ध धर्मः. पूर्वकालवृत्ति धर्मः। अनन्यथा सिद्धनियतपूर्ववर्त्तित्वरूप कारणतायाः सिद्धधर्मत्वादित्यर्थः। सिद्धधर्मत्वमेवाह। असिद्धेरिति। भाविनः कार्यानुदयादित्यर्थः। साध्यत्वं चेति अनन्तरंभविष्यत्वरूपं साध्यत्वं च। असिद्धधर्मः। भावि कालवृत्तिधर्म इत्यर्थः। अनन्यथासिद्धनियतपश्चाद्भावित्वरूपकार्यतायाः। अनागतवृत्तित्वादिति भावः। तदेवाह। सिद्धता दशायामिति। तदभावात् साध्यत्वाभावात्। नचेति। एककालावच्छेदेन सिद्धत्वासिद्धत्वयोरसम्भवेन तदवच्छिन्नयो साध्य साधनत्वयोरपि सामान्यत एव विरोधेनान्यनिरूपितयोरपि तयोर्विरोध इति भावः। येन। एककालावच्छेदेन सिद्धत्वासिद्धत्वयोः सम्भवेन। एकदाकृतीति। नच इदानीं इष्टसाधनंअग्रे च कृतिसाध्यमिति ज्ञानादेव प्रवृत्तिरास्तामिति वाच्यं। इदानीं अग्रेतनकालयोरननुगमेन तथा व्याप्तिग्रहासम्भवादिति भावः। नवीन नैय्यायिकमते इष्टसाधनताज्ञानस्य कृतिसाध्यताज्ञानस्य च पृथगेवकारणत्वादाह। जरदिति। लाघवादिति। कारणतावच्छेदकलाघवादित्यर्थः। प्रवर्त्तकमिति। प्रवृत्तिसामान्ये कारणमित्यर्थः ज्ञानादीति। आदि नेष्टसाधनताज्ञानकालीन कार्यताज्ञानपरिग्रहः। गौरवादिति। जन्यत्वादि प्रवेशेन कारणतावच्छेदक गौरवादित्यर्थ। फलाभावादिति। सन्ध्यावन्दनादीनां स्वर्गादिरूप फलाभावादित्यर्थः। नित्येपीति। सन्ध्यावन्दनादावपीत्यर्थः। फलश्रुतेरिति। सन्ध्यामुपासते येतु सततंशंसितव्रताः। विधूतपापास्ते यांति ब्रह्मलोकंसनातनमित्यादिना तत्रापि फलबोधनादित्यर्थः। सर्वत्र नित्ये फलश्रवणाभावादाह बहुश इति। अतएवाह। यत्र चेति। नित्ये इति शेषः। विश्वजिदिति। विश्वजिता यजेतेत्यत्र इष्टसाधनत्वस्य विधार्थत्वेन विशेषतः फलानुपस्थितौ विधेः प्रवर्त्तकत्वानुपपत्त्याविशेषतः तत्फ-

ज्ञा । येनैकदाकृतिसाध्यत्वमिष्टसाधनत्वं च स्यादिति। अत्रज
न्यैयायिकाः । इष्टसाधनताविषयकं कृतिसाध्यताज्ञानमेव
लाघवात्प्रवर्त्तकं । नत्विष्टसाध्यताज्ञानजन्य कार्यताज्ञानादि
गौरवात् । नच नित्येइष्टसाधनताज्ञानासम्भवः फलाभा-
वादिति वाच्यं । नित्येऽपि बहुशः फलश्रुतेः । यच्च फल-

लं कल्पनीयं । तत्रस्वर्गापवर्गयोरेव मुख्यपुरुषार्थत्वेनापवर्गस्याभावरूपतया गौरवेण लघुत्वात् स्वर्गएव फलंकल्प्यते तथा श्रुतफले नित्येपीत्यर्थः । ननु यदकरणे प्रत्यवायस्तन्नित्यमिति तच्च प्रत्यवाययरिहारस्यावश्यकत्वात् भएफलं नतु स्वर्गो गौरवात्। नच निरूपाधीच्छा विषयत्वरूप मुख्यपुरुषार्थ-त्वासम्भव इति वाच्यं। बलवद्देष विषयाभावत्वेन दुःखाभाव इव दुःखजन-काभावेपि तत्वाविरोधादित्यतस्तथैवाह । प्रत्यवायेति । नच प्रत्यवायपरि-हारस्तत्प्रागभावः तस्यच कथं लत्वं प्रागभावस्याजन्यत्वादिति वाच्यं । यत्स-त्वे यत्सत्वं यदभावे पदभाव इत्येवंरूपयोगक्षेम साधारण जन्यत्वस्य तचा-पि सम्भवादिति भावः । नचैवमिति। नित्येपि इष्टसाधनता ज्ञानबलादेव प्रवृत्तिस्वीकारेत्यर्थः । काम्यत्वमिति । कामनाधीनकर्त्तव्यत्वस्यैव काम्यत्व रूपत्वादित्यर्थः । नत्विति । कामानानधीनकर्त्तृकत्वस्यैव नित्यत्वस्वरूप-त्वादिति भावः । कर्महि त्रिविधं । नित्यं काम्यं नित्यकाम्यंच तच केवलं नित्यं सन्ध्यावन्दनादि केवलं काम्ययागादि नित्यकाम्य एकादशीव्रतादि। अकरणे प्रत्यवाय श्रवणात् नित्यत्वं । पुत्रादि कामना श्रवणात् काम्यत्व-मपि। अतएव काम्यकरणे नित्यमपितंचेणैव सिध्यतीति न तत्र कर्मद्वयं-भवन्मते सर्वस्यैव नित्यस्य काम्यत्वे केवलं नित्यकर्मैव न स्यात् । तथाच नित्यत्वमित्यस्य केवल नित्यत्वमित्यर्थः। अन्यथा नित्यकाम्ये कामनाधीन-कर्त्तव्यत्वेन काम्यत्वे पिनित्यत्वस्वीकारादसंगत्यापत्तेरिति ध्येयं । नदि-ति। कामनाधीनकर्त्तव्यभिन्नत्वस्य नित्यत्वरूपत्वे नित्यकाम्याऽसंग्रहात्का-मनानधीनकर्त्तृकत्वमित्युक्तम् । यदिति । विहित तत्कालीनाकरणे इत्य-र्थः। तेनान्यदा सध्यावन्दनाकरणेऽपि न क्षतिः। तत्वमित्यन्तरं नित्यत्व-मित्यऽनुषंगः। तच्चेति । प्रत्यवाय प्रयोजकीभूताकरण प्रतियोगित्वरूप नि-

स्मृतिर्नास्ति तचास्तां विश्वजिन्न्यायात् स्वर्गएवफलं प्रत्यवायपरिहारो वा। नचैवं फलकामनाधीनकर्त्तृकत्वे काम्यत्वंस्यान्नतु नित्यत्वमिति वाच्यम्। नहि फलकामनानधीनकर्त्तृव्यत्वं नित्यतां ब्रूमः। किन्तु यदकरणे प्रत्यवायसत्वंतत्त्वं। तच्च फलकामनोपाधिकर्त्तृव्यत्वेप्यक्षतमेव। नचैवं फले यदा कामनानास्ति तदा संध्यावन्दनादौ प्रवृत्तिर्नस्यादिति वाच्यं दृष्टत्वात्। नहि प्रयोजनमनुद्दिश्य मन्दोऽपि न प्रवर्तते। नचैवं कामनाधिकारिविशेषणं स्यात्। तथाच यदा फले कामना नास्ति तदा पुरुषस्याशुचेरिवानाधिकारत्वान्नित्याकरणेपि प्रत्यवायो न स्यादिति चेत्। यदि तच प्रत्य-

---

त्वंचेत्यर्थः। कामनोपाधीति। कामनारूपो यदुपाधेः प्रयोजकस्तत्कर्त्तृव्यत्वेपि इत्यर्थः। प्रयोजकत्वंचान्यूनानतिरिक्त वृत्तित्वं। तथाच कामनाधीन कर्तव्यत्वे कामनाधीनकर्तव्यत्वस्य विरुद्धत्वेऽपि प्रत्यवायप्रयोजकीभूताकरण प्रतियोगित्वं न विरुद्धमिति भावः। नचैवमिति। एवं कामनोपाधिकर्त्तृव्यत्वे। फलेति। प्रथमतः फलज्ञानं ततः फलेच्छा ततः इष्टसाधनता ज्ञानं उपाये ततः उपायेच्छा ततः प्रवृत्तिरिति क्रमः। तथा चाङ्गिरः सन्ध्यामुपासीतेत्यादौय दानफलप्रतिसन्धानं तच फलेच्छाभावेन इष्टसाधनताज्ञानाभावात् प्रवृत्तिर्नस्यादित्यर्थः। इष्टत्वादिति। गुरुणअहरहः सन्ध्याकर्त्तव्येतिशिक्षितेऽवश्यं किञ्चिदेतस्य फलमस्तीति प्रतिसधायैव बालानामपि प्रत्यहं प्रवृत्तिरिति भावः। तथाच केवलं नित्यत्वास्थ्येवेतिहृदयं। नन्वेवमिति। एवं नित्यस्याऽपि काम्यत्वे। कामनेति। अधिकारि विशेषणंहि अधिकारः तथाच नित्ये शुचितत्कालजीवित्वमधिकारः काम्ये तु कामनाधिकाइति कामनाऽधिकारीविशेषणंस्यादित्यर्थः। नस्यादिति। अधिकृताकरणे प्रत्यवाय। यथाऽशुचिना संध्याऽकरणेपि न प्रत्यवायः। अधिकारा भावात् तथा कामनाशून्येनाकरणेपि प्रत्यवायो न स्यात्। अधिकाराभावादित्यर्थः। यदीति। तच। कामनाविरहप्रयुक्त नित्याकरण स्थले। वस्तु तस्तु। तत्रनियमेन कामनास्थ्येव अकरणं तु आलस्यादिप्रयुक्तमिति अधिका-

वायः प्रामाणिकस्तत्यज्यते । तर्हि कामनाधिकारि विशेषणं । ननु वेदबोधितमिष्टसाधनत्वमपि । प्रामाणिकत्वात् । कल्प्यतां वा कामनेतर यावदधिकारवतामकरणमेव प्रत्यवायहेतुरितिन किञ्चिदेतत् नच साध्यत्वसाधनत्वयोर्विरोधः । एकस्मिन्याकौदनसाधन कृतिसाध्यत्वयोः असत्वात् । कथमन्यथा तवेष्टसाधनताज्ञानकालीनं कृतिसाध्यताज्ञानं यागादौप्रवर्त्तकमिति । कृतिसाध्यत्वे च बलवदनिष्टाननुबन्धित्वं विशेषणं देयं । नातोमधुविषसंपृक्तान्नभोजने

रोत्थेव । कामनेति । नित्येतरकाम्ये कामनाऽधिकारिविशेषणं । नित्यकाम्ये तु शुचितत्कालजीवित्वमेवाधिकार इति कामना शून्येऽपि प्रत्यवायोस्तीति भावः । इष्टसाधनत्वमपि त्यज्यते इति पूर्वेणान्वयः । प्रामाणिकत्वात् । प्रमाणसिद्धत्वादित्यर्थः । ननु फलहेतोरेवाऽधिकारत्या कामनाप्यधिकारिविशेषणत्वादधिकारः कथमन्यथा काम्यसाधनता ज्ञानस्य प्रवृत्तिसामान्ये हेतुत्वमित्यत आह । कल्प्यतां वेति । कामनेतरेति । तथाच कामनायाश्चाधिकारत्वेपि कामनेतर शुचितत्कालजीवित्वरूप यावदधिकारवतां नित्याकरणे प्रत्यवाय इति कामनाविरहकालेऽपि नित्याकरणे प्रत्यवाय एवेति भावः । न किञ्चिदिति । काम्यगोचरप्रवृत्तिं प्रति इष्टसाधनता लिङ्गक कृतिसाध्यताज्ञानत्वेन प्रवृत्तिसामान्ये तु कार्यताज्ञानत्वेन हेतुत्वमिति गुरुतरानुसरणस्य वैयर्थ्यम् । नित्येऽपि फलस्योपपादितत्वादिति । ननु साध्यत्वसाधनत्वयोर्विरोधादिष्टसाधनता विषयककृतिसाध्यता ज्ञानत्वेन प्रवृत्तिहेतुत्वासम्भव इत्याशयेनाह । नचेति । उत्तरयति । एकस्मिन्निति । एकनिरूपितयोरेव साध्यत्वेसाधनत्वयोर्विरोधेन अन्यनिरूपितयोरविरोधितया ओदननिरूपितसाधनत्वस्य कृतिनिरूपितसाध्यत्वस्य च पाकेऽविरोधित्वादिति भावः । अन्यथेति । साध्यत्व साधनत्वयोः सामान्यतः विरोधे । तवेति । विषभक्षणादौ प्रवृत्तिवारणाय इष्टसाधनतालिंगकं कृतिसाध्यताज्ञानं प्रवर्त्तकमिति वाच्यं । तच्च साध्यत्वसाधनत्वयोर्विरोधेऽसम्भवतीति तयोर्नसामान्यतो विरोध

कृतिसाध्यत्वेन सुखसाधनत्वेन च ज्ञातेपि प्रवृत्तेर्बलवद-
निष्टानुबन्धित्वेनग्रहात्। यदिच बलवदनिष्टाननुबन्धित्वेन
ज्ञायते तदा प्रवर्त्तत एव। एवंच बलवदनिष्टाननुबन्धीष्टसा-
धनत्वेसति कृतिसाध्यत्व विषयकं ज्ञानं प्रवर्त्तकं। विधा-
र्थेपि बलवदनिष्टाननुबन्धीष्टसाधनत्वेसति कृतिसाध्यत्वं।
अतएव कलंजभक्षणस्येष्टसाधनत्वेसति कृतिसाध्यत्वेऽपि ब-
लवदनिष्टाननुबन्धित्वाभावादिशिष्टाभावान्न कलंजं भक्षये-
दिति विध्यर्थो निषेध उपपद्यते कथन्तर्हि श्येनेनाभिचरन्
यजेतेत्यत्र विधिप्रवृत्तिः श्येनस्य हिंसात्वेन नरकरूपबलवद्

इति लाघवात् सामान्यतः इष्टसाधनताविषयककृतिसाध्यताज्ञानमेवप्रवर्त्तक-
मिति भावः। ननु मधुविषसंपृक्तान्नभोजने मरणरूपबलवदनिष्टजनकत्वज्ञा-
नकालेऽपि प्रवृत्त्यापत्तिः। कृतिसाध्यत्वस्य तृप्तिरूपेष्टसाधनत्वस्य च ज्ञानात्।
मन्यते तु बलवदनिष्टानुबन्धीष्टसाधनत्वलिङ्गककृतिसाध्यताज्ञानत्वेन प्रव-
र्त्तकतया हेत्वज्ञानेन तथाज्ञानाभावादित्यत आह। बलवदिति। सुखेति।
तृप्तिरूपसुखेत्यर्थः बलवदनिष्टाननुबन्धित्वभ्रमकाले प्रवृत्त्यापत्तिरतस्तत्रेष्टा-
पत्तिमाह। यदिचेति। एवंच। बलवदनिष्टाननुबन्धित्वज्ञानस्यान्वयव्यति-
रेकानुविधायित्वे च। विध्यर्थोपीति। प्रवर्तकज्ञानविषयस्यैव विध्यर्थतया
बलवदनिष्टाननुबन्धीष्टसाधनत्व विशिष्टं कृतिसाध्यत्वं विशिष्टमेव विध्यर्थः।
प्रत्येकशक्तिकल्पने नानार्थत्वापत्त्याविशिष्टे एव शक्तिरिति भावः। अत
एवेति। विशिष्टस्य विध्यर्थत्वादेवेत्यर्थः। विशेषणाभावप्रयुक्त बलवदनिष्टा
ननुबन्धीष्टसाधनत्वविशिष्टकृतिसाध्यत्वाभावरूपो विशिष्टाऽभावोस्तीत्यर्थः।
उपपद्यत इति। प्रत्येकं शक्तौ च कलंजभक्षणे इष्टसाधनत्व कृतिसाध्यत्वरू-
प विध्यर्थसत्वात्सामान्यतो विध्यर्थनिषेधबोधनेबाधात्। नकलंजंभक्षयेदि-
त्यादिस्मृत्या भक्षणनिषेधात्। निषिद्धाचरणेचानिष्टोत्पत्त्याविध्यर्थ बलव-
दनिष्टाननुबन्धित्वांशे बाधात्। विशिष्टरूपविध्यर्थ निषेधः विशिष्टे शक्ति-
स्वीकारे शक्यसमर्थनमिति भावः। कथं तर्हीति। बलवदनिष्टाननुबन्धित्वस्य

निष्टाऽनुपधित्वादिति चेन्न श्येनोहि वधसाधनं नतु नरक साधनं मानाभावात् श्येनाच्च वधो वधाच्च नरकमिति न तत्रास्तिकानां प्रवृत्तिरिति ननु श्येनो मरणानुकूलव्यापारत्वेन हिंसा साच नरकजनिकेतिचेत् नहि मरणानुकूलव्यापारमात्रं हिंसाकूपादौविनष्टे गवि तत् कर्तुर्गोवधकर्तृत्वप्रसङ्गात् नापि मरणोद्देशेनानुष्ठीयमानत्वेन विशेषितं तत् गङ्गामरणमुद्दिश्यकृतविसन्ध्यास्नपाठादेरपि तत्वापत्तेः अदृष्टद्वारामरणानुकूलत्वं विवक्षितमितिचेत्-

---

विध्यर्थत्वेहीत्यर्थः । श्येनेनेति । अभिचरन् वैरिवधादुत्कटकामनावान् श्येनेन यजेतेत्यर्थः । विधिप्रवृत्तिः । विधेः शाब्दबोधप्रयोजकत्वं । हिंसात्वेनेति । न हिंस्यात्सर्वभूतानि इत्यनेन हिंसामात्रस्यैव नरकसाधनत्वबोधनादिति भावः । मानाभावादिति । नरकसाधनत्वबोधकप्रमाणाभावादित्यर्थः । नच हिंसात्वमेव मानमिति वाच्यं । तस्य निरस्तत्वादिति भावः । ननु तर्हि नरकासाधनतया आस्तिकानामपि कथं न तत्र प्रवृत्तिरत आह । श्येनाच्चेति । आस्तिकानां नरकभीरूणां । तथाच श्येनस्य साक्षान्नरकासाधनत्वेऽपि नरकप्रयोजकत्वप्रतिसंधानादेव न तत्रास्तिकानां प्रवृत्तिरिति भावः । कथं मानाभाव इति शंकते । नन्विति । सा चेति । हिंसा चेत्यर्थः । नरकेति । न हिंस्यात्सर्वाभूतानीत्यनेन नरकजनकत्वबोधनादिति भावः । विनष्टे इति । गवि विनष्टे सतीत्यर्थः । तत् कर्तुः । कूपकर्तुः । गोवधेति । कूपकर्तुः गोहिंसकत्वापत्या तस्यापि गोवधप्रायश्चित्तापत्तेस्तत्प्रभावनया न कस्यापि कूपकरणे प्रवृत्तिस्यादिति भावः । तदिति । मरणानुकूलव्यापारमात्रं हिंसा इत्यनुषज्यते । यच्च मरणोद्देशेन खड्गघातः तेन च मरणं न जातं तत्रापि हिंसकत्वापत्तेरतोमरणानुकूलव्यापारत्वमिति । तदर्थेऽपि मरणोपधायकव्यापारत्वं । तथाच कूपस्य मरणोद्देशेनाननुष्ठीयमानत्वान्नतत्कर्तुर्गोवधकर्तृत्वमिति भावः । तत्वापत्तेः हिंसात्वापत्तेः । तथाच तस्यापि आत्मवधकर्तृत्वापत्तेरिति भावः । अदृष्टेति । तथाच मरणोद्देशेनानन-

हि कथं श्येनस्य हिंसात्वमिति नव्यास्तु क्रतिसाध्यत्वेसति बलवदनिष्टाननुबन्धीष्टसाधनता ज्ञानत्वेन बलवदनिष्टाननुबन्धिक्रतिसाध्यत्वेसतीष्टसाधनताज्ञानत्वेन वेत्यत्र विनिगमनाविरहः। अस्तुतेनापि तेनापि रूपेण हेतुत्वमिति चेत्तर्हि

ष्ठीयमानत्वेसति अदृष्टद्वारामरणानुकूलव्यापारत्वं हिंसात्वं। हिंसंध्यास्तवपाठस्य अदृष्टद्वारा मरणानुकूलत्वेन न हिंसात्वमिति भावः। तर्हीति। अदृष्टद्वारा मरणानुकूलत्वस्य विवक्षितत्वेहीत्यर्थः। कथमिति। श्येनेनहिनाहत्यमरणं जन्यते किन्तु कालान्तरे। तथाच तत्राऽदृष्टस्वीकारस्यावश्यकत्वात्। अदृष्टद्वारामरणानुकूलत्वरूपं न हिंसात्वमिति तच्च बलवदनिष्टाननुबन्धित्वस्याक्षततया श्येनेनाभिचरन् यजेतेति विधेर्नाप्रामाण्यमिति दिक्। प्राचीनमते स्वरसंप्रकाशयन् नव्यमतमाह। नव्यास्त्विति। विनिगमनाविरह इति। तथाच बलवदनिष्टाननुबन्धित्वविशिष्टेष्टसाधनत्वविशिष्टक्रतिसाध्यताज्ञानत्वेन हेतुत्वे तेषां मिथो विशेषणविशेष्यभावे विनिगमनाविरहेण विशिष्टरूपेण न कारणत्वमिति भावः। नच विशिष्टस्य वैशिष्ट्यमितिन्यायेन नावच्छेदकत्वं येन विशेषणविशेष्यभावे विनिगमना विरहस्यात्। किन्तु एकत्र इयमिति न्यायेन सर्वेषां विशेषणानां ज्ञान एव विशेषणत्वं। अवच्छेदकतायाः व्यासज्य वृत्तित्वाङ्गीकारात् इति वाच्यं। नाना सम्बन्धावच्छिन्नावच्छेदकतायाः एकस्याः असम्भवात्। महानसीय वन्ह्यभावप्रतियोगितावच्छेदकतायाः एकस्या महानसीयत्ववन्हित्वे च स्वीकरे महानसीयत्वे समवायसम्बन्धावच्छिन्नावच्छेदकत्वप्रतीत्यापत्तेस्तस्याव्याप्यवृत्तित्वस्य च वक्तुमशक्यत्वादिति दिक्। शङ्कते। अस्त्विति। तेन तेनापीति। बलवदनिष्टाननुबन्धीष्टसाधनत्वविशिष्टक्रतिसाध्यताज्ञानत्वेन क्रतिसाध्यत्वविशिष्टबलवदनिष्टाननुबन्धीष्टसाधनताज्ञानत्वेन बलवदनिष्टाननुबन्धित्वविशिष्ट क्रतिसाध्यत्वविशिष्टेष्टसाधनताज्ञानत्वेन इष्टसाधनत्वविशिष्टक्रतिसाध्यत्वविशिष्टबलवदनिष्टाननुबन्धिताज्ञानत्वेनापि रूपेण हेतुत्वमित्यर्थः। तर्हीति। क्रतिसाध्यताज्ञानत्वादिना क्रतिसाध्यताज्ञानत्वेन इष्टसाधनताज्ञानत्वेन बलवदनिष्टाननुबन्धित्वज्ञानत्वेनैव हेतुत्वमस्तीत्यर्थः। लाघवादिति। बलवदनिष्टाननुब-

कार्य्यतावच्छेदकत्वनैव हेतुतास्तु लाघवात् वस्तुतस्तु कृति-साध्यताधीत्वेनैव चिकीर्षाप्रति हेतुत्वं नन्वेवमिष्टाजनकेऽपि चिकीर्षास्यादिति चेन्नास्यादेव सुखादाविष्टाजनकत्वेन ज्ञाते मण्डलीकरणादौ चिकीर्षास्यादिति चेन्न उपायेच्छासामग्र्यभावात् कोयमुपायेच्छासामग्रीति चेत् इष्टसाधनताज्ञानं बलवदनिष्टाननुबन्धित्वज्ञानञ्च बलवदनिष्ट-

---

न्धित्वे इष्टसाधनत्वे कृतिसाध्यत्वे च प्रत्येकरूपेणाहेतुत्वे गौरवात् विशिष्टे एव शक्तिः । विशिष्टरूपेणैव च हेतुत्व मित्येककार्यकारणभावेनैव निर्वाह इति नवाभिप्रायः । सचावच्छेदकतायाः व्यासज्यवृत्तित्वानङ्गीकारात् मिथो विशेषण विशेष्यभावे विनिगमनाविरहेण कार्यकारणभावद्वयावश्यकतया वच्छेदकगौरवाच्चासम्भवीति अवच्छेदकलाघवात् प्रत्येकरूपेणैव हेतुत्वमुचितमिति भावः । चिकीर्षा द्वारा ज्ञानस्य प्रवृत्तिहेतुता तच्च चिकीर्षात्वावच्छिन्नं प्रति न विशिष्टरूपेण हेतुत्व किन्तु कृतिसाध्यताज्ञानत्वेनैवेत्याह वस्तुतस्त्विति । चिकीर्षाप्रतीति । चिकीर्षात्वावच्छिन्नं प्रतीत्यर्थः । इच्छायाः स्व समानप्रकारक धी साध्यत्व नियमात् कृतिसाध्यत्वप्रकारेकेच्छां प्रति कृतिसाध्यत्वप्रकारक ज्ञानत्वेनैव हेतुत्वं नतु प्रत्येक त्रितयरूपेण विशिष्टरूपेण वा । तेन रूपेण हेतुत्वे गौरवात् । मानाभावाच्चेति भावः । नन्वेवमिति । एवं । कृतिसाध्यताज्ञानत्वेनैव चिकीर्षात्वावच्छिन्नं प्रति हेतुत्वे । इष्टाजनकेपीति । कृतिसाध्यताज्ञानस्यतत्रापि सत्वादिति भावः । स्यादेवेति । कृतिसाध्ये सुखादौ चिकीर्षाभवत्येवेत्यर्थः । तथाचेष्टापत्तिरिति भावः । शङ्कते । इष्टेति । मण्डलीकरणे इष्टसाधनत्वभ्रमकाले चिकीर्षाभवत्येवेत्यत इष्टाजनकत्वेन ज्ञात इति । मण्डलीकरणे फलतया चिकीर्षानोपादयितुंशक्यते सुखादि चिकीर्षाप्रति सुखादिज्ञानत्वेन हेतुत्वादिति उपायतया आपादनीया सा तु न सम्भवति विशेषणसामग्रया फले जननीये सामान्य सामग्राः सहकारित्वादित्याह । उपायेच्छेति । उपायेच्छाया या सामान्यसामग्री तस्या अभावादित्यर्थः । शङ्कते । कोयमिति । इष्टेति । कृत्यसाध्यइष्टादाविच्छानुरोधेन उपायेच्छात्वावच्छिन्नं प्रति इष्टसाधनताज्ञानत्वेन बलवदनिष्टाननुबन्धित्वज्ञानत्वेन हेतुत्वं सुखादौ चिकीर्षात्वावच्छिन्नंप्रति कृतिसाध्यताज्ञानत्वेन हेतुत्वंमण्डलीकरणे

साधनताज्ञानस्य प्रतिबन्धकं। इष्टसाधनत्वञ्च विद्यमानेच्छाविषयोयस्तत्साधनं इच्छाविषयत्वञ्च स्वरूपसद्विशेषणं नतु तस्यापि ज्ञानं कारणं। एवंचयदासुखादाविच्छापाकादौ च सुखसाधनाधीस्तदपाकादाविच्छेति ध्येयमिति विध्यर्थोऽपीष्टसाधनत्वं कृतिसाध्यत्वं बलवदनिष्टाजनकत्वं च नतु विशिष्टं विशेषण विशेष्यभावेन विनिगमनाविरहात् न कलञ्जं भक्षयेदित्यत्र कृतिसाध्यत्वेष्टसाधनत्व-

---

चिकीर्षा जायमाना उपायतयैवस्यात् साच न सम्भवति। उपायेच्छा सामान्य सामग्रभावादित्यर्थः। बलवदनिष्टानुबन्धित्वज्ञानं वा प्रतिबन्धकमिति बलवदनिष्टाननुबन्धित्वज्ञानस्य प्रतिबन्धकत्वे अप्रामाण्यनिश्चयत्वेनोक्तेजकतया तदभावव्याप्यतदभावावच्छेदकधर्मदर्शनादीनां प्रतिबन्धकत्वे च गौरवमेवाचास्वरसो वाकारेण दर्शितः। विद्यमानेति। विद्यमाना या इच्छा तद्विषयो य स्तत्साधनत्वमित्यर्थः। स्वरूपसति। वस्तुगत्या यः इच्छाविषयस्तत्साधनताज्ञानं कारणमित्यर्थः। तस्यापि। इच्छविषयत्वसत्रोऽपि। एवं चेति। वस्तुगत्यायदिष्टंतत्साधनताज्ञानं कारणमिति। सुखादाविच्छाशून्यकालेन पाकादाविच्छोदय इति। ननु बलवदनिष्टाननुबन्धीष्टसाधनताकृतिसाध्यता ज्ञानादीनां प्रत्येकरूपेण हेतुत्वेऽपि विधेर्लाघवाद्विशिष्ट एव शक्तिरास्तामत आह। विध्यर्थोपीति। प्रवर्त्तकज्ञानविषयस्यैव विध्यर्थतया येन रूपेण ज्ञानस्य प्रवर्तकता तेनैव रूपेण शक्तिरिति भावः। ननु येन रूपेण प्रवर्त्तकतातेनैव रूपेण शक्तिरित्यत्र मानाभावात् लाघवाद्विशिष्टमेव शक्यमस्त्वित्यत आह। नत्विति विशिष्टं। बलवदनिष्टाननुबन्धित्वविशिष्टेष्टसाधनत्वविशिष्टकृतिसाध्यत्वं। विशेषणेति। बलवदनिष्टाननुबन्धित्वविशिष्टेष्टसाधनत्वविशिष्टकृतिसाध्यत्वे शक्तिः उतकृतिसाध्यत्वविशिष्टबलवदनिष्टाननुबन्धित्वविशिष्टेष्टसाधनत्वे बलवदनिष्टाननुबन्धित्वविशिष्ट कृतिसाध्यत्वविशिष्टेष्टसाधनत्वे इष्टसाधनत्वविशिष्ट बलवदनिष्टाननुबन्धित्वविशिष्टकृतिसाध्यत्वे वेति विनिगमना विरहादवच्छेदकगौरवाच्च प्रत्येकरूपेणैव शक्तिरिति भावः। ननु न क-

श्येनेनाभिचरेदित्यत्र नञर्थैकान्वयस्य कार्यत्वादिष्टसाधनत्वाच्च किंतु बलवदनिष्टाननुबन्धित्वस्य श्येनेनाभिचरन्यजेतेत्यत्र बलवदनिष्टाननुबन्धित्वस्य नान्वयबोधात् दृष्टसाधनत्वश्रुतिसाध्यत्वयोस्त्वन्वयस्यात्रैवाबाधादिति संक्षेपः । सोऽयं विधिस्त्रिविधः । अपूर्वविधिर्नियमविधिः परिसंख्याविधिश्चेति । तदुक्तम् विधिरत्यन्तमप्राप्तौ नियमः साक्षिकेसति तत्र

लंजभक्षयेदित्यत्र कलंजभक्षणे विध्यर्थस्याऽभावो बोधनीयः । विध्यर्थश्च प्रत्येकमेवेति इष्ट साधनत्वस्य श्रुतिसाध्यत्वस्य च नञर्थेऽन्वये बाधापत्तिः । विशिष्टरूपेण शक्तौ तु बलवदनिष्टाननुबन्धित्वरूप विशेषणाभावाद्यत्र विशिष्टाभावसम्भवास्तत्रैव शक्तिरुचितेत्यत आह । नकलंजमिति । तस्य कलंजभक्षणस्य । कार्यत्वात् । श्रुतिसाध्यत्वात् । इष्टेति । तथाचायोग्यत्वान्न तयोर्नञर्थेऽन्वय इति भावः । तर्हि कथं विध्यर्थाभावबोधनमत आह । किंत्विति । नहि यावद्विध्यर्थाभावोनञाबोध्यते भवन्मतेऽपि यावद्विशेषणाभावायत्र विशिष्टाभावासम्भवात् । तथाच यत्किंचिद्विध्यर्थाभावबोधनेनैव सामंजस्यमिति भावः । विशिष्टरूपेण शक्तौ श्येनोबधमाधनं नतु नरकसाधनमिति तत्र विध्यर्थाबाध उपपादितः श्येनाच्च बधो बधाच्च नरक इति प्रतिसंधानाच्चास्तिकानां न तत्र प्रवृत्तिरित्युक्तं । तत्तु न सम्यक् । बलवदनिष्टाजनकत्वस्यविधयर्थत्वे विधयर्थाबाधसम्भवेऽपि आस्तिकानां कथं न तत्र प्रवृत्तिः प्रवर्त्तकस्य बलवदनिष्टाजनकत्वज्ञानस्य तत्र सत्वात् । बलवदनिष्टाप्रयोजकत्वज्ञानस्य प्रवर्त्तकत्वे च बलवदनिष्टाप्रयोजकत्वस्यैव विधयर्थत्वेन कथं तत्र विधयर्थबाध इत्यभिप्रेत्य प्रत्येकरूपेण शक्तौ विधयर्थाबाधं उपपादयति । श्येनेनेति । बाधादिति । बलवदनिष्टाप्रयोजकत्वरूपस्य तस्य बाधादित्यर्थः । अबाधादिति । बाधाभावरूपयोग्यता सत्वादित्यर्थः । ननु बलवदनिष्टेत्यत्र बलवत्वं दुर्निरूप्य मत आह । संक्षेप इति । नांतरीयकत्वमव्याहतबलवत्वमानुभाविकमित्यादि । रागिणां तु नरके बलवत्वाग्रहान्न तत्र प्रवृत्त्यनुपपत्तिरिति हृदयं । विधिं निरूप्य तद्विभागमाह ।सोयमिति । क्रमेणलक्षणान्याह । अपूर्वेति । तदुक्तमिति । अत्यंतमप्राप्तौविधिः अपूर्वविधिरित्य-

चान्यत्र च प्राप्तौ परिसंख्येति गीयते इति। उदाहरणानि। व्रीहीन् प्रोक्षति व्रीहीन्वहन्ति पञ्चपञ्चनखाभक्ष्या इत्यादि

र्थः। यथा व्रीहिषु प्रोक्षणस्याप्राप्त्या व्रीहीन् प्रोक्षतीत्यपूर्वविधिः। पाक्षिकेसति। पक्षे प्राप्तौ सत्यां नियमविधिरित्यर्थः यथा व्रीहिषुतु पक्षे प्राप्तौसत्यां नियमविधिरित्यर्थः। यथा व्रीहिषु तुषोपवापस्यावघातेनैव नखविदलनेनाऽपि सम्भवात्यक्षेऽवघातस्य प्राप्त्या अवघातेनैव तुषोपवापः कर्तव्यो नतु नखविदलनादिनेति नियम्यते इति व्रीहीनवहंतीति नियमविधिरित्यर्थः। तत्र चान्यत्रच प्राप्तौ यच्च नियम्यते सा परिसंख्या। यथा-पंचनखानां सर्वेषो भक्षणप्राप्तौ पंचैव पंचनखा भक्ष्या नत्वन्ये इति नियम्यते इति पंच पंचनखा भक्ष्या इति परिसंख्याविधिरित्यर्थः। शशकः शल्लकीगोधा खड्गीकूर्मस्तु पंचम इति पंचनखा बोधाः। ननुयाजनाधापनप्रतिग्रहे ब्राह्मणो धनमर्जयेदिति नियमविधिस्थेन तावत् धनार्जनं विधीयते तस्य रागप्राप्तत्वात्। नाप्यर्जनेयाजनाद्यन्वयः। क्रयाद्यन्वयवत्तस्यापि रागप्राप्तत्वात्। किंत्वप्राप्ते तरोपायनिषेध एवात्रविधेयः। एवं परिसंख्यायां पंच पंचनखभक्षणस्य रागप्राप्तत्वात्। तदितर पंचनखभक्षणनिषेधएव विधेय इति इतर व्यवच्छेदकत्वा विशेषान्नियमपरिसंख्ययोः को विशेष इति। तत्राहुः। यत्र क्रियायां विकल्पेन कारकान्वयः स नियमः। यथा धनार्जने याजनप्रतिग्रहाभ्यामेकस्यार्जनस्याऽसम्भवात् एकस्यां धनार्जनक्रियायां याजनादीनां मिलितानामन्वयासम्भवितया विकल्पेनैवान्वयः शशकादिमांसनिर्मितस्यैकपिण्डस्य सम्भवात् भक्षणक्रियायां मिलितानामन्वयसम्भव इति नियमपरिसंख्ययोर्भेदः। तदुक्तं। नियमः पाक्षिके सतीति। केचित्तु। इतरव्यवच्छेदस्यार्थत्वशाब्दत्वाभ्यां नियमपरिसंख्ययोर्भेदः। तथाहि। अर्जने उपायत्वय सम्बन्धस्य शब्दात्प्रतीतौ क्रयादीनामनन्वयः अर्थात्सिध्यति येषामेकान्वयेऽपरानन्वयस्तेषां समुच्चयासम्भवात्तत्रेतरोपायव्युदासे शब्दतात्पर्यं कल्प्यते परन्तु धूमोस्तीति वाक्ये बन्हेरिव तस्याप्यर्थत्वं। परिसंख्यायां तुभक्षणक्रियायां पंचानामन्वयः सम्भवति इतरपंचनखव्युदासो नार्थः। तत्र पंचानामपि समुच्चयसम्भवात्। किन्तु शाब्द एव एवंच भक्ष्यपंचनखपदयोर्विरोधि लक्षणया पंचेतरे पंचनखाभक्ष्या इति वाक्यार्थः; तथाच उपस्थितपदार्थपरित्यागादनुपस्थितप-

अचक्षुषः नेष्टसाधनत्वं विध्यर्थः स्वर्गकामो यजेतेति विधिना तस्य बोधयितुमशक्यत्वात् । तथाहि स्वर्गकामस्येष्टसाधनंयाग इत्यनेनबोध्यम् इष्टत्वाचकाम्यत्वेनोपस्थित स्वर्ग एव नचेदं शक्यं साक्षात्साधनत्वस्याशुविनाशित्वेनासम्भवात् नच परंपरया स्वर्गसाधनत्वं बोध्यं परंपराघटकाऽपूर्वानुपस्थितेः नापि कार्य्यत्वं स्वर्गकामिकार्य्यत्वस्य यागे

दार्थकल्पनादभाव विधित्वाच्च नियमापेक्षया दोषत्रयवती परिसंख्येत्याहुः । तच्चिंत्यं । याजनादि जन्याजने इतरव्यवच्छेदस्यार्थत्वेऽपि क्रत्वादिभिर्नार्जयेदित्यस्याप्राप्तानियमेऽपि इतरव्यवच्छेदस्य शाब्दत्वावश्यकत्वात् मुख्यार्थत्यागः परार्थस्वीकारः प्राप्तबाधश्चेतिदोषत्रयं । इतरथा तु क्रत्वादिभिरर्जयेदेव तज्जन्यार्जने तत्सम्बन्धव्युदासाभावादितिनेष्टसाधनत्वादौ विधेः शक्तिः किन्तु कार्येऽपूर्व एवेति प्राभाकरमतमाहुः । अत्र गुरवइति । तस्य । इष्टसाधनत्वस्य । बोधनाशक्यत्वमेवाह । तथाहीति । स्वर्गकामस्येति । स्वर्गकामस्य यदिष्टं तत्साधनं याग इति । अनेन विधिना । बोध्यं बोधनीयं । ननु विधिना सामान्यतः इष्टसाधनत्वे बुद्धेपि कुतः स्वर्गरूपेष्टसाधनत्वबोधः इत्यत आह । इष्टं चाचेति । स्वर्गएवेति । स्वर्गकामपद समभिव्याहारात् स्वर्गरूपमिष्टं सिद्धयति । प्रतीतिस्तु इष्टत्वेन पदार्थैकदेशयोरप्यभेदान्वयस्वीकारे तु स्वर्गत्वेन तथाच स्वर्गभिन्नेष्टसाधनं यागइतिबोधइति भावः । नचेदमिति । स्वर्गसाधनं याग इति बोधयितुं न शक्यमित्यर्थः । साक्षात्साधनत्वस्य । साक्षात्स्वर्गसाधनत्वस्य । आशुविनाशित्वेन । द्वितीयक्षणवर्तिध्वंसप्रतियोगित्वेन । असम्भवादिति । यागस्येच्छाविषयात्मकतया द्वितीयक्षणेनष्टतया कालान्तरभावि स्वर्गाव्यवहित पूर्ववर्तित्वासम्भवादित्यर्थः । नचेति । साधनत्वं हि द्विविधं साक्षात्परंपरयाचेति साक्षात्स्वर्गसाधनतया बाधेऽपि परंपरया स्वर्गसाधनता बोधे बाधकाभावादिति भावः परंपरेति । परंपरया स्वर्गसाधनत्वंहि स्वर्गसाधन पूर्वसाधनत्वं तच्च स्वर्गकामो यजेतेति वाक्य प्रवृत्तेः पूर्वमपूर्वानुपस्थित्या दुर्ग्रहमिति भावः । क्रतिसाध्यत्वमपि न विध्यर्थ इत्याह । नापीति । कार्य्यत्वंक्रतिसाध्यत्वंनविध्यर्थइत्यर्थः ।

बोधयितुमशक्यत्वात् तथाहि शाब्दे योग्यताज्ञानं हेतुः। योग्यताचान्वयप्रयोजकरूपवत्त्वम् अतएव सैकान्वयप्रयोजकं रूपं द्रवद्रव्यत्वम् जलेऽस्तीति तद्योग्यं वह्नौच नास्तीति तदयोग्यम् प्रकृतेच कामिकार्य्यत्वान्वये इष्टसाधनत्वमन्वयप्रयोजकम् नच तद्ग्रहीतुंशक्यमिति। अन्वयप्रयोजकस्य काम्यसाधनत्वस्य विरहात् तस्मात्कार्य्यमपूर्वमेव विध्यर्थस्तस्मिंश्चयागस्य विषयतयान्वयः नन्वपूर्वस्य पूर्वमनुपस्थितत्वात्तत्र शक्तिग्रहोऽनुपपन्नः। अथ कार्य्यत्वेन का-

स्वर्गकामीति। इष्टसाधनत्वस्य बोधार्थत्वे स्वर्गकामस्येष्टसाधनं याग इति बोधः। क्रतिसाधत्वस्य बोधार्थत्वे तु स्वर्गकामीयक्रतिसाध्यो याग इति बोधनीयं तच्च न सम्भवतीति भावः। तदेवोपपादयति। तथाहीति। शाब्दे। शाब्दबोधे। बाधाभावस्य योग्यतात्वे प्रकृतानुपयोग इत्यत आह। योग्यताचेति। अतएव अन्वयप्रयोजकरूपवत्त्वस्य योग्यतात्वादेव। तद्योग्यमिति। पयसा सिंचतीति वाक्यं योग्यमित्यर्थः। नास्तीति सैकान्वयप्रयोजकं द्रवद्रव्यत्वं नास्तीति तदयोग्यं। वह्निना सिंचतीतिवाक्यमयोग्यमित्यर्थः। नन्वस्तु शाब्दबोधे योग्यताज्ञानं कारणं आस्तां चाऽन्वयप्रयोजकरूपवत्त्वमेव योग्यता ततः किमत आह। प्रकृतेचेति। स्वर्गकामीयजेतेत्यत्र च। कामीति। कामिक्रतिसाधत्वस्यान्वयप्रयोजकं रूपमिष्टसाधनत्वमेव। तद्ग्रह एव च कामिकार्यत्वस्य शाब्दबोधो भवेत्। नच तत् इष्टसाधनत्वं ग्रहीतुं शक्यं। इत्युक्तमिति। आशुविनाशित्वात् साक्षात्साधनत्वस्य परंपरा घटका पूर्वानुपस्थित्या च परंपरासाधनत्वस्य ग्रहीतुमशक्यत्वादित्युक्तमित्यर्थः। स्वमतमाह। तस्मादिति। इष्टसाधनत्वस्य क्रतिसाधत्वस्य च बोधयितुमशक्यत्वाद्विध्यर्थत्वासम्भवादित्यर्थः। कार्यमिति। कार्यमेव विध्यर्थः। तच्च प्रकृते। अपूर्वमेव पर्यवस्यतीत्यर्थः। अन्वयप्रकारमाह। तस्मिंश्चेति। कार्यरूपे विध्यर्थे। विषयतयेति। यागविषयकं कार्यमितिबोध इति भावः। अनुपस्थितत्वादिति। पूर्वमुपस्थितत्वे चापूर्वत्वव्याघातः। अपूर्वत्वं हि पूर्वाप्रतीतत्वमितिभावः। तत्र। कार्ये अपूर्वे शक्तिग्रहः। विधिशक्तिग्रहः। अथेति। न लिङः कार्येऽपूर्वा एव

र्व्यसामान्य एव शक्तिग्रहः वेदस्थले च योग्यताबलाद्यापू-
र्व्यशक्तेर्ग्रहः नहि यागविषयकमन्यत्कार्य्यं भवतीति चेन्न ।
स्वज्ञानादेरपि सम्भवात् । उच्यते । कार्य्यतावत्स्वर्गकामस्या-
न्वयोनियोज्यनियोजकभावलक्षणस्तत्र कामीनियोज्यः नि-
योजकश्चकार्य्यमतः कार्य्यनियोज्यनियोजकत्वमेव स्वर्गकाम-
स्यान्वयः नियोजकत्वञ्च तत्कामिकार्य्यतया प्रतीयमानत्वं ।
अत्र चान्वये प्रयोजकं काम्यसाधनत्वं नहि कामीकाम्यादन्यत् काम्यसाधनत्वेनाज्ञातं कार्य्यं तथाऽवैति नच काम्य-
साधनं काम्यासाधनत्वेन ज्ञायते अन्यथा ख्यातिरनभ्युपग-

शक्तिः । किन्तु कार्यत्वेन रूपेण घटपटादिरूपकार्य्य सामान्य एव । तत्रैव शक्तिग्रहः । ननु विधिजन्यबोधे कार्यत्वेन घटादेरेव भानापत्त्या कथमपूर्वे प्रतीतिरत आह । योग्यतेति । नहीति । अन्यदिति घटादिरूपकार्यस्य यागविषयकत्वाभावादिति भावः । स्वज्ञानादेरपीति । स्वं पुरुषः । तदीयज्ञानस्य यागविषयकत्वात् । तथाच कथमपूर्वलाभ इति भावः । कार्य्ये इति । कार्यत्वरूपेण घटपदादावेव शक्तिग्रहः । ततः यागविषयकं कार्यमिति बोधे स्वर्गकामस्यापि नियोज्यनियोजकभाव सम्बन्धेन कार्येऽन्वयादपूर्वलाभः । ननु किं नियोज्यं किंनियोजकमतआह । तत्रेति । नियोजकत्वं चेति । तत्कामीति । स्वर्गकामकृतिसाध्यत्वेनप्रतीयमानत्वं कृतिसाध्यत्वं चापूर्वे यागद्वारा । ननु कामिकार्यतया प्रतीयमानत्वं ज्ञानादावपि सम्भवतीत्यत आह । नहीति । सुखादेरपि कार्यत्वेन प्रत्ययादुक्तं काम्यादन्यदिति । अवैतीति । तन्मते अन्वयप्रयोजकरूपवत्त्वस्यैव योग्यतात्वेन योग्यतायाश्च शाब्दे भानात्साधनत्वसाधनत्वयोर्विरोधेऽपि कामिकार्यत्वान्वये इष्टसाधनताज्ञानविशेष्यत्वस्यैवऽन्वयप्रयोजकतया काम्यसाधनताज्ञानस्यावश्यकतया ज्ञानादेः स्वर्गसाधनतयाऽज्ञानान्न तत्र कामिकार्यतया प्रतीतिरितिभावः । ननु ज्ञानादेरपि इष्टसाधनत्वभ्रमसम्भवात्कामिकार्यतया प्रतीतिः सम्भवत्येवेत्यत आह । नचेति । काम्यासाधनं ज्ञानादि काम्यसाधनत्वेन न ज्ञायते इत्यर्थः । ननु प्रमाविर-

मात्। नच ज्ञानं काम्यस्य स्वर्गस्य साधनं सम्भवतीत्यतो-
योग्यतावाधायागविषयकं कार्य्यं स्वर्गकामीयं स्वर्गका-
मो यागविषयककार्य्यवानित्येवं वानुभवो भवन् योग्यतया

हेऽपि भ्रमःस्यादेवेत्यत आह। अन्ययेति। ननु तथापि ज्ञानस्यापि स्वर्गसाधनतया तद् ज्ञानसम्भवेन कामिकार्यतया प्रतीतिसम्भवात्कथं न तत्र योग्यतेत्यत आह। नचेति। नह्रीत्यर्थः। यागेति। स्वर्गकामनियोज्यकं यागविषयकंकार्यमित्यन्वयबोध इति भावः। प्रथमांतार्थ मुख्यविशेष्यक बोधाभिप्रायेणाह। स्वर्गकाम इति। कार्यत्वंच नियोज्यनियोजकभावलक्षणसम्बन्धेन। योग्यतयेति। स्वर्गकामनियोजकस्य यागविषककार्यस्यान्यस्यासम्भवेनापूर्वलाभ इत्यर्थः। ननु कामिकार्यतान्वये इष्टसाधनत्वस्यान्वयप्रयोजकतया पूर्वानुपस्थित्या तत्रेष्टसाधनताज्ञानासम्भवात् कथं स्वर्गकामनियोज्यकं यागविषयकंकार्यमिति प्राथमिको बोध इति चेत् नहि बोधनीये योग्यताज्ञानंकारणं किंतु तत्पदार्थतावच्छेदकावच्छिन्ने यत्र कुत्रचित् तदज्ञानं मृगयते तत्र पचेतेत्यादौ कामिकार्ये इष्टसाधनत्वावगमादत्रतमिति। ननु पदार्थस्य पदार्थयोग्यतायाश्च शाब्दबोधे भानमुपेयते तत्रेष्टसाधनत्वस्य स्वर्गकामिनियोज्यकत्वं योग्यतात्वेन कथमिष्टसाधनत्वमविषयीकृत्य तज्ज्ञानमितिचेत्सत्यम्। स्वर्गसाधनीभूतापूर्वसाधनत्वमेव हि यागे स्वर्गसाधनत्वमित्यपूर्वं स्वर्गसाधनत्वभानस्यावश्यकतया शब्दानुपस्थितस्यापि अर्थाधाहारवादितन्मते भानोपगमात् नहि प्रथमांतैरपि यागविषयककार्ये स्वर्गसाधनत्वबोधो नाभ्युपेयत इति। किन्तु अस्थिरत्वात् क्रियायां क्रतिसाधत्वान्वयात्प्रागिष्टसाधनत्वबोधो न सम्भवतीति तन्मतनिगर्वात्। अथ स्वर्गसाधनं स्वर्गकामनियोज्यक यागविषयकंकार्यमिति प्राथमिकोबोध इति तन्मतसिद्धं तत्र न सम्भवति। अन्वयप्रयोजकरूपवत्वरूपयोग्यताज्ञानस्य शाब्दबोधहेतुतया कथं युगपदेवेदृशोबोधः। स्वर्गसाधनत्वबोधानंतरं क्रतिसाधत्वस्य बोध इति तन्मतनिगर्वादिति चेत् तन्मतेहि असंसर्गाग्रहसहितोपस्थितेरपि विशिष्टबुद्धिकार्यकारित्वोपगमात् स्वर्गसाधनत्व स्वर्गकामनियोज्यत्वादीनां पूर्वमनुपस्थितानामसंसर्गाग्रहबलादेव शाब्दबोधे भानसम्भवात्। तद्योग्यताविषय-

क तत्पदार्थविषयक शाब्दबोधस्य तन्मतेऽलीकत्वादिति । ननु तथापि साधा-त्वसाधनत्वयोर्विरोधात्कथं स्वर्गसाधनत्वकृतिसाधात्वयोरपूर्वे एकज्ञानविष-यत्वं नतु यागे इति चेत् । वैदिकस्थले एकविशिष्टेऽपरान्वय इतिहि उत्स-र्गः । उद्देश्यतावच्छेदकसमानकालीनत्वं विधेये भासत इत्यपि नियम इति इष्टसाधनत्वमुद्देश्यतावच्छेदकीकृत्य कृतिसाधात्वस्य विधेयतया भानं न स-म्भवति । सिद्धावस्थधर्मः साधनत्वमसिद्धावस्थधर्मः साधात्वमिति । प्रकृतेतु एकविशिष्टेऽपरवैशिष्ट्यमितिन्यायेनेष्टसाधनत्वकृतिसाधात्वयोर्भानासम्भवेऽपि एकत्र इयमिति न्यायेन यागविषयकंकार्यमिष्टसाधनमित्यन्वयबोधे बाध-काभावः । आख्यातार्थमुद्देश्यतावच्छेदकीकृत्य बोधानुपगमात् । अन्यथा प-चन् गच्छतीतिवत् पचति गच्छतीत्यत्रापि शाब्दबोधापत्तेः । नन्वेवं यागी-पि इष्टसाधनत्वकृतिसाधात्वयोरेकत्रेइयमिति न्यायेन भानस्य सम्भवेन कथं यागमादाय तयोर्विरोध इति वाच्यं । तत्र यागस्य प्रकृत्यर्थतया प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वनियमेन एकविशिष्टेऽपरवैशिष्ट्यमिति न्याये-नैवान्वयबोधस्य व्युत्पत्तिसिद्धत्वान्नत्वेकत्रेइयमिति न्यायेनापि अत एव ति-लकीकर्मकुर्वीतेत्यादौ तिलकविशिष्टे कर्मकरणवैशिष्ट्यमिति न्यायेनैव बो-धोदयात्कर्मकरणे नियमेन तिलकसमानकालीनत्व भानात् तिलकशून्यका-लीनत्वकर्मकरणस्य नैष्फल्यं । यदि चैकत्रेइयमिति न्यायेनापि शाब्दबोध इष्यते तदा तस्य नैष्फल्यानापत्तिरिति । आख्यातार्थोद्देश्यतावच्छेदकशाब्द-बोधानुपपत्त्याच्च विधिप्रत्ययस्थले एकत्र इयमिति न्यायेन बोधे बाधकाभाव एव । ननु च वर्षं जपन्निदं स्तोत्रमपुत्रः पुत्रवान्भवेदित्यादौ पुत्राभाव समा-नकालीनत्वं पुत्रबाधितमिति कथं विशिष्टवैशिष्ट्यमिति न्यायेन बोधे उत्सर्ग इति चेत् । तत्र नञो विरोधिलक्षणया पुत्रविरोधिनी पुत्रेच्छार्थः सुविषयसि-द्धत्वस्येच्छाविरोधित्वात् । तथाच पुत्रेच्छासमानकालीनत्वं पुत्रे भासत इ-ति न काप्यनुपपत्तिरिति दिक् । अत्र स्वर्गकामो यजेतेत्यादौ प्रथमतः याग-विषयकं कार्यमिति प्रथमो बोधः । यागविषयकंकार्यं स्वर्गसाधनमिति द्वि-तीयो बोधः । स्वर्गसाधनं यागविषयककंकार्यं स्वर्गकामनियोजकमिति तृ-तीयो बोधः । स्वर्गसाधनं स्वर्गकामनियोज्यकं यागविषयकंकार्यं स्वर्गकाम-कृतिसाधामिति तुर्योबोधः । ततश्चापूर्वं कृतिसाधात्वं यागे कृतिसाधात्वं विनाऽनुपपन्नमित्यनुपपत्तिज्ञानसहकारेण स्वर्गसाधनं स्वर्गकामनियोज्यको

याग: स्वर्गकामकृतिसाध्य इत्यादौपादानिक यागविशेषकः पंचमोबोधः स-एव च प्रवर्त्तकः। उपादनमनुपपत्ति ज्ञानं तत्सहकृतशब्देनजनितोबोध औपादानिक इत्युच्यते इति केचिदाहुः। काम्यसाधनता धीजन्यममेदं कार्यताज्ञानवत् पुरुषकार्यं यागविषयकमिति प्रथमो बोधः। ततो ममेदं यागविषयकंकार्यमिति द्वितीयो बोधः। अयमेव च नियोज्यत्वेन पुंसो अपूर्वेऽन्वयः। अपूर्वजनिका कामिकृतिस्तावन्नभवति यावद्यागविषया न भवति कृत्यंतरात्तदनुपपत्तेः। कामिकृतिश्च यागविषया न तावद्भवति। यावद्यागः काम्यसाधनत्वेन न ज्ञायते काम्यसाधनत्वेन ज्ञायमान एव कामिकार्यत्वनियमादित्येतादृश विमर्शानंतरं काम्यमानस्वर्गसाधनं स्वर्गसाधनताज्ञानजन्यकार्यताज्ञानवत्स्वर्गकामकार्यो याग इति तृतीयो बोधः। अत्र चाधिकारित्वेन पुरुषान्वयः। काम्यस्यनिष्टस्वर्गे न क्रियाकार्यत्वावगमात् ततो यागकृतिः कर्त्तारं विनाऽनुपपन्नेत्यऽनुपपत्तिज्ञानवत्वात्स्वर्गकामो यागकर्त्तेति तुर्योबोधः। स्वर्गकामस्य इदं कार्यं अहमपि स्वर्गकामस्ततो ममेदंकार्यमिति युक्तिपुरःसरं यागे यष्टुः प्रतिसन्धानं पञ्चमोबोधः। विधेः प्रवृत्ति निर्वाहकतया तावत्पर्यंतं नाकांक्षाया अपिऽपरिपूर्तेः पंचैव शाब्दानीति बहवः। मदंशोपरागेण बोधद्वयमानुमानिकं बोधत्रयमेव शाब्दमिति नव्याः। मदंशस्य शाब्दे प्रवेशेऽपि प्रथमं यागविषयकंकार्यमित्येव बोधो नतु स्वर्गकामस्य तत्र प्रवेशः अन्योन्याश्रयापत्तेः। तत उक्तबोधपंचकमिति षडेव बोधा इत्यपि प्राहुः। स्वर्गकामनियोज्यकं यागविषयक कार्यं स्यायि स्वर्गसाधनत्वेन ज्ञायमानमिति प्रथमो बोधः। नतु स्वर्गसाधनमिति स्वर्गकामनियोज्यत्वस्य स्वर्गकामस्येदंकार्यमिति बोधरूपतया तत्राज्ञायमानस्येष्टसाधनत्वस्यान्वयप्रयोजकत्वाभावात् इष्टसाधनत्वज्ञानाभावे कृतिसाध्यत्वज्ञानानुदयाच्चेति। इदं च ज्ञानमपूर्वविषयप्रयोजकं नतु यागविषयकं तस्याखिरत्वेन तच्चेष्टसाधनत्वस्य दुर्ग्रहत्वात् ततो मन्नियोज्यकं इदं कार्यं स्यायि स्वर्गसाधनत्वेन ज्ञायमानमिति पुनरपूर्वविषयकं मदंशोपरागेण ज्ञानं द्वितीयं। नतु संनियोज्यकं कार्यमित्याकारकं तत्सर्वत्रैवकार्यबोधे नियोज्यकत्वस्यायित्वस्वर्गसाधनत्वानां योग्यतावच्छेदकानां भानस्यावश्यकत्वात्। अपूर्वे कृतिसाध्यत्वं च यागे कृतिसाध्यत्वंविनाऽनुपपन्नं यागविषयाकृतिश्चेष्टसाधनताज्ञानंविनाऽनुपपन्ना नहि कामीकाम्यादन्यत्काम्यसाधनतयाऽज्ञायमानं कार्यतयाऽवैती-

ति यागे इष्टसाधनत्वमुपादानेनावगत्य यागकाम्यमान स्वर्गसाधनत्वेन ज्ञायमानोऽधिकारी भूतस्वर्गकामस्य नियोज्यस्य कार्यमित्येवं तृतीयं ज्ञानं यागविषयकं अयमेवचाधिकारित्वेनान्वयः । ततश्च चैत्रः पचतीत्यादाविव स्वर्गकामः यागानुकूलकृतिमानिति स्वर्गकाम्यविशेषकश्चतुर्थो बोधः ततः स्वर्गकामस्येदं कार्यं अहमपि च स्वर्गकामः तस्मान्ममेदं स्वर्गकामस्य नियोज्यस्य कार्यं स्वर्गसाधनत्वेन ज्ञायमानमिति बोधपंचकमित्याहुः । केचित्तु । इदानीं तनत्वांतर्भावेण कृतिसाध्यता ज्ञानस्य विधितः साक्षादसम्भवितया परंपरयैव विधिजन्यज्ञानस्य प्रवर्त्तकत्वेन यागे कृतिसाध्यताज्ञानमपि न शाब्दं किंत्वौपादानिकमनुमित्यात्मकमेवेत्याहुः । तच्चिंत्यं । यागे कृतिसाध्यताज्ञानं विधिना जनयितुं न शक्यते तच्चेष्टसाधनत्वस्यान्वयप्रोजकतया परंपराघटकापूर्वोपस्थितिंविना तत्ज्ञानासम्भवादपूर्वेशक्तिरिति तन्मतं तच्च यदि यागे कृतिसाध्यताबोधो न शाब्दः । तर्हि कथं तद्बोधार्थं योग्यताज्ञानसम्पत्यर्थमिष्टसाधनताज्ञानमम्पादनाया पूर्वेशक्तिरिति न जानीम इति दिक् । परेतु । नियोज्य स्वर्गकामीयं स्वर्गसाधनत्वेन ज्ञायमान स्यायियागविषयकं कार्यमिति प्राथमिको बोधः । नियोज्यत्वं योग्यतात्वेन स्वर्गकामे प्रकारतया स्वर्गकामस्य संसर्गतयापि भासते । ततः अपूर्वे कृतिसाध्यत्वं यागे कृतिसाध्यत्वंविनाऽनुपपन्नमित्यनुपपत्तिज्ञानात् प्रतीतापूर्वघटितकाम्यसाधनताज्ञानसहितात् स्वर्गकामीयः स्वर्गसाधनत्वेन ज्ञायमानः यागः कार्य इति हितोयो बोधः । ततः कृतिराश्रयं विनानुपपन्नेत्यनुपपत्तिज्ञानात् स्वर्गकामः स्वनियोज्यकस्वर्गसाधनत्वेन ज्ञायमानकार्ययागानुकूलकृतिमान् स्वर्गकामः मृनियोज्यकस्वर्गसाधनत्वेन ज्ञायमानकार्ययागानुकूलकृतिमान् स्वनियोज्यकस्वर्गसाधनत्वेन ज्ञायमानकार्ययागानुकूलव्यापारवान् वेति तृतीयोः बोधः । ननु क्रियानुकूलव्यापारवत्वस्य कर्तृरूपतया यागे स्वर्गकामकृतिसाध्यत्वे प्रतीते तत्कर्तृत्वस्यापि प्रतीतिर्जातेति तृतीयबोधवैयर्थ्यमिति चेन्न । व्यापारमात्रशक्तस्याख्यातस्य व्यापारबोधकतया व्यापारस्य कर्तृसाकाङ्क्षत्वात् । प्रथमांतार्थविशेषकबोधस्य व्युत्पत्तिसिद्धत्वाच्च अत एव तच्चैवाख्यातार्थसंख्यान्वय इति ततश्च नानधिकृतः कर्त्तेति न्यायेनावगतं स्वर्गकामस्य कर्तृत्वं यागजन्यफलभोक्तृत्वरूपाधिकारित्वंविनाऽनुपपन्नमित्यनुपपत्तिज्ञानात् स्वर्गकामो यागजन्यफलभोक्तेति चतुर्थो बोधः । ततश्च विधेः प्रवर्त्तक-

त्वं प्रवर्त्तकज्ञानजननं विनानुपपन्नमित्यनुपपत्तिज्ञानात् स्वर्गकामस्य यागः कार्यः स्वर्गकामस्य यागः कार्य्यं स्वर्गकामोयागस्य कर्तामोक्ताचाऽहमपि च स्वर्गकाम इति प्रतिसन्धाय यागो मत्कृतिसाध्य अहं च यागकर्ता अधिकारीति प्रवर्त्तकं पञ्चमं ज्ञानमुत्पद्यते इति प्राभाकरमतमेवं वर्णयंति। ननु परमापूर्वं वाच्यं कलिकापूर्वाणि तु कल्प्यानीति तेषां सिद्धान्तः मत्र कथं सङ्गच्छते तथाहि। अमावास्यायाममावस्यया यजेत पौर्णमास्यां पौर्णमास्यायजेतेति दर्शपौर्णमास यागौ विहितौ तदुत्पत्तिविधयश्च षट् यदाग्ने योऽष्टाकपालोऽमावास्यायां पौर्णमास्यां चाच्युतो भवति उपांशु यागमंतराय जतिताभ्यामेवाग्नीषोमीयमेकादशकपालं पौर्णमास्यां प्रायच्छत् ऐंद्रदधिभवत्यमावास्यायां ऐंद्रं पयोभवत्यमावास्यायामित्यनेनाग्ने यो अष्टाकपालउपांशु यागः। अग्नीषोमीय एकादशकपालः पौर्णमास्यां आग्ने योऽष्टाकपाल ऐंद्रदधियागः। ऐंद्रं पयोयाग अमावास्यायां विहिताः एतेषां षण्णां दर्शपौर्णमास यागानां क्षणिकतया स्वर्गं प्रतीव परमापूर्वंप्रत्यपि साक्षाद्दे तुत्वासम्भवेन कलिकापूर्वस्यापि वाच्यत्वमुपेयमिति चेत्। अत्रोच्यते। फलस्योत्कटरागगोचरतया फलपूर्णत्वमफलशिरस्काऽपूर्वबोधक काम्यविधेरेवादौ प्रवृत्तिः। तेन च यागे साक्षात्स्वर्गसाधनत्वस्य बोधयितुमशक्यत्वात् परम्पराघटकापूर्वे बोधिते तदुत्तरं उत्पत्तिवाक्येभ्यः षण्णां आग्नेयादीनां नियोगसाधनताबोधः तावत्कालस्थायिव्यापारकत्वरूपयोग्यता ज्ञानसम्भवात्। ततश्चाग्नेयादीनां षण्णामाशुविनाशितया परमापूर्वंरूपव्यापारकत्वबोधे कलिकापूर्वाणिकल्प्यंते तद्द्वारा च तेषां परमापूर्वसाधनत्वमिति। अथ प्रधानविधिना परमापूर्वंबुद्धे आग्नेयादीनां परमापूर्वसाधनता उत्पत्तिवाक्यैः प्रतीयते। परमापूर्वसाधनतायाश्च साक्षादसम्भवितया कलिकापूर्वाणिकल्प्यंते इति तत्सिद्धान्तः। तत्तु कथमुपपद्यते। तथाहि। यथा आशुविनाशितया यागेन स्वर्गसाधनताबोधस्तथा परमापूर्वसाधनतापि दुर्ग्रहा। नहि परमापूर्वमाग्नेयादीनां प्रत्येकंव्यापारः तथा तत् द्वारा स्वर्गसाधनतानिर्वाहोऽपि कथं। परम्परा घटकापूर्वानुपस्थित्या परमापूर्वंप्रति श्रीरामश्रीराम परम्परया साधनत्वस्य दुर्ग्रहत्वात्। यागत्वावच्छिन्ने परमापूर्वसाधनत्वग्रहसम्भवेऽपि पदार्थतावच्छेदकाग्नेयत्वाद्यवच्छिन्ने तावत्कालस्थायि व्यापारकत्वस्याग्रहात् सामन्यतो दृष्टत्वात् तथा कल्पने कालांतरभाविफलजनकाशुविनाशित्वावच्छिन्ने तावत्कालपर्य्यन्तस्थायि व्या-

पारकल्यानुभवे दृष्टत्वात्परमापूर्वस्यापि वाच्यत्वं दुर्घटंस्यादिति । अत्रोच्यते । अध्यायाः । षण्णां षट्पुरुषक्रियमाणानां यौगपद्यसम्भवादयोग्यता धीर्नसम्भवतीति तदुत्तरं चैककर्तृकत्वेऽवगते प्रथमावगतस्वर्गसाधनत्व निर्वाहकतया कलिकापूर्वाणिकल्प्यंत इति । तत्तु चिंत्यं । प्रथमं तेषामेककर्तृकत्वस्य भिन्नकालीनत्वस्यच पाणिपिहितत्वा भावादिति । नवीनास्तु । काम्यविधिना कार्यत्वेन परमापूर्वबुद्धे आग्नेयादीनां कार्यत्वेनोपस्थितं प्रतिहेतुता बुद्ध्यते । कार्यस्याव्यवहितोत्तरक्षणेपि संभवान्न कालांतरभावित्वप्रतिसंधानं तत्र । स्वर्गस्यच देहांतरोपभोग्यत्वप्रतिसंधानात् न यागे साक्षात्तज्जनकत्वबोधसंभवः । एवमाग्नेयादि न साक्षात्परमापूर्वं जनकमिति बाधग्रहेपि साक्षात्कर्मजनकमिति ग्रहे बाधकाभावश्च समानप्रकारक बाधबुद्धेरेव प्रतिबंधकत्वात् ततश्च कार्यांतरजनकत्वबाध प्रतिसंधाने परमापूर्वरूप कार्यजनकत्वमेव ग्राह्यं। तच्च सर्वादीच्यतया कालांतरीणत्वेन साक्षात्तज्जनकत्वासंभवात्परंपरयैव जनकत्वमिति कलिकापूर्वाणि कल्प्यंत इत्याहुः । अत्रच दर्शचिकेनाकलिकापूर्वचिक सहकृतेनैकं समुदायापूर्वं जन्यते । एवं पौर्णमासचिकेनाप्रत्येक कलिकापूर्वचिक सहकृतेनैकं समुदायापूर्वं जन्यते । दर्शत्वेन पौर्णमासत्वेन च हेतुता लाघवात् निरपेक्षसाधनत्वस्यच तृतीयार्थत्वात्ताभ्यां च समुदायापूर्वाभ्यां फलशिरस्का पूर्वं स्वर्गजनकं जन्यते इति । न वापूर्वौ वादः । तत्रकेचिदाहुः । प्रथम चितयांतर्गतस्य चरमप्रधानस्य साक्षादेवसमुदायापूर्वजनकत्व संभवे तज्जन्य कलिकापूर्वे मानाभावः । एवंच कलिकापूर्वद्विक सहितेन दर्शचिकेना । एवं कलिकापूर्व द्विकसहकृतेन पौर्णमासचिकेनासमुदाया पूर्वं जन्यते ताभ्यां समुदायापूर्वाभ्यां फलशिरस्कापूर्वं जन्यते इति सप्तापूर्वी वाद एवेति । अन्येतु । पंचजन्यापूर्व सहकृतचरमः साक्षादेव परमापूर्वं जनयतु किं तज्जन्यापूर्वस्वीकारेण । तेन पंचापूर्व सहकारेण स्वाव्यवहितोत्तरक्षण एव परमापूर्वजनन संभवात् । यदिच षड्पूर्वी स्वीकारस्तदा तेषामेव साक्षात्स्वर्गजनकत्व संभवात्कथं परमापूर्वसिद्धिः । ननु षण्णां प्रत्येकमहेतुतया मिलितानां हेतुत्वं मेलनंच पंचानामिव षष्ठस्यापि व्यापारद्वारैव । अन्यथा केषांचिद्व्यापारतः कस्यचित्साक्षादिति नानाविधतया मेलनस्य प्रयोजकत्वे गौरवादननुगमाच्च । एवं फलस्योत्कटरागगोचरतया फलबोधकपद समभि-

व्याहृत प्रधानविधेरेव प्रथमप्रवृत्तत्वात् प्रधानस्य चाशुविनाशितया परमापूर्व जनकत्वस्थिते पश्चादुत्पत्तिवाक्यानां प्रवृत्तिरिति नवैः षड्पूर्वैः प्रथमकृमैकविध परमापूर्वस्यान्यथासिद्धिरुपजीव्य विरोधादिति चेन्न। कृप्तप्रत्येकधर्मावच्छिन्नकारणताकानां समाजाधीना कार्योत्पत्तिः तत्र च साक्षान्मेलनासंभवे व्यापारकल्पनमित्येकविधमेलनस्याकिंचित्करत्वात् नहि यागस्य व्यापारद्वारा मेलनमिति तज्जन्यापूर्वस्यापि व्यापारद्वारा मेलनं क्वचिदभ्युपैतीति। तन्न। दक्षिणादानस्योत्तरांगतया चरमप्रधानस्य साक्षात्परमापूर्वजनकत्वासंभवात् एवं षड्पूर्वीस्वीकारेऽपि परमापूर्वमावश्यकं दक्षिणाचोत्तरागं साक्षादेवपरमापूर्वहेतुः। ननु तज्जन्यमप्यंगापूर्व कल्प्यते इति न तत्र द्वारापेक्षा। षड्पूर्वीद्वारा सांगप्रधानषट्केन परमापूर्वं जन्यते। दक्षिणाया अङ्गतया स्वर्गजनिकायाः षड्पूर्वीजन्यं परमापूर्वं प्रत्येवजनकत्वादित्यास्तां विस्तरः। ननु दुरितापूर्वं कल्प्यं नतु वाच्यमिति तेषां सिद्धांतः। तथाच यथा यो ब्राह्मणायावगोरपेतं शतेन पातयेदितिविधिना ब्राह्मणवधोद्यमस्य यातनारूपनरकविशेष हेतुत्वबोधानंतरं दुरितापूर्वं कल्प्यते तथा काम्यस्थलेपिस्यादिति चेन्न। हेतुहेतुमतोर्लिङित्यनुशासनबलात्पौर्वापर्यमात्रं बुद्ध्यते नतु कारणत्वं किन्तु एतद्विधेर्निवर्त्तकत्वानुपपत्त्याऽवगोरणस्य नरकहेतुत्वं कल्प्यते तच्च दुरितापूर्वं विनानुपपन्नमिति तत् कल्पनमिह च कार्यत्वशक्तो लिङ्कार्यतामाहुः। कार्यत्वं बिनेष्टसाधनत्वग्रहं दुर्ग्रहं साधनत्वं चान्यथासिद्धिपश्चकराहित्ये सति नियतपूर्ववर्त्तित्वरूपं कार्यसहभूतत्वघटितं कार्यं सहभूतत्वं च क्षणिकस्य व्यापारघटितमिति काम्यस्थलेऽपूर्वावश्यता नतु प्रकृत इति। केचित्तु। हेतुहेतुमतोर्लिङ्त्यनुशासनबलात्पौर्वापर्यमात्रमुदासीनसाधारणं बुद्ध्यते नत्वव्यवहितपूर्ववर्तित्वरूपकारणत्वं ततश्च सिद्धसाध्यसमभिव्याहारे सिद्धं साध्यायोपयुज्यत इति व्युत्पत्तिबलात्कारणत्वावगम इति न दुरितापूर्वस्य वाच्यता। अथवा। यद्योगप्राथम्याभ्यां नियतपौर्वापर्यबोधानंतरं विधेर्निवृत्तिपरत्वग्रहेनावगुरितव्यमिति विधिः कल्प्यते तेन चावगोरणाभावविषयकं कार्यमित्यन्वयबोधः। तदन्यथानुपपत्त्या चावगोरणस्य नरकहेतुत्वं कल्प्यते। नच्चवगोरणस्यानिष्टसाधनत्वं विनावगोरणाभावविषयककार्यसंभवतीति दुरितापूर्वं कल्प्यत इति प्राहुः। ननु स्वर्गकामोयजेतेत्यादौ लिङः कार्ये शक्तिर्यागादेश्चाशुविनाशितया तच्चेष्टसाधनत्वज्ञानासंभवात्। स्वर्गका-

क्रत्वऽपूर्व्वमालम्बते एवञ्च काम्ये क्रतुप्रयुक्तिलिङ्नित्ये निषेधे-चापिविधेऽपूर्व्वमाह लोकेच पचेदित्यादौ अपूर्व्वतात्पर्य्याव-

---

मनियोज्यकत्वान्वययोग्यमपूर्वमेव स्वर्गकामनियोज्यकं यागविषयकंकार्यमित्यन्वयबोधे विषय इति पर्यवसितं। आस्तां तावदेवं काम्यस्थले। यत्र तु न फलं तत्र नित्यादि विधिस्थले संध्योपासनरूपक्रियायाः विषयतयान्वयाभावेऽपि अभेदेनैव कार्येऽन्वयसम्भवात् संध्योपासनीयं कार्यमित्यन्वयबोधे क्रियाया एव कार्यायाः प्रतीत्यानापूर्वविषयत्वमिति। कथं वैदिकविधौ सर्वत्रापूर्वबोध इत्यत आह। एवंचेति। अपूर्वबोधस्यावश्यकत्वे चेत्यर्थः। काम्ये स्वर्गकामोयजेतेत्यादौ। नित्ये। अहरहः संध्यामुपासीतेत्यादौ। निषेधे। न कलंजं भक्षयेदित्यादौ। अपूर्वमाहेति। लोकेपचेदित्यादावनन्यलभ्यस्य शब्दार्थतया कार्यत्व एव शक्तिः। काम्यस्थले तु कामिकार्यत्वस्य विनेष्टसाधनत्वग्रहं प्रत्येतुमशक्यतया क्रियाया अस्थिरतया च तत्रेष्टसाधनताज्ञानार्थं परंपराघटकापूर्वोपस्थितये कार्येलिङः शक्तिः कल्प्यते तच्च कार्यं वस्तुगत्याक्रियातिरिक्तमेव वैदिकविधिजन्यबोधविषय इति नित्यनिषेधविधिस्थलेऽपि क्रियातिरिक्तकार्यमेव बोधविषय इत्यपूर्वविषयक एव सर्वत्रवैदिकस्थले बोध इत्यर्थः। इदं तु चिंत्यं। निषेधस्थले कलंजभक्षणाभावीयं कार्यमित्यनुभवे कलंजभक्षणाभावस्य प्रागभावरूपस्य वस्तुगत्या क्रियातिरिक्तस्याभेदेन कार्येऽन्वयसम्भवात्नापूर्वलाभः योगक्षेमसाधारणस्य कार्यत्वस्य प्रागभावेऽपि सम्भवादिति। ननु सामान्यतः लिङ्त्वावच्छेदेन कार्येशक्तेः पचेतेत्यादावपि कार्यबोधःस्यादत आह। लोके चेति। अपूर्वे तात्पर्यसम्भवात् क्रियातिरिक्त कार्यबोधासम्भवेन क्रियायां कार्यत्वबोधाय तत्र लक्षणेत्यर्थः। अनन्य लभ्यस्यैव शब्दार्थत्वात्र तत्र कार्यत्वेऽपि शक्तिरिति भावः। ननु लाघवाल्लोकेकार्यत्वे शक्तिर्व्वेदेतु कार्ये लक्षणेत्वेकिञ्चस्यात् नचापूर्व्वानुपस्थित्यातत्र शक्यसम्बन्धरूपलक्षणाग्रहासम्भवान्न लक्षणेति वाच्यम् कार्यत्वरूपशक्यसम्बन्धस्य सामान्यतः कार्येऽवगतेरिति मैवम् लाक्षणिकपदस्याननुभावकतया लिङः कार्ये लक्षणास्वीकारेऽपूर्व्वाननुभवापत्तेः नच गङ्गायांघोष इत्यत्रैव यजादियदादेवबोधासु इतरान्वितस्वार्थानुभावकत्वात्पदानामिति वाच्यम्। वस्तुगत्येतरान्वितो

स्वार्थात्कार्य्यत्वे लक्षणेत्याहुः। अत्रोच्यते कार्य्यत्वे एव विधे-

---

यस्यार्थस्तदनुभावकत्वं पदेनान्वितरांशस्याप्यन्यलभ्यत्वात् गङ्गायांघोष इत्यत्रापीतरान्वितो यो घोषस्तदनुभावकत्वं घोषपदस्य नतु तीरस्यापि शाब्दबोधविषयत्वं तीरस्य तु संस्कारादेवोपस्थितस्य तटस्थतया भानं शक्या-दशक्योपस्थितिर्लक्षणेति मतेन गङ्गापदेन पूरस्मरणं पूरेणच स्वसम्बन्धितीर-मुपस्थाप्यते तथाचासत्तः पदजन्यपदार्थोपस्थितिरूपतात्पर्यासत्त्वेन तीर-शाब्दबोधासम्भवात् तत्राप्यनुपस्थितेनान्वितेनाभिधानानभ्युपगमात् अपूर्वं तु पूर्वमप्रतीततया न संस्कारवलाज्ज्ञानसम्भवः नन्वर्थाध्याहारवादिनस्तस्य मते पदजन्यपदार्थोपस्थितिर्नासत्तिः एवं प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थ बोधकत्वमिति नियमात् तीराधिकरणको घोषइति बोधानुपपत्तिरिति तीरस्यापीतरपदादेव शाब्दबोधविषयत्वमुपेयमिति यज्यादिपदादेवकार्य्यत्व सामान्यरूपेणोपस्थितापूर्व्वलाभाद्बोधसम्भव इतिचेत् तथापि लक्षणायां लक्ष-णीयविशेषणकस्वार्थविशेष्यकान्वयबोधजनकत्व नियमात्स्वर्गकामकार्य्यविष यो याग इत्येवानुभवो यजि पदेन जननीयः नचैष आकाङ्क्षितस्तस्यकार्य्यांशे क्लृप्तिसाध्यत्वप्रकारकत्वेऽपि स्वर्गकामबोधकीयागविषयकंकार्य्यमिति कार्य्यमु-ख्यविशेष्यकज्ञानस्यैव प्रवर्त्तकत्वाभ्युपगमेनाकाङ्क्षितत्वात् आशार्थत्वस्य तत्त-द्वाक्यित्वरूपतया तत्तद्वाक्यित्वावच्छिन्नप्रतियोगिताकभेदे कूटरूपस्यानाङ्गा-र्थत्वस्य निवेशे कार्य्यविशेषणक भेदानामनिवेशेच लाघवसम्भवेन मुख्यविशे-ष्यताया निवेशस्य तर्कसङ्गतत्वात् स्वर्गकामकार्य्यमित्येवज्ञानन्तु यजिपदेन जनयितुमशक्यं यागाविशेषित कार्य्यमात्रे स्वर्गकामान्वयासम्भवात् परन्तु यागविषयककार्य्यविशेषविषयकं तथाच यागविशेषितकार्य्यबोधार्थं लिङश्श-क्तिरिति। अथवा लौकिकलिङः क्रियाकार्य्यत्वे शक्तिः वेदेतु स्वर्गकामान्वया-नुपपत्त्या क्रियातिरिक्त कार्य्ये शक्तिः एवं चशक्ततावच्छेदकैक्याभावेन नाना-र्थन्याय इति दिक्। प्राभाकरमतं दूषयति। अत्रोच्यत इति कार्य्यत्व एव क्लृ-प्तिसाध्यत्व एव लाघवादिति कार्य्यत्वविशिष्टे शक्तिस्वीकारे कार्य्यत्वांशे शक्तेरा-वश्यकत्वात् नागृहीतविशेषणान्यायेन तत्रैव शक्तिरित्यर्थः। नन्वपूर्व्वे शक्ति-विरहेऽपूर्व्वानुपस्थितावितसाधनत्वाप्रतीत्या स्वर्गकामक्लृप्तिसाध्यत्वान्वयबो-

शक्तिकल्पनौचित्यात् ननु कार्य्यत्वविशिष्टे नच यागे स्वर्गकाम-कार्य्यत्वान्वयासम्भवो बाधकाभावात् नच योग्यताज्ञानविरहोबाधकः नह्यन्वयप्रयोजकरूपवत्त्वं योग्यतासेकान्वयितोये सत्त्वात् किन्तु प्रकृतसंसर्गवत्त्वं तस्य च संशयसाधारणं ज्ञानं हेतुः नच यागे स्वर्गकामकामकार्य्यत्वस्य संशयो न संभवति येनैवंस्याद्यच्चोक्तं इष्टसाधनत्वं न विध्यर्थे यागे तस्यच लिङापि प्रत्योधितुमशक्यत्वादिति तदपि न

धासम्भव इत्याशङ्कते नचेति समाधत्ते बाधकाभावादितिनचेति अन्वयप्रयोजकरूपवत्वरूपयोग्यताज्ञानविरहोबाधक इत्यर्थः अपूर्व्वानुपस्थित्या स्वर्गकामिकार्य्यत्वान्वयप्रयोजकरूपस्येष्टसाधनत्वस्याज्ञानान्नतदन्वयबोधसम्भव इति भावः । सेकेति । सेकान्वयप्रयोजकस्यद्रवद्रव्यत्वस्य करकादावपि सत्वेन करकाभिप्रायप्रयुक्तं पयसासिञ्चतीति वाक्यमपियोग्यंस्यादिति भावः । किंत्विति । प्रकृतसंसर्गवत्वं योग्यतेत्यनुषङ्गः ननुपयसासिञ्चतीत्यादौ संसर्गस्य वाक्यार्थरूपतया तदज्ञानासम्भवाद्योग्यताज्ञानविरहात्कथं शाब्दबोध इत्यत आह । तस्य चेति । प्रकृतसंसर्गवत्वस्यचेत्यर्थः । संशयेति । संशयनिश्चयसाधारणं योग्यताज्ञानं शाब्दबोधे हेतुरित्यर्थः । येनेति । संशयासम्भवेन । एवंस्यादिति । अपूर्व्वशक्तिस्यादित्यर्थः लाघवात्कार्य्यत्वे शक्तिं व्यवस्थाप्येष्टसाधनत्वे शक्तिस्वीकारे पूर्व्वमुक्तं बाधकं निरस्यति यच्चेति तस्येष्टसाधनत्वस्य बाधकाभावात् । लिङा यागे इष्टसाधनताबोधने बाधकाभावादित्यर्थः । उक्तमिति । आशुविनाशिनस्साक्षात्साधनतायाः परम्पराघटकापूर्व्वानुपस्थित्या परम्परासाधनत्वस्यापि यथासम्भवरूपबाधकमुक्तमित्यर्थः समाधत्ते । साधनतेति । साधनतात्वेन रूपेण साधनताबोधः सच साक्षात्साधनत्वासम्भवात्परम्परासाधनताविषयक एवेति भावः इदञ्च साधनतात्वं साक्षात्परम्परासाधारणमेकमित्यभिप्रायेण । यथेति । रूपवांश्चैव इत्यत्र रूपत्वेनैव रूपेण नीलादिविषयकोबोध इति भावः । अथेति । एकविशेषबाधे । एकविशेषबाधस्थले सच्छिद्रघटस्य जलाहरणेऽन्वय बाधे छिद्रेतरत्वेनघटस्य शाब्दबोधः छिद्रेतरेण घटेन जलमाहरेत्याकारकः अत इति एकविशेषबाधे शाब्दसामान्यज्ञानस्य तदितरविशेषप्रकारकत्वनियत-

बाधकाभावाद्दुक्तं बाधकमिति चेन्न साक्षात्परंपरात्वसंदिग्ध साधनतासामान्यस्य लिङादिबोधनाद्यथारूपवांश्चैत्र इत्यत्र नीलत्वादीन् व्युदस्य रूपसामान्यज्ञानं अर्थैकविशेषबाधे शाब्दसामान्यज्ञानं तद्विशेषप्रकारकतानियतं यथा घटेन जलमाहरेत्यत्र सच्छिद्रबोधे च्छिद्रेतरत्वेन घटज्ञानमतोऽचसाक्षात्त्वबाधे परंपरात्व प्रकारकं ज्ञानं कार्य्यम् तच्च न सम्भवति द्वारानुपस्थितेरिति चेन्न घटेन जलमाहरेत्यत्रहि योग्यतया वस्तुतो यच्छिद्रेतरस्तदन्वय नतु तदितरत्वेन तदुपस्थापकाभावात् नच लक्षणया तदुपस्थितिर्मानाभावात् आस्तां वाचापि साक्षादन्यसाधनत्व प्रकारेणैवान्वयः किंतच्छिद्रम्। अथ योग्यताज्ञानविरहोबाधकः तथाहि आशुतरविनाशिमः कालान्तरभाविफलजनकत्वे फलसमयपर्य्यन्तस्थायि व्यापारजनकत्वमन्वय प्रयोजकम् नचेह तथाज्ञानं सम्भवतीति चेन्न अन्वयप्रयोजकरूपवत्त्वस्य योग्यतात्वविरहात् नन्वेवं कथमपूर्व्व लाभ इतिचेत् आशुतरविनाशिनः कालान्तरभाविफलजनकत्वस्य तत्कालस्थायि भावव्यापारकत्वेव्याप्तेः तदुक्तमाचार्य्यैः। चिरध्वस्तं फलायालं न कर्म्मातिशयंविना सम्भ्रोनिर्व्विशेषाया

त्वादित्यर्थः अत्र स्वर्गकामोयजेतेत्यत्र साक्षादाधे साक्षात्साधनतावाधे परंपरात्वप्रकारकं परम्परासाधनतात्वप्रकारकंज्ञानं कार्य्यलिङाजननीयम् तच्च परम्परात्व प्रकारकंज्ञानञ्च। द्वारेति। परम्परास्वर्गसाधनत्वं हि स्वर्गजनकापूर्व्वजनकत्वरूपमपूर्व्वानुपस्थित्या दुर्ग्रहमित्यर्थः वस्तुतः। वस्तुगत्या तदन्वयः जलाहरणे तदन्वयः तदितरत्वेन छिद्रेतरत्वेन तदुपस्थापकाभावात् छिद्रेतरत्वोपस्थापकाभावात् घट पदस्य घटत्वविशिष्ट एव शक्तेरिति भावः ननु घटपदस्य छिद्रेतरत्वविशिष्टे लक्षणेत्यत आह। नचेति। तदुपस्थितिः

छिद्रेतरत्वोपस्थितिः । मानेति । वस्तुगत्या छिद्रेतरघटस्यान्वयेनैवोपपत्ते-रिति भावः । किमिति । साक्षात्वबाधे साक्षादन्यसाधनत्वरूपेणाबोधेऽपि परम्परासाधनत्वेन रूपेणाबोधान्नापूर्व्वं वाच्यतेति भावः बाधकः साक्षादन्य साधनत्वेनापि रूपेण परम्परासाधनताबोधे बाधकः तथाज्ञानं फलपर्य्यन्त स्थायिव्यापारजनकत्वेन ज्ञानं सम्भवतीति व्यापारानुपस्थितेरिति भावः । नन्वे वमिति । एवं अपूर्वे शक्तिविरहे । तत्कालेति । तत्कालस्थायी फलपर्य्यन्तस्थायी भावरूपो व्यापारस्तत्कत्वव्याप्ते रित्यर्थः यागध्वंसस्य व्यापारत्वनिरासया भा-वेति तदुक्तमिति । चिरध्वस्तंकर्म्म अतिशयं विनाव्यापारं विना फलाय कालान्तर भाविफलाय न अलं न समर्थम् यथाऽनुभवेन स्मृतौ जननीयायां संस्कारो व्या-पार इति ननु तथाप्यपूर्व्वे मानाभावः यागध्वंसस्यैव व्यापारत्वसम्भवात् व्याप्ते-श्च भावव्यापारत्वघटितत्वे ऽप्रयोजकत्वेन व्यापारमात्र सिद्धे रिति नच स्वर्ग धारायां आपत्तिः मन्मते चरमफलस्यापूर्व्वनाशकत्वंनोपगमेन व्यापाराभावा देव तदनुदयादितिवाच्यम् । उपान्त्यफलध्वंसस्य फलप्रतिबन्धकत्वोपगमाच्चरम फलस्यापूर्व्वनाशकत्वकल्पनापेक्षयास्यलघुत्वात् एवं फलजनकतदितरकारण-स्य तत्तच्चन्दनसंयोगस्य तत्तच्छरीरादेश्चासत्वादेव न धारायां आपत्तिः नच साम-ग्री सम्पादकस्यादृष्टस्य सत्त्वात्तस्याप्यापत्तिरिति वाच्यम् तत्तदृष्टकारणस्मृति त-त्तदृष्टकारणान्तराभाव तदृष्टकारणस्मृत्तेरभावादिति नच कारणीभूताभाव-प्रतियोगित्वं प्रतिबन्धकत्वमिति यागस्य प्रतिबन्धकत्वापत्तिरिति वाच्यम् अभावत्वेन कारणत्वस्यैव प्रतिबन्धकत्वशरीरनिविष्टत्वात् अतध्वंसत्वेन कार-णत्वयाऽतथात्वात् नच कर्म्मनाशाजलस्पर्शात्करतोयाश्लिङ्घनात् गण्डकीवा-हुतरणाद्धर्म्मः चरतिकीर्त्तनादिति श्रुतेः कृते यागादौ तत्कीर्त्तनेच सतिस्वर्गा-दि फलाभावस्तूर्व्वसिद्धस्तुचभवन्मतेऽनुपपन्नः कीर्त्तनेन यागस्यनष्टत्वादेवाना-शात् ध्वंसस्याच ध्वंसासम्भवात् अपूर्व्वस्वीकारेच कीर्त्तनेनापूर्व्वनाशादुपप-त्यत एवेति वाच्यम् । तत्र कीर्त्तनादीनां फलप्रतिबन्धकत्वोपगमात् धर्म्मो या-गादिः कीर्त्तनात् चरतिफलभाङ् न भवतीत्यर्थ करणादिति अत्राहुः; कीर्त्त-नादीनामाशुविनाशितया फलप्रतिबन्धकत्वासम्भवादपूर्व्वं स्वीकार आवश्यक एव नच कीर्त्तनं तत्प्रतिबन्धकं किन्तु कीर्त्तन प्रागभावविशिष्टो याग स्वर्गं हेतु रिति वाच्यम् । कीर्त्तनसत्वेऽपि यागान्तरीय कीर्त्तनप्रागभावविशिष्टयागात् फलापत्तेः तत्क्रियोद्देश्यककीर्त्तनप्रागभावविशिष्ट तत्क्रियात्वेन हेतुत्वे य-

क्रियायां कीर्त्तनमप्रसिद्धं तच्च फलाभावप्रसङ्गस्तस्याः कारणतावच्छेदकाक्रान्तत्वात् अथ कीर्त्तनंध्वंससम्बन्धेन प्रतिबन्धकमिति चेन्न अश्वमेधजन्यस्वर्गस्मृति अश्वमेधःकृत इति कीर्त्तनत्वेन प्रतिबन्धकत्वं अश्वमेधः कृत इति कीर्त्तनानन्तरं पुनरश्वमेधेकृते स्वर्गानुदयप्रसङ्गात् तदश्वमेधजन्यस्वर्गस्मृति तदश्वमेधःकृत इति कीर्त्तनत्वेन प्रतिबन्धकत्वं चासम्भवितदश्वमेधजन्यस्वर्गस्यैवाप्रसिद्धेः नच यदश्वमेधमुद्दिश्य कीर्त्तनंकृतं तदश्वमेधव्यक्ति जनितफलकाश्वमेधव्यक्ति एतदन्यतरजन्यस्वर्गस्मृति तदश्वमेधोद्देश्यककीर्त्तनत्वेन प्रतिबन्धकत्वमिति नाप्रसिद्धिरिति वाच्यम् । जनितफलकव्यक्तेर्विशेषे प्रत्येकं सर्व्वासामपि निवेशमादाय विनिगमनाविरहापत्तेः न रूपधायकतासम्बन्धेन स्वर्गस्मृति उद्देश्यतासम्बन्धावच्छिन्नप्रतियोगिताकीर्त्तनाभाववत्कर्म्मत्वेन कारणत्वं मतु कीर्त्तनादीनां प्रतिबन्धकत्वमिति चेन्न कीर्त्तनादेरश्वरूपतयाऽश्वविनाशित्वेन कृतेऽपिकीर्त्तने फलापत्तेः नचोद्देश्यतासम्बन्धेन कीर्त्तनवद्भिन्नकर्म्मत्वेन कारणत्वमिति वाच्यम् । तथा सतिफलोत्पत्त्यनन्तरं यत्र कीर्त्तनमाचरितं तत्र पूर्व्वफलानुदयप्रसङ्गात् तस्मात्कीर्त्तनादिनाश्य तयाऽपूर्व्वस्वीकारआवश्यकः एवं प्रायश्चित्तस्य दुःखसाधनदुरितध्वंसफलकेनापि तत् स्वीकारआवश्यकः ननु दुःखप्रागभावपरिपालनमेव तत्फलं योगत्वेनाराधनजन्यत्वञ्च प्रागभावेऽपि सत्त्वात् सुखदुःखाभावान्यतरस्यैवपुरुषार्थत्वेन दुःखप्रागभावस्यैव फलत्वौचित्यादितिनापूर्व्वसिद्धिरिति चेन्न तत्रापि दुःखानुत्पत्त्या तत्प्रागभावेऽपि मानाभावात् बलवद्विषयाभावत्वेन दुःखाभावइव दुःखजनकदुरितध्वंसेऽपि पुरुषार्थतायास्सम्भवात् दुरितध्वंसस्यैवतत्फलत्वमिति यत्तु, परमापूर्व्वास्वीकारेऽङ्गानामपि स्वर्गादिजनकत्वमेवोपेयमिति प्रधानाङ्गभावानुपपत्तेरपूर्व्वस्वीकार इति यागेरागादङ्गेधीति तदुपपत्तेः रागः फलेच्छाविधिरपूर्व्वं इति तन्तुच्छम् प्रधान कर्त्तव्यताप्रयुक्तविधिविधेयत्वेनाङ्गपरिभाषोपपत्तेः केचित्तु सत्कर्म्मदानादपि फलंशूयते तच्चासत्कर्म्मणो न दानं तस्य नष्टत्वादकर्म्मिकायाश्च दानक्रियायाअभावाददृष्टदानमेवतत्पर्य्यवस्यति तेनादृष्टदानेनादृष्टान्तरं फलसमानाधिकरणं जन्यत इति सत्कर्म्मदानान्यथानुपपत्त्याऽदृष्टसिद्धिरिति तच्चिन्त्यम् यागादिकं ममफलं माजनयत किन्त्वस्येतीच्छाविशेषस्य फलजनकत्वोपगमात् दानपदस्य भाक्तत्वोपगमस्य च तवाप्यवश्यत्वादिति दिक् तच्चादृष्टं कर्त्तरिस्वीक्रियते पुत्रकृत-

गयाश्राद्धादिस्थलेतु भोक्तारिपितर्य्येव अत एव शास्त्रदेशितफलमनुष्ठातरीत्युत्सर्ग इति गीयते अथ दृष्टत्वावच्छिन्नस्मृति विहितक्रियात्वेन हेतुतया यागस्थलइव तत्रापि कर्तर्य्येवादृष्टमुचितम् नच गयाश्राद्धं कृत्वा यत्रमुक्तः पुत्रस्तत्राशेषविशेषगुणोच्छित्तेरेवमुक्तितया तददृष्टनाशात्पितुस्स्वर्ग भावप्रसङ्ग इति वाच्यम् स्वहत्तिफलजनकादृष्टस्यैवमुक्तिविरोधितया तददृष्टसत्वेऽप्यक्षतेः नच यत्रैकं पितरमुद्दिश्य नानापुत्रैर्गयाश्राद्धं कृतं तत्र नानादृष्टस्वीकारापेक्षया एकस्मिन् पितर्य्येव तदुचितमिति वाच्यम् यत्र त्रिकोटिकुलोद्धरणेच्छया गङ्गास्नानादिकृतं तत्र नाना दृष्टस्वीकारेण तुल्यत्वादिति मैवम् अस्थिनस्य कालान्तरभाविस्वर्गोपपादनायादृष्टस्वीकार इति स्वर्गसमानाधिकरणमेव तत्कल्प्यते स्वर्गस्मृति समवायसम्बन्धेनादृष्टस्य हेतुत्वे लाघवात् तवतु पितृस्वर्गस्मृतिपुत्रनिष्ठादृष्टस्य व्यधिकरणतया परम्परासम्बन्धे नैवकारणतया गौरवात् नचादृष्टस्मृतिगयाश्राद्धस्य परंपरयैवत्वया हेतुत्वस्य वाच्यतया तुल्यतेति वाच्यम् पितरमुद्दिश्य श्राद्धकरणादुद्देश्यतासम्बन्धेनैव श्राद्धस्यकारणत्वात् फलइव पितर्य्यप्युद्देश्यतायास्स्वीकरणात् ततः पितरमुद्दिश्य ब्राह्मणेभ्यो धनंददाविति रामायणस्य तिरिति । ननु यत्र पुत्रेण गयाश्राद्धं कृत्वा संङ्कीर्त्तनं कृतं कर्म्मनाशाजलस्पर्शो वा कृतस्तत्रपितुस्स्वर्गापत्तिरिति कीर्त्तनस्य कर्म्मनाशाजलस्पर्शे च परम्परासम्बन्धेन नाशकत्वं कल्प्यम् मन्त्रतेतु प्रतियोगिता सम्बन्धेनादृष्टनाशइति सामानाधिकरण्यसम्बन्धेनकीर्त्तनस्य शब्दरूपस्य जलसंयोगरूपस्य जलस्पर्शस्य च कारणत्वम् । सामानाधिकरण्यञ्चैकत्राच्छेदकतया स्वाधिकरणशरीरेऽवच्छेदकता अपूर्व्वस्य वृत्तित्वरूपं द्वितीये च समवायेन स्वाधिकरणे शरीरेऽवच्छेदकतासम्बन्धेनापूर्व्वस्य वृत्तित्वरूपमितिचेत्तत्रेष्यत एव फलम् त्वन्मतेऽपि पुत्रस्य बलपुष्ट्यादिकामनया यत्र पित्रा कर्म्मकृतं पुत्रेण च कर्म्मनाशा जलस्पर्शः कृतस्तत्रफलोत्पत्तावितरापत्तेरेवाङ्गीकरणीयत्वादिति दिक् ननु देवताप्रीतिव्यापारोऽस्तु कृतमपूर्व्वस्वीकारेणेति मैवम् प्रीतेस्सुखरूपतया सुखानुभवरूपतयावाऽस्थिरत्वेन कालान्तरभाविस्वर्गजनकत्वासम्भवात् स्वसमानविषयकफलंप्रत्येवसंस्कारस्य हेतुतया तज्जन्यसंस्कारहेतुतायाः दुर्व्वचत्वात्तद्देवताप्रीतेर्व्यधिकरणतया स्वर्गहेतुत्वानुपपत्तेश्चेति । अत्र केचित् देवताचैतन्यएव मानाभावः इन्द्रस्मरहसाच्च इत्यादेस्तुस्तावकत्वेन प्रवृत्तिपरत्वात् मन्त्रप्रकाशितशशिशेखराद्युपेतमुद्दिश्य याज्ञिकानां

तत्रैवदेवतापहारस्तु लक्षणयाप्युपपद्यत इत्याहुः तत्र शिवाय गां दद्यादित्यादौ फलभागित्वेनोद्देश्यत्वरूपसम्प्रदानत्वं शिवस्य श्रूयते इति चेतनैव देवता यदिच वृक्षस्यापोदकमासिंचतीत्यत्रेव वास्तवसम्प्रदानत्वाभावेऽपि वैवक्षिकसम्प्रदानत्व मादायाचापि गतिः देवतायाः स्वीकारविरहेण तवापि मुख्य सम्प्रदात्वविरहादिति विभाव्यते तथापि शिवादि सर्व्वनाम्नां पर्य्यायत्वश्रवणादर्शैक्य एव च पर्य्यायत्वेन तदनुपपत्तिः शब्दस्यैव देवतात्वेऽनेकदेवताकल्पनापत्तिश्च आराधितदेवतानां वरदात्व श्रुतेश्च न्यायाच्च ध्रुवन्तीतिवन्नाच लक्षणयोपपत्तिः बाधकाभावादिति देवताचैतन्यसिद्धिः ननु नानायागेष्वेकदाज्ञाने एकदासन्निधानंकथमुपपद्यते इन्द्रादेरेकत्वादिति चेन्न तत्तद्द्रव्यविशेषएव हि सन्निधानं प्रतिष्ठाविधिना प्रतिमादावहङ्कारवत्। नचेन्द्रादेस्सार्व्वज्ञ्याभावात्सङ्ग्रामादिव्यासङ्गदशायां नानाराधककोटिभिरेकदाज्ञाने कथंज्ञानमिति वाच्यम् । अदृष्टविशेषस्यारिभलिङ्गादि प्रतिसन्धानात्तत्तद्विषयज्ञानमदृष्टविशेषसहकृतमनसा वा तथाज्ञानमिति अथास्तां राजसूयादिफलत्वेन श्रुतेरिन्द्रादिश्चेतनएव देवतात्वे तु तस्य मानाभावात्। किन्त्विन्द्रायेति पदमेव देवतादेशनादेशित चतुर्थ्यन्तपदनिर्देश्यकत्वमेवहि देवतात्वानिर्देश्येति भावप्रधानो निर्देशः तथाच देशनयातद्धितादि रूपया देशितंबोधितं चतुर्थ्यन्तपदनिर्देश्यत्वे तच्छब्दोच्चारणं यत्र तत्तथा इन्द्रायेत्युच्चार्य्य दद्यादिति वेदेन बोधनात्। आग्नेयोऽष्टाकपाल इत्यत्र तद्धितेन चतुर्थ्यन्तपदनिर्देश्यत्वं बोध्यते देशनादेशितं चतुर्थ्यन्तपदनिर्देश्यत्वं तत्वंभवतीति नच भूम्स्वाहा धृतिस्स्वाहेत्यत्रतु चतुर्थ्यन्तस्याभावः तत्र चतुर्थ्यन्तस्य ऊहनात् नच तद्धितस्य देवतात्वमप्यर्थः साऽस्यदेवतेति देवताधिकारीयत्वात् तथाचोक्तम् तद्धितेन चतुर्थी वा मन्त्रलिङ्गेन वापुनः देवतासङ्गतिस्तत्र दुर्व्वलन्तु परंपरमिति तथाच देवतात्व ज्ञाने तद्धितात्मकदेशनया बोधनं देशनयाबोधनेच सतिदेशनादेशित चतुर्थ्यन्त पदनिर्देश्यत्वरूपदेवतात्वज्ञानमित्यन्योऽन्याश्रय इति वाच्यम् देवतात्वैकदेशस्य चतुर्थ्यन्तपदनिर्देश्यत्वरूपस्य तद्धितार्थत्वात् तथाच चतुर्थ्यन्तपदनिर्देश्यत्वरूपदेवतात्वज्ञानेसति तद्धितप्रवृत्तौ देशनादेशित चतुर्थ्यन्तपदनिर्देश्यत्वरूपं देवतात्वं गृह्यत इति ननु आग्नेयोऽष्टाकपाल इत्यत्राग्निर्देवताऽस्येति तद्धितेनाऽन्यादेः प्रकृत्यर्थस्यदेवतात्वं बोध्यते नत्वाग्नय इति पदस्येति

कथं तस्य देवतात्वमिति चेन्न । तच्च शब्दात्मकस्यैवप्रकृत्यर्थत्वोपगमात् अथ तथापीन्द्रायेति चतुर्थ्यन्तपदं नचतुर्थ्यन्तपदेन निर्दिश्यते येन चतुर्थ्यन्तपदमेवदेवता भवेदितिचेन्न अर्थोपहितशब्द एव देवतेतिमते देशनयादेशितं चतुर्थ्यन्तपदनिर्देश्यत्वं यस्य तद्रूपार्थोपहितं चतुर्थ्यन्तपदनिर्देश्यत्वं देवतेत्यर्थः नचार्थस्यापिदेवतात्वं सिद्धमिति कथं देवताया अचैतन्यमिति वाच्यम् । तस्यापि विशिष्टस्याचेतनत्वात् नचेत्यमिन्द्रायेत्यादिपदमेवदेवतेत्ययुक्तमिति वाच्यम् । तथापि चतुर्थ्यन्तपदस्यैव प्राधान्यात् अर्थस्योपलक्षणत्वाभिप्रायेण वा तथोक्तेरिति अग्नये इति पदेनोक्तावेव फलभागित्वं नतु वक्ष्ये इति तस्माच्छब्दमपी देवतेति नचेन्द्रायस्वाहेति तादर्थ्यचतुर्थ्यनुपपत्तिरिति वाच्यम् । स्वाहादियोगे उपपदविभक्तिरित्युपगमात् उपपदं समीपवर्त्तिपदं तद्योगादिभक्तिरित्यर्थात् मैवम् अर्थोपहितशब्दस्य देवतात्वे विशेषणीभूतार्थस्यैव देवतात्वमुचितम् । एवमग्नयेहव्यवाहनायेत्यादौ देवताद्वयप्रसङ्गात् इन्द्रस्य हस्याच्च इत्यपि वादस्येन्द्रमुपासीतेति विधिसमभिव्याहारेणैकवाक्यतया तस्यैवोपास्यत्वात् शिव स्वंनाददतेत्यादौ महादेवमुद्दिश्य त्यक्ते शिवस्वत्वेन शिष्टानां व्यवहाराच्च अग्नयेइत्येवत्यागो नतुवक्ष्ये इतियत् तच्छ्रुतिबोधितत्वेन तथात्यागस्य फलहेतुत्वात् व्रीहीनवहन्तीत्यत्र नखविदलनेन तुषोद्वायसभवो व्यवधात नियमवत् मन्त्रकरणकहविस्त्यागभागित्वेनोद्देश्यत्वं देवतात्वमपि चेतनदेवाताया एव स्वाहादियोगे चतुर्थ्यनुशासनञ्च प्रपञ्चार्थम् नच वीजाक्षराणां देवतात्वाङ्गीकारात्तदनुपपत्तिस्तवमतेऽपि वीजाक्षराणां चतुर्थ्यन्तत्वानियमेन देशनादेशित चतुर्थ्यन्तपदनिर्देश्यत्व रूपदेवता स्वस्यानुपपादनात् मन्त्रप्रकाशितशशिशेखरत्वाद्युपेतमुद्दिश्य हविस्त्यागभागित्वेन याजकानां तत्रैव देवतात्वव्यवहाराच्च शिवस्य मन्त्रभेदेन वीजाक्षराणां नानात्वेनाननुगतेषु शिवपदशक्तिग्रहे गौरवाच्च तस्मान्मन्त्रकरणक हविस्त्यागभागित्वे नोद्देश्यत्वं देवतात्वमिति मणिकृतः मन्त्रकरणको यो हविस्त्यागस्तद्भागित्वे नोद्देश्यत्व मन्त्रप्रयोज्यहविस्सम्बन्धवत्वे नोद्देश्यत्वमिति यावत् हविर्निष्टत्यागजन्यफलंस्वत्वं तदाश्रयतयोद्देश्यत्वमिति वर्त्तुलार्थः स्वर्गसम्बन्धितयोद्देश्यत्वस्य यागकर्त्तरिसत्वात्तत्रातिव्याप्तिवारणाय हविरिति हविष्पित्यागकर्मत्वं कोऽदात्कस्मा अदादिति मन्त्रकरणकघृतादि रूपहविस्त्व-

निश्वासैः सङ्गतैरपीति । भट्टास्तु धर्म्मिकल्पनातो धर्म्मकल्पनाया लघुत्वाद्यागादेरेव स्थायित्वं युक्तं नत्वपूर्व्वम् नचैवमिदानीं यागप्रत्यक्षतापत्तिः आत्मविशेषगुणानां द्वितीयक्षणे योग्यत्वादित्याहुः तन्न इदानीं न यजेयमिति प्रत्यक्षविरोधात् विधिभिन्नोऽर्थवादः सच त्रिविधः गुणवादोऽनुवादो भूतार्थवादश्चेति तदुक्तम् विरोधे गुणवादस्यादनुवा-

---

त्वभागितयोद्देश्यत्वस्य प्रतिग्रहीतरिसत्त्वात्तत्रातिव्याप्तिवारणाय मन्त्रपरत्यागकर्त्तृमन्त्रपरम् न योषिद्भ्रः पृथग्दद्यादित्यादिना पार्व्वणादौ पत्न्या अपि स्वत्वभागितया तत्रातिव्याप्तिवारणायोद्देश्यत्वमिति नच शूद्रपितुर्म्मन्त्रकरणकहविस्सम्बन्धाभावान्नदेवतात्वं स्यादिति वाच्यम् तस्यदेवतात्वानभ्युपगमात्तज्जातीयस्य हविस्सम्बन्धस्य विवक्षितत्वाद्वा प्रेतस्यापि देवतामिश्रत एव मन्त्रपदस्वास्वधास्वाहान्यतरपरमिति केचित् तदन्यत्वेन विशेषणान्न तत्रातिव्याप्तिरित्यपरे उद्देश्यत्वञ्चोद्देश्यतावच्छेदकधर्म्मवत्वरूपबोधम् तेन नशरीरावच्छिन्नतादशायामात्मन्यतिव्याप्तिः शरीरावच्छिन्नस्यैवोद्देश्यत्वाद्देवतात्वाच्चेति निगर्व्वः। धर्म्मीति। स्थाप्यपूर्व्वकल्पने स्थायित्वपूर्व्वयोरुभयोः कल्पनाद्वरं याग एव स्थायित्वं धर्म्ममात्रं कल्प्यतामित्यर्थः। नचैकमिति। एवं यागस्य स्थायित्वस्वीकारे इदानीं यागनाशकाले प्रत्यक्षतेति। प्रत्यक्षे विषयस्य कारणतया तत्सत्वात् मन्मतेच यागस्याशुविनाशित्वाद्विषयासत्त्वान्नतल्लौकिकप्रत्यक्षमिति भावः। आत्मेति। प्रथमक्षणेयोग्यत्वाद्द्वितीयक्षणे तत्प्रत्यक्षेऽपि न तृतीयादि क्षणे प्रत्यक्षमित्यर्थः विषयस्य कार्य्यकालवर्त्तितया हेतुत्वेन तृतीयादि क्षणेन ज्ञानादिप्रत्यक्षमित्यभिप्रायेण द्वितीयक्षणेयोग्यत्वाभिधानम् अन्यथातु तृतीयक्षणे योग्यत्वादिति बोध्यम्। इदानीमिति। भवन्मते यागस्यस्थायित्वेन यागस्य चिरातीतदशायां न यजेयमिति न स्यादित्यर्थः। अपूर्व्वस्वीकारेतु तस्यातीन्द्रियतया न तत्प्रत्यक्षापरिति भावः। विधिं निरूप्यर्थवादं निरूपयति विधिभिन्न इति। विधिभिन्नो वाक्यविशेषोऽर्थवाद इत्यर्थः विशेष इत्युपादानान्नघटमानयेत्यादि वाक्येऽतिव्याप्तिः विधौ तद्वार-

दीवधारितो भूतार्थवादस्तद्वृत्तादपि बाधस्तिष्ठामतः कृमिणो दाहरणानिआदित्यो यूपः अग्निर्हिमस्य भेषजम् इन्द्रोवृत्र-यत्रज्ञमुदयच्छत् सोऽयं शब्दोऽनित्यः उत्पन्नोगकारो विनष्टो गकार इति प्रतीतेः अत्र गुरवः नित्यश्शब्दोव्योमैकगुणत्वात्त-त्परिमाणवत् नचाप्रयोजकं सोऽयं गकार इति प्रत्यभिज्ञान-स्यान्यथानुपपत्तेः नचायं भ्रमः बाधकाभावात् नचोत्पत्त्या-

---

णाय विधिभिन्न इति अर्थवादं विभजते । सत्विति । अर्थवादस्त्वित्यर्थः यथाक्रमं तल्लक्षणान्याह । तदुक्तमिति । विरोधे विशेष्यतावच्छेदक विशेषण शब्दार्थयोर्विरोधो यथा आदित्योयूपोभवति यजमानः प्रस्तर इत्यादि । अवधारित इति प्रमाणान्तरेणानिश्चितार्थ ज्ञापकशब्दः अनुवादरूप इत्यर्थः यथाऽऽदुक्खेन सम्भिन्नमित्यादि वाक्यं परिणति सुरसमाम्रफलं परिणति विरसं पनसफलमित्यादिरूपं च वाक्यं तत्र प्रत्यक्षप्रमाणादिना तत्तदर्थनिर्णयादिति बोध्यम् । तद्भावादिति । अर्थभानात् तथाच तत्काले तद्गुणज्ञापकशब्दो भूतार्थवाद इत्यर्थः यथा जरायामयं शूरः यथा वाराज्यभ्रंशेऽप्यमात्यैरयंराजेति प्रयुज्यत इति । इयताप्रबन्धेन परिकरस्यशब्दस्य प्रामाण्यं व्यवस्थाप्यशब्दस्य नित्यत्ववादिमतनिरासाय तस्यानित्यत्वं व्यवस्थापयति । सोऽयंशब्द इति । अनित्यः उत्पत्तिमान् ध्वंसप्रतियोगिवा तत्त्वमानमाह । उत्पन्न इति । गुरवः प्राभाकराः । व्योमेति । व्योममात्र गुणत्वादित्यर्थः मात्रपदेन घटाकाशसंयोगेन व्यभिचारः तत्परिमाणवत्गगनपरिमाणवत् अप्रयोजकत्वं हेतुरस्तु साध्यमास्तु इति प्रकृतानुमानेऽनुकूलतर्कविरह इत्यर्थः अन्यथा शब्दनित्यतांविना । अनुपपत्तेरिति । सोऽयंगकार इत्यत्र हि एतत्कालीनगकारेपूर्वकालीनगकाराभेदोभासते । सचगकारनाशेन सम्भवति तथाच शब्दोयदि नित्योन स्यात्तर्हि पूर्वकालीनगकाराऽभदे प्रत्यभिज्ञानविषयो न स्यादित्यनुकूलतर्क इति भावः अयम् सोऽयंगकार इति प्रत्ययो बाधकाभावात् प्रमात्वे बाधकाभावात् बाधकाभावेऽपिच भ्रमत्वे विषयव्यवस्थोच्छेदापत्तेरिति भावः । उत्पत्त्यादीति । उत्पन्नो गकार इत्यादि-

दि प्रतीतिर्बाधिकातस्याव्यञ्जक वायूत्पत्त्यादि विषयत्वा-
दित्याहुः तन्न गकारगतत्वेनोत्पत्त्यादि प्रतीतेः न चासौभ्रा-
न्तिः बाधकाभावात् प्रत्यभिज्ञानं बाधकमिति चेत् अनयैव
सावाधिताकिन्न स्यात् नह्यच विनिगमकमस्ति नन्वेवं वि-

प्रतीतेरित्यर्थः आदिना विनाशप्रतीतिपरिग्रहः बाधिका नित्यत्वे बाधिका-
तस्याउत्पत्त्यादि प्रतीतेरित्यर्थः। व्यञ्जकेति। अस्मन्मते विजातीयवायुः श-
ब्दोत्पादकःएतन्मते व्यञ्जकः तथाचोत्पन्नोगकार इत्यत्र गकारव्यञ्जकवायुरु-
त्पन्न इति वायुनिष्ठत्वेनोत्पत्त्यादिप्रतीतेर्नशब्दनित्यता बाधकत्वमितिभा-
वः। गकार इति। तथाच गकारउत्पन्न इत्यत वायोरभानात् गकार नि-
ष्ठोत्पत्तेरेव विषयत्वाच्च न वायुनिष्ठोत्पत्त्यादि विषयकत्वमिति न शब्दनि-
त्यत्वमिति भावः नचासाविति गकारगतत्वेनोत्पत्त्यादि प्रतीतिः बाधका-
भावात् प्रमात्वे बाधाकाभावात् प्रत्यभिज्ञानं सोऽयं गकार इत्यभेदावगा-
हिप्रत्यभिज्ञानम् बाधकम् उत्पत्त्यादि प्रत्ययस्य प्रमात्वे बाधकम् अनयैव उ
त्पत्त्यादिमत्वप्रतीत्यैव सोऽयंगकार इत्यभेदावगाहिप्रत्यभिज्ञावाधिका किं
न स्यादित्यर्थः अत्र उत्पत्त्यादिप्रतीत्यभेदावगाहिप्रत्यभिज्ञानयोर्वाध्य
बाधकभावे विनिगमकमस्तीति येनप्रत्यभिज्ञानस्य बाधकत्वेनोत्पत्त्या-
दि प्रतीतेर्भ्रमत्वकल्पनाच्छब्दानित्यत्वं नसेत्स्यतीति भावः। नन्वेवमि-
ति। एवमित्यस्य विवरणं विनिगमकाभावे इतिबाध्यबाधकभावे विनिग-
काभाव इत्यर्थः विनाशादीति। एवकारेण प्रत्यभिज्ञानव्यवच्छेदः कुत इति
येन तद्बलाच्छब्दानित्यत्वं सिद्ध्येदिति भावः उत्पत्तीति। द्वयोर्भ्रमत्वकल्प-
नापेक्षया एकस्यैव भ्रमत्वकल्पनायान्याय्यत्वादित्यर्थः उभयस्यापि प्रमात्वेनो-
पपत्तिमाह अन्यत्वित्यादिना विनिगमकेति बाध्यबाधकभावे विनिगम-
काभावादित्यर्थः उभयोः उत्पत्त्यादि प्रतीतिप्रत्यभिज्ञानयोः एतद्विरुद्धार्थ-
योरुभयोः प्रमात्वमित्यर्थः अनयोरेकतरंवाध्यं विरुद्धार्थग्राहकत्वादिति
भावः प्रत्यभिज्ञानस्य स एवायं गकार इति प्रत्यभिज्ञानस्य गत्वेति इद-
न्त्वावच्छिन्ने गत्वावच्छिन्नाभेदो भासते नतु तत्तद्व्यक्त्यभेद इतिगकारव्यक्ती-
नामुत्पत्त्यादि प्रत्ययबलेन नानात्वेऽपि गत्वेन रूपेणाभेदोऽस्त्येवेतिन क-

निगमकाभावे विनाशादि प्रत्ययस्यैव कुतोबाधितत्वमिति चेन्न उत्पत्तिविनाशप्रत्यययोरुभयोर्बाध्यत्वकल्पनापेक्षया प्रत्यभिज्ञानमात्रस्य बाध्यत्वकल्पनायां लाघवात् ॥ अन्ये तु विनिगमकाभावादुभयोरेवप्रमात्वं कथमेतदिति चेत् प्रत्यभिज्ञानस्य गत्वावच्छिन्न भेदाभाव विषयत्वात्तथाच सतिगकारोऽयमितिस्यान्तु सोऽयमितीति चेन्न सोऽयमित्यस्य तद्व-

---

स्या अपि प्रतीतेर्भ्रमत्वमिति भावः शङ्कते तथा सतीति गत्वावच्छिन्नाभेदाभावविषयकत्वे सतीत्यर्थः । नत्विति । सोऽयमित्यत्र हि इदन्त्वावच्छिन्नतद्व्यक्त्यभेद एव भासते नतु गत्वावच्छिन्नाभेद इति भावः । तद्वृत्तीति । सोऽयमित्यत्र तद्व्यक्त्यभेदोन विषयः किन्तु तद्व्यक्तिवृत्तिगत्वावच्छिन्नाभेदः सत्यप्यभेदेऽपि गत्वस्याभेदात्सम्भवत्येवेति भावः । गकारोऽयमिति । गकारोऽयमित्यत्र स्वरूपतः गत्वावच्छिन्नाभेदो विषयः नतु सोऽयमित्यत्रेवतद्व्यक्तिवृत्तिगत्वावच्छिन्नाभेद इति भावः । तद्वृत्तित्वेति । तद्वृत्ति तद्व्यक्तिवृत्तित्वानवगाहित्वादित्यर्थः तथाच गत्वे तद्व्यक्तिवृत्तित्वं यत्र न भासतेतत्र गकारोऽयमित्याकारः यत्रतु तद्व्यक्तिवृत्तित्वं भासते तत्र सोऽयमितिनसोय मित्यत्र गकारोऽयमिति प्रतीत्यापत्तिरि तिभावः ननु व्यक्तीनां भेदेऽपि जातेरभेदेनैवाभेदावगाहिप्रत्यय इति तवानुमतमेवस्वभ्रमोऽयमित्यस्य तद्व्यक्तिवृत्तिगत्वजात्यवच्छिन्नाभिन्नोऽयमित्यर्थपर्य्यवसानात्तज्जातीयोऽयमित्याकारापत्तिःरित्याशङ्कते तथा सतीति । गत्वरूपजात्यवच्छिन्नाभेदविषयकत्वे सतीत्यर्थः । तज्जातीयोऽयमिति । तद्वृत्तिजात्यवच्छिन्नाभेदस्यैव तज्जातीयोऽयमिति प्रतीतिविषयत्वादिति भावः । जातित्वेति । यत्रजातित्वेनोपस्थित तद्व्यक्तिवृत्तित्वे नोपस्थित गत्वावच्छिन्नाभेदोभासते तत्रतज्जातीयोऽयमिति यत्रतु तद्व्यक्तिवृत्तित्वे नैवोपस्थित गत्वावच्छिन्नाभेदस्तत्र सोऽयमित्याकार इति न तज्जातीयोऽयमित्याकारइति भावः आहुरित्यस्वरसोद्भावनं तद्दीजन्तुसोऽयंघट इति प्रत्यभिज्ञावलाद्घटादीनांस्थैर्य्यसिद्धिः सातु घटादीनां क्षणिकत्वेऽपि घटत्वे नैक्यादेवाभेदप्रत्ययोपपत्तेर्व तत्साधिकेति स्थै

त्तिगतत्वावच्छिन्नाभिन्नोऽयमित्यर्थोल्लेखोऽयमित्यपि च गत्वे तद्वृत्तितानवगाहनात्तथा च सति तज्जातीयोऽयमिति स्मारिति चेन्न गत्वे जातित्वानवभासनादित्याहुः भट्टास्तु शब्दानित्योनिस्पर्शद्रव्यत्वादात्मवदित्याहुः तन्न उक्तदोषाच्छब्दस्य द्रव्यत्वे मानाभावाच्च शब्दद्रव्यं साक्षात्सम्बन्धेनेन्द्रियाग्राह्यत्वाद्घटवदिति चेन्न अप्रयोजकत्वाच्छब्दस्य नीरूपद्रव्यत्वेन बहिरिन्द्रिय ग्रहापत्तेश्च अन्ये तु वर्णो नित्योध्वन्यत्य-

---

र्थमात्रमुच्छिद्येतेति तद्व्यक्त्यभेदएव सोऽयमितिप्रतीतेर्विषयो वाच्यः तथा चैतस्याभ्रमत्वं विनानोपपत्तिरिति यत्तु विजातीयवायुसंयोगस्य कार्यतावच्छेदकं कविषयकश्रावणत्वं शब्दनित्यत्वमते वाच्यमुतच विषयकत्वश्रावणत्वयोर्विशेष्यविशेषण भावे विनिगमनाविरहः मन्मतेतु कत्वमेवेति तत्तुच्छम् तन्मते विषयितासम्बन्धे न कव्यक्तेरेवावच्छेदकत्वात्अगृहीतकत्वखत्वादिरूप जातिक शब्दस्य कोलाहलतया तत्प्रत्यक्षासङ्ग्रहेण विषयितयाकत्वचत्वस्यावच्छेदकता सम्भवादिति वस्तुतस्तु तारत्वमन्द्रत्वरूप विरुद्धधर्म्माध्यासाद्वेदसिद्धो तन्नित्यत्वे मानाभावः अभेदावगाहि प्रत्यभिज्ञाया असम्भवात् य एव तारस्सएव मन्द्र इति प्रतीतेस्तारत्वमन्द्रत्वयोरविरोधेऽपि त त्रति योगिकं तारत्वं तत्प्रतियोगिकंमन्द्रत्वञ्च विरुद्धमेव कत्वादिना सङ्करात् तारत्वादीनां कत्वादि व्याप्यानामननुगमेऽपि सजातीयसाक्षात्कारप्रतिबन्धकतावच्छेदकशब्दवृत्तिजातित्वेन तेषामनुगमात्तार इत्यनुगतप्रतीत्युपपत्तिःसजातीयेत्यस्यस्वाश्रयसजातीयेत्यर्थः लौकिकविषयतया मन्द्रसाक्षात्कारम्प्रति स्वावच्छेदककर्णावच्छेद्यत्वरूपया समानावच्छेदकत्वप्रत्यासत्त्या तारस्य प्रतिबन्धकत्वमिति तारत्वे प्रतिबन्धकतावच्छेदकत्वमिति नन्वत्रावच्छेदकत्वं न तत्पर्य्याप्त्यधिकरणत्वं मन्द्रबुभुत्साविरहविशिष्टतारत्वेनैव प्रतिबन्धकतयातारत्वेऽपि तत्पर्य्याप्त्यधिकरणत्वाभावात् अवच्छेदककोटिप्रविष्टत्वविवक्षणेचतारसाक्षात्कारम्प्रति तारबुभुत्साविरहविशिष्टमन्द्रबुभुत्साविशिष्टमन्द्रत्वेन प्रतिबन्धकतया मन्द्रत्वेऽतिप्रसङ्ग इति चेन्मैवम् मन्द्रबुभुत्साविशिष्टत्वेनैव प्र

तिवन्धकत्वात् मन्द्रवुभुत्वात्वेनैव सामानाधिकरण्य प्रत्यासत्त्याप्रतिवन्धकत्वे तु मन्द्रासत्वेपि तारप्रत्यक्षानापत्ते र्वुभुत्सितत्वेन प्रतिवन्धकत्वं तथाच मुख्यविशेष्यविधयाऽवच्छेदककोटिप्रविष्टत्वरूपावच्छेदकत्वस्य विवक्षणान्मन्द्रत्वेनातिप्रसङ्ग इति दिक् शब्दस्य द्रव्यत्वनित्यत्व वादिभट्टमतं दर्शयति । भट्टास्त्विति । निरस्पर्शेति निरूपर्शत्वं गन्धादौ व्यभिचारीति । द्रव्यत्वादिति । द्रव्यत्वमाचंच घटादौ व्यभिचारीति निरूपर्शद्रव्यत्वादिति विशिष्टहेत्वनुधावनम् । उक्तदोषादिति । शब्दस्य नित्यत्वे उत्पत्तिविनाशप्रत्यययोरुभयोर्भ्रमत्वकल्पनमपेक्ष्यैकस्याभेदावगाहिप्रत्ययस्यैव भ्रमत्वकल्पनायान्याय्यत्वादितिनित्यत्वे उक्तदोषादित्यर्थः तथाच प्रकृतानुमाने वाध इति भावः स्वरूपासिद्धिमप्याह । शब्दस्येति । नन्वनुमानमेव शब्दस्य द्रव्यत्वसाधकमित्याशङ्कते शब्दे इति साक्षादिति । साक्षात्सम्बन्धत्वञ्चसंयोगसमवायान्यतरत्वम् । अप्रयोजकत्वादिति । अनुकूलतर्काभावादित्यर्थः प्रतिकूलतर्कमप्याह । शब्दस्येति । नीरूपेति शब्दो द्रव्यंभवेद्रूपिद्रव्यं वा भवेन्नीरूपद्रव्यम्बातत्वरूपिद्रव्यत्वस्य प्रत्यक्षवाधितत्वात्नीरूपद्रव्यत्वमेवेति भावः । वहिरिति । वहिर्द्रव्यप्रत्यक्षत्वावच्छिन्नम्प्रतियोगिनूतरूपत्वेन हेतुतया शब्दस्याप्रत्यक्षत्वापत्ते रित्यर्थः तथाच शब्दो यदि नीरूपद्रव्यं स्यात् वहिरिन्द्रियप्रत्यक्षविषयो न स्यात् रूपिद्रव्यत्वन्तु प्रत्यक्षवाधितमिति शब्दस्य द्रव्यत्वसाधने प्रतिकूलतर्क इति भावः वर्णातिरिक्तो वर्णव्यङ्ग्यो नित्यश्शब्दस्स्फोटः तस्यचोत्पत्त्यादि प्रत्ययाभावात् नित्यत्वेन तं दृष्टान्तीकृत्यान्येषामपिवर्णानां नित्यत्वमिति वैयाकरणमतं दर्शयति। वर्ण इति । शब्दमात्रस्यपक्षत्वे ध्वन्यात्मकशब्दे वाधः अगतो भागासिद्धिश्च शब्दत्वसामानाधिकरण्येन साध्यसिद्धेरुद्देश्यतायान्तु स्फोटेन तन्मते सिद्धसाधनमतश्शब्द इतिविहाय वर्ण इत्युक्तम् अतएव पक्षातिरिक्तस्यैव दृष्टान्तत्वमिति मतेऽपि नक्षतिरितिध्येयम् । ध्वन्यन्येति । शब्दत्वमात्रस्य ध्वनौ व्यभिचारित्वात् ध्वन्यन्यति ध्वन्यन्यत्वञ्च घटादौ व्यभिचारीतिशब्दत्वादित्युम् अतएवेति । उत्पत्त्यादि प्रत्यक्षेणानुमानस्य वाधित्वात् अप्रयोजकत्वाच्चेत्यर्थः दोषान्तरमप्याह । दृष्टान्ते ति । दृष्टान्तासिद्धिमेवोपपादयति नहीति । प्रमाणेति । प्रत्यक्षादेरभावादिति भावः सः स्फोटः । वर्ण कदम्बेति । वर्णसमूहेत्यर्थः आशुविनाशितया द्वतीयक्षणवृत्तिध्वंसप्रतियोगितया । मेलनेति ।

ग्राह्यत्वात्स्फोटवदित्याहुः तदप्यतएव निरस्तम् दृष्टान्तासिद्धेश्च नहिवर्णान्यः स्फोटात्मकः प्रमाणसिद्धोऽस्तिनन्वस्तिनसः तथाहि पदानां वर्णा तदस्वरूपाणामाशुतरविनाशितया मेलनासम्भवात्प्रत्यक्षत्वं तावन्निरूढम् तथाच तदप्रत्यये कुतोऽर्थप्रत्ययस्तस्मात्तदर्णाभिव्यङ्ग्यः पदस्फोटः कश्चिदभ्युपेयः यतोऽर्थप्रत्यय इति तदसत्यहि स्फोटस्तावद्वर्णव्यङ्ग्यः तावतां मध्ये यत्किंचिद्वर्णव्यङ्ग्यो वा तावद्वर्णाभिव्यक्तिव्यङ्ग्यो वा नाद्यः आशुतरविनाशिनां क्रमिकाणां तेषां मेलनासम्भवात् न द्वितीयः घकारमात्रोच्चारणे घटपदस्फोटप्रत्ययेर्थप्रत्ययापत्तेः वर्णान्तरवैफल्याच्च नान्त्यः तदसम्भवात् अथ

एकक्षणावस्थायित्वाभावादित्यर्थः। अप्रत्यक्षत्वमिति। पदानामिति प्राक्तनेनान्वयिप्रत्यक्षे विषयत्वेन कारणत्वादिति भावः। तथाचेति। पदानामप्रत्यक्षत्वेच तदप्रत्ययेपदाप्रत्यये व्याप्त्याद्यस्मरणेनानुमित्यादेरप्यभावादिति भावः। कथमिति। द्वित्वापदजन्यपदार्थोपस्थितेरेव शाब्दबोधाङ्गत्वादिति भावः तस्मात् पदानामप्रत्यक्षत्वात्। पदस्फोट इति। तथाच तेनैव पदार्थोपस्थितिरिति भावः। तावद्वर्णेति। पदघटकीभूततावद्वर्णैर्व्यङ्ग्य इत्यर्थः तावतां पदघटकीभूतानां तावतामित्यर्थः। तावदिति। पदघटकीभूत तावद्वर्णप्रत्यक्षव्यङ्ग्योवेत्यर्थः आशुविनाशिनां द्वितीयक्षणवृत्तिध्वंसप्रतियोगिनाम् क्रमिकाणाम् तदधिकरणक्षणध्वंसाधिकरणक्षणोत्पत्तिकानाम्। मेलनेति। एकक्षणावस्थायित्वासम्भवादित्यर्थः आशुतरविनाशिनामपि युगपदुत्पन्नानांपुरुषीयज्ञानानां मेलनमस्तीति क्रमिकाणामिति क्रमिकाणामपि घटपटादीनां मेलनमस्तीति आशुतरविनाशिनामिति आशुतरविनाशिनोः क्रमिकयोरपिज्ञानयोर्मेलनमस्तीति आशुतरविनाशिनामिति बहुवचनोपपादनं। घकारेति। टकारमात्रोच्चारणेऽपीति द्रष्टव्यम्। वर्णान्तर इति। वर्णानां नार्थप्रत्ययेउपयोगित्वं किन्तु स्फोटप्रत्यय एव तस्य च यत्किञ्चिदेकवर्णेनैवोपपत्तेः वर्णान्तरोपादानवैफल्यादित्यर्थः। तदसम्भवादिति। पदघटकीभूत तावद्-

पूर्व्वपूर्व्व वर्णगोचरसंस्कारसहचरितचरमवर्णोपलम्भस्-
ह्यङ्गक इति चेत्तर्हि सएवार्थ प्रत्यायकोभवतु कृतंस्फोटेन
अथ पदप्रतीतिबलात्तत्सिद्धिरिति चेन्न तस्यक्रमविशेषवत्ता-
वद्वर्णगोचरत्वात् तावद्वर्णगोचरप्रत्ययएव न सम्भवतीति
चेन्न तावद्वर्णगोचरसंस्कारात्तत्समूहालम्बनरूपतावद्वर्ण गो-
चरस्मरणसम्भवात् ननु तावद्वर्णमात्रं नपदं अर्थाप्रत्यायक-
त्वादन्यथा नदीदोनयोः पदयोरविशेषापत्तेः किन्त्वानुपूर्व्वी-
विशेषविशिष्टतावद्वर्णरूपंनच तत्प्रत्ययस्सम्भवतीति चेन्नघो-

र्णाभिव्यक्तीनामेकदाऽसम्भवादित्यर्थः प्रथमं घत्वनिर्व्विकल्पकं ततः घत्वविशि-
ष्टबुद्धिः तत टत्वनिर्व्विकल्पकं तत टत्वविशिष्टबुद्धिरिति एकदा वर्णानामिव
ज्ञानानामप्याशुविनाशितया यौगपद्यासम्भवादिति भावः । तद्व्यञ्जक इति ।
स्फोटव्यञ्जक इत्यर्थः सएव पूर्व्वपूर्व्ववर्णगोचरसंस्कारसहितचरमवर्णोपल-
म्भ एव कृतम् । व्यर्थस्फोटेनेति तद्वोरेवास्तु हेतुत्वं किंतेनेतिन्यायेन पूर्व्ववर्-
र्णगोचरसंस्कारसहकृत चरमवर्ण प्रत्यक्षेणैवार्थप्रत्ययोपपत्तें र्नतदन्यथानुपप-
त्त्या स्फोटकल्पनमिति भावः मास्तु अर्थप्रत्ययानुपपत्त्या स्फोटसिद्धिः पूर्व्वपू-
र्व्ववर्णसंस्कारसहकृतचरमवर्णाभिव्यक्तिव्यङ्ग्येन स्फोटेन पदप्रतीतिर्ज्जन्यत
इति पदप्रतीत्यन्यथानुपपत्तिरेव स्फोटसाधिकास्यादित्याशङ्कते । अथेति । त-
त्सिद्धिः स्फोटसिद्धिः तस्य पदप्रत्ययस्य । क्रमेति । स्वाव्यवहितोत्तरवर्त्ती यः
टः तदव्यवहितोत्तरवर्त्यादिविषयत्वादित्यर्थः । न सम्भवतीति । वर्णानामाशु
विनाशितया प्रत्यक्षात्मकस्तावद्वर्णगोचरः प्रत्ययोनसम्भवतीत्यर्थः प्रत्यक्षात्म-
कतावद्वर्णप्रत्ययासम्भवेऽपि स्मरणात्मकस्यैव तस्यसम्भव इत्याह । तावदिति ।
ननु तावद्वर्णगोचरस्मरणसम्भवेऽपि न तस्य पदरूपत्वं पदस्य तावद्वर्णमात्रा-
नात्मकत्वादित्याह । नन्विति । तावद्वर्णेति पदघटकीभूततावद्वर्णमात्रमित्यर्थ
र्थः । अर्थेति । केवल वर्णमात्रस्यार्थाप्रत्यायकत्वादित्यर्थः अन्यथा वर्णमात्रस्या
र्थं प्रत्यायकत्वे । अविशेषापत्तेरिति । दीनपदादपि नदीविषयकशाब्दबोधाप-
त्तेरित्यर्थः वर्णद्वयस्योभयत्राविशिष्टत्वादिति भावः दीनेत्यत्राप्यानुपूर्व्व्यास्म-
त्वादानुपूर्व्वीविशेषेति तत्प्रत्ययः आनुपूर्व्वीप्रत्ययः आनुपूर्व्वीगोचरसंस्कारा-

क्षरत्वं हि टस्यानुपूर्व्वी अस्तिच तस्य प्रत्यक्षत्वंघोत्तरं टं शृं-णोमीति प्रतीतेरिति दिक्। नन्वर्थापत्तिरपिपृथङ् मान-मिति द्विःमानान्तरम् तथाहि पीनोदेवदत्तोदिवानभुङ्क्ते इ-ति प्रत्यक्षानन्तरं दिवसाभोजिनः पीनत्वं रात्रिभोजनम-न्तरेणानुपपन्नमिति तत्कल्पयति नचात्र प्रत्यक्षादिप्रमा-णम् किन्त्वनुपपत्तिज्ञानम् सैवार्थापत्तिरितिचेन्न केवल व्यतिरेकिणोऽपपत्तेः तथाहि देवदत्तोरात्रौभुङ्क्ते दिवाभु-

---

भावेन तत्स्मरणस्याप्यभावादिति भावः। घोत्तरत्वं हीति। घाव्यवहितोत्तर-त्वं हीत्यर्थः अनादौ संसारे सर्व्वस्यापि टकारस्य घोत्तरत्वात् अव्यवहितोत्तर-त्वञ्च तद्यावत्क्रियध्वंसाऽधिकरणक्षणध्वंसानधिकरणत्वे सति तद्यावत्यधिकरणक्ष-णध्वंसानधिकरणीभूतो यःक्षणस्तदुत्पत्तिकत्वम् यद्येवंतस्य तत्तद्यावत्क्रियघटि-तत्वादननुगमस्तथापि स्वाव्यवहितोत्तरक्षणोत्पत्तिकत्वस्यसम्बन्धेन घवदत्वंबो-ध्यम् सम्बधाननुगमस्य चादोषत्वाददोषः यत्तु टस्य घोत्तरत्वं घवत्तोच्छादिम-त्वंइच्छादिमत्ताच कालिकसम्बन्धेन नतु घवत्तिज्ञानवत्त्वं तत् अपेक्षाबुद्ध्यात्म-कज्ञानस्य क्षणचतुष्टयावस्थायित्वसम्भवेन तस्याव्यवहितोत्तरत्वघटकत्वासम्भ-वादिति तन्न इच्छावत्त्वनिवेशेऽपि नदीदीनयोरविशेषापत्तेरवारणात् इच्छा-विशेषनिवेशेच विशेषस्य दुर्निरूपत्वादिति तस्य घोत्तरत्वानुपूर्व्वीविशेषस्य प्र-तायक्षत्वम् अलौकिकप्रतायक्षविषयत्वम्। घोत्तरंटमिति। घोत्तरत्वांशेऽलौ-किकं टांशे लौकिकं श्रावणप्रत्यक्षंभवतीत्यर्थः। दिगिति। पदत्वम् आनुपू-र्व्वीविशेषविशिष्टवर्णत्वं तथाच शाब्दबोधे आनुपूर्व्वीविशेषविशिष्टवर्ण-ज्ञानत्वेन कारणत्वे वर्णविशिष्टानुपूर्व्वीविशेषज्ञानत्वेन कारणत्वमादाय विनिगमनाविरहाद्वर्णज्ञानत्वेनानुपूर्व्वीज्ञानत्वेनच भिन्नभिन्न रूपेणैव कारणत्वमिति सूचितम्। पृथगिति : अर्थापत्तिरपिप्रमाणम् अर्थापत्ति-पदवाच्यमपिप्रमाणं पृथगस्तिप्रत्यक्षादिप्रमाणचतुष्टय भिन्नमस्तीत्यर्थः ते-न न सिद्ध्यसिद्धिव्याघातः तत् रात्रिभोजित्वं कल्पयति। नचात्रेति। अत्र रा-त्रिभोजित्वज्ञाने प्रत्यक्षादीत्यादिनाऽनुमानादि परिग्रहः किन्त्वनुपपत्ति-ज्ञानं प्रमाणमित्यनुषज्यते। सैवेति। अनुपपत्तिज्ञानरूपैव अर्थापत्तिरिति।

ज्ञानत्वेनसतिपीनत्वाद्यन्नैवंतन्नैव यथा केवलमभोजीति अर्थापत्तिपदज्ञकेवलव्यतिरेकिणएव नार्थान्तरमिति सङ्क्षेपः अविदितकर्तृकश्रुतविशेष एव ऐतिह्यं नासयदि मानं तदा शब्द एव नोचेत्प्रमाणमेव नेत्युभयथापि न मानान्तरमितिसिद्धज्ञत्वारिप्रमाणानीति नतु सर्वमिदं प्रमात्वसिद्धौ स्यात् तदेवतावन्नसिद्धम् नहि तत्प्रत्यक्षंज्ञानस्यातीन्द्रियत्वेन

अर्थापत्तिरूपं प्रमाणमित्यर्थः तज्जन्यप्रमापि अर्थापत्तिरित्येव व्यवक्षियत इति ध्येयम् । दिवेति । पीनत्वमात्रं दिवैवभोजिनिव्यभिचारीति दिवाभोजित्वेसतीति अभोजित्वस्य स्वरूपासिद्ध्यादिवाऽभोजित्वे सतीति विशिष्टमुपात्तं दिवाभोजित्वमात्रं चाभोजिनि अपीनेव्यभिचारीति पीनत्वादिति। यन्नैवमिति । यः रात्रौ न भुङ्क्ते नासौदिवाभोजित्वेसति पीनः यथा रात्रौदिवाऽभोजी अपीनश्चेति व्यतिरेकिणैव व्यतिरेक्यनुमानेनैव उपपत्तेः रात्रिभोजित्वज्ञानोपपत्तेः नार्थापत्त्याख्यं प्रमाणान्तरमुपेयमिति भावः ननु तथासति अर्थापत्तिः प्रमाणमिति व्यवहारः कथमतआह अर्थापत्तिपदज्ञेति । केवलेति । केवलव्यतिरेकिविशेषस्यैवेत्यर्थः नन्वनुमिनोमीत्यनुव्यवसायवदनुपपत्तिप्रभवतादृशज्ञानोत्तरमर्थापयामीत्यनुव्यवसायादर्थापत्तित्वजातिसिद्धौ तदवच्छिन्नकरणतया प्रमाणान्तरत्वस्वीकारआवश्यकइत्य आह । सङ्क्षेप इति । अर्थापत्तित्वस्यानुमितित्वव्याप्यत्वोपगमादतएव तादृशज्ञानोत्तरं नानुमिनोमीति न धीरिति दिक् ऐतिह्यप्रमाणान्तर वादिमतं दूषयितुमाह । अविदितेति । विशिष्यानिर्णीतकर्तृकशब्दविशेषः इतिहासादि रूपः स एव ऐतिह्यमिति व्यवक्षियते तस्य प्रमाणान्तरत्वं दूषयति । सयदीति । शब्द विशेषः यदि प्रमाणम् यदि प्रमितिकरणं तदा शब्दएव प्रमाणं नत्वतिरिक्तं नोचेत् प्रमाणं न चेत् प्रमाणमेव न प्रमाणपदवाच्यमेव न उभयथा प्रमितिजनकत्वाजनकत्वाभ्याम् न मानान्तरम् न प्रत्यक्षादिप्रमाणेभ्यो भिन्नं सत्प्रमाणमित्यर्थः । चत्वारीति । प्रत्यक्षानुमानोपमानशब्दाएव प्रमाणानि नत्वतिरिक्तानीत्यर्थः इयता प्रबन्धेन प्रमाणं निरूप्य प्रामाण्यस्य परतोग्राह्यत्वं साधयितुमाह । नन्विति ।

न्द्रियत्वादन्यथाज्ञानं ज्ञानं तज्ज्ञानानां ज्ञानमेवस्यान्नतु-
विषयान्तरसञ्चारः इति अत्रगुरवः स्वप्रकाशमेवज्ञानं घ-
टादिकमिवस्वात्मानं स्वाधिकरणमात्मानञ्चविषयीकरोति क-
त एव सर्वमेवज्ञानं घटमहंजानामीत्याकारकम् इत्यञ्च
ज्ञानस्यमिति माढमेयतयैतिद्विः विषयत्वात्त्रिपुटीप्रत्यक्ष-
तेति प्रवाद इत्याहुः तन्न चक्षुर्जन्यघटज्ञानादिस्वात्म-
नोविषयीकर्तुमशक्यत्वाच्चक्षुषादिज्ञाने विषयेन्द्रियसन्निक-
र्षयोरपि हेतुत्वात् नचोत्पद्यमानं ज्ञानपूर्वमस्तिसन्निक-

मर्वमिदंप्रमाकरणनिरूपणम् प्रमात्वसिद्धौ प्रमात्वज्ञानं विशिष्टबुद्धिं प्रति वि-
शेषणज्ञानस्य हेतुतया प्रमात्वज्ञानं विनाप्रमाकरणत्वज्ञानासम्भवादिति भा-
वःतदेवतु प्रमात्वमेवतु कुतस्सिद्धम् किंजन्यज्ञानविषयः तत्प्रमात्वम् प्रत्यक्ष-
म् प्रत्यक्षगम्यमतत्प्रत्यक्षं प्रमात्वप्रत्यक्षमिति वा तदर्थः। ज्ञानस्येति। प्रमा-
त्वाश्रयज्ञानं विनाप्रमात्वज्ञानासम्भवात् प्रमात्वस्य ज्ञानघटितत्वादिति भा-
वः ननु ज्ञानातीन्द्रियत्वमेव कुत इतत्र आह। अन्यथेति। ज्ञानस्य प्रत्यक्ष-
त्वेविषयतत्सन्निकर्षयोस्सत्वात् ज्ञानधारैवस्यान्नतुघटपटादि विषयान्तरविष-
यकंज्ञानं कदाचिदपिस्यादितत्रर्थः अनुव्यवसायान्तरकल्पने प्रतीतानवस्था-
पत्त्या व्यवसायएवानुव्यवसायः नत्वतिरिक्त इति ज्ञानस्य प्रत्यक्षत्वमेवेति
गुरुमतंदर्शयति। अत्रगुरवेति। स्वंप्रकाशते भासते यच्च तादृशं ज्ञानंस्वात्मा-
नं स्वस्वरूपं स्वाधिकरणं स्वस्यज्ञानस्याधिकरणं आत्मानंविषयीकरोतीतत्र-
र्थः। अतएवेति। ज्ञानस्यघटादिविषयज्ञानात्मविषयकत्वादेव। इत्यञ्चेति।
सर्वस्य व्यवसायस्यानुव्यवसायात्मकत्वेच ज्ञानस्य सर्वस्य ज्ञानस्य। मि-
तीति। मितिर्ज्ञानम् माता आत्मा मेयंघटादि तद्विषयकत्वात् मिति माढ
मेयानां ज्ञानस्यैकसामग्रीकत्वादिति भावः। त्रिपुटीति। त्रयाणांपुटानां समा-
हारः त्रिपुटीमिति माढविषया इतियावत् तत्प्रत्यक्षतेत्यर्थः। चक्षुरिति। च-
क्षुर्जन्यंयत् घटज्ञानादि तेन स्वात्मनश्चक्षुर्जन्यघटज्ञानस्वरूपस्य। विषये-
ति। विषयस्य विषयेन्द्रियसन्निकर्षस्यच हेतुत्वादितत्रर्थः विषयस्यासत्वमाह।
नचेति। नह्येतत्रर्थः उत्पद्यमानं घटज्ञानादि। पूर्वमिति। पूर्वभाविन

ष्टं वा कथं चाक्षुषाऽऽत्मविषयकं ज्ञानं जायते चाक्षुषादि-
ज्ञाने उद्भूतरूपवत एव द्रव्यस्य योग्यत्वादन्यथाऽऽका-
शस्यापि चक्षुषाग्रहापत्तेः भट्टस्तु ज्ञानं तावत्स्वविषये
ज्ञाततारूयं फलंजनयतीति निरूढं तेनैवानुमेयज्ञानमित्या-
ऊस्तदपिनज्ञाततायां निरस्तत्वा अज्ञानरूपस्य साध्यस्याप्र-

एव कारणत्वादिति भावः सन्निकर्षस्यासत्वमाह । सन्निकृष्टत्वेति । यत्र विषयतया प्रत्यक्षं तत्पूर्वक्षणे तत्रविषयस्य सन्निकर्षस्यचापेक्षणो-यत्वेन उत्पद्यमाने तत्र तत्पूर्वक्षणावच्छेदेन तयोरभावात् अवच्छे-द्याधिकरणे सम्बन्धस्यावच्छेदकत्वानङ्गीकारादिति भावः ननु तन्मते ज्ञानेन्द्रियसन्निकर्षस्य ज्ञानप्रत्यक्षहेतुत्वानभ्युपगमेन विषयतत्सन्निकर्षाद्य-घटितायाएवसामग्र्याःज्ञेरुपगमादज्ञानस्य स्वप्रकाशकत्वेबाधकाभावः नचेच्छादिप्रत्यक्षानुरोधेनात्मसमवेतमानसत्वावच्छिन्नम्प्रति मनस्संयुक्तसमवायस्य हेतुतया ज्ञान प्रत्यक्षे व्यभिचार इति वाच्यम् कार्य्याव्यवहितपूर्वक्षणा वच्छेदेन कार्य्याधिकरणे कारणाभावस्यैव व्यभिचारतयाऽवच्छेद्याधिकरणेऽ सम्बन्धस्यानवच्छेदकतया कार्य्याधिकरणेज्ञाने पूर्वक्षणावच्छेदेन कारण सत्वस्येवकारणाभाव सत्वस्याप्यनङ्गीकारेण व्यभिचारासम्भवादित्यत आह कथञ्चेति । चाक्षुषादीत्यादिनास्यार्शनपरिग्रहः स्यार्शनेऽप्युद्भूतरूपस्य प्रयो-जकत्वात् वायोरप्रत्यक्षत्वादितिभावः । अन्यथेति । रूपशून्यसम्बन्धस्यापि चक्षु षाग्रहे चक्षुषेत्युपलक्षणं त्वचापि ग्रहापत्तेरित्यपिद्रष्टव्यम् । केचित्तु चाक्षु-षादीत्यादि पदात्स्यार्शन परिग्रहः उद्भूतरूपवतइत्युपलक्षणमुद्भूतस्पर्शव-तदत्यपिद्रष्टव्यम् । स्यार्शने उद्भूतस्पर्शवत एव द्रव्यस्ययोग्यत्वादितिभावः तेन नात्मनोघटादि स्यार्शनेऽपि भानसम्भवं इति व्याचक्रुः ज्ञानं न प्रत्यक्षं अनु-वस्थापत्तेः किन्त्वनुमिति ग्राह्यमिति भट्ट मतमाह । भट्टास्त्विति । स्वविषये ज्ञानविषये घटादावित्यर्थः । ज्ञाततेति । ज्ञातो घट इति प्रतीतेरितिभावः तच्च ज्ञानंनिमित्तकारणंघटादिकं समवायिकारणमसमवायिकारणन्तु नापेक्षि-तं भावकार्य्यस्य सा समवायिकारणकत्वमितिनियमस्यतु तैरनङ्गीकारादिति बोध्यम् तयैव ज्ञाततयैव ज्ञाततायाः इति नष्टे घटेऽपि ज्ञातोघटइतिप्रतीतेस्त-

सिद्धावनुमानासम्भवाच्च उच्यते मनसैवज्ञानं गृह्यते योग्यत्वात् नचैवं तज्ज्ञानमपिस्यादेवं तज्ज्ञानमयांत्यनवस्था विषयान्तरसञ्चारसामग्र्याः प्रतिबंधनेकस्यचिज्ज्ञानस्यमनसाऽग्रहात्तत्प्रतिबन्धकत्वे किंनियामकमिति चेत् फलानुदयएवेति सङ्क्षेपः तथापि तस्य प्रामाण्यं केन गृह्यते न तदनुमान गृहीतुंशक्यं साध्याप्रसिद्धेः अत्र भट्टाः ज्ञाततया ज्ञानानुमितिर्ज्ञायमानाप्रामाण्यमपि विषयीकरोतीत्या-

---

त्वसमवायिकारणस्य घटस्यासत्वेन ज्ञाततायाजननासम्भवात् स्वरूपसम्बन्धरूपंज्ञानविषयत्वमेव ज्ञातो घट इति प्रतीतिविषय इति ज्ञाततायां प्रमाणाभावेन तेन हेतुना ज्ञानानुमानासम्भवादिति भावः साध्याप्रसिद्धिमप्याह। ज्ञानरूपस्येति। साध्यप्रसिद्धिर्हि अनुमानाङ्गम् प्रकृतेतु ज्ञानरूपस्य क्वचिदप्यप्रसिद्धाज्ज्ञाततायां तन्निरूपितत्वाग्रे रग्रहान्नतया तदनुमानसम्भव इतिभावः तस्मादज्ञानस्याप्रत्यये तद्घटितमूर्त्तिकस्य प्रमात्वस्य दुर्ज्ञेयत्वमिति पूर्व्वपक्षे समाधानमाह। उच्यत इति। योग्यत्वात् मनसो योग्यत्वात् नचैवं ज्ञानस्यमनोयोग्यत्वे तद्ज्ञानमपि ज्ञानज्ञानमपि एवं तद्ज्ञानज्ञानमपि ज्ञानज्ञानज्ञानमपि। अनवस्थेति। सर्व्वत्रविषयतत्सन्निकर्षरूपायास्सामग्र्यास्सत्वादितिभावः उत्तरयति। विषयान्तरेति। घटादिविषयकज्ञानसामग्र्याः प्रतिबन्धकत्वेनेत्यर्थः मानससामग्र्यादुर्व्वलत्वादिति भावः। फलेति। सर्व्वत्रमानससामग्र्यास्सत्वेनइतरसामग्र्यपेक्षया तस्या एव दुर्व्वलत्वोपगमादितिभावः शङ्कते। तथापीति। तथापि ज्ञानस्य प्रत्यक्षगम्यत्वेऽपि तस्यज्ञानस्य तत्प्रामाण्यमनुमानेन इदं ज्ञानं प्रमासमर्त्थप्रवृत्तिजनकत्वादित्यादिरूपेण। साध्येति। साध्यस्य प्रामाण्यस्य। ज्ञाततयेति। घटो ज्ञानवान् ज्ञाततावत्त्वादित्यादिना ज्ञानविधेयकानुमितिर्ज्ञायमाना घटत्ववतिघटत्वप्रकारकत्वरूपप्रामाण्यमपि विषयीकरोतीत्यर्थः ततः ज्ञानमात्रनिरूपितत्वाग्रेः ननु तत्प्रमात्वमपि तस्यज्ञानस्य प्रमात्वमपि सिद्धे दित्यनेनान्वयि ननु ज्ञानत्ववत् प्रमात्वग्रहे बाधकाभाव इत्यतआह। साध्यतेति। ननु रूपान्तरेण नतु साध्यतावच्छेदकरूपेण ननु तद्विधेयकानुमितौ तद्व्याप्यवत्तापरामर्शो हेतुः नतु तद्धर्मावच्छिन्नविधेयकानुमितौ इतिरू

ज्ञानमात्रस्य व्याप्तिर्गृहीताप्रमात्वविशिष्टस्य वा नाशः ततो ज्ञानमात्रं सिध्येन्नतु प्रमात्वमपि साध्यतावच्छेदकरूपेण साध्यं व्याप्त्यासिध्येन्नतुरूपान्तरेण अन्यथावह्निव्याप्योधूम इति ज्ञानद्रव्यत्वेन दीपत्वेन वा दहनसिद्ध्यापत्तेः नान्यः व्यभिचारात्साध्याप्रसिद्धेश्च गुरवस्तु स्वप्रकाशमहिम्ना स्वमिवस्वप्रामाण्यमपि सिध्यतीत्याहुः तन्न स्वप्रकाशतायाअसिद्धेः किञ्चैवंज्ञाने प्रामाण्यसंशयोऽपिनस्यात् ज्ञानग्रहे प्रामाण्यानिश्चयान्निश्चितेच संशययायो-

---

पान्तरेणापि तज्ज्ञानमतआह । अन्यथेति। अन्यथा साध्यतानवच्छेदकरूपेणाप्यनुमितौ भाने। दहनेति। इदन्तु लाघवज्ञानेतर बाधातिरिक्तस्थले बोध्यम् तेन वह्निव्याप्यधूमवान् पर्व्वत इति परामर्शादपि महानसीय बन्हौलाघवमिति लाघवज्ञानवलान्महानसीय वह्निभिन्नवन्हयभाववानितीतर बाधज्ञानवलाच्च महानसीयवह्नित्वादिनाऽनुमितावपि न क्षतिः तत्र वह्नित्वादिना महानसीयवह्निभानोपगमे पर्व्वतो महानसीयवह्निमान्नवेति संशयापत्तेरितिध्येयम्। व्यभिचारादिति । भ्रमाहितज्ञाततायां व्यभिचारादित्यर्थः नच ज्ञानतैव प्रमितताप्रि स्वीकार्य्येति वाच्यम्। एवं सत्यप्रमितताम्पि स्वीकृत्याप्रामाण्यस्यापि स्वतोग्राह्यत्वापत्तेरिति एवं प्रमात्वस्य कुत्रापिदुर्ग्रहत्वेन तद्धर्म्मविशिष्टनिरूपित व्याप्तेरपिदुर्ग्रहत्वमाह साध्येति। स्वमिवेति । ज्ञानमिवस्वप्रामाण्यमपि स्वनिष्ठं प्रामाण्यमपि विषयी भवतीति मितिमात्रमेवरूपचिपुटीप्रत्यक्ष वादि मते घटत्ववतिघटत्वप्रकारकत्वरूप प्रामाण्यमपि भासतएवेति भावः । स्वप्रकाशतायाइति । विषयतत्सन्निकर्षयोः प्रत्यक्षहेतुतया स्वस्मिन्स्वविषयकत्वासम्भवादितिभावः । किञ्चैवमिति । एवं प्रामाण्यस्यस्वतोग्राह्यत्वे । ज्ञानइति । इदं ज्ञानं प्रमा नवेतिप्रामाण्यसंशयो न स्यादित्यर्थः ननु तत्र प्रामाण्यानिश्चयान्न संशयानुपपत्तिरतआह । ज्ञानग्रहइति। निश्चयात् प्रामाण्यस्य निश्चयात् अयं घट इति ज्ञानोत्तरंहि इदंज्ञानं प्रमा नवेति प्रामाण्यसंशयः तत्रायंघट इति ज्ञानस्य स्वप्रकाशतया स्वविषयकत्वेन स्वनिष्ठ-

ग्रहे स्वप्रकाशताव्याघाताद्धर्म्मिज्ञानाभावाच्च समानधर्म्मोपपत्तया धर्म्मिज्ञानस्यान्वयव्यतिरेकाभ्यां संशयहेतुतावधारणात्। मुरारिमिश्रास्तु तद्विशेष्यकत्वे सति तत्प्रकारकत्वं प्रामाण्यम् तच्च प्रथमानुव्यवसायेनैव गृह्यते तथाहि घटत्ववाँस्तावदव्यवसायोपनीतः अतः तद्विशेष्यकतासंसर्गरूपाज्ञाने मनसागृह्यते तद्विशेषणस्य तदतः पूर्व्वमुपस्थितत्वात् नहि मनसोबहिरर्थ्थे प्रकाशकताऽसामर्थ्ये सुघनयस्यसहकारेण तस्य बहिरर्थ्थे प्रकाशकत्वात् कथमन्यथा कविकाव्यमू-

---

प्रामाण्यस्यापि निश्चयादितिभावः निश्चिते प्रामाण्ये संशयायोगात् प्रामाण्यस्य संशया योगात् तन्निश्चयस्य तत्संशयप्रतिबन्धकत्वादितिभावः ननु यत्र प्रामाण्यसंशयस्तत्रजातमपि घट ज्ञानं न स्वविषयकमिति तत्र प्रामाण्याग्रहेण दोषइत्यतआह। अग्रहइति। ज्ञानस्याग्रहे इत्यर्थः। स्वप्रकाशतायाइति। यदि तत्र घटज्ञानं न स्वविषयकं तदा त्रिपुटी प्रत्यक्षाव्याघात इत्यर्थः तुष्यतुदुर्ज्जन इतिन्यायेनाह। धर्म्मीति। इदं ज्ञानंप्रमा नवेतिसंशये घटज्ञानरूपधर्म्मिज्ञानाभावात्तद्धर्म्मिकप्रामाण्य संशयासम्भवादिति भावः ननु तद्धर्मीति न्यायेन धर्म्मीन्द्रियसन्निकर्षस्यैव हेतुत्वे मनु धर्म्मिज्ञानस्येत्यतआह। समानेति। तत्कोटि साधारणधर्म्मवत्तया धर्म्मि ज्ञानस्य तत्कोटिसंशयहेतुत्वावधारणादित्यर्थः। अन्वयेति। तुरगादौ वेगेनगच्छतोऽनेकवृक्षेन्द्रिय सन्निकर्षेऽपि यस्यैवधर्म्मिणोज्ञानं तत्रैव पतनत्वादिसंशयो नान्यत्रेति संशयो धर्म्मिनियमार्थं धर्म्मिज्ञानहेतुत्वादितिभावः नच तत्रापि विषयसाहित्यादेरेवधर्म्मिज्ञानहेतुत्वमुपेयं तदेवसंशयहेतुरितिवाच्यम्। तथापि यत्कोव्यासह भूयसहचरितो यस्मिन् धर्म्मेगृहीतः यत्कोटिसहचरितानेकधर्म्मोपलब्धो वा यत्र तद्धर्म्मवत्तया धर्म्मिज्ञानस्योत्कटकोटिकसंशयप्रति हेतुतया यद्विशेषयोरिति न्यायेन संशयसामान्ये धर्म्मिज्ञानस्य हेतुत्वाप्राप्तेरुभयकोटिकसंशयप्रति धर्म्मिज्ञानस्यहेतुत्वावश्यकत्वाच्चेति तथाच धर्म्मिज्ञानस्य संशयहेतुतया संशयपूर्व्वं ज्ञानग्रहेआवश्यकस्तेनच प्रामाण्यस्य विषयीकरणे संशयायोगः अविषयीकरणेतु तदप्रामाण्याग्राहक यावद्ज्ञानग्राहकसामग्री-

लभूतं ज्ञानं कथञ्चाऽनुव्यवसाये विषयभानं घटत्वमपि व्यव-
सायोपनीतमतस्तत्प्रकारताविषये तावत्सुग्रहेत्युभयस्यैकग्र-
हेण गृहीतप्रामाण्यमिति तदपि न एवंहि तद्वद्विशेष्यकत्वं
तत्प्रकारकत्वञ्च गृहीतं नचैतावदेवप्रामाण्यं किन्तु तद्वद्वि-
शेष्यकत्वविशिष्ट तत्प्रकारकत्वम् नच तद्वद्विशेष्यकत्वविशि-

ग्राह्यत्वरूपंस्वतस्त्वं न प्रामाण्यस्येति भावः तच्च तद्वद्विशेष्यकत्वेसति तत्प्र-
कारकत्वरूपं प्रामाण्यञ्च । प्रथमेति। ग्राह्यप्रामाण्याश्रय विषयकेनघटमहंजा-
नामीत्याकारकप्राथमिकज्ञानेनेत्यर्थः विशेष्यकत्वप्रकारकत्वांशग्रहेऽविवादात्
प्रामाण्यग्रहस्तद्घटत्वग्रहपर्य्यवसन्न इति तदृग्रहमेवादावुपपादयति । तथाहो-
ति । व्यवसायेति व्यवसायएवात्र प्रत्यासत्तिरितिभावः अतः घटत्ववतः प्रागु-
पस्थितेनेत्यर्थः तद्वद्विशेष्यकताघटत्ववद्विशेषकता संसर्गतारूपाघटत्ववद्वि-
शेष्यकतासम्बन्धेन ज्ञानोपरिभासते विशेषणस्यतद्वतः घटत्ववतः इदन्तु सा-
मान्यतो विशिष्टबुद्धौ विशेषणधियो हेतुत्वादनुपस्थितयोर्विशेष्यत्वप्रकारकत्व-
योर्भानानुपगमाभिप्रायेण वस्तुतो प्रतियोगित्वयोरिवानुपस्थितयोरपि तयोः
प्रकारतया भाने बाधकाभाव इति ध्येयम् । नचेति। वह्निः पदार्थविषयक
ज्ञानासामर्थ्यम् अन्यथोऽभयस्यापि विप्रकृष्टघटोपलब्ध्यापत्तेरिति भावः अन्य-
था उपनयसहकारेण वह्निर्विषयकज्ञानजननासामार्थ्यं । कवीति । वाक्यप्र-
योगे वाक्यार्थज्ञानस्य हेतुतया मनसैव तत्र वाक्यार्थज्ञानादिति भावः अ-
नुव्यवसाये घटमहं जानामीत्याकारकानुव्यवसाये । विषयेति । घटादेर्भा-
नमित्यर्थः घटत्ववद्विशेष्यकत्वग्रहमुपपाद्य घटत्वप्रकारकत्वग्रहमुपपादयति
घटत्वनपीति विषये विषयावच्छेदेन । सुग्रहेति । संसर्गरूपासुग्रहेत्यर्थः उ-
भयस्य घटत्ववद्विशेष्यकत्वस्य घटत्वप्रकारकत्वस्य च एकत्र ज्ञाने ग्रहेण ग्रहस-
म्भवेन एवंहि उक्तप्रकारेण हि एतावदेव तद्वद्विशेष्यकत्वं तत्प्रकारकत्वमेव ।
किन्त्विति । अन्यत्र घटत्ववद्विशेष्यकत्वस्यान्यत्र घटत्वप्रकारकत्वस्य च प्रामा-
ण्यापत्तेः सामानाधिकरण्यसम्बन्धेन तद्वद्विशेष्यकत्व विशिष्ट तत्प्रकारकत्वमेव
प्रामाण्यस्वरूपमितिभावः । पूर्व्वमिति । विशिष्टबुद्धौ विशेषणधियो हेतुत्वा-
दिति भावः विशेष्यताप्रकारतयोः प्रकारतया भानस्यैव प्रामाण्यभानतया

ष्टमनुव्यवसायो गृहीतुमर्हति तद्वह्निविशेष्यकत्वस्य पूर्वमनुपस्थितेः संसर्गविषया हि विशेष्यतायाः प्रकारताच भासते किञ्चैतदपि न प्रामाण्यम् वह्निगुञ्जयोर्गुञ्जावह्नि इति भ्रमेऽतिव्याप्तेः आस्तांहि तत्र वह्निविशेष्यकत्ववह्नित्वप्रकारकत्वञ्च किन्तु तद्वह्निविशेष्यकत्वावच्छेदेन तत्प्रकारकत्वमित्युक्तम् नचावच्छेद्यावच्छेदकभावः प्रथमं गृहीतुं शक्यः तद्वह्निविशेष्यकत्वस्य पूर्वमप्रतीतेः अत्रोच्यते आस्तां तावत् प्रथमानुव्यवसायेन प्रामाण्यग्रहो द्वितीयेनतुस्यात्तद्वह्निविशेष्यक-

---

संसर्गविषया तज्ज्ञानेऽपि न प्रामाण्यभानमितिभावः ननु प्रकारताविशेष्यतयोः संसर्गतया भानमेव प्रामाण्यभानं वाच्यमतआह। किञ्चेति। एतदपि तद्वह्निविशेषकत्वविशिष्टं तत्प्रकारकत्वमपि। वह्नीति। यत्र वह्नौ गुञ्जात्वभ्रमः गुञ्जायाश्चवह्नित्वभ्रमस्तत्रातिव्याप्तिरित्यर्थः. अतिव्याप्तिमुपपादयति। अस्तिहीति। वह्निविशेष्यकत्वं गुञ्जात्वप्रकारत्वावच्छेदेन गुञ्जाविशेष्यकत्वावच्छेदेनच वह्नित्वप्रकारकत्वम्। किन्त्विति। तत्प्रकारकत्वं प्रामाण्यमित्यनुषज्यते वह्निगुञ्जापुञ्जयोर्गुञ्जापुञ्जवह्नीतिभ्रमेच गुञ्जाविशेष्यकत्वावच्छेदेन वह्नित्वप्रकारकत्व सत्वेऽपि वह्नित्ववद्विशेष्यकत्वावच्छेदेन वह्नित्वप्रकारकत्वाभावान्नातिव्याप्तिरितिभावः। तद्वदिति। प्रकारतया संसर्गतया वा विशेष्यकत्वस्य प्रकारकत्वस्य चानुव्यवसाये भानेऽपि विशिष्टे वैशिष्ट्यमिति न्यायेन विशिष्टवैशिष्ट्यबोधे विशेष्यतावच्छेदकप्रकारनिर्णयस्य हेतुतया तद्वह्निविशेष्यकत्वप्रकारकनिर्णयं विना तद्वह्निविशेष्यकत्वावच्छेदेन तत्प्रकारकत्वरूप प्रामाण्यभानं सम्भवतीतिभावः स्वमतेन प्रामाण्यग्रहमुपपादयति अत्रोच्यतइति। द्वितीये नत्विति। अनुव्यवसायेनेत्यनुषज्यते प्रथमं अयंघट इति ज्ञानं ततो ज्ञानज्ञानत्वे इति निर्विकल्पकं ततो घटमहं ज्ञानामीत्यनुव्यवसायस्ततो व्यवसायस्य नष्टत्वाद्घटोऽयमिति व्यवसायस्तत्र घटमहं ज्ञानामीत्यनुव्यवसायस्तेनप्रामाण्यंगृह्यत इत्यर्थः। उपस्थितेरिति। तथाच तद्वह्निविशेष्यकत्वावच्छेदेन तत्प्रकारकत्वग्रहे बाधकाभाव इति भावः अवच्छिन्नत्वञ्च स्वरूपसम्बन्धरूपं बोध्यम्। नचैवमिति। धर्मिज्ञा-

तस्य पूर्वं प्रथमानुव्यवसायेनोपस्थितेः नचैवं प्रामाण्यस्यानुव्यवसायगम्यत्वे प्रामाण्यसंशयो नस्यादितिवाच्यम् दोषग्राह्यचप्रामाण्यं नानुव्यवसायेन गृहीतं तच्च संशयसम्भवात्अन्यथा पुरुषत्वसंशयोपि न स्यात्तस्य चक्षुर्जन्यत्वात् नचैवं प्रामाण्यस्य स्वतोग्राह्यत्वमागतं असतिप्रतिबन्धके यावत्स्वाश्रयानुव्यवसायग्राह्यत्वंहि मिश्रमते स्वतोग्राह्यत्वं तच्च प्रथमानुव्यवसायेनाग्रहात् एवञ्च साध्यप्रसिद्धावनुमान-

---

नस्य संशयहेतुतया ज्ञानग्रहे प्रामाण्यग्रहात् संशयो न स्यादित्यर्थः । दोषेति । अनभ्यासदशापन्नत्वरूपदोषेत्यर्थः । संशयेति । प्रामाण्यसंशयेत्यर्थः ननु सामग्रीमत्वे कुतोन निश्चय इत्यतआह । अन्यथेति । तद्धीश्चस्य तेनावश्यं ग्रहे इत्यर्थः तस्य पुरुषत्वस्य चाक्षुषसामग्रीमत्वे पुरुषत्व चाक्षुषसामग्रीमत्वे पुरुषत्व चाक्षुषोत्पत्तौ पुरुषत्वसंशयो न स्यादित्यनायत्यासंशयजनकदोषस्य निश्चयविघटकत्वं वाचामितिभावः नचैवम् असतिदोषे अनुव्यवसायग्राह्यत्वे उत्तरयति असतीति । यावदिति । स्वाश्रयाः प्रामाण्याश्रयाः तदनुव्यवसायायावत्तत्स्वाश्रयाग्राह्यत्वं मिश्रमते स्वतस्त्वमित्यर्थः द्वितीयानुव्यवसायेन प्रामाण्यग्रहान्नैयायिकमते सिद्धसाधनमतो यावदिति प्रामाण्याभाववत्तानिश्चयकाले प्रामाण्यागृह्यादाधवारणायामति प्रतिबन्धक इति इत्थञ्च प्रामाण्यागृह्यप्रतिबन्धकाभाववत्तालीनयावत्स्वाश्रयानुव्यवसायग्राह्यत्वं मिश्रमते स्वतस्त्वं बोध्यम् । तच्च ईदृशं स्वतोग्राह्यत्वञ्च नास्माभिस्ते इतिविशेषः एवञ्च द्वितीयानुव्यवसायेन क्वचित्प्रामाण्यग्रहेच साध्यप्रसिद्धौ प्रामाण्यरूप साध्यप्रसिद्धौ तद्ग्राहकम् प्रामाण्यग्राहकम् । इदमिति । द्वितीयानुव्यवसायेनागृहीत प्रामाण्यकपुरुषज्ञानमित्यर्थः प्रमापुरुषत्ववति पुरुषत्वप्रकारकम् । करादिमतीति । करादिमद्भिन्नेष्यकत्वे सति पुरुषत्वप्रकारकज्ञानत्वादित्यर्थः स्थाणौ पुरुषत्वभ्रमे व्यभिचारवारणाय करादिमद्भिन्नेष्यकत्वे सतीति पुरुषविशेष्यकदृश्यत्वप्रकारकज्ञाने व्यभिचारवारणाय पुरुषत्वप्रकारकज्ञानत्वादिति विशिष्टहेत्वनुधावनम् । सम्प्रतिपन्नवत् द्वितीयानुव्यवसायेन गृहीतप्रामाण्यकपुरुषज्ञानवदित्यर्थः पुरुषज्ञानभिन्नस्य दृष्टान्तत्वे चान्वयदृष्टान्ताभावाद्व्यतिरेकीत्याह । यद्वेति ।

मपि तद्ग्राहकम् तत्यथा इदं पुरुषज्ञानं प्रमाकरणादिति-पुरुषत्वप्रकारकज्ञानत्वात्सम्प्रतिपन्नवत् इदायन्नैवं तन्नैवं यथा घट इति केवलव्यतिरेकी अन्यत्तु प्रथमसप्रामाण्याभाव एव प्रामाण्यं व्यतिरेकिणासाध्यं नच साध्याप्रसिद्धिः नहि व्यतिरेकिणासाध्यहेत्वोर्व्याप्तिर्गृह्यते किन्तु स्वाभाव हेत्वभावयोः किं तदप्रसिद्ध्या नच साध्याप्रसिद्धौ तदभावाप्र-

---

यन्नपुरुषत्ववति पुरुषत्व ज्ञानं तन्न करादिमतिपुरुषत्वज्ञानं यथा स्थाणौपुरुषत्वभ्रम इति व्यतिरेकीत्यर्थः। प्रथममिति। द्वितीयानुव्यवसायेन प्रामाण्यग्रहात्पूर्व्वं तदभाववतितत्प्रकारकत्वरूपभावरूपा प्रामाण्याभावएव व्यतिरेकिणासाध्यतइत्यर्थः तदप्रसिद्ध्या साध्याप्रसिद्ध्या तदभावाप्रसिद्धिः साध्याभावाज्ज्ञानं तस्य साध्याभावस्य प्रतियोगिरूपत्वात् अप्रामाण्यरूपत्वात्। नचेति। नहीत्यर्थः तथाच तदभावत्वनैव ज्ञानेप्रतियोगिज्ञानकारणमिति भावः नन्वेवं कथमप्रामाण्याभावानुमितिरत आह। एवञ्चेति। यद्व्यापकतया यस्यभावरूपा प्राभाण्यस्य व्यापकतया हेत्वभावो गृह्यते तेन हेतुनातस्याभावः अप्रामाण्यस्याभावोसाध्यतीति अप्रामाण्याभावज्ञानं विनाप्यप्रामाण्याभावानुमितिरिति भावः। नचसाध्येति। विशिष्टबुद्धौ विशेषणधियो हेतुत्वादिति भावः। अप्रामाणेति। ज्ञानेऽप्रामाण्याभाव इत्याकारिकायामित्यर्थः साध्यविशेष्यकानुमितौ साध्यप्रसिद्धेरनङ्गत्वादिति भावः। आस्तामिति। प्रथममप्रामाण्याभावानुमितिरास्ताम् तद्गृहीति। उक्तवेति। द्वितीयानुव्यवसायेन प्रामाण्यग्रहानन्तरमन्वयिना प्रामाणानुमितिरेकगतिरित्यर्थः अयभावः निष्फलप्रवृत्तिस्मृति गृहीतप्रामाण्यकनिश्चयत्वेन हेतुत्वेऽभावरूपप्रामाण्यनिवेशे गौरवात् भावरूपं तद्वति तत्प्रकारकत्वरूपं प्रामाण्यमेव निवेशनीयम्। तस्यच प्रथमं साध्याप्रसिद्ध्यादिना दुर्ग्रहत्वान्नानुमानेन प्रथमंग्रहस्युपयोगिप्रामाण्यग्रह इति ननु ज्ञानं हि द्विविधं तदभाववति तत्प्रकारकं तद्वतितत्प्रकारकंच तत्र तदभाववतितत्प्रकारकत्वाभावरूपाप्रामाण्याभावस्सिध्यत्तद्वति तत्प्रकारकत्वमादायैवपर्य्यवस्यति। व्यापकतानवच्छेदकरूपेण भानानुपगमेतु तत्प्रकारके तदभाववति तत्प्रकारकत्वाभावस्य तदभावद्वारे-

सिद्धिः प्रतियोगिज्ञानसाध्यत्वादभावज्ञानस्येति वाच्यम् तद्रूप प्रतियोगिरूपत्वात् नच प्रतियोगिज्ञानेऽप्यभावज्ञानं कारणं प्रमाणाभावात् एवंचज्ञानव्यापकतया हेत्वभावोगृहीतस्तेन हेतुना तदभावोसिध्यतीति नच साध्याज्ञाने कथं त-

---

थकत्वाभावमात्रपर्य्यवसायितया तदभाववद्विशेष्यकत्वेसति तद्विशेष्यकत्वेन हेतुना तद्वतितत्प्रकारकत्वं तद्वद्विशेष्यकत्वमात्रं पर्य्यवसन्नं सिध्यतीति चेन्न तथापि तद्वद्विशेषणकत्वरूप साध्याप्रसिद्धेः । प्राग्भावीयसंस्काराद्दृष्टविशेषोद्बोधकसहकृतात् स्मृत्युपगमेतु समर्थप्रवृत्तिजनकत्वरूपान्वयेनैवोपपत्तौ किमनयाकुसृष्ट्याअपूर्व्वचैत्वादिघटित प्रामाण्यग्रहे प्राग्भवीयसंस्कारासम्भवाच्च नकिञ्चिदेतत् किञ्चप्रामाण्याभावरूपमपि प्रामाण्यं प्रथमं हेत्वज्ञाने दुर्ग्रहमित्याह । किञ्चेति। करादिमद्विशेष्यकत्वेसति पुरुषत्वप्रकारकज्ञानत्वं हेतुः अप्रामाण्याभावग्रहे हेतुः कीनग्राह्यं किंजन्यज्ञानविषयः । अनुव्यवसायेनेति । उक्तन्यायेन द्वितीयानुव्यवसायेनेत्यर्थः तत्प्रकारकत्वग्रहः पुरुषत्वप्रकारकत्वग्रहः । यत इति । करादिमतिपुरुषत्वज्ञानत्वग्राहकेणानुव्यवसायेन पुरुषत्ववतिपुरुषत्वप्रकारकत्वग्रहसम्भवादित्यर्थः तमपहाय हेतुग्राहकेण पुरुषत्ववतिपुरुषत्वप्रकारकत्वग्रहमपहाय । एषकुसृष्टीति । अनुव्यवसायेन करादिमद्विशेष्यकत्वेसति पुरुषत्वप्रकारकत्वग्रहेसति तेन प्रामाण्यानुमानमिति अनुमानकुसृष्ट्यादर इत्यर्थः सर्व्वज्ञानानां यथार्थत्वात्तत्प्रकारकज्ञानत्वमेव प्रमात्वमिति प्राभाकरमतं दूषयति । अन्ये त्विति । तत्प्रकारकज्ञानत्वमेवेत्येवकारेण तद्वतीत्यस्यव्युदासः । नचेति । शुक्लाविदंरजतमिति ज्ञानस्यापि रजतत्वप्रकारकत्वेन तदपि रजतत्वांशे प्रमास्यादित्यर्थः । तदसिद्धेरिति । रजतत्वप्रकारक शुक्तिज्ञानासिद्धेरित्यर्थः तदसिद्धिमेव विवृणोति । नहीति । शुक्तौ रजतत्वं नास्तीति कथं तत्ररजतत्वप्रकारकंज्ञानम् । विषयाभावेन लौकिकप्रत्यक्षाद्यभावादिति भावः मानमस्ति प्रमाणमस्ति व्यवहारानुपपत्तिरेव मानमिति शङ्कते । कथन्त्विति । रजतत्वप्रकारक शुक्तिज्ञानंनासिद्धावित्यर्थः व्यवहारः शब्दप्रयोगः तत्र व्यवहर्त्तव्यज्ञानस्य हेतुत्वादिति भावः । तत्रेति । व्यवहर्त्तव्यतावच्छेदकासंसर्गाग्रह एव व्यवहारेकारणं नतु व्यवहर्त्तव्यता वच्छेदः

द्दिशिष्टज्ञानरूपानुमितिः अप्रामाण्याभावविशेष्यकाथाएवानुमितेरभ्युपगमादित्याहुः आस्तां तत्तथापि तद्वतितत्प्रकारकत्वग्रहेऽप्रवृत्तिः किञ्च करादिमतिपुरुषत्वज्ञानं केनग्राह्यं अनुव्यवसायेनेति चेत्तर्हि पुरुषवतितत्प्रकारकत्वग्रहः केनवार्य्य तांयतस्तद्ग्रहमपहायैव कुसृष्टादर इति अन्येतु तत्प्रकारकज्ञानत्वमेवप्रामाण्यम्। नच रजतत्वप्रकारकशुक्तिज्ञानमपिप्रमाणंस्यात्तद्सिद्धेः नह्यियच यन्नास्ति तचतत्प्रकारकज्ञाने मानमस्ति कथंतर्हि शुक्तावि दं रजतमिति व्यवहार इतिचेत् नच व्यवहर्त्तव्यतावच्छेदक रजतत्वासंसर्गाग्रहात् रजतत्वप्रकारकाशुक्तौ प्रवृत्तिरपि तचेष्टतावच्छेदकप्रकारकज्ञानं कारणमितिभावः ननु प्रवृत्तिम्प्रति पुरोवर्त्तिनीष्टतावच्छेदकं प्रकारकज्ञानस्य हेतुतया शुक्तिगोचररजतत्वज्ञानाभावे कथंतच रजतार्थिप्रवृत्तिरतआह। रजतत्वेति। तचेष्टतेवि पुरोवर्त्तिनीष्टतावच्छेदकासंसर्गाग्रहएव प्रवृत्तिहेतुः नत्विष्टतावच्छेदकप्रकारकज्ञानं तद्धेतोरिति न्यायादिति भावः। अथेति। भ्रमप्रमासाधारणप्रवृत्तिसामान्ये रजतत्वप्रकारकज्ञानस्यसत्यरजतस्थले प्रवृत्तिहेतुत्वेनावधारणात्कथं तेनविनाभ्रान्तप्रवृत्तिरिति भावः तेन विनाशुक्तौ रजतत्वप्रकारकज्ञानेनविनाशुक्तौप्रवृत्तिः रजतार्थिप्रवृत्तिः। तचापीति। प्रामाण्यस्थलेऽपीत्यर्थः। रजतत्वे ति। पुरोवर्त्तिनीष्टतावच्छेदकासंसर्गाग्रहस्येव हेतुत्वादित्यर्थः नत्विष्टतावच्छेदकप्रकारकज्ञानस्येतिभावः। अविशेषादिति। कारणविशेषएवहि कार्य्यविशेषेनियामकः तथाच तदविशेषात्कथं प्रवृत्तेस्सम्बादित्वविसम्बादित्वनिर्व्वाहः मन्मतेच प्रवृत्तिसामान्ये इष्टतावच्छेदकप्रकारकज्ञानत्वेन सम्बादिप्रवृत्तिम्प्रति इष्टतावच्छेदकप्रकारकप्रमात्वेनविसम्बादिप्रवृत्तिम्प्रतिच इष्टतावच्छेदकप्रकारकभ्रमत्वेन हेतुत्वमित्यन्यथाख्यातिसिद्धिरिति भावः सम्बादिनीविषयसम्बादिनीअबाधितविषयेति यावत् एवं विसम्बादिनी बाधितविषयेत्यर्थः। तद्वतीति। सत्यरजतस्थले रजतत्ववतिरजतत्वासंसर्गाग्रहस्य विद्यमानत्वात्सम्बादि प्रवृत्तिः शुक्तिरजतस्थलेतु रजतत्वाभाववतिरजतत्वासंसर्गाग्रहस्य विद्यमानत्वाद्विसम्बा-

च्छेदकरजतत्वस्यासंसर्गाग्रहात् अथ रजतप्रकारकप्रवृत्तौ रजतत्वप्रकारकज्ञानं प्रमास्थले कारणं कृप्तम् तथाच कथं तेनविनाशुक्तौप्रवृत्तिरस्यादिति चेन्न तत्रापि रजतत्वासंसर्गाग्रहस्यहेतुत्वात् अन्यथासंसर्गाग्रहस्याविशेषात् क्वचित्संवादिनी प्रवृत्तिः क्वचिद्विसंवादिनीति कुतोनियम इति चेन्न तद्वति तत्संसर्गाग्रहस्य तत्प्रकारकतत्त्वाद्विन्यां तदभाववति तदसंसर्गाग्रहस्य तत्प्रकारक विरुद्धाद्विन्यां प्रवृत्तौ तुल्यत्वात् अत्रोच्यते लाघवाद्रजतत्व संसर्गग्रहो रजतत्वप्रकारकप्रवृत्तौ हेतुर्न तुरजतत्वासंसर्गाग्रहो गौरवात् नच शुक्तौ तदसम्भवः विशेषणज्ञानं विशेष्येन्द्रिय

दिनीप्रवृत्तिः अतएव सम्बादिप्रवृत्तौ अविद्यमानासंसर्गाग्रहः विसम्बादि प्रवृत्तौ तु विद्यमानासंसर्गाग्रहो हेतुरितिगायन्ति अविद्यमानो योऽसंसर्गस्तदग्रहः विद्यमानोयोऽसंसर्गस्तदग्रह इतिच तदर्थोऽवसेयः। लाघवादिति। इष्टतावच्छेदकासंसर्गाग्रहत्वापेक्षया कारणतावच्छेदकलाघवात् इष्टतावच्छेदकप्रकारकज्ञानमेव रजतत्वप्रकारकप्रवृत्तौ हेतुरित्यर्थः एतेन तद्वेतोरितिन्यायोऽपि परास्तः अवच्छेदकलाघवेनतन्न्यायस्यापूर्वोजकत्वात्। अनुमितौ परामर्शवदिति। तदसम्भवः रजतत्वसंसर्गाग्रहासम्भवः समाधत्ते। विशेषणेति। अत्रापि भ्रमस्थलेऽपि तयोः शुक्तिरजतत्वयोः। असंसर्गाग्रहश्चेति। सच दोषाधीनइति भावः। रजतत्वेन्द्रियेति। पुरोवर्त्तिनिरजतत्वाभावेन संयुक्त समवायरूपसन्निकर्षाभावादित्यर्थः। कथमिति। तत्प्रकारकम् रजतत्वप्रकारकन्तत्प्रकारकमितितु पूर्वतनाभिप्रायेण सन्निकर्षस्य सामान्यतः रजत्वपूर्वत्वे एव हेतुत्वादित्यवधेयम्। सन्निहितमिति। पूर्वञ्चद्विविधं लौकिकमलौकिकञ्च पूर्वतसंयुक्तसमवायरूप लौकिकसन्निकर्षाभावाल्लौकिक पूर्वज्ञानविरहेऽपि ज्ञानलक्षणारूपालौकिकसन्निकर्षसत्वादलौकिकपूर्वत्वे बाधकाभाव इति भावः। रजतत्वेति। शुक्तौ रजतत्वप्रकारकं पूर्वज्ञानमित्यर्थः नचैव शुक्तौ रजतस्य प्रकारकपूर्वज्ञ एव। तत्प्रकारिकेति। शुक्तौ रजतत्वप्रकारिकापूर्ववृत्तिरित्यर्थः पूर्ववृत्तौतु इष्टतावच्छेदकप्रकारकज्ञानत्वेन हेतुता-

सन्निकर्षस्तयोरसंसर्गाग्रह इत्येवंविधविशिष्टज्ञाने हेतुः। अस्तिचात्रापि विशेषणस्य रजतत्वस्यज्ञानं विशेष्यशुक्तीन्द्रियसन्निकर्षस्तयोरसंसर्गाग्रहश्च अथ रजतत्वेन्द्रियसन्निकर्षोविरहात्कथंतत्प्रकारकं प्रत्यक्षमितिचेत् सन्निहितं यच्च रजतं तच्च संयुक्तसमवायस्यान्यच्चज्ञानस्य सन्निकर्षस्यसत्त्वात् ज्ञानस्यसन्निकर्षत्वेकिंप्रमाणमितिचेत् रजतत्वप्रकारकप्रत्यक्षमित्यवेहि तत्रैव किंप्रमाणमितिचेत् तत्प्रकारकप्रवृत्तिरिति सङ्क्षेपः॥ इति श्रीतार्किकश्री जानकीनाथभट्टाचार्य्य विरचिता न्यायसिद्धान्तमञ्जरी समाप्ता॥

याव्यवस्थापितत्वादिति भावः इदं रजततया जानामीत्यनव्यवसायोऽपि शुक्तिगोचररजतत्वप्रकारक प्रत्यक्षमाधकोऽवसेय इति॥

अतिकर्कशतर्के यत्श्रृदग्धं स्फुरितंमम।
सिद्धान्तमञ्जरीपदद्वन्द्वं वरम्यैतद्विजृम्भणम्॥ १॥
धीमताविश्वनाथेन काश्यांसमुदपादिय:।
तस्यश्रीकण्ठकृतिन: कृतिः कलयतां मुदम्॥ २॥

विश्वनाथात्मजदीक्षित श्रीकण्ठ शर्म्म विरचिता
प्रकाशाभिधा सिद्धान्तमञ्जरी दीपिका
समाप्ता:॥

—§—

॥ श्रीः ॥

विज्ञापन ।

अमरयन्त्रालयाध्यक्षों ने वेदवेदान्तमीमांसादिशास्त्रों के प्राचीन अमुद्रितग्रन्थोंकी सुप्रसिद्धिकरनेकी इच्छा किया है इस कारण प्रथम न्यायशास्त्र का एक प्राचीन उत्कृष्ट ग्रन्थ का छापना आरम्भ किया है सम्प्रति उस का एक खण्ड प्रस्तुतकरके प्रकाश किया है अब इस स्थान पर परमप्रसिद्ध ब्रह्मामृतवर्षिणीसभासम्पादक मान्यवर श्रीयुतपण्डित राममिश्रशास्त्री जीका उल्लेखविशेष आवश्यक है शास्त्रीजी की प्रशंसा माद्दशव्यक्ति से यथोचित नही होसकती पण्डितजीने इसपुस्तकको बहुत अन्वेषण करके दिया और उन्हीके प्रधान शिष्य गौरीनाथशास्त्रीजी महाशय ने कृपापूर्वक शोधनकार्य सम्पादन किया है यदि प्रागुक्तमहोदय सहायता प्रदानन करते तो हम लोक कदापि इस महदनुष्ठान मे हाथ न लगा सकते ॥

मिति आश्विन कृष्ण २ भानुवासरे संवत् १९४१ — श्रीअम्बिकाचरण चट्टोपाध्याय